
Almira 1
Shelf 2
5



पा १६८६८

ग्र.सं. १६८५८

मूल्य रु ६०/-

श्रीदानदिनकरोद्योतानुक्रमणिका

धान्य

इतिदानदिनकरोद्योतानुक्रमणिकासमाप्ताः शुभम्

५

१-१८६

२

२-१८५+३-१९४

४-२२८

३

इति दानदिनकरोद्योतानुक्रमणिका समाप्ता ॥ ॥

४

जनकराज १९६६

॥ वि॰भ॰ ॥
॥ १ ॥

श्रीगणेशाय नमः ॥ ॥ नारायणश्च पौत्रः केसरिदेवस्य दौहित्रः ॥ श्रीरामकृष्णपौत्रो दिनकरस्तु तस्य नो नि·दा
नातिनं त्वा दिनकरं तानं सौगम्यान्त्रुपेक्षितं ॥ दाने दिनकरो येन तं संपूरयति — नः ॥ १ ॥ नत्वदानमतिः ॥ नैव
शीयश्रुतौ दानं यज्ञानां वरूथ्यं दक्षिणालोके दातारं सर्वे भूतान्युपजीवंति दानेनारातीनपानुदंत दानेन द्विषं
तो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंति ॥ मनुः तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥ द्वा
परे यज्ञमेवाहुर्दानमेकं कलौ युग इति ॥ ज्ञानपथे सैषा देवी वाग्दद्द इति दमं दानं दयामिति ॥ नंदिपुराणे
पि व्याधिर्दानेन नश्यतीति ॥ तथा हिरण्यदा ऽमृतत्वं भजंते ॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति·
यज्ञेन दानेन तपसा नाशकेनेत्यादिश्रुते मोक्षार्थत्वं ज्ञानार्थत्वं वस्य ष्टमेव ॥ दानत्वं तु स्वत्वध्वंसपरस्वत्वो
त्पत्त्यनुकूलव्यापारत्वं ॥ स च व्यापार इदं तुभ्यं संप्रददे न मम इति शब्दाभिव्यंग्यो ज्ञानविशेषः शब्दविशेषो वा
स्वत्व पत्नीस्वत्वोत्पत्त्यनुकूले यन्मदीयं स्वं तत्त्वदीयमित्यर्थकतानि च रामीति शब्दाभिव्यंग्य शब्दविशेषे

॥ राम ॥
॥ १ ॥

निषसंगवारणाय स्वत्वनिवृत्तीति॥ यागश्राद्धादिवारणाय परस्वत्वेति॥ नच देवतायाः पितृणां चनिग्र
हावाभावेन न परस्वत्वोत्पत्त्यभावात्॥ मासि मासि पितृभ्यो दद्यादिंडायददतीत्यादिप्रयोगस्त्वलाक्षणिकः
अनुकूलत्वं जनकत्वं न त्वौभयत्र फलोपहितं बोध्यं॥ नेन देशान्तरस्थपात्रोद्देशेन संकल्पे व्यापारस्य स्वत्वं
निवृत्तौ फलोपहितजनकत्वेपि परस्वत्वोत्पत्तौ फलोपहितजनकत्वाभावान्नातिव्याप्तिः॥ नेननननत्रमुख्यं
दानत्वं॥ अन्तरवरमनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत्॥ नदानत्फलमाप्नोति निषनिचाहीन दोषभा
क् इति स्मृतौ न तत्फलमाप्नोतीत्युक्तं॥ दानफलसमानजातीयं फलं न रमाप्नोतीत्यर्थः॥ एतेनाश्वमेधफलं
लभे गंगास्नानफलं लभे वाजपेयसमं स्मृतमित्यादिवाक्यानि व्याख्यातप्रायाणि॥ नचनत्रसमेत्वं र्द्धफ
कलयदित्यादिवाक्यपर्यालोचनया र्द्धफलकत्वमितिवाच्यं॥ तस्य पापश्चित्तपकरणाधीनत्वेन तन्मा
त्रविषयत्वात्॥ अन्यथा प्रयोजके त्वर्द्धकल्पनापत्त्या गंगास्नानं कुर्विति प्रयोजकस्यापर्द्धकलापत्तिः॥ अ

तस्त्वसंधाशेषोदकंपीत्वासुरापानसमंभवेदित्यादौनपायश्चित्तार्थकत्वंनमस्याकरणिकंरिम्यस्त्कपसक्ता
नुपसक्तं॥सर्वथानाद्यासंकल्पेनसुरवंप्रदानत्वं॥केचित्त्वाहुः॥तस्यसंकल्पस्यत्वनिहत्त्वावपिनफलोपहि
तंजनकत्वं॥अन्यथास्वत्वनाशेउद्दिष्टविशेषाणामंगीकरणेपात्रांतरायप्रदानजलक्षेपोवानस्यात्॥परस्वा
पहारस्यवीर्यत्वयानदपहारेवीर्यंनस्यात्॥नचास्वापहारस्थौर्यमितिवाच्यं॥अविभक्तधनापहारेचौर्याना
पत्त्यापत्तेर्भागात्प्रदत्तइत्यादिश्रुतिविरोधापत्तेरिति॥नच॥नचस्वत्वानुहत्तौतस्ययथेष्टविनियोगाप
त्तेः॥नचसिद्धावारविरोधादविनियोगइतिवाच्यं॥तन्मूलभूतप्रमाणास्यातैवविचार्यत्वात्तस्यतत्क्रमेण
त्वंगीकारपात्रांतरायजलक्षेपोवानस्यादिति॥तन्नः॥स्वित्वकल्पितदावकाशावनिकप्रतिपत्तौवाधकाभावात्
विनियुक्तविनियोगासंभवेननिरिष्टिकत्वयादत्तस्यदानांतरासंभवेनप्रतिपत्तेस्त्वयाप्यंगीकारात्॥य
त्तुतत्तदात्तुःस्वत्वपुनरुत्थापनद्यतिस्मात्तर्भयदावार्याः॥तन्न॥स्वत्वोत्पादकप्रतिग्रहाद्यभावेनस्वत्वोत्पत्ते

रसंभवात्न च परिग्रहस्वत्वोत्पादकः ॥ स्वत्वाभावविशिष्टद्रव्यपरिग्रहस्यैव स्वत्वोत्पादकत्वात् ॥ यदप्युक्तं तदप
हारे चौर्यं न स्यादिति ॥ तदपि न लाघवेनास्वापहारस्य चौर्यत्वात् ॥ यथेष्टविनियोगायोग्यापहारश्चौर्यमिति
यावत् ॥ तेनारण्यस्थतृणकाष्ठाद्यपहारेण चौर्यानिंध्यांग्रयपहारेतु चौर्यमिति ॥ अविभक्तधनेपितादृशाप
हारस्वत्वास्तित्वं चौर्यमितिदिक् ॥ ननु क्रमस्य लक्षणास्य क्रयविक्रयोरतिव्याप्तिः ॥ तत्रापि उक्तव्यापारं स्वत्वा
त् ॥ न वा दृष्टोद्देश्यकत्वविशेषणेन तत्परिहारः ॥ यागांगमन्त्ररभिहितेनिचिदिता ॥ अन्यथा अनियहस
मर्थोपि प्रसंगं न त्र वर्जयेदिति स्मृत्या प्रतिग्रहस्यापि निषिद्धत्तपा स्वत्वोत्पादता न स्यात् ॥ अत एवोनेषा
पुरुषार्थत्वाज्जैमिनिनोक्ता ॥ तेन निषिद्धोपायार्जितेन न दानयागाद्यनुष्ठाने उरुषस्य प्रत्यवायो न दानादि
वैगुण्यमितिदिक् देवलः ॥ द्विहेतु षड्धिष्ठानं षडंगं षड्विपाकयुक् ॥ चतुःप्रकारं त्रिविधं ॥ त्रिनाशं दा
नमुच्यते ॥ द्विहेतू भक्तिश्रद्धे ॥ आराध्यत्वेनज्ञानं भक्तिः ॥ वेदार्थनिश्चयः श्रद्धा ॥ स्कांदे· दानं देशान्नयत्नेन श्रद्धा

॥ विभ ॥
॥ २ ॥

पूनमनंडितः॥ श्रद्धाकृतं स्वल्पमपि दानमानंत्यमश्नुते॥ अश्रद्धयान्तु यद्दत्तं सर्वस्वमपि सनम॥ ननस्फल
मवाप्नोति तस्माछ्रद्धां समाश्रयेत॥ मनुः॥ श्रद्धयेष्टं च पूर्त्तं च श्रद्धां कुर्यात्प्रयत्नतः॥ श्रद्धाकृते ह्यक्षये ते भव
तः स्वागतैर्धनैः॥ व्यासे देववत्ते॥ फलतनाभारणां पाहुः श्रद्धां सर्वस्य भार्गव॥ तीर्थे वेदे गुरौ वापि भेषजे धर्मसा
धने॥ श्रद्धा धर्मसुता देवी सा धनं भृगुनंदन॥ देवलः॥ पदायशाकमुष्टिं च यः कश्श्रद्धासमन्वितः॥ महते
पात्रभूताय सर्वाभ्युदयमाप्नुयात्॥ भारते॥ श्रद्धया साध्यते धर्मो महद्भिर्नार्थराशिभिः॥ निःकिंचनापि
मुनयः॥ श्रद्धावंतो दिवंगताः॥ धर्मार्थकाममोक्षाणां श्रद्धा परमकारणं॥ पूंसामश्रद्धधानानां न धर्मो
नापि तत्फलं॥ बृहस्पतिः॥ मंत्राज्यदेषाक्रोमे तु न यसीं ड्रिपदेष नः॥ न्यूनतास्मात्प्रदाने तु श्रद्धायुक्तेभ
वत्किचित्॥ षडधिष्ठानानाह॥ देवलः॥ पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनं॥ केवलं धर्मबुध्याय
द्धर्मदानं तदुच्यते॥ केवलं धर्मबुध्यैत्यनेनानिःकाममेव दानमुक्तं न त्वनिके चिन्नन्नस्वर्गाद्यर्थदानस्या

॥ राम ॥
॥ २ ॥

संग्रहयन्तेः अन्नो यस्मात्तु धर्मोदयस्तद्धर्मदानं अध्वनादिषु जनन तथा धर्मोद्दयः ॥ प्रयोजनमपेक्ष्यैवय
त्प्रसंगात्प्रदीयते ॥ तदर्थदानमित्याहुरैहिकं फलहेतुकं ॥ ऐहिकं प्रयोजनमित्यन्वयः ॥ स्त्रीयानमृग
याक्षाराणां प्रसंगाद्यत्प्रदीयते ॥ अनर्हेषु च रागेण कामदानं तदुच्यते ॥ संसदि व्रीडया श्रुत्वा वार्थिभ्यः
प्रयाचितः ॥ प्रदीयते च यद्दानं व्रीडादानं तदुच्यते ॥ दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षाद्यत्तु प्रदीयते ॥ हर्षदान
मिति प्राहुर्दानं तद्धर्मचिन्तकाः ॥ आक्रोशनार्थहिंसानां प्रतीकाराय यद्भवेत् ॥ दीयते तापकर्तृभ्यो भय
दानं तदुच्यते ॥ तथा च धर्ममर्थं च कामं व्रीडा हर्षभयानि चेति षडधिष्ठानानि प्रयोजकानीत्यर्थः ॥
अंगानि च ॥ दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक् ॥ देशकालौ च दानानामंगान्येतानि षड्विदुः ॥ स
एव ॥ पञ्चयडुलंभद्रवं यस्मिन्काले पि वा पुनः ॥ दानार्हौ तौ देशकालौ स्यातौ श्रेष्ठौ न चान्यथा ॥ अन्यथा
तुलभत्वे विपाकाश्चतुःफलनिःफलं हीनं तुल्यं विपुलमक्षयं ॥ षड्विपाकयुग्दिष्टमिति ॥ पतितादिसंप

॥ वि॰भ ॥
॥ ४ ॥

दानकंडुःफलं ॥ अन्यादृशीनं निःफलं ॥ इत्यस्फलकमित्यर्थः ॥ योष्यजनपीडाकरः हीन ॥ योप्यवाधाकरं द्रव्यंपर
मप्यूनं नांडुजेदित्युक्तेः ॥ पथे ॥ क्रमपियद्रव्यं वित्तेन कलुषेणान्तु ॥ नन्नस्मं कल्पदोषेणादानं तुल्य फलं भवे
त् ॥ संकल्पोदेयद्रव्यलोभादिः ॥ सूक्तांगेः सकलैः षड्भिर्दानं स्याद्विपुलोदयं ॥ अनुक्रोशवशाद्दत्तं दानमक्ष
यतां व्रजेत् ॥ अनुक्रोशोदया ॥ चत्वारः प्रकाराश्च ध्रुवनित्यंकाम्यं नैमित्तिकमिति प्रपादानतडागादिसर्व
कालफलं ध्रुवं ॥ नदास्निकमित्याहुर्दीयते यद्दिनेदिने ॥ अपत्यविजयैश्वर्यस्त्रीवालार्थं यदिष्यते ॥ इच्छा
संस्थं तु यद्दानं काम्यमित्यभिधीयते ॥ कालापेक्षं क्रियापेक्षमर्थापेक्षं तथैव च ॥ त्रिधानैमित्तिकं प्रोक्तं स
होमं होमवर्जितमिति देवलोक्तेः ——— मानिवत्वादिमध्यमानि विधानतः ॥ अधमानि तु शेषाणि
त्रैविध्यं ॥ इष्टं दत्तमधीतं च विनश्यत्यनुकीर्तनात ——— घानुशोचनाभ्यां च भग्नतेजो विपद्यते ॥ अ
नुशोचनपश्चात्तापः ॥ गारुडे ॥ कायिकवाचिकदानमानसं च त्रिधामतं ॥ अर्जितेयत्स्वर्णादिदानं तत्का(

॥ राम ॥
॥ ४ ॥

पिकंमतं ॥ अन्नंनामभयंदद्यात्येनदैवाविकंस्मृतं ॥ विद्यायास्तथायोगीनदानंमानंसमद्विजाः ॥ भगवद्गी
तास्तुत्रैविध्यमन्यथोक्तं ॥ दातव्यमितियद्दानंदीयतेनुपकारिणे ॥ देशेकालेचपात्रेचतद्दानंसात्विकंस्मृ
तं ॥ यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः ॥ दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं ॥ अदेशकालेयद्दानमपा
त्रेभ्यश्चदीयते ॥ असत्कृतमविज्ञातंतद्दानंतामसंस्मृतं ॥ विष्णुधर्मे ॥ तामसानांफलंभुंक्तेतिर्यक्त्वेमानवः
सदा ॥ अन्तोन्यथानुमानुष्येराजसानांफलंभवेत् ॥ सात्विकानांफलंभुंक्तेदेवत्वेनात्रसंशयः ॥ फलभोक्तार
श्चयद्यपिनह्यविविहितोस्तीतिन्यायेनत्रैवर्णिकाएवतथापिवर्णानामाश्रमाणांचचातुर्वर्ण्येयुधिष्ठि
र ॥ दानधर्मेप्रवक्ष्यामिपञ्चव्यासेनभाषितं ॥ अधिकारीभवेच्छूद्रःपूर्त्तंधर्मेनवैदिकेइतिव्यासवचनात्
शूद्रस्यापिफलंभोक्तृत्वं ॥ पूर्त्तमाहनारदः ॥ ग्रहोपरागेयद्दानंसूर्यसंक्रमणेतथा ॥ द्वादश्यादौचयद्दानं
तदेतत्पूर्त्तमुच्यते ॥ हेमाद्रौजातूकर्ण्यः ॥ वापीकूपतडागादिदेवतायतनानिच ॥ अन्नप्रदानमारामःपू

॥ विभ ॥
॥ ५ ॥

र्न्नमित्यभिधीयते॥ स्मृत्यंतरे॥ वृहिर्वेदिचयद्दानंतयोर्न्निकमुदाहृतमिति॥ अत्रस्त्रीणामथधिकारः॥ अ
मंत्रकवस्त्रहिरण्यादिदानेचचांडालादीनामपि॥ अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः॥ दानंदमोदया
क्षांतिःसर्वेषांधर्मसाधनमितियाज्ञवल्क्यस्याचांडालसाधारणत्वेनविज्ञानेश्वरेणाव्याख्यानादिति॥ अ
थदानांगानि॥ नवधानकालाः॥ शानानप॥ संक्रांतौयानिदत्तानिहव्यकव्यानिदातृभिः॥ तानिनित्यंददा
त्यर्कःपुनर्जन्मनिजन्मनि॥ शतमिंदुक्षयेदत्तंसहस्रंतुदिनक्षये॥ विषुवेशतसाहस्रंव्यतीपातेत्वनंतकं
दिनक्षयलक्षणंएकस्मिन्सावनेत्वस्रीनांचितपंयदा॥ तदादिनक्षयःप्रोक्तःशतंसाहस्रिकंफलमिति
वसिष्ठेनोक्तंव्यतीपातश्चतुर्धा॥ आद्यमाहस्तुमनुः॥ श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके॥ यद्य
मारविवारेणव्यतीपातःसउच्यते॥ मस्तकःप्रथमःपादः॥ सचसर्वेषां॥ अन्येस्त्वन्यथोक्तःपंचाननस्थेगु
रुभूमिपुत्रौमेषेरविःस्याद्यदिमुक्तयक्षे॥ याशाभिधानाकरभेणयुक्तानितिथिर्व्यतीपातइतीहयोगः॥

॥ राम ॥
॥ ५ ॥

पंचाननः सिंहः ॥ पाशो द्वादशी ॥ करभो हस्तः ॥ भृगुस्तु नमाह ॥ क्रांतिसाम्यसमयः समीरितः सूर्यपर्वसह
स्रांशुनीश्वरैः ॥ तत्र जसत्तु नदत्तं पूजनकोटिकोटिगुणामाह भार्गवः ॥ चतुर्थस्तस्य सन्नदशोयोगः ॥ अयनेषु
चयदत्तं पडशीतिमुखेषु च चंद्रसूर्योपरागे च दत्तं भवति चाक्षयं ॥ ब्रह्मवैवर्त्ते ॥ अस्ताद्वयविशान्नावमा
वास्यादिने तथा ॥ पितृमातृक्षयाहे --- कल्पयुगादिषु ॥ एकादशीषु सर्वासु विशेषाद्वादशीदिने ॥ प्र
दत्तमक्षयदानं याति श्रद्धया पुनः सरं ॥ विष्णुधर्मे ॥ द्वादशीषु च यद्दत्तं शुक्लासु च विशेषतः ॥ श्रवणेन च यु
क्तासु न चापि द्विजसत्तमाः ॥ विशेषाद्बुधयुक्तासु पक्षान्तेषु च यत्तथा ॥ तृतीयासु च सर्वासु शुक्लासु च विशे
षतः ॥ आषाढे कार्त्तिके चैव फाल्गुने च विशेषतः ॥ तिस्रस्वेताः पौर्णमास्यो दाने विषमहाफलाः ॥ तृतीया
नेषु यद्दत्तं जन्मर्क्षे च द्विजोत्तमाः ॥ ग्रहसंक्रमकाले च नीक्षार रक्षे विशेषतः ॥ तुलामेषप्रवेशे च त्यागे च मि
थुनस्य च ॥ रवेर्महाफलं दत्तं नेष्याति सान्महाफलं ॥ पदाप्रविशतेभानुर्मकरं द्विजसत्तमाः ॥ आषाढे

॥ विभ ॥
॥ ६ ॥

श्वयुगेपौषेचैत्रेभुक्तेनथैवचमाघदशीशुभ्रनिर्णोक्तंपुराणंदिनचतुष्टयं॥ श्राद्धिन्ननाश्यांयदन्नंपुत्रेजानेपि
जोन्नमाः॥ संस्कारेपुचवर्णंचस्पनदक्षयंप्रकीर्त्तितं॥ मत्स्यपुराणे॥ युगादिषूपरागेषुतथामन्वन्तरादिषु·
संक्रान्तौवैधृतिदिनेचतुर्दश्यष्टमीषुच॥ यज्ञोत्सवविवाहेषुदुःस्वप्नाद्भुतदर्शने॥ द्रव्यब्राह्मणलाभेचश्र
द्धावायच्चजायते॥ पद्मपुराणे॥ युगादिषुयुगान्तेषुस्नानदानजपादिकं॥ यत्किंचिक्रियतेतस्ययुगानां·
कर्मसाक्षिणः॥ युगानांचाद्यिपुराणे॥ सूर्यस्यसिंहसंक्रान्त्यामंतःकृतयुगस्यच॥ वृश्चिकस्यतुसंक्रान्त्याम
न्त्रेतायुगस्यच॥ ज्ञेयस्तूवृषसंक्रान्त्याद्वापरान्तस्तुसंख्यया॥ तथाचकुंभसंक्रान्त्यामंतःकलियुगस्यच।
वाराहे॥ दर्शेशतगुणंदानंतच्छतघ्नंदिनक्षये॥ तच्छतघ्नंचसंक्रान्तौशतघ्नंविषुवेततः॥ युगादौतच्छत
गुणमयनेतच्छताहतं॥ सोमग्रहेतच्छतघ्नंतच्छतघ्नंरवेर्ग्रहे॥ तच्छतघ्नंव्यतीपातेदानंवेदविदोविदुः॥
स्कान्दे॥ अर्धप्रसूतांगांदद्यात्कालादिनविचारयेत्॥ कालःसएवयत्रहिर्णायदास्याद्विमुखीतुगौः॥ वास

॥ राम ॥
॥ ६ ॥

आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् ॥ तदभावे तु गौरेव नरकोद्धरणाय वै ॥ तदा यदि न शक्नोति दातुं वै
नरा गौ तु गां ॥ अशक्तोन्योरुत्तराद्वादद्याद्धेनुं यो मृतस्य तु ॥ वाराहे ॥ पुराणकालात्सदा सर्वैर्यदा मृत्युरुपस्थितः
विसृज्य धर्मे ॥ नहि कालं प्रतीक्षेत न जलं दातुं तृषादिने ॥ अन्नोदकं सदा देयमित्याह भगवान्मुनिः ॥ आह्नि
त्तना — पदत्तं पुत्रेजाते द्विजोत्तम ॥ संस्कारेषु च यद्दत्तं न दक्षयमुदाहृतं ॥ कालः सर्वोपि निर्दिष्टः
पात्रे सर्वमुदाहृतं ॥ अन्नस्य संप्रदाने तु नात्र कार्या विचारणा ॥ पूजनं त्वतिथीनां च यात्थानामपि पूज
नं ॥ नत्वरात्रौ न थाज्ञेयं गवाम्भक्तं च पूजनमिति ॥ अर्धरात्रादिकालनिषेधः सर्वदाने प्रज्ञेयः ॥ सर्वक
र्मसाधारणान् ॥ अपवादाः ॥ व्यासः ॥ गंगाद्वारे प्रयागे च ह्यविमुक्ते च पुष्करे ॥ नगरे चाट्टहासे च गंगासा
गरसंगमे ॥ कुरुक्षेत्रे गयायां च तीर्थे चामरकंटके ॥ एवमादिषु तीर्थेषु दत्तमक्षयतामियात् ॥ सर्वती
र्थमयी गंगा तत्र दत्तं महाफलं ॥ स्कांदे ॥ वाराणसी कुरुक्षेत्रं प्रयागं पुष्कराणि च ॥ गंगासमुद्रतीरं च

नैमिषामरकंटके॥श्रीपर्वतंमहाकालंगो---दपर्वतं इत्याद्याः कीर्त्तिता देशाः सुरसिद्धनिषेविताः॥स
र्वेशिलोच्चयाः पुण्याः सर्वा नद्यः ससागराः॥स्पृष्ट्वार्थि----फलस्थानंन्यकृत्तवेत॥मार्कंडेयः॥सह्यस्य
चोत्तरेपार्श्वे यत्र गोदावरी नदी॥पृथिव्यामपिकृत्स्नायांसप्रदेशोतिपावनः॥विष्णुधर्मे॥गंगाद्वारेकुशा
वर्त्तेबिल्वकेनीलपर्वते॥तथाकनखलेतीर्थेशालग्रामेतथैवच॥त्रिस्रगानांचतीरेषुदत्तंबहुफलंभवे
त्॥भविष्ये॥क्रोशमात्रंभवेत्क्षेत्रंशिवस्यपरमात्मनः॥प्राणिनांतत्रयंचत्वंशिवसायुज्यकारकं॥
फलंदत्तहुतानांचश्रुतंतत्परिकीर्त्तितं॥मनुजैःस्थापितेलिंगेक्षेत्रमानमिदंस्मृतं॥स्वयंभुविसहस्रं
स्यादार्षेयेचतदर्धकं॥पाद्मे॥गंगाचोदग्गुरवीयत्रयत्रप्राचीसरस्वती॥तत्रक्रतुशतंपुण्यंस्नानदान
व्रतादिषु॥लिंगंवाप्रतिमाचापिदृश्यतेयत्रकुत्रचित्॥तत्सर्वंपुण्यतायानिर्दानेष्वत्रमहाफलं॥प्र
तिमालिंगस्थावरेच॥ब्रह्मप्रोक्ते॥अग्निहोत्रेगवांगोष्ठेवेदघोषपवित्रिते॥शिवायतननसंस्थानेय

त्स्यमपिरीयते ॥ नदनंनफलंज्ञेयंशिवक्षेत्रानुभावनः ॥ तथा ॥ नदीतीरंगवांगोष्ठेब्राह्मणानांचवेश्मनि
दत्तंशतगुणंप्राहुर्लक्षमादित्यसन्निधौ ॥ शिवस्यविष्णोर्वक्रेश्चसन्निधौदत्तमक्षयं ॥ मात्स्ये ॥ ज्ञातयाम
सगुन्नूनःशैलश्चक्रांकमंडितः ॥ निष्ठतेयत्रवसुधेतत्क्षेत्रंयोजनत्रयं ॥ धारवत्याःशिलादेवीमुद्रिता
ममसुद्रया ॥ यत्रापितीयतेतस्मात्क्षेत्रंद्वादशयोजनं ॥ देवीपुराणे ॥ सर्वेशिवाश्रमाःपुण्याःसर्वानघः
शुभप्रदाः ॥ दानस्नानोपवासादिफलदाःसततंनृणां ॥ ब्रह्मवैवर्त्ते ॥ अनंतफलदंनृणांदानंचशिवसन्नि
धौ ॥ सर्वतीर्थमयीगंगासर्वदेवमयोहरिः ॥ सर्वधर्ममयोविप्रस्तत्संयोगोविमुक्तये ॥ अथपात्रता ॥ दे
वलः ॥ अपापरोगीधर्मात्मादित्सुरव्यसनःशुचिः ॥ अनिंद्याजीवकर्माचषड्भिःपात्रंप्रशस्यते ॥ अनिंद्यः
मनिषिद्धंआजीवकर्मजीवनहेतुर्यस्येत्यर्थः ॥ वाराहे ॥ कामक्रोधविहीनश्चपाखंडस्पर्शवर्जितः ॥
जितेंद्रियःसत्यवादीदानेपात्रंप्रशस्यते ॥ दम्भःप्रतिग्रहेयश्चित्तमाहुसुमनुः ॥ एतेषांब्राह्मणोत्तमा

दत्वा कृत्वा प्रतिग्रहं ॥ प्राजापत्येन वन्नेनेतेन स्मात्स्त्रापात्स्त्रमुच्यते ॥ एतदपवादः स्कंदपुराणे ॥ दुर्भिक्षे दारुणे
प्राप्ते कुटुंबे सीदति क्षुधा ॥ असाधोरपि गृह्णीयान्न प्रतिग्रहमनंदितः ॥ अरणायकरणार्थे च प्रतिग्राह्यं द्वि
जोत्तमैः ॥ चिकीर्षया च यज्ञस्य मातृपित्रर्थमेव च ॥ गृह्णीयान्नब्राह्मणादेव नित्यमाचारवर्ज्जितः ॥ श्रु
यापिज्ञतं दत्तं नथा धर्मान्न हीयते ॥ अब्राह्मणात्कृतात्तानादिभ्यो दारपि सर्वतः ॥ ब्राह्मणो न कृतं याद्यवि
षिद्धमपि जानता ॥ निषिद्धं कृत्याजिनदानादि ॥ अथ देयं ॥ यत्रादिष्टं विशिष्टं च न्यायप्राप्तं च यत्नवेतः ॥
तत्तत्तुराणवते देयं न देवाक्षयमिच्छता ॥ कात्यायनः ॥ सर्वसंगृहवर्जं तु कुटुंबभरणाधिकं ॥ यत्तद्द्रव्यं स्वकं
देयमदेयं स्यादतोन्यथा ॥ समाराम गृहक्षेत्राद्य घनक्षेत्रं दीयते ॥ पित्रा यथवा स्वयं प्राप्तं तत्तु द्रव्यं विव
क्षितं ॥ क्रमागतं प्रीतिदानं प्राप्तं च सहभार्यया ॥ अविशेषेण वर्णानां सर्वेषां त्रिविधं धनं ॥ वैशेषिके
धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणं प्रतिग्रहेणायज्ञव्याजनः शिष्यतस्तथा त्रिविधं क्षत्रियस्यापि प्राहुर्वै

शेषिकंधनं ॥ पुत्रोपलब्धं कारात्त्वं दंअन्त्व व्यवहारतः ॥ वैशे — — — नं ज्ञेयं वैश्यस्यापि त्रिलक्षणं ॥ कृषिगोर
क्षवाणिज्यैः शूद्रस्यैतस्त्वनुग्रहात् ॥ सर्वेषामेव वर्णानामेवं धर्म्यो धन — — — ॥ विपर्ययादधर्मस्यान्न
वेदापत्रीयसी ॥ शिवधर्मे ॥ नस्यात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ॥ भागद्वयं तु धर्मार्थं मनित्यं जी
वनं यतः विशेषाभविष्यन्तु राशौ ॥ गोभूतिलहिरण्यादि दद्यान्नित्यममनं द्विजः ॥ तथा द्रव्यविशेषाश्च दद्या
त्पात्रविशेषतः ॥ आर्त्तानामन्नदानं च कुटुम्बिनां ॥ आर्त्तानां क्षुधार्त्तानां तथा च निष्ठाहीनानां क्षेत्रदानं प्रश
स्यते ॥ सुवर्णं परमं याज्ञिकानां चैवोद्धरेनसां ॥ कन्या चैवानपत्यानां दद्यात् गति रुत्तमां ॥ कालिकापुरा
णे ॥ ग्राहयेदग्निहोत्राणि द्विजैर्धर्मविचिन्तकः ॥ विधिपूर्वं यथान्यायमात्मनः श्रेयसे नरः ॥ यज्ञदानं व्र
तार्थं च तीर्थयात्रादिकं च यत् ॥ यस्त्वन्यैः कारयेज्जन्तुः तेन सर्वमनुष्ठितं ॥ सयात्यर्कविमानाभं विमानं रत्न
मालिनं आरुह्य नमदंपुण्यं सुरस्त्रीभिरलंकृतं ॥ विमानं च परैर्दिव्यैः सहस्रैः परिवारितः ॥ सर्वलोकगना

॥ वि·भ ॥
॥ ९ ॥

भोगान्भुक्त्वा तस्मिन्न पद्यते ॥ विष्णुपुराणे ॥ यज्ञोपकरणां सर्वं ब्राह्मणेभ्यो महाफलं ॥ गृहोपकरणां सर्वं क्ष
त्रिये द्विजपुंगवाः ॥ परायोपयोगिन दैवे श्रूद्रे शिलोपयोगि च ॥ परस्योपयोगि यद्द्रव्यं देयं तस्यैव तज्ज्ञवे
त् ॥ येन येन च भाण्डेन यस्य हृष्टि रूपाहृता ॥ तत्तस्यैव प्रदातव्यं पुण्यकामेन धीमता ॥ दंडं कृष्णाजीनं चैव
तथा विप्राः कमंडलुं ॥ वीरणं वापि वा प्रोक्ति दत्वेना ब्रह्मचारिणे ॥ वस्त्रं शय्यासनं धान्यं वेश्म वेश्मपरिछ
दं ॥ गृहस्थायानुन हृत्तं ज्ञेयं बहुफलं सदा ॥ नावारवल्कलं शाकं फलं मूलं च गोरसं ॥ वानप्रस्थाय यद्दत्तं
मननं परिकीर्त्तितं ॥ भिक्षाप्रदानं पनयेयान्नदानं तथाहितं ॥ गंधं मांगल्यनांबूल रक्तवस्त्रादिकं स्त्रि
याः ॥ स्त्रीणां दानं प्रदातव्यं भर्तृहस्ते गुनान्यथा ॥ प्रोक्तं संग्रहणां येन कुर्वं भर्त्तुः प्रपद्यतः ॥ अन्नं प्रतिश्र
यं चैव पांथे दत्तं महाफलं ॥ विवाहादि क्रियाकाले तत्क्रियासिद्धिकारणां ॥ यः प्रपद्यति धर्मज्ञः सोश्वमेध
मवाप्नुयात् ॥ आतुरेभ्यो धनं दत्वा दानं बहुफलं लभेत् ॥ बाले क्रीडनकं दत्वा मृष्टमन्नं तथैव च ॥ फलमनो

॥ राम ॥
॥ ९ ॥

हृत्वापिअग्निष्टोमफलंलभेत् ॥ मृष्टान्नंमानवोदत्वामृष्टान्नंयेनकांक्षितं ॥ अक्षयंफलमाप्नोतिस्वर्गलो
कंचगच्छति ॥ श्रीविहीनेनतथादत्वाभोजनंद्विजसत्तमाः ॥ वस्त्रंशुभंवाधर्मज्ञाःपुराणंमहदुपाश्नते ॥ यव
सानांप्रदानेनधेनुमन्तुद्विजानिपु ॥ लवणानांचधर्मज्ञाःफलमक्षयमश्नुते ॥ प्रसवेषुउपद्भन्नंवाभना
र्थिभयेषुच ॥ नदानमक्षयंप्रोक्तंपुरुषस्यविपश्चितः ॥ दत्वाव्रासणाश्वाईलाजलपात्रमथार्थिने ॥ फल
मक्षयमाप्नोतिनात्रकार्याविचारणा ॥ अंगिराः ॥ देवनानांगुरूणांचमातापित्रोस्तथैवच ॥ पुराणंदेयंप्र
यत्नेननापुराणंचोदितंक्वचित् ॥ ॥ नंदिपुराणे ॥ ॥ तथायात्रविशेषेणदानंस्यादुत्तरोत्तरं ॥ पितृमातृ
गुरुब्रह्मवादिनांदीयतेचयत् ॥ नक्ष्मक्षगुणितंविद्यात्पुराणंवायापमेवच ॥ ॥ व्यासः ॥ ॥ कुटुंववीड
यित्वापिब्राह्मणायमहात्मने ॥ दानंवाभिक्षवेचात्रमात्मनोभूतिमिच्छता ॥ भिक्षुर्यस्मातिथ्यादिः ॥ ॥
याज्ञवल्क्यः ॥ देयंप्र------वदत्वानापहरेत्पुनः ॥ पत्रवाचाप्रतिज्ञातंकर्मणानोपपादितं ॥ नद्धनं(

॥ वि॰भ॥
॥ १०॥

अगासंयुक्तमिहलोकेपरत्र ॥ आग ----मित्यर्थः॥ महाभारते॥ संभ्रमयोनदिन्नेनयाचितायश्चनेष्य
ति॥ उभावनृतिकावेतौ तथा पापमवाप्नुत॥ शुश्रिनत्वे - मायन॥ सुस्क्केनान्नेनवादत्तंश्चावितंधर्मकारणा
त्॥ स्वदत्वानुमृतेयथस्तत्तुनोनात्रसंशयः॥ इदंधर्मार्थेनरदानपरं॥ गौतमः॥ प्रतिश्रुत्यायधर्मसंयुक्तं
यनदद्यात्॥ कात्यायनः॥ प्राणसंशयमापन्नंयोमायुन्नारयेदितः॥ सर्वस्वंतेप्रदास्यामीत्युक्तेपिनतथाभ
वेत्॥ कात्यायनः॥ कन्याशय्यागृहंचैवदेवंयत्रोस्त्रियादिकं॥ नदेकस्मैप्रदातव्यंनबहुभ्यःकथंचन॥ स्कांदे
श्रध्वयाधारायुक्तावनसंदिग्धानचोरवरा॥ ननदीकूलनिकटभूमिर्देयाकदाचन॥ स्कांदे॥ पापदःपा
पमाप्नोतिनरेलक्षगुणांसदा॥ तस्मान्नदद्यान्मेधावीयानकंज्ञानुकस्यचित्॥ विष्णुधर्मोत्तरे॥ भुवंधेनुंत
थाश्वंचरत्नानिकनकंतथा॥ तिलांश्चकुंडलंदद्यात्वाविज्ञापयगुणांगुणात्॥ यमः॥ सुवर्णरजतेनाश्रंयति
मोयःप्रपद्यति॥ ननश्फलमवाप्नोतिनचैवयविवर्जते॥ अथदेयमानानि॥ नचापोहेग्रः याज्ञवल्क्यः

॥ राम ॥
॥ १०॥

जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं ॥ तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ॥ गौरस्तु ते त्रयः षट् ते य
वो मध्यस्तु ते त्रयः ॥ कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश ॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्त्तितं ॥ ते म
ध्ययवास्त्रयः कृष्णलः ॥ गुंजा रक्तिके ति पर्यायाः ॥ कर्षसुवर्णशब्दाः पर्यायाः ते षोडश माषः कर्षो स्त्री पलं कर्षच
तुष्टयमिति निघंटुः ॥ तथा च षोडशभिर्माषैः कर्षः ॥ बृहत्पराशरस्तु कर्षमन्यथाह ॥ पंचगुंजो भवेन्माषः
कर्षो स्याद्दशभिश्चैतैः ॥ तैश्चतुर्भिः पलं शेषं तदा ने मानं च पेशसः ॥ पेशः कनकमिति निघंटुः ॥ लीलावत्यां ॥
तु त्यायवाभ्यां कथितात्र गुंजा वल्लस्त्रिगुंजो धरणं च तेऽष्टौ ॥ दशार्धगुंजं प्रवदंति माषं माषैस्तथा षोडशभि
श्च कर्षमिति ॥ अत्र गुंजा द्वियवा पूर्वं त्रियवा ॥ अक्षार्धं तु द्वादशमाषाः ॥ तथा च हेमाद्रौ विष्णुः ॥ यवत्रयं
कृष्णलं ते पंच कं माषस्ते द्वादशाक्षमक्षार्धं सचतुर्माषकं सुवर्णश्चतुः सौवर्णिको निष्क इति ॥ चतुः सुव
र्णो रूपस्यापि निष्क इति व्यपदेशमनुना च चतुः सौवर्णिको निष्क इति निष्कशब्दस्य रजनपरिमाणत्वोक्तेरा

॥ वि॰भ ॥
॥ ११ ॥

जनसौवर्णीचतुष्कमेवनिष्कशब्दवाच्यमितिनभ्रमितव्यं॥ अतोपत्रगवामभावेनिष्कंस्यात्तदर्धयादसवचे
स्तुक्तंनत्वसुवर्णरजतनिष्कयोर्विकल्पः॥ हेमाद्रौबलपोक्ते॥ पालानांविंशतिर्वीसीपंचवीस्यक्तलास्मृता॥ उ
न्नोलिकःसएवस्याशतोविंशतिर्नोलिकःनिशंकुः॥ मानंतुलांगुलिप्रस्थैर्गुंजाःपंचाधमाषकः॥ तेषोडशाक्षः
कर्वोस्त्रीपलंकर्षचतुष्टयं॥ सुवर्णविस्तौहेम्नोक्षेकुरुविंदस्तत्पले॥ तुलास्त्रियांपलशतंभारःस्याद्विंश
तिस्तुला॥ आचितोदशभाराःस्युःशाकटोभारआचितः॥ अथरजतमा॥ मनुः॥ द्विकृष्णलेसमध --- षो॰
रूप्यमाषकस्त्रियवःकृष्णलस्तद्वयंमाषः॥ तेषोडशस्याद्धरणंपुराणश्चैवराजतः॥ धरणानिदशज्ञेयःश॰
तम --- राजतः॥ चतुःसौवर्णिकोनिष्कोविज्ञेयस्तुप्रमाणतः॥ धरणस्यैवसंज्ञांतरंपुराणइति॥
सुवर्णस्ययत्सुवर्णपरि --- चतुष्टयमितंरजतंराजतोनिष्कइत्यर्थः॥ विज्ञानेश्वरः॥ रूप्यस्यसुवर्ण
च्छिन्नमानमभिधीयते॥ अष्टाशीतिर्गौरसर्षपारूप्यमाषकःतेषोडशधरणंनिष्कावाविंशतिर्वारूप्य

॥ राम ॥
॥ ११ ॥

पलं वदश धरणि[illegible]नमलानां शतं तुला तत्तुलाविंशतिर्भार इति ॥ अथ मानस्य ॥ मनुः ॥ कार्षापणस्तु विज्ञेयस्ता
म्रिकः कार्षिकः पणः ॥ कर्षशब्दवाच्यं यत्सुवर्णपरिमाणं तत्परिमितद्रव्यमर्थः ॥ बृहस्पतिः ॥ ताम्रकर्षकृता मु
द्रा विज्ञेयस्ताम्रिकः पणः ॥ स एव चारिका ज्ञेया ताश्चतस्रस्तु धानकः ॥ अथ भूमेः ॥ ॥ आदित्यपुराणे ॥ जा
लान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥ त्रसरेणुस्तु विज्ञेया अ
ष्टौ ये परमाणवः ॥ त्रसरेणवस्तु ते ह्यष्टौ रथरेणुस्तु स स्मृतः ॥ रथरेणवस्तु ते ह्यष्टौ वालाग्रं तत्स्मृतं बुधैः
वालाग्रं ह्यष्ट लिक्षा स्यात्तावत्यूका लिक्षाष्टकं बुधैः ॥ अष्टौ यूका यवं प्राहुरङ्गुलन्तु यवाष्टकं ॥ द्वादशाङ्गुलमात्रो वै
वितस्तिः स्यात्प्रकीर्त्तितः ॥ अङ्गुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते ॥ तालः स्मृतो मध्यमया गोकर्णश्चाप्यना
मया ॥ कनिष्ठया वितस्तिस्तु द्वादशाङ्गुलमानिकः ॥ रत्निः स्वङ्गुलिपर्वाणि विज्ञेयस्त्वेकविंशतिः ॥ चत्वा
रिंशतिश्चैव हस्तः स्यात्तदङ्गुलानि तु ॥ किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदङ्गुलः ॥ षण्णवत्यङ्गुलश्चै

॥वि॰भ॥
॥१२॥

वधनुर्दंडः॥ प्रकीर्त्तितः॥ धनुर्दंडयुगन्नालिर्ज्ञेया षेनेयवांगुलैः॥ धनुषां त्रिंशतिं नल्वमाहुः संख्याविदो ज्ञ
नाः॥ धेनुः सहस्रेस्तैर्व्वापि गव्य्विरूपदिश्यते॥ अक्षौधनुः॥ सहस्राणि योजनं तु प्रकीर्त्तितं॥ विष्णुधर्मोत्त
रे॥ यदुमन्त्रमथाश्नाति नरः संवत्सरं द्विजः॥ एकं गोचर्ममात्रं तु भुवः प्रोक्तं विचक्षणैः॥ हस्तनिः॥ दश
हस्तेन दंडेन त्रिंशद्दंडानिवर्त्तनं॥ दशतान्येव गोचर्म्म दत्वा स्वर्गे महीयते॥ मात्स्ये॥ दंडेन सप्तहस्तेन त्रिं
शद्दंडानिवर्त्तनं॥ त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः॥ ॥अथ धान्यस्य॥ ॥भविष्ये॥ पल
द्वयं तु प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढक॥ आढकैस्तैश्चतुर्भिस्त
द्रोणश्च कथितो बुधैः॥ कुंभो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश॥ द्रोणद्वयं सैव सज्ञानरं शूर्पेति नि
गद्यते॥ ॥पलद्वयं तु प्रसृतं मुष्टिरेकपलं स्मृतं॥ अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलं॥ पुष्कला
नि च चत्वारि आढकः परिकीर्त्तितः॥ चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणं॥ दानविवेके उविंशति द्रो

॥राम॥
॥१२॥

णः कुंभो द्रोणद्वयेन वा ॥ पंचसहस्रपलमितः कुंभ इत्युक्तं ॥ द्वादशाधिकपंचशतपलमितं इति गोपथब्राह्म
णे ॥ द्रवद्रव्ये तु स्कांदे ॥ पलद्वयेन प्रसृतं द्विगुणं कुडवं मतं ॥ चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गुणैः ॥
चतुराढको भवेद्द्रोणः इत्येतद्द्रवमानकं ॥ ग्रंथांतरे ॥ लाजापायसनालिकेरसलिले सूत्रे जलेकां — — — त्रि
शन्मितिकः पलैर्धृतिमितैः प्रस्थो गुडे सम्मतः ॥ तैले क्षौद्रघृते ऽभूविंशतिपलैर्दध्नस्तु पंचोत्तरैः ॥ प्रस्थ — —
नोऽतु धैर्निगदितस्त्रिंशत्पलैरेव तु ॥ धृतिरष्टादश ॥ अथ गोहयादिमूल्यं ॥ भूलपारणे संवर्त्तः ॥ गवामभा
वेदानवं तन्मूल्यं न तु संशयः ॥ मितानक्षराया ॥ गवामभावे निष्कं स्यात्तदर्धं पादमेव च ॥ निष्कश्चतुः सु
वर्णो रूप्यस्य सुवर्णस्य वा ॥ नानार्थे निष्कपरिमाणमुक्तं ॥ अमराको नन्नमंधानादिवाहृद्यादिनिष्कम
र्थसारः ॥ भूलपारणे षड्विंशन्मते ॥ धेनुः पंचभिराख्याना मध्यानां त्रिपुराणिका ॥ कार्षापणेकमूल्यादि
कनिष्ठानां पुर्कीर्त्तिर्नात्रियवपरिमितं ताम्रलषोडशाकं रजतं पुराणः ॥ कार्षापणोऽपि स एव ॥ कान्या

॥वि॰भ॥ ॥१२॥

यनपरिशिष्टे॥धान्येद्रोणमिताकागावःश्वनुःकार्षापणोवरः॥हयेकार्षापणाःपञ्चसुवर्णेवनडुहिस्मृता:
स्त्राकार्षापणाधेनोरश्वेपंचदशैवतु॥हिरण्यकार्षापणाकःपणानवतथाविके॥वस्त्रेकार्षापणाश्च
गेछेपणाख्याद्रयाधिकाः॥हयस्यामयपंचाशन्मतंकार्षापणाःस्मृताः॥निष्केपंचाशद्देवस्याजज्ञेयंच
शतानितु॥पंचकार्षापणाःशोक्ताघेतायांचजथेतथा॥गेहेदेवेकार्षापणाकास्तासकर्षापणाःस्मृता:॥ ॥
अथदानप्रकारः॥ ॥त्रिःसंपूज्यततोदद्यंद्रालयोत्क्रिःस्रपूजयेत्॥जलेनाभ्युक्षणंद्रव्यंदद्यादेषविधिः
स्मृतः॥विष्णुधर्मोत्तरे॥द्रव्यस्यनामगृह्णीयाद्दद्यानीतितथावदेत्॥तोयंदद्यात्तथादातादानेविधिरयं
स्मृतेः॥गोभिलः॥अंतर्जानुकरौकृत्वासकुशंतिलोदकं॥फलसमन्विसंपाथपद्यात्भक्त्याचितः
परितुष्टेनभावेनतंभ्यंसंप्रददेदिति॥नामगोत्रेसमुच्चार्यपाङ्मुखोदेवकीर्तनात्॥उदङ्मुखायविप्रायप्र
द्याउदकपूर्वकं॥नामगोत्रेश्चात्मनःसंप्रदानस्यच॥नामगोत्रेसमुच्चार्यसंप्रदानस्यचात्मनः॥संप्रदेयंप्र

॥राम॥ ॥१३॥

यद्दं निकन्यादाने तु पूर्वत्रयमिति हेमाद्रावुक्तेः ॥ व्यासः ॥ अप्यायुक्तः श्रुतिर्यन्नो दानं दद्यान्न दक्षिणां ॥ अदक्षि
णं तु यद्दानं तत्सर्वं निःफलं भवेत् ॥ तथा ॥ दक्षिणाभिरुपेतं हि कर्म सिध्यति मानवे ॥ सुवर्णमेव सर्वासु
दक्षिणासु विधीयते ॥ सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ॥ अत्र सुवर्णं यथाशक्तीति गोदानपद्धतौ वक्ष्य
ते ॥ कचिद्विशेषमाहस ॥ पितृणां रजतं पात्रमथवा रजतान्वितं ॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं ॥ अ
मंगलं तद्यज्ञेषु देवकार्येषु वर्जितं ॥ रजतं दक्षिणामाहुः पितृकार्येषु सर्वदा ॥ दक्षिणापरिमाणं स्कांदे ॥ देय
द्रव्यतृतीयांशं दक्षिणां परिकल्पयेत् ॥ अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः ॥ विशेषो लैंगे ॥ अष्टषष्टि
पलोन्मानं दद्याद्वै दक्षिणां गुरोः ॥ होतृणां चैव सर्वेषां त्रिंशत्पलमुदाहृतं ॥ अध्येतृणां न दर्शेन घारपानान
दर्शनः ॥ दक्षिणां च शतं सार्द्धं न दद्वा प्रदापयेत् ॥ ऋत्विजां चैव सर्वेषां दशनिष्कान्प्रदापयेत् ॥ एतद्दय
वादमाह व्यासः ॥ सुवर्णं रजतं ताम्रं तंडुला धान्यमेव च ॥ नित्यश्राद्धं देवपूजा सर्वमेतद्दक्षिणां ॥ अयं च सा

॥ वि०भ० ॥
॥ १४ ॥

मान्यप्रकारः॥ --- स्मृत्यन्तरे ज्ञानप्रकारेणास्मृतः॥ अथ पात्रं॥ नैवत्रयं यथा स्मृतौ॥ यावन्तीर्व इदेवत्ताः सर्वा वे
दविदि ब्राह्मणे वसंति --म--शीलं संवसनात् ज्ञेयं शौचं संव्यवहारतः॥ प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं
परीक्ष्यते॥ प्रज्ञा धर्माधर्मवासना॥ याज्ञवल्क्यः॥ सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः॥ तेभ्यः क्रियाप
राः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः॥ न विद्यया केवलया तपसा वापि पात्रता॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्र
चक्षते॥ वृहन्नारदीये॥ सत्कर्मनिरतेभ्यश्च श्रोत्रियायाहिताग्नये॥ वृत्तिहीनाय वेदेयं श्रोत्रियाय कुटुं
बिने॥ कौर्मे॥ श्रोत्रियाय कुलीनाय विनीताय तपस्विने॥ वृत्तस्थाय दरिद्राय प्रदेयं शक्तिपूर्वकं॥ मनुः
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे॥ सहस्रगुणमाचार्ये त्वनंतं वेदपारगे॥ आघावाह्व्यासः॥ ब्रह्म ॥ राम ॥
बीजसमुत्पन्नो मंत्रसंस्कारवर्जितः॥ जातिमात्रोपजीवी च भवेद्ब्राह्मणः स तु॥ गर्भाधानादिभिर्युक्त ॥ १४ ॥
स्तथोपनयनेन च॥ न कर्म विन्न वाधीतः स भवेद्ब्राह्मणब्रुवः॥ मानानयः॥ अब्राह्मणास्तु षट् प्रो

क्राऋषिःशातातपोऽब्रवीत्॥ अघोराजभृतनस्तेषांद्वितीयःक्रयविक्रयी॥ तृतीयोवज्याज्यश्वचतुर्थीशा
मयाजकः॥ पंचमस्कभृतनस्तेषांग्रामस्यनगरस्यव॥ अनागतांतुयःपूर्वांसादित्यांश्चैवपश्चिमां॥ नोपासीत
द्विजःसंध्यांसपश्चोत्राशूराःस्मृतः॥ स्कांदे॥ पृथमंतुगुरोर्दानंदत्वाश्रेष्ठंमतुक्रमात्॥ ततोन्येषांउविशा(
यांदद्यात्पात्रानुसारतः॥ प्रभासखंडे॥ येपूर्वपूजितायेचपूजिताश्चपितामहैः॥ ताविचराहृत्याचामेउद(
दघूक्तपतत्यधः॥ भविष्यपुराणे॥ संनिधानस्थितान्विप्रान्दौहित्रंविडूतिंतथा॥ भागिनेयंविशे
षेणतथाबंधून्गृहाधिपः॥ नातिक्रामेन्नरस्तेतान्मूर्खानपिगोपते॥ अतिक्रम्यमहारौद्रंरौरवंन
रकंव्रजेत्॥ विडूतिजामाता॥ मातृष्वसास्वसावैवनथैवचपितृष्वसा॥ मातामहंभागिनेयीभागिनेयं
तथैवच॥ दौहित्रश्चापिजामातानेभ्योदत्तंमहाफलं॥ श्रीश्रेष्ठेपितथादत्तंतदप्यक्षयमुच्यते॥ माता
पित्रोर्गुरोर्मित्रेविनितेचोपकारिणि॥ दीनानाथविशिष्टेभ्योदानंवंभूतिमिच्छता॥ पाद्मे॥ पानेषुकूप(

॥वि॰प्र॥ गानाथवाप्यिदीनेषु यन्नया ॥ विकलेषु न थान्येषु जडवामनपंगुषु ॥ रोगार्त्तेषु च यद्दत्तं तत्साद्दक्फलं ध
॥१५॥ नं ॥ व्यासः ॥ मातापितृषु यद्दत्तं भ्रातृषु स्वसुतासु च ॥ जायात्मजेषु यद्दत्तं सोनिंग्रः स्वर्गसंगमः ॥ पितुः शत
गुणं दानं सहस्रं मातुरुच्यते ॥ अनन्तं दुहितुर्दानं सोदर्ये दत्तमक्षयं ॥ दातृदोषाः पात्रदोषाश्च कलावज्ञेय
ता ज्ञाः ॥ ॥ अथ प्रतिग्रहप्रकारः ॥ ॥ हारीतः ॥ प्रतिग्रहं मार्गनेपेन गृह्णीयात् ॥ आग्नेयं तीर्थकरम
ध्यः ॥ आदित्यपुराणे ॥ ॐकारमुच्चरन् प्राज्ञो द्रविणसकुशोदकं ॥ गृह्णीयाद्दक्षिणे हस्ते तदंते स्वस्ति की
र्त्तयेत् ॥ विष्णुधर्मोत्तरे मन्त्रप्रयोगान्ते च अमुकस्मै अमुकायवेद्य दमो प्रतिगृह्णामि तदंते स्वस्ति कीर्त्तयेत्
तथा वा अमुके दैवत्यममुकं द्रव्यं ॐ प्रतिगृह्णामि स्वस्तीत्युच्चारः ॥ कचित्तु देवस्य त्वेति मन्त्रं --- त्वा वरु ॥राम॥
णो नयतु देवि दक्षिणे अमुकस्मै अमुकं ॥ तेनामृतत्वमश्यां वयो दात्रे मयोमह्यमस्तु प्रतिग्र --- ॥१५॥
हीतुः कामस्तुति ॥ ॐ स्वस्तीति मन्त्रः पठितः ॥ विष्णुधर्मे ॥ भूमेः प्रतिग्रहं कुर्वन् कुर्याद्भूमि प्रदक्षिणां ॥ करेया

स्यात्तथा कन्यादासदासो द्विजोत्तमाः ॥ कर्तुं हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहः ॥ दासदासोर्हि दिकं रविस
स्मृत्यन्वयः ॥ आरुह्य च गजस्योत्तमाः करौ चाभ्यस्य कीर्तिनः ॥ तथैकस्य फलानां तु सर्वेषामविशेषतः ॥ प्रतिगृ
ह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा ॥ करौ गजाः पश्वश्वा नेयास्याः पुच्छे विचक्षणैः ॥ प्रतिग्रहमथो पुरुषस्या
रुह्यैव तथा भवेत् ॥ वीजानां मुष्टिमादाय रत्नानादाय सर्वतः ॥ वस्त्रं दशान्तादादायाप्यरिधीय तथा पुनः
आरुह्योपानहौ यानमारुह्यैव च पादुके ॥ ईषायां तु रथो याह्यश्वं दंडं वधारयेत् ॥ कुमारीमथ सर्वे
षां मूलेन स्वकरो भवेत् ॥ आयुधानि समादाय तथा मुच्याविभूषणं ॥ आमुच्य परिधाय ॥ चर्मध्वजौ न
यासु सुप्त्वा प्रविश्य च तथा गृहं ॥ अवनीर्यच सर्वाणि जलस्थानानि वै द्विजाः ॥ ब्राह्मणा गृहे कूपादिकं वरोऽह
दं तडागादि दानेष्वप्रतिग्रहेत्त्रभावात् ॥ उपविश्य च शय्यायां स्पर्शयित्वा करेण वै ॥ द्रव्याण्येतान्यथादाय स्पृश्य
वा ब्राह्मणाः पठेत् ॥ पठेत्पूर्वं स्वस्तिपदं पाठान्तु स्वस्ति पठेदित्यर्थः ॥ केचित्तु दानस्कृतिं पठेदित्याहुः ॥ तन्त्रमाराण

भावाग्निं त्यं ॥ गृह्णीयान्महिषीं शृंगे खरं चैव पृष्ठदेशतः ॥ प्रतिग्रहस्य यो दुस्सय्यानानां वाधिरोहणात् ॥ ॥ अ
थ दृश्यदेवतानि ॥ ॥ नैत्तिरीयप्रकरणे ॥ सोमाय वाससो रूपाय गावरुणाय अश्वं प्रजापतये पुरुषं मनवे त(
ल्पं त्वष्ट्रे अजां पूष्णे विनिर्दिश्यात् अश्वतरगर्दभौ हिमवते हस्तिनं गंधर्वाप्सरोभ्यः स्वगलंकरणे विश्वेभ्यो देवे
भ्यो धान्यं वाचे अन्नं ब्रह्मणे अन्नोदने समुद्राय पायः उत्तानायांगिरसाय अनः वैश्वानराय रथमिति ॥ विष्णुध
र्मे ॥ अभयं सर्वदेवत्यं भूमिर्वै विष्णुदैवता ॥ कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः ॥ प्राजापत्यो(
गजः प्रोक्तस्तुरगो यमदैवतः ॥ तथा चैकशफं सर्वं कथितं यमदैवतं ॥ महिषश्च तथा पस्य उष्ट्रश्चैव नै
र्ऋतो भवेत् ॥ रौद्री धेनुर्विनिर्दिष्टा छागश्चाग्नेय उच्यते ॥ मेषं तु वारुणं विद्याद्वराहो वैष्णवः स्मृतः ॥ आ
रण्याः पशवः सर्वे कथिता वायुदेवताः जलाशयानि सर्वाणि वारिधीनि कमंडलुः ॥ कुंभं च करकं चैव वारु(
णानि विनिर्दिशेत् ॥ समुद्रजानि रत्नानि सामुद्राणि तथैव च ॥ आग्नेयं कनकं प्रोक्तं सर्वलोहानि वायथ

प्रजापत्यानि सस्यानि पक्वान्नमपि च द्विजाः ॥ ज्ञेयानि सर्व्वगंधानि गांधर्व्वाणि विचक्षणैः ॥ वाईस्पत्यं स्मृतं वा
सः सौम्याग्नेया रसास्तथा ॥ पक्षिणाश्च तथा सर्व्वे वायव्याः परिकीर्त्तिताः ॥ विद्याब्राह्मी विनिर्दिष्टा विद्योप
करणानि च ॥ सारस्वतानि ज्ञेयानि पुस्तकाद्यानि पंडितैः ॥ सर्व्वाणि शिल्पिभाण्डानां विश्वकर्मा तु दैवतं ॥ द्रुमा
णामथ गुल्मानां शाकैर्हरितकैः सह ॥ फलानामपि सर्व्वेषां तथा ज्ञेयो वनस्पतिः ॥ मत्स्यमांसे विनिर्दिष्टे
पाजाप --- वच ॥ छत्रकृष्णाजिनं शय्यां रथमासनमेव च ॥ उपानहौ तथा यानं पन्नान्यस्त्राणि वर्जितं
श्रोत्रानांगिरस --- निगृह्णीत मानवः ॥ पर्ज्जन्यायतनं योशीरं वस्त्रं चर्मध्वजादिकं ॥ रणोपकरणं सर्
र्व्वं कथितं शक्रदैवतं ॥ गृहं तु सर्व्वदैवत्यं प्रदत्तं द्विजोत्तमाः ॥ नगनं ज्ञेयं विष्णुदैवत्यं सर्व्वं वा विष्णुदैवतं
॥ ॥ इति श्रीमन्नारायण – हस्तूरिसूनु श्रीमहादेवपंचाननरामकृष्णभट्टसूनुदिनकरभट्टसूनुविश्वे
श्वरकृतायां विश्वेश्वरीपद्धतौ दानोपयोगिनिर्णयः ॥ ॥ अथ महादानोपयोगितुलामानादिनिर्माणप्र

॥ विभ ॥
॥ १८ ॥

कारः॥ नवमामकाः श्लोकाः॥ गाढपंकाद्धनेनोयेस्थाप्यंदंडचतुष्टयं॥ नोपोपरिसमंसांनरालंनद्दीर्घसूत्रनः॥
दंडंधृत्वाखनेद्भूमौ पूरयेत्पांपिपुष्क्लिनः॥ यावद्दंडस्पसाम्यं साम्भूरेवं समनां व्रजेत्॥ अथप्राची॥ मध्याङ्के
सूक्ष्मंशंकोर्याछायासा ह्रस्विरोान्तरा॥ दिशानयापूर्नीचीचपाचीसाध्याचमत्स्यतः॥ जांबूकेशावमरोपि·यो
डशांगुलसमुज्जवह्नन्नेघादशांगुलककीलकमाथं॥ यन्त्वंत्वनिंह्नंनिंस्थलपुष्मेतत्रपाशाघानमत्सुदिशो
मः॥ सिंहात्कुंभात्रिकेप्राची—कापुष्मेनवालयेत्॥ एकपायनदिशाडक्षिणाह्नध्निकेकर्कटेमृगे॥ डक्षिणाह्न
षभे॥ नत्रेपंचशंकुपक्षोरामवाजयेष्यां॥ रज्जोरंतार्द्धमध्येषुपंचशंकून्निखन॥ नयेत्॥ पाशाद्धपान्ययोर्द
त्वारक्षोदक्षधयकर्मणो॥ विकृचपान्मतन्स्तत्रेसमंमध्येनयोपद्वयोः॥ पाशाद्वयेमध्यकर्षाच्छ्रगुरसमुदी
तिनमितिं॥ अथमंडपभेदेनामकाः श्लोकाः॥ दशाष्टेरधरःमःप्रोक्तोदशादित्येस्तमध्यमः॥ मनुवोडशा
भिःप्रोक्तः उत्तमोमंडपःकरैः॥ तुलायांदंतिदशभिःकेष्विविंशानिभिश्चसःसभाःशारक्षयां॥ षोडशास्तंभ

॥ राम ॥
॥ १८ ॥

संपूर्कं चत्वारस्तेषु मध्यमाः ॥ अष्टहस्तसमुच्छ्रायाः संस्थाप्या पदशाभिनः ॥ पंचहस्तप्रमाणास्ते निछिद्रा ऋजवः
शुभाः ॥ नम्यं च मांशं निखनेन्मेदिन्यां नंत्र विन्नमः ॥ निंखननं सूत्रसंपानशांकौ वेदिः ॥ अग्नेय्यादिक्रमेण च ॥
स्तंभोच्छ्राये विनान्यासे सूत्रयोजनकीलके ॥ खनने वटसंस्कारे प्रारंभो वह्निवरइति पंचरात्रात् ॥ स्तंभका
ष्ठानि क्रियासारे ॥ वृक्षस्याग्निशियो वेणुः क्रमुकस्तंभकर्मणि ॥ अन्ये विशुद्धवृक्षा वा भवेयुर्नान्यभूरुहाः ॥
धारणिकक्कावल्लां ॥ कनीयसि स्यात्रिकरं वेत्नुरंगलहस्तिनः ॥ मध्यमो नाम्यो वीरमिति ॥ तोरणानि मात्स्ये
वक्ष्यंते ॥ विशेषो वास्तुशास्त्रे ॥ अश्वत्थोदुंबरप्लक्षवटशाखाहृतानि तु ॥ मंडपस्य प्रतिदिशं द्वाराण्येतानि
कारयेत् ॥ पंचहस्तप्रमाणानि विस्तारेणाधिहस्तकाः ॥ षडंगुलाभिहृद्वास्तु सप्तहस्ता यथोत्तमा ॥ मस्तके
द्वादशांशेन द्वारं खचक्रगदांबुजं ॥ प्रागादिक्रमयोगेन न्यसेन्नेपांस्वदारुजं ॥ पंचमांशान्यसेद्भूमौ सर्वसाधा
रणो विधिरिति ॥ शैवे कर्मणि कर्तव्यं रिवाशं खादिस्थाने परिमाणांतरयुक्तं त्रिशूलमेव कार्यं ॥ शूलेन वि

ष्ठिताः कार्या द्वारशाखासु मस्तके ॥ शूलं नवांगुलं दैर्घ्यं तुरीयांसेन विस्तृतिः ॥ ऋजु वै मध्यश्रृंगं स्यात्किंचिद्वक्रं
व यक्षयोरिति निपिंगलामतवचनात् ॥ वेदिमूलागमे ॥ ततो मंडपसूत्रं तु त्रिगुणं परिकल्पयेत् ॥ पूर्वादिषु
क्रमात्तस्य मध्यगर्भे तु वेदिका ॥ वेदिकोणेषु विन्यस्येत्स्तंभान्वेदस्वरूपकान् ॥ आग्नेयादिक्रमेणैव लोके
शांदिग्विदिक्षु च ॥ इष्टकाभिर्मृदा वापि वेदी दर्पणसन्निभा ॥ राजहस्तोच्छ्र्या कार्या विउषा सिद्धिमिच्छता
राज्ञो यजमानः ॥ मात्स्ये तु ॥ वेदः सप्तहस्तमितं त्वपंच हस्तमितं त्वं चोक्तं ॥ तोरणस्थापने विशेषः सिद्धांत
शेखरे ॥ अग्निमीले निमंत्रेण विन्यसेत्पूर्वतोरणं ॥ इषेत्वोर्जे निमंत्रेण दक्षिणेन निवेशनं ॥ अग्न आ
याहि मंत्रेण पश्चिमस्यां निवेशतं ॥ शन्नो देवी निमंत्रेण दद्यादुत्तरतोरणमिति ॥ पताकाध्वजाश्च सू
त्रसंग्रहे ॥ सप्तहस्ताः पताकाः स्युः सप्तमांशेन विस्तृताः ॥ लोकपालानुवर्णेन नवमी तु हिमप्रभा ॥ पीनर
क्तादिवर्णाश्च पंचहस्ता ध्वजाः स्मृताः ॥ द्विपंचहस्तैर्दंडैश्च वंशजैः संयुतास्तथेति ॥ द्विपंचहस्तैः दशहस्तैः

लोकपालवर्णास्मृतंतरे॥ इंद्रःपीतोयमःश्यामोवरुणःस्फटिकप्रभः॥ कुबेरश्चसुवर्णाभअग्निश्चापिसुवर्णाभः
तथैवनिरृतिश्यामोवायुर्धूम्रःप्रशस्यते॥ ईशानःशुभवेद्रक्तएवंध्यायेत्क्रमादिति॥ मंडपेकुंभस्थापनंमू
लागमे॥ गंधपुष्पाक्षतैःपेतान्कुंभान्सेषुनिवेशयेत्॥ ध्रुवंधरांवाकुर्यात्तेचविप्रेशान्तेषुपूजयेत्॥ मंडपस्यतु
कोणेषुकलशेषुक्रमादमी॥ अमृतोऽर्जयश्चैववसिष्ठार्थोमंगलस्तथा॥ पूज्याद्वारस्थकुंभेषुशाखाद्यास्मन्स्मनूत्त
मैरिति॥ तन्मनून्नमैस्तन्मैत्रैः॥ मंडपवास्तुःप्रपंचसारे॥ शुभकर्मणिदीक्षायांमंडपकरणेगृहादिविधि
श्रुतथा॥ विहितोवास्तुवलिःस्याद्दक्षोविघ्नापशांतिसंपन्नः॥ मंडपेचोत्तरपूर्वयोर्मध्येहस्तोच्छ्रितावेदि
मीत्ले॥ गर्तस्योत्तरपूर्वेणविनास्तिद्वयविस्तृतां॥ वप्रद्वययुतांवेदिंवितस्त्युच्छ्रायसंयुतां॥ स्थापनाय
चदेवानांचतुरस्रामुदक्प्लवामिति॥ वप्रद्वयलक्षणमाह्स्योच्छ्रितेंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः
चंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि॥ षडंगुलस्तच्चविस्तारःसर्वेषांकथितोबुधैरिति॥ अथकुंडानिमात्स्ये

प्रागुत्तरंसमासाद्यप्रदेशंमंडपस्यतु॥शोभनंकारयेत्कुंडंयथावल्लक्षणान्वितं॥प्राक्पूर्वेउत्तरमुक्तस्य
मध्यदेशांशाध्येप्यर्थइतिपितामहचरणाः॥भविष्ये॥मध्येपिमंडपस्यापिकुंडंकुर्याद्विचक्षणः॥अष्टहस्तप्रमा
णेनआयामेनतथैवच॥तानिचनवपंचचत्वार्येकंवा॥भविष्येवेदिपादांतरंत्यक्त्वाकुंडानिनवपंचच॥वे
दाश्रारण्येवतानिस्युर्वर्जितान्यथवाक्वचित्॥आश्वायनकल्पे॥कुंडानिचतुरस्राणिवृत्तानानाकृतानिवा॥नवपं
चाथवैकंवाकर्तव्यंलक्षणान्वितं॥ ॥नवकुंडीविधानेतुदिक्षुकुंडाष्टकेस्थिते॥नवमंकारयेत्कुंडंपूर्वेशान
दिगंतरे॥विधानेपंचकुंडानामीशानेपंचमंभवेत्॥ ॥नारदीये॥यज्ञोपदिष्टनेकुंडंचतुष्कंतत्रकर्मणि
वेदाश्रमर्धचंद्रंचवृत्तंपद्मनिभंतथा॥ ॥मात्स्ये॥कुर्यात्कुंडानिचत्वारिप्राच्यादिषुविचक्षणः॥कुंडवेद्यं
तरंचैवसपादकरसंमितं॥ ॥मदनरत्नेस्मृत्यंतरेच॥वेदिभित्तिंपरित्यज्यत्रयोदशाभिरंगुलैः॥हस्तमा
त्राणिकुंडानिचतुरस्राणिसर्वतः॥ ॥सपादकरस्यास्यमंडपाल्पत्वमहत्वाभ्यांव्यवस्था॥कुंडैकत्वेतुनदाग्ने

ण्यामीशान्यां प्रतीच्यामुत्तरस्यां वा ॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं ॥ मेखलात्रयसंयुक्तं योन्या वापि
विभूषितमिति मनहारणवोक्तेः ॥ एकं वाग्निवकोणायां प्रतीच्यां वापि कारयेदिति सोमशंभूक्तेः ॥ अथवाग्नि
ग्निकुंडं उत्तरस्यां प्रविश्याद्यं चतुरस्रमेकमेवेति मूलागमोक्तेश्च ॥ तत्रोदीच्यां चतुरस्रमेवा विशेषवच
नात् ॥ ईशान्यां चतुरस्रं वृत्तमष्टास्रि वा प्रतीच्यां चतुरस्रं वृत्तं वा ॥ आग्नेय्यां तु चतुरस्रं वृत्तं योन्याकारं वाका
र्यं ॥ नवकुंडीपक्षविहिताकारापरित्यागेनैवैककुंडविधानोपपत्तेः ॥ तत्र योनिः पश्चिमे एव प्रागग्निया
म्यकुंडानां कार्या योनिरुदङ्मुखीत्यस्योपक्रमेण नवकुंडीमात्रपरत्वात् ॥ नवकुंडी वसिष्ठांतशेखरे ॥ च
तुरस्रं च योन्याभमर्धचंद्रं त्रिकोणकं ॥ ॥ वृत्तं षडस्रकुंडं च पद्माभं चाष्टकोणकं ॥ ऐंद्रादीशानपर्यंतं न
वमं चतुरस्रकं ॥ तथा ॥ पुरंदरेशयोर्मध्ये वृत्तं वा चतुरस्रकं ॥ नदाचार्यैर्विनिर्दिष्टं नवकुंडक्रमोस्ययं ॥ शा
न्तार्थे मुष्टिमात्रं स्याच्छते चारत्निमात्रकं ॥ हस्तमात्रं सहस्रे स्याद्द्विहस्तं वायुते मतं ॥ लक्षार्धे त्रिकरं कुंडं ल

॥ वि॰भ ॥
॥ २० ॥

क्षहोमे चतुःकरं ॥ कुंडं पंचकरं प्रोक्तं दशलक्षावधिकमात् ॥ षट्हस्तं लक्षविंशत्यां कोट्यर्द्धे सप्तहस्तकम् ॥ कोटि
होमे चाष्टहस्तं कुण्डं नोक्तं ततोर्द्धतः ॥ पंचाशतः प्राक्स्थंडिलमेव ॥ नवियत्नुत्तरतो ॥ मुष्टिमात्रं शतार्द्धे तु
शते वा रत्निमात्रकम् ॥ सहस्रे त्वथ होतव्ये कुर्यात्कुंडं करात्मकम् ॥ द्विहस्तमयुतेन दक्षलक्षहोमे चतुःक
रम् ॥ दशलक्षमिते होमे षट्करं संप्रचक्षते ॥ अष्टहस्तात्मकं कुण्डं कोटिहोमे तु नाधिकम् ॥ इदं यंवनिता
दिविवरहिद्व्ययरम् ॥ पूर्णा याद्भ्रवाल्पहोमे तु धाररचाया ॥ एकहस्तमितं कुण्डमेकलक्षे विधीयते ॥ ल
क्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत् ॥ दशहस्तमितं कुण्डं कोटिहोमे विशस्यते इत्युक्तम् ॥ कुण्डफला
निशारदायाम् ॥ सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृतम् ॥ पुत्रप्रदं योनिकुण्डमर्द्धचन्द्राभं शुभप्रदं ॥ शत्रु
क्षयकरं त्र्यस्रं वर्तुलं शान्तिकर्मणि ॥ छेदमारणयोः कुण्डं षडस्रं पद्मसन्निभं ॥ वृष्टिदं रोगशमनं कुण्ड
मष्टास्रमीरितम् ॥ विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते ॥ वैश्यानामर्धचन्द्राभं शूद्राणां त्र्यस्रमीरितं

॥ राम ॥
॥ २० ॥

म ॥ चतुरस्रं तु सर्वेषां केचिदिच्छन्ति नान्विकाः ॥ कोणिकयपरिशिष्टे ॥ सर्वकर्मसु विज्ञेयं कुण्डं पद्मनिभं तु यत्
चतुरस्रं च सर्वत्र समं स्याद्द्विज यावहं ॥ सर्वसिद्धिकरं कुण्डं पद्माकारं विशेषतः ॥ अथास्य कुण्डीकरणप्रकारः
तत्र चतुरस्रमुक्तं ॥ अथ योनिकुण्डम् ॥ कामिके ॥ पञ्चमांशं पुरोन्यस्य मध्ये वेदांशमानतः ॥ भ्रमाद्भ्रमस्थयप
द्वांशं कुण्डमाग्नेयमुच्यते ॥ कोणारज्ज्वोश्च तुर्थांशमानतन्नन्यर्थः ॥ अथार्द्धचन्द्रं ॥ तत्रैव ॥ चतुरस्रे यदैर्भक्ते
त्यक्ताधं तेन दक्षको ॥ मध्ये सप्तांशमानेन तत्कुण्डं खण्डवत्भ्रमात् ॥ त्रिकोणं तत्रैव ॥ त्रिभागहस्तिनो मत्स्ये
स्त्रिभिर्भैर्शाचरं भवेत् ॥ इदं च षागयं निर्भेत्ते दिक्षिण तत्कुर्याद्वैषेयपूर्वे दिगयकमिनिसिद्धां तद्धोरवरात् ॥
वृत्तं कामिके ॥ कर्णार्धाष्टसमन्यासात् वृत्तकुण्डमिहोदितम् ॥ अष्टादशांशक्षेत्रस्य न्यसेदेकं वहिर्बुधः ॥ भ्राम
येत्तेन मानेन वृत्तकुण्डमनुत्तमम् ॥ षडस्रं तत्रैव ॥ षड्भागहस्तिनो मत्स्यैश्चतुर्भिः स्यात्षडस्रकम् ॥ शारदायां
तु ॥ अष्टधा विभजेत्क्षेत्रं मध्यसूत्रस्य पार्श्वयोः ॥ भागं न्यसेदेकैकं समानेनानेन मध्यतः ॥ कुर्यात्पार्श्वगतं

मत्स्य चतुष्कं नंत्र विन्नमः ॥ पमकुरोमक्ष्मसत्रं चतुर्विंशनिधा भवेत् ॥ आमयेत्कर्णिकाहृन्नं त्र्यंशहृन्नार्धमान
तः ॥ षडंशहृन्नार्धमानश्च मिहृन्नेत्र केसरः ॥ नवांशहृन्नार्धमाने हृन्ने स्यान्मत्र मध्यभूः ॥ त्वादशांशान्तु हृन्ना
र्धहृन्नं नत्रोर्ध्वभूः स्मृता ॥ दशाग्रराणान्तु हृन्नार्धकृत्वा पद्म दशांशकैः ॥ न्यूनैः पंचाभिरेकांश चतुः षष्ठ्यंशकैर्व
मान् ॥ रेखाये भ्यः पत्रसीम्नो दलाग्राणि प्रकल्पयेदिति ॥ नानि चत्वार्यथौवा ॥ अवशिष्टदलं वेददलमष्टद
लं तु वेनिकामिकोक्तेः ॥ तानि चतुःपक्षे दिक्षु अष्टपक्षेष्ट दिक्षु ॥ चतुर्दिक्षु चतुःपत्रं पद्माभं कुंडमीरितम्
अथवाष्टदलं कुंडं कुर्याच्छास्त्रोक्तमार्गतः इति सिद्धांतशेखरादिनिके चित् ॥ पितामहश्वरणास्तु ॥ नार्थये
त्कुण्डकोणेषु वेदीनां नेत्र विन्नम इति शारदायां दलोपरि योनिनिषेधात् दलद्वयसंधेश्च कुण्डकोणानामा
वादष्टपक्षे दिगंतरालेषु चतुःपक्षे विदिक्षु दलानीत्याहुः ॥ दलाग्रप्रकारः पितामहश्वरणैरुक्तः ॥ दिग्वि
दिक्सूत्रसंपाताग्राद्धृन्नद्वयेंकयेत् ॥ वाह्यहृन्नविदिग्मध्य हृन्नदिक्षु चिह्नितोंकयेत् ॥ मध्ये व्यस्तवदेन

स्यादंकान्नुभ्रामयेद्बहिः ॥ एवमेवास्यतन्तुश्चापि भ्रामयेत्स्यात्ततुर्दलम् ॥ दिक्‌विदिक्‌तनदंतरे सुवायसहस्तद्वयेंक
येत् ॥ वायहस्तान्तरांकान्वमध्यहस्तन्दिगंकनः ॥ अंकयेन्नास्त्वन्मध्येनहस्तविदिगंकनः ॥ अस्त्रांकाभ्यामुपग
तोभ्रामयेत्तुबाहिःसमः ॥ एवंसमंततःकार्यमेवमष्टदलंभवेत् ॥ ततःखातमध्ये अंगुलहस्तेनकर्णिका ॥ उ
त्तनापितावन्मेव ॥ उत्सेधंवनथाकुर्यात्कर्णिकाव्यासमाननः ॥ नवहिस्त्वेकभागेनकेसराणिप्रकल्पयेत् इ
निकामिकोक्तेः ॥ अष्टाभ्रिकामिके ॥ क्षेत्रघादशभागं वतु दिक्षु तदंतरे ॥ विन्यसनन्तमाणेनतुर्याश्रम
परं नयेत् ॥ तरीणमाणेनतकुजास्वपिलांछयेत् ॥ नवाष्टसन्नसंयोगादष्टास्त्रंकुंडमुच्यत इति ॥ ~~ततःसमे~~
ख~~तंवातुखतमं~~खनेत् ॥ यावान्कुंडस्यविस्तारःखननं तावदीरितमितिसारदोक्तेः ॥ खातं कुण्डप्रमाणं
स्यादूर्ध्वमेखलयासहेतिसिद्धान्तशेखराच्च ॥ कुण्डकंठमानं कालोत्तरे ॥ खातात्प्राह्येगुलःकण्ठः सर्वकुंडेष्व
यं विधिरिति ॥ सिद्धांतशेखरेपि ॥ कुंडेहस्तमिते कंठं कुर्यादेकांगुलं ततइति ॥ द्विहस्ते ककरमिते ॥ द्विक

॥ कि·म ॥
॥२२॥

रात्नेनु व्यासचतुर्विंशांशेन ॥ कुंडनायश्चतुर्विंशो भागः सोंगुलसंज्ञितः ॥ विभज्यानेन कर्तव्या मेखला कंठनाभ
यद्इति सोमशंभुनोक्तेः ॥ मेखलाः पिंलामने ॥ खातादेकांगुलं त्यक्त्वा मेखलानां विधिर्भवेत् ॥ मेखलैकाथवा त्रि
स्रो भूतसंख्याथवापि ये ॥ एका षडंगुलोत्सेधविस्तारा मेखला मतेति ॥ भूतानि पंच ॥ एकमेखलामान्त्से·
चतुरंगुलविस्तारा मेखलानवडुच्छ्रिता ॥ नचयं नवानरे ॥ षट्संशेनाप्यमाज्ञोन मेखलाघ्नितयं मतं ॥ नचत्
यं सिद्धांतशेखरे ॥ चतुर्भिस्त्रिभिर्द्वाभ्यामूर्ध्वाधःखातानि स्तुः प्रोक्ताः क्रमादेव विस्तरादुच्छ्रयादपि·
क्रियासारेपि ॥ प्रधानमेखलोत्सेधमुक्तमत्र नवांगुलम् ॥ नवाद्यमेखलोत्सेधं यत्तांगुलमिहस्मृतं ॥ तन्
माद्य मेखलोत्सेधमंगुलघ्नितयं क्रमात् ॥ चतुस्त्रिघंगुलो व्यासो मेखलात्रितयस्य तु ॥ प्रयोगसारे तु सर्वाश्च
तुरंगुला उक्ताः ॥ सात्विकी मेखला पूर्वा युत्सेधाद्यादशांगुला ॥ द्वितीया राजसी प्रोक्ता मेखला षडंगुलैः समा
तृतीया मेखला ख्याता नामसी चतुरंगुला ॥ पृथुविस्तारसमताम्रचतुरंगुलमानतः ॥ सत्वादियदैः श्वेतारु

॥ रम ॥
॥ २२ ॥

ग्रासामरजांस्तु चक्षते ॥ पंच मेखलाः सिद्धा नश्रेयरे ॥ षड्वापणां द्विवन्हि नेत्रमिताःस्तुः पंच मेखलाः ॥ यथयदा(
कारकुंडे नन्न धकाराः कार्याः ॥ याद्दकुंडस्याकृतिः संप्रोदस्थानाद्ध्यू पंमेखलायाविदध्यादिति हेमाद्राबुक्तेः
द्विहस्तादिकुंडे मेखलापरिमाणविशेषाःसारसंग्रहे ॥ द्विहस्तस्य च षड्बेदंगुलैर्मेखलात्रयम् ॥ मेखलाः
स्तु त्रिहस्तस्य सप्त पंच त्रिगुणांगुलैः ॥ चतुर्हस्ते मेखलाःस्तु रुद्रर्तुवत्तुरंगुलैः ॥ मेखला पंचहस्ते स्यान्निधिषी
पशरांगुलैः ॥ षद्धारस्य च नाःप्रोक्ताः विश्वरुद्रनवांगुलैः ॥ दशहस्तमिनेकुंडे मनुभानुदशांगुलैरिति ॥ त्रगा
स्त्रयः ॥ ऋतवः षड्गीनधयोनव ॥ दीपाः सप्तश्वराः पंच रुद्रा एकादश ॥ अंकानव ॥ भानवो द्वादश ॥ दिशो द
श ॥ वसवो ऽष्टौ ॥ विश्वे च योदश ॥ मनवश्चतुर्दशाः ॥ योनिर्मान्स्ये ॥ विनस्ति मात्रा योनिःस्यान्षट्सप्तांगुल
विस्तृता ॥ कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलान्विता ॥ गजोष्ठसदृशी तद्वदायनाछिद्रसंयुता ॥ एनन्नार्वे
ष्ठकुंडेषु योनिलक्षणमभिध्याने ॥ विनस्तीन्येकहस्तकुण्डाभिप्रायम् ॥ षट्सप्तेन्यवर्त्निमितकुण्डाभिप्राय

म्॥ मेखलामभितो योनिः कुण्डार्द्धांशविस्तरेति स्वायंभुवोक्तेः॥ अंगुष्ठोच्चां फलकरूपां योनिं मेखलोपरि
स्थापयेदित्यर्थः॥ योनिः स्यान्मेखलोपरीति सिद्धान्तशेखरात्॥ पंचरात्रे तु स्थालादारभ्य योनिस्थापय
मेखलया समा मेखलासमत्वं चतुरंगुलत्रिमेखलत्वपक्षे॥ यत्तु यवषड्द्वादशांशे योनिः कुण्डायनेमवेदिमि
वचनं तच्छिद्रस्थानाचरणाद्युपेक्ष्यं सच कुंडमध्ये एकांगुलप्रविष्टा॥ एकांगुलोच्छ्रिता सा तु प्रविष्टाभ्यंतरे तथे
ति त्रैलोक्यसारात्॥ योनौ च वर्ध्य निर्मलम्॥ योनिकुंडे न योनिः पद्मकुंडे च न नाभिः॥ योनिकुंडे योनिमब्ज
कुंडे नाभि विवर्जयेदिति शारदोक्तेः॥ अस्याश्चावस्था स्वायंभुवे॥ प्रागग्निया म्ये कुण्डानां प्रोक्ता योनि
रुदङ्मुखी॥ पूर्वास्तु खाः कृताः शेषा यथा शोभं सन्निनाहनि॥ पूर्वेशानमध्ये वेधांगुलादि देवतास्थापनम्
स्मारे॥ मध्ये तु भास्करं विंद्यात् कुशीनं पूर्वदक्षिणे॥ दक्षिणे लोहितं विंद्यान्नैर्ऋत्यां पूर्वोत्तरयाः तु॥ उत्तरे
जगरुं विंद्यात् पूर्वे रौवज्रभार्गवं॥ पश्चिमे तु शनिं विंद्याद्राहुं दक्षिणपश्चिमे॥ पश्चिमोत्तरतः केतुं स्था

पात्रैर्भुक्तमंडलैः ॥ अथवा वर्णकैः कार्याः स्वस्ववर्णादिधातुभिः ॥ तथा ॥ भानुं तु मण्डलाकारं चतुरस्रं तु सो(
मकं ॥ अङ्गारकं त्रिकोणं च बुधं बाणाकृतिं तथा ॥ दीर्घं चतुरस्रं गुरुं पंचास्रं भार्गवं तथा ॥ धनुस्तुल्यं शनिं
विंद्याद्राहुं शूर्पाकृतिं तथा ॥ केतवश्च ध्वजाकारा ग्रहाणां तत्स्वरूपिणः ॥ धनुस्तुल्यं धनुराकारं ॥ प्रतिमा इ
व्यासिमात्से ॥ ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णजाद्भौ ॥ रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमा
त् ॥ बलयामलेन ॥ ताम्रेणाकारयेद्भानुं रजतेन निशाकरं ॥ कुजं ज्ञं जीवरूपाणि सुवर्णेन तु कारयेत् ॥ र
जतेन ततः भृगुं कृष्णलोहेन सूर्यजं ॥ नागेन कारयेद्राहुं केतुं कांस्येन कारयेत् ॥ स्वाग्रलेनोक्ताः सर्वे ग्र
हाः कार्या विधानतः ॥ अथवा स्वर्णमात्रेणाथ निमां कारयेत्सुधीः ॥ प्रतिमा तथा स्वानिमत्से ॥ पमास(
नः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्सदा रविः ॥ श्वेतः श्वेताम्बरधरो दशा
श्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ॥ च

॥ वि॰ म ॥ ॥ २४ ॥

गुर्जजो मेषगमो वरदः स्याद्वराङ्कुशः ॥ पीनमाल्यांबरधरः कर्णिकारसमद्युतिः ॥ खड्गचर्मगदापाणिः सिं
हस्थो वरदो ध्रुवः ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ॥ इं
द्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योर्कसुतः सदा ॥ करालवदनः खड्गच
र्मशूली वरप्रदः ॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृ
ध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ ह्यांगुलेनोच्छ्रिताः सर्वे
शतमष्टोत्तरं सदा ॥ अधिदेवतानथ नाधिदेवतानाश्च मान्ये ॥ भास्करस्येश्वरं विद्यादुमां च शशिनस्तथा
स्कंदमंगारकस्यापि बुधस्य च तथा हरिं ॥ ब्रह्माणं च गुरोर्विद्याच्छुक्रस्यापि शचीपतिं ॥ शनैश्चरस्यापि य
मं राहोः कालं तथैव च ॥ केतूनां चित्रगुप्तं च सर्वेषामधिदेवताः ॥ अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च दे
वता ॥ प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥ एनम्प्रानि माः विष्णुधर्मोत्तरे ॥ पंचवक्त्रो वृषारूढः प्रति

॥ राम ॥ ॥ २४ ॥

वक्त्रस्त्रिलोचनः॥ कपालमलखट्वांगी चंडमौलिः सदाशिवः॥ अक्षसूत्रं च कमलं दर्पणं च कमण्डलुं॥ उभावि
भनिर्हस्तेषु पूजितात्रिदशैरपि॥ कुमारः षण्मुखः कार्यः शिखण्डकविभूषणः॥ रक्ताम्बरधरः कार्यो मयू
रवरवाहनः॥ कुक्कुटश्च तथा घंटा तस्य दक्षिणहस्तयोः॥ पताका वैजयंत्याख्या शक्तिः कार्या च वामयोः॥
प्रदक्षिणं दक्षिणाधः करादारभ्य निम्नशः॥ विष्णुः कौमोदकीपद्मशंखचक्रधरः क्रमात्॥ यज्ञोपवीति
सिंहस्थ एकवक्त्रश्चतुर्भुजः॥ अक्षस्रजं स्रुवं विभ्रत्कुण्डिकां च प्रजापतिः॥ चतुर्दन्तगजारूढो वज्री कुलि
शासन्करः॥ प्राचीपतिः प्रकर्तव्यो नानाभरणभूषितः॥ प्राचीपतिरिंद्रः॥ ईषमीनो यमः कार्यो दण्डह
स्तो विजानता॥ रक्तदृक्पाशभृन्नक्रो महिषस्थो विभूषितः॥ कालः करालवदनो निम्नमध्यनिभीषणः
पाशहस्तो दण्डहस्तः सर्पवृश्चिकरोमवान्॥ उदीच्यावेधं रक्ताक्षं द्विभुजं सौम्यदर्शनं॥ पुस्तकालोकनपरं
चित्रगुप्तं विनिर्दिशेत्॥ दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत्॥ पिंगभ्रूश्मश्रुकेशानः पिंगाक्षस्त्रिन

योरुणः॥ छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः॥ विहितं चवरेणास्य करमग्नेस्तु कारयेत्॥ आपः
स्त्रीरूपधारिण्यः श्वेनामकरवाहनाः॥ दधानाः पाशकलशौ मुक्ताभरणभूषिताः॥ शुक्लवर्णा मही कार्या
दिव्याभरणभूषिता॥ चतुर्भुजा सौम्यवपुश्चंडांशुसदृशाम्बरा॥ रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतं॥
पद्मं करेषु कर्त्तव्यं भूपो यादवनंदन॥ दिङ्नागानां चतुर्णां सा कार्या पृष्ठगा नानथा॥ विहितं द्वयोर्लक्षणं प्रा
गुक्तं॥ वामेशाख्याः करे कार्या सौम्या संतानमंजरी॥ वरदा मंडिता कार्या द्विभुजा च तथा शची॥ प्रजापत
निलक्षणमपि प्राग्गुणं॥ अक्षसूत्रधरः सर्वाः कुण्डिकापुष्पसंयुताः॥ एकभोगास्त्रिभोगा वा सर्वाः कार्याः
श्चभीषणाः॥ पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्मुखः॥ अक्षमालां स्रुवं बिभ्रत्पुस्तकं च कमण्डलुं॥ वा
सः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च॥ विनायकादिप्रतिमालक्षणानि विस्नुधर्मोत्तरएव॥ चतुर्भु
जस्त्रिनेत्रश्च कर्त्तव्यो गजाननः॥ नागयज्ञोपवीतश्च शशांककृतशेखरः॥ वेनं दक्षकरे दद्याद्द्वितीये स्या

क्षसूत्रकं॥ तृतीयेयरशुंदद्यात्चतुर्थेमोदकंतथा॥ शक्तिर्वाणास्तथाशूलंखड्गंचक्रंचदक्षिणे॥ चन्द्रविंवमथो
वामेखेटकपालकं॥ सुकटंकंचविभ्राणासिंहारूढानुदिग्भुजा॥ एषादेवीसमुद्दिष्टादुर्गादुर्गासुहारिणी॰
धावकहरिणपृष्ठस्थोध्वजधारीसमीरणः॥ वरदानकरोधूम्रःकार्योविजाननः॥ नीलोत्पलाभंगगनंतद्वर्णं
वरधारिच॥ चन्द्रार्कहस्तंकर्त्तव्यंद्विभुजंसौम्यरूपवत्॥ द्विभुजौदेवभिषजौकर्त्तव्यौदेहसंयुतौ॥ तयोरोष
धयःकार्यादिव्यादक्षिणहस्तयोः॥ वामयोःपुस्तकौकार्यौदर्शनीयौतथाद्विजाः॥ एकस्यदक्षिणेपार्श्वेवामे
वामस्यपाद्व॥ नारीयुगंप्रकर्त्तव्यंसुरूपंचारुदर्शनम्॥ रत्नभाण्डकरेकार्येवन्दुभृत्कांवरेनथा॥ ॥द्विवा
प्रतिमालक्षणानिवृलयामले॥ ॥इन्द्रस्वैरावनारूढोवज्रपाणिःशचीसखः॥ स्वर्णावर्णःसहस्राक्षोनाक
पत्सुरेश्वरः॥ पत्मपूर्वदलस्याग्रेइन्द्रमिंदंचरस्थवा॥ अग्निस्तुस्वर्णवर्णाभःसप्तार्चिःसप्तहस्तकः॥ स्वा
हासखोमेषवाहःसीत्रोहसैस्तुवादिमुत्तम्॥ आदिशब्देनजुह्यमन्त्रकवाग्रहंतने॥ अग्निदंतमनियनयाज्ञव

॥विभ॥
॥२६॥

ग्रेयदलाग्रके ॥ इत्ताशियो दण्डधरो यमो महिषवाहनः ॥ ऊर्ध्वकेशो विरूपाक्षः करालः कालिकाप्रियः ॥ मोक्ष
णस्त्वेति मंत्रेण नैरृत्ये तु दलाग्रके ॥ मोक्षणाः परायरेनित्रास्वे देवसिंह्रो मंत्रः ॥ नागपाशधरो रक्तभूषणः
पद्मिनीप्रियः ॥ वरुणस्तु पतिः स्वर्णवर्णो मकरवाहनः ॥ पूज्यः पश्चिमदिग्भागे त्वन्तोऽग्ने त्वाचा नया ॥ प्रा
णभृनोहिंजगतो वायुः कृष्णमृगासनः ॥ हेमदण्डधरः श्यामो वर्णनो मोहनीप्रियः ॥ नववायो इत्यृचा वपू
ज्यो वायुर्मरुद्दिशि ॥ अश्वारूढः कुन्तपाणिः कुबेरश्चित्रिणीप्रियः ॥ निधीश्वरः स्वर्णवर्णो धनदो रूपवान्प्र
भुः ॥ सोमो धेनुमनेनैव ईशानस्य दलाग्रके ॥ शुद्धस्फटिकसंकाशो गौरीशो वृषवाहनः ॥ वरदाभयशूला
क्षस्रक्त्रेधृक परमेश्वरः ॥ कद्रुद्रायेति मंत्रेण पाज्यः प्राग्नैरदले ॥ अत्रेंद्रवज्रमृगादिपदैः स्वस्वशक्ती
यनत्र देवताप्रकाशकमंत्राउपलक्षणे ॥ ॥ अत्राधिदेवतादीनामपि स्वस्वप्रतिमासु अक्षतपुंजेषु वा
पूजा कार्या ॥ ॥ अधिदेवतानां स्थापनप्रदेशाउक्तास्कन्दपुराणे ॥ ॥ वक्ष्ये स्थानानि देवानामीश्वरा

॥राम॥
॥२६॥

दियथाक्रमं ॥ सूर्यस्यैवोत्तरे शंभुं उमां सोमस्य दक्षिणे ॥ स्कन्दमंगारकस्यैव दक्षिणास्यां निवेशयेत् ॥ सो
म्यास्य पश्चिमतो विष्णुं ब्रह्माणं जीवपूर्वतः ॥ इन्द्रमैन्द्रां सिताद्विद्यान्मंदाद्यामे यतो यमं ॥ राहोः पूर्वोत्तरे कालं
सर्वभूतभयावहं ॥ केतोर्नैर्ऋत्य दिग्भागे चित्रगुप्तं निधापयेदिति ॥ प्रत्यधिदेवतास्थापनस्य देश उक्तो
गोभिलीये ॥ ग्रहदेवतयोर्मध्ये अधिदेवाभिवशायेदिति ॥ उत्पलपरिमलेन ग्रहस्य दक्षिणे पार्श्वे स्थापये
दधिदेवतां ॥ ग्रहस्योत्तरपार्श्वे तस्य प्रत्यधिदेवतामिति ॥ स्कान्दे ॥ उत्तरेशानि सूर्याभ्यां ग्रहकेत्वोश्च दक्षि
णे ॥ गणाधिपः प्रतिष्ठाप्यः सर्वदेवनमस्कृतः ॥ संग्रहे ॥ राहुमंददिनेशानामुत्तरस्यां यथाक्रमं ॥ गणेशदु
र्गावायुश्च राहुकेत्वोश्च दक्षिणे ॥ आकाशमश्विनौ चेति पंचैता स्थापयेन्नरः ॥ मात्स्ये ॥ आदित्याभिमुखा
स्सर्वे साधिप्रत्यधिदेवताः ॥ स्थापनीया मुनीश्रेष्ठ नोत्तरेण परामुखाः ॥ स्कान्दे ॥ वर्णरूपगुणैर्युक्तान्ध्या
त्वावाहयेन्मुनीन् ॥ विनायकं तथा दुर्गां वायुमाकाशमेव च ॥ आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ

आकृदमेन सहस्रांशोरिमन्देवास्तथैन्दवे॥ अग्निर्मूर्द्धेति भौमाय उद्बुध्यस्व बुधाय च॥ बृहस्पते इति गुरोः शु(
क्रा१न्नात्परिस्रुतः॥ शनैश्चरस्य मंत्रो यं शन्नो देवीरुदाहृतः॥ कयान इति राहोश्च केतुं कृण्वंस्तु केतवे इति॥
अधिदेवताश्च प्रत्यधिदेवता मंत्राश्चोक्तास्तथैव ईश्वरं त्र्यंबकं वेति श्रीश्च ते चेति पार्वती॥ यदक्रंदेति च स्कंदं(
विष्णुं विष्णोरराटनः॥ आब्रह्मन्निति ब्रह्माणं सजोषेन्द्रेति वासवं॥ यमाय त्वेति च यमं कालं कार्षिरसीति(
च॥ चित्रावसो इति मंत्रेण चित्रगुप्तं निधापयेत्॥ अग्निं दूतमिति ह्यग्नेर्वरुणस्य उदुत्तमं॥ स्योना पृथिवीति
मेदिन्या इदं विष्णुस्तु विष्णवे॥ इन्द्रायेन्दो इतीन्द्रस्यान्नानयर्यौ शचीस्थितौ॥ प्रजापते प्रजेशस्य एषब्रह्मेति
वै विधेः॥ मंत्रो नमोस्तु सर्पेभ्यः सर्पाणां स्थापने मतः॥ विनायकं गणानां त्वा दुर्गां वै जातवेदसे॥ वायो ये
नेन तथा वायुं घृतं घृतेनेति चावरं॥ या वां कशेति संपूज्यो द्वावप्येतौ अश्विनावपि॥ आहनिमंत्रणमावाहनेस
मुद्धयदीति केचिन॥ आ ह्याशु वा समं त्रैः स्थापयेद्दन्यमे॥ स्मृत्वं नरे॥ इदं ईं पूर्वेतु संस्थाप्यपेनेद्यं दक्षिणे

तथा ॥ वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा ॥ अस्मादि लोकपालांश्च कोणभागेषु विन्यसेत् ॥ इन्द्रः पीतो यमः
श्यामो वरुणः स्फटिकप्रभः ॥ कुवेरश्च सुवर्णाभ अग्निश्चापि सुवर्णभः ॥ तथैव निर्‌ऋतिः श्यामो वायुर्धूम्रः प्रश
स्यते ॥ ईशानस्तु भवेच्छुक्ल एवं ध्यायेदिनिक्रमान् ॥ इंद्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ॥ ध्रुवोध्वरस्त
था सोम आपश्चैवानिलोनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः ॥ देवेशेशानयोर्मध्ये आदित्यानां
तथा यमं ॥ धातार्यमा च मित्रश्च वरुणोंशो भगस्तथा ॥ इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्व
ष्टा ततो विष्णुरजघन्यो जघन्यतः ॥ इत्येते द्वादशादित्याना मभिः परिकीर्तिताः ॥ अग्नेः पश्चिमभागे तु रुद्राणा
मयनं विदुः ॥ वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुव
नाधीश्वरश्चैव कपाली च विशांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रास्त्वेकादश स्मृताः ॥ प्रेतेशरक्षोमध्ये
च मातृस्थानं प्रकल्पयेत् ॥ मातरो गौर्याद्याः निर्‌ऋतेरुत्तरभागे गणेशायतनं विदुः ॥ कुवेरमरुतोर्मध्ये

मरुतां स्थानमुच्यते ॥ मरुतो नाम ते देवा गणा वै सप्तसप्तकाः ॥ आवहः प्रवहश्चैव उद्वहः संवहस्तथा ॥ विवहः
परावहश्चैव तथा परिवहोऽनिलः ॥ अत्रैव तु समिधावाचु नानां स्थापनं ॥ शौनकः ॥ ग्रहाणां शंभुकोणे वा सौम्ये
वा पश्चिमेऽपि वा ॥ तन्मध्ये वारुणं कुंभं धाम्नस्योपरि विन्यसेत् ॥ याज्ञवल्क्यः ॥ यथावर्णं प्रदेयानि वासां
सि कुसुमानि च ॥ गंधाश्च वलयश्चैव धूपो देयश्च गुग्गुलः ॥ मात्स्ये ॥ धूपो देयोऽत्र सुरभीरुपरिष्टाद्वितानकं ॥ शो
भनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितं ॥ स्कान्दे ॥ दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं ॥ यं डेच भार्गवे चैव
सितवर्णं प्रदापयेत् ॥ कुंकुमेनानुसंयुक्तं चंदनं जीवसौम्ययोः ॥ अगरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च ॥ ग्रह
वर्णानि पुष्पाणि गायत्र्या धूपमादहेत् ॥ रवेः कुंदुरुकं धूपं शशिनस्तु घृतं शिना ॥ भौमे सर्जरसं चैव अगरु
श्च बुधे स्मृतः ॥ सिल्हकं गुरवे दद्यात्कुष्ठं कोविल्वागरुं तथा ॥ गुग्गुलं मंदवारे तु लाक्षा राहोश्च केतवे ॥ कुंदुरुस
ल्लकीनिर्यासः सिल्हकं सिल्हारसः ॥ उद्दिवस्वेति मंत्रेणार्दीयं दद्याद्दर्भं द्विजः ॥ गुडोदनं रवेर्दद्यात्सोमाय घृत

पायसं ॥ लोहिताय हविष्यान्नं बुधाय क्षीरषाष्टिकं ॥ दध्योदनं गुरोर्दद्यात् शुक्राय च घृतौदनं ॥ मिश्रितं तिलमा
षैश्च नैवेद्यं तु शनैश्चरे ॥ राहोर्मांसौदनं दद्यात् केतोश्चित्रौदनं तथा ॥ हविष्यान्नं तु मन्नादि तिलमाषैर्मिश्रि
तमन्नमिति शेषः ॥ नैवेद्यानि मान्येपि ॥ गुडौदनं रवे दद्यात् सोमाय घृतपायसम् ॥ अंगारकाय संयावं बु
धाय क्षीरषाष्टिकं ॥ मसूरांश्च कुजे दद्यादिति क्वचित्पाठः ॥ अस्मिन्पाठे मसूरमिश्रितमन्नं दद्यादित्यर्थः ॥ द
ध्योदनं तु जीवाय शुक्राय च घृतौदनं ॥ शनैश्चराय कृशरमाजमांसं च राहवे ॥ चित्रौदनं च केतुभ्यः सर्वैर्भक्ष्यै
रथार्चयेत् ॥ विनायकादिपूजा तु शतपत्रचंदनादीनि यथावर्णाणि ॥ पुष्पाणि शतपत्राणि चंदनं च विलेप
नं ॥ एतेषां तु स्नु तैर्धूपयेन्नैवेद्यं च घृतोदनं ॥ सर्वेषां लोकपालानां चन्दनं च विलेपनं ॥ शतपत्रादिपुष्पाणि
दद्यात्तु गुग्गुलधूपकं ॥ दीपं गोघृतसंयुक्तं नैवेद्यं सघृतोदनमित्युत्पलपरिमलोदाहृतवचनात् ॥ उक्तानाम
लाभे यथालाभमृतुकालोद्भवैरनिषिद्धैः पूजा विधेया ॥ ग्रहसमिधो याज्ञवल्क्येनोक्ता अर्कः पलाशः खदिर

स्त्वपामार्गोथपिप्पलः॥ औडुंबरःशमीदुर्वाकुशाश्चसमिधःक्रमात्॥ एकैकस्यत्वष्टशतमष्टाविंशतिरेववा॥
शेनव्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवायुना॥ अथतुलादैवतप्रतिमालक्षणानितन्त्रेगोविंदप्रतिमापंचरात्रे॥
स्वधश्चक्रंगदामूर्ध्वदक्षिणेवामयोःक्रमात्॥ ऊर्ध्वेशंखमधःपद्मंगोविन्दःकपिलांगकः॥ ईशादिप्रतिमावि
श्वकर्मणोक्ता॥ पूर्वोत्तरेत्रिनेत्रश्चवृषभस्थश्चशूलधृक्॥ कपालपाणिश्चन्द्रार्द्धभूषणःपरमेश्वरः॥ श्वेता
श्वरथगःसोमोगदापाणिर्वरप्रदः॥ धावद्धरिणपृष्ठस्थोध्वजधारीसमीरणः॥ रक्तवर्णस्त्रिनयनोद्वि
भुजाश्चंडमौलयः॥ जटिलाश्चपकर्तव्यारुद्रावाणधनुर्धराः॥ सूर्यविश्वकर्मप्रतिमाविष्णुधर्मोत्तरेरवि
कार्य्यःशुभश्मश्रुःसिंदूरारुणसप्रभः॥ पद्मासनःपद्मकरोमनुषितोरत्नानाधरः॥ विश्वकर्मातुकर्तव्यःश्मश्रु
लोरत्नानाधरः॥ सदंशपाणिर्द्विभुजस्तेजोमूर्तिरधोम्बरः॥ गुरुप्रतिमात्वसौडुपशरो॥ पीतांबरःपीनव
पुःकिरीटीचतुर्भुजोदेवगुरुःप्रशान्तः॥ अंगिरोग्निप्रतिमाविश्वकर्मीये॥ कमंडलुंस्रुवंचैवशक्तिंधर्मेपदि

क्रमात् ॥ कलयंत्यगिरोनाम्नः करात्याणिसमंत्रतः ॥ पाराणयश्चाग्निनाम्नापि कलयंनिजयस्मनं ॥ आक्निंचपुस्त
कंवैवक्रमादेवकमण्डलुं ॥ अनयोश्चमिलितनयोर्देवनाम्नं ॥ प्रजापतिप्रतिमोक्ता ॥ विश्वेदेवलक्षणमाह्यमः
विश्वेदेवास्तुसर्वेपिदक्षिणावाणापाणयः ॥ कर्त्तव्यावामपाणौचसशरासनपाणयः ॥ सर्वेदशक्रतुर्दक्षो
वसुःसत्यःकालकामौधूरिलोचनौ ॥ पुरूरवार्द्रवश्चेतिविश्वेदेवादशस्मृताधनिवाणधराणान् ॥ विधानरू
पंप्रजापतिसमं ॥ पर्जन्यलक्षणंसिद्धार्थसंहितायां ॥ पर्जन्यनामाविज्ञेयोगजवक्त्रनयान्वितः ॥ योधन्तेस
र्वजीवात्मावरंवीजंचशंखकम् ॥ कुम्भंदक्षपयोजंचबिंनारत्नमहाभावः ॥ पाशंचक्रंकिशलयंकुण्डीचदश
भिःकरैः ॥ धांभुरीशवत् ॥ अनयोरपिमिलितनयोः ॥ पितृपतिमायमदीपिकायां ॥ कृशाविष्टरूपमस्याःपि
नरःपिण्डपात्रिणः ॥ सौम्यलक्षणंब्रह्माण्डपुराणे ॥ पीतांवरःपीतवपुःकिरीटीचतुर्भुजोदण्डधरश्चहारी
चर्मासिधृग्भामसुतःसदानःसिंहादिरूढोवरदोवुधश्च ॥ धर्मपतिमाविज्ञुधर्मे ॥ चतुर्मुखस्वच्छवर्षःसि

॥ वि॰ भ ॥
॥ ३० ॥

न्नमालः सितांबरः ॥ सर्वाभरणवान् श्वेतो धर्मः कार्यो विजानता ॥ दक्षिणे चाक्षमाला च न्यस्ता वामे तु पुस्तकं
ध्वजाश्चि वरुणा लक्षणान्युक्तानि ॥ मित्रस्वरूपमाह विश्वकर्मा मित्रं कमलपाणिश्च कमलासनसंस्थितः ॥ द्वि
भुजः श्वेतमूर्तिश्च सर्वलोकहिते रतः ॥ वरुणः पूर्ववत् ॥ मरुन्त्रीनमाव्रमांडपुराणे देवा एकोनपंचाशद्देवेंद्र
समतेजसः ॥ ध्यानः पुरुहूतस्य मरुतः सूर्यवर्चसः ॥ किरीटीहारकेयूरकटकादिविभूषिताः ॥ खड्गचर्मधरा
नित्यं शक्रस्यानुचराः सदा ॥ धनेशस्वरूपं श्रीप्रश्ने ॥ ह्रस्वमापिंगनेत्रं च गदिनं पीनविग्रहं ॥ पुष्पकस्थं धना
ध्यक्षं ध्यायेद्धि वरस्वं सदा ॥ गंधर्वस्वरूपमाह पद्मः ॥ वरदाभयक्ततोकानां किरीटी कुंडली गदी ॥ कार्यः स्व
रूपो गंधर्वो वीणावादपरस्तथा ॥ वरुणः पूर्ववत् ॥ विष्णुलक्षणमुक्तं ॥ एताश्च मात्स्यानुक्तान्नावश्यका
शीन वक्ष्यंते ॥ मंडपमध्ये षोडशारचक्रनिर्माणप्रकारो मात्स्ये ॥ तडागोत्सर्गप्रकरणे ॥ वेदिमाणकं
वेद्यां रजोभिः पंचवर्णकैः ॥ मंडलं वर्णयेत्प्राज्ञो न्यूनं नाधिकं क्वचित् ॥ शालिचूर्णैर्भवेच्छ्वेतं कौसुंभं लो

॥ राम ॥
॥ ३० ॥

हितं भवेत् ॥ पीतं निशाभवं ज्ञेयं कुसुम्भं द्वैहेयमस्मजं ॥ हरितं बिल्वपत्रोत्थं मंडलार्थं रजःस्मृतं ॥ खधातंत्र्यासनं
त्वेतन्मानसूत्रेणासूत्रयेत् ॥ पूर्वं प्रसारयेत्सूत्रं समृजुं सुरु यथा भवेत् ॥ संत्रु धत्त्रजुतत्सूत्रं अंकयेद्विंडनाम
नः ॥ याम्येवाप्यंकयेदेवं कौवेरं संप्रसारयेत् ॥ कोणाभ्यो मीयते भूयो दत्तविंदुचतुष्टयात् ॥ सर्वतः समतां ग
त्वा पांशुसूत्रं निपातयेत् ॥ चतुर्दिक्षु प्रसार्यैवं सूत्रमास्फालयेत्समं ॥ अष्टौ भागान्प्रकुर्वीत मंडलेतु कनीय
सि ॥ सूत्रार्द्धेन भजेत्तावत्तस्यार्द्धेन पुनस्ततः ॥ तस्याप्यर्द्धेन संभज्य सर्वाविंदुभिरंकयेत् ॥ अंकेभ्यः समतां ग
त्वा पांशुसूत्रं प्रसारयेत् ॥ एवं विभज्य तन्मत्त्र चतुर्भाभ्यामष्टधा समं ॥ तस्मिन्द्वारादिसर्थ्यर्थं कोष्ठकानि वि
लोपयेत् ॥ पंक्तिष्वंत्यासु चत्वारि द्वितीयासु द्वयं द्वयं ॥ मध्यवर्तीनि कोष्ठानि लोपनीयानि देशिकैः ॥ कोण
जानि कोष्ठानि कण्ठार्थं न लोपयेत् ॥ गात्रार्थं च विलोप्यानि पंच पंच तदंतिके ॥ अतः षोडशकानीह
कोष्ठकानि स्थितानि वै ॥ तेषां चत्वारि मध्यानि त्यक्त्वा शेषाणि लोपयेत् ॥ तद्विलोपाद्भवेत्पीठं चतुरस्रं स

॥ वि·भ ॥
॥ २१ ॥

मंततः ॥ मानसूत्रमथाद्राय दैशिकः खटिनीं तथा ॥ एकतः सूत्रमारोप्य मध्ये सव्येन पाणिना ॥ अंगुलानि व
हिः पश्चात्मन्त्रात्पीठे समंततः ॥ भ्रामयेदपसव्येन सूत्रकं खटिकान्वितं ॥ मंडलं जायते तस्मात्पीठेस्मिन्सर्वतः
समं ॥ चतुरस्रे चतुष्कोष्ठे पद्मक्षेत्रे तथाडनः ॥ चतुरस्रांगुलं मध्ये कुर्याद्वै मंडलद्वयं ॥ अंगुलानि चतुर्विंश
वहिस्तस्यापि मंडलं ॥ ततः षोडशभिर्भागैः पद्मक्षेत्रं विभाजयेत् ॥ दिग्विदिक्ष्वप्यस्तथा निर्यकपांश्च सूत्रेण
दैशिकः ॥ एवं सकलमासूत्र्य मंडलं वेदिमध्यगं ॥ रजःपातं ततः कुर्याद्दपसव्यकरेण तु ॥ प्रथमं कर्णिकां वि
ध्वंसितेन रजसा सितेन तु ॥ पश्चात्तं पूरयीतेन पीतेन दक्षिणेन तु ॥ शुक्ललोहितवर्णेन केशराणि द्वि
तीयके ॥ दलसंधिगता रेखाः शुक्लेकांगुलसंज्ञकाः ॥ दलान्याछादयेच्छुक्लेन दद्याद्ध्येयुपाठलं ॥ दलानि नरानं कृ
ष्णेन रजसा कादयेत्ततः ॥ पद्मस्यावरणं शुक्लं रेखासममतुन्नमं ॥ अतः परं लिखेच्चक्रं पंचवर्णसमुज्ज्व
लं ॥ अपमापीतारुणा श्वेतान्मध्यभागे यवाक्रमीत् ॥ आरान्समालिखेत्तत्र वर्णिकाभिः सुशोभनान् ॥ आरा

॥ राम ॥
॥ २१ ॥

तराणि सर्वाणि यथाशोभं विभूषयेत् ॥ रजोभिः पांशुभिः पंचचक्रधारावहिर्लिखेत् ॥ सितपीतारुणश्यामर
हिताः क्रमशुर्वला ॥ चक्रस्यवाह्यतः पीतं भूषयेत् श्यामवर्णकैः ॥ रजोविस्तारयोर्हस्तुरेखा स्याद्विदिक्षु वै ॥
वज्ररत्नानि लिखेद्रेखां सितेन तु रजसा ततः ॥ वल्लीनितलकपात्राणि दद्यात् पीठे यथेच्छया ॥ उपपीठं ततो यंत्रं यथा
शोभं विभूषयेत् ॥ ततो द्वाराणि चत्वारि रेखायां सितया लिखेत् ॥ पीतश्यामसितहरितानि वास्याभ्यंतराणि
वै ॥ पूर्वादिक्रमयोगेन रजोभिर्भूषयेत् पृथक् ॥ मात्रकं रक्तमाग्नेयं हरितं नैरृतं तथा ॥ वायव्यं श्यामवर्णाभ
मैशानं धवलं तथा ॥ कपोलाः कोणसंकीर्णा वर्णश्चित्रितया भूषणाः ॥ वज्ररत्नां सितां रेखां वाह्ये दद्यात् समंत
तत इति ॥ वेदप्रमाणकं वेदसंख्याकमंडलं चत्वारि मंडलानीत्यर्थः ॥ पत्रं कर्णिका केशरदलदलाग्रव
हिर्मण्डलरूपं मंडलयंत्रकं युक्तं तत्र दलदलाग्रयोर्विभागतात्पर्यकं ॥ वर्णयेत् रचयेत् ॥ दलाग्रकरणोक्तं
डवतक्षेत्रपरिमाणनावश्यकं ॥ मानाधिकेन वेद्रोग इत्यादेः प्रकरणे न कुंडविषयत्वात् ॥ निशाहरिद्राश्य

धानमिति यत्त्वचक्रं लेखनीयं तत्स्थानमित्यर्थः ॥ एतन्मानसूत्रेणेति ॥ एतन्सपोडशारस्यमानसूत्रेण ॥ न च
तुर्हस्तमिति तिरामोदरः ॥ त्रिहस्तमिति मदनरत्नः ॥ ऋजुसंउध्वऋजुत्वेत्यर्थः ॥ पांशुसूत्रं खटिकासूत्रं ॥ क
नीयसीति कनीयस्त्वं मंडलानपेक्षया ॥ अष्टभागकरणप्रकारमाह ॥ सूत्रार्द्धेनेति ॥ सर्वान्भागानुभा
भ्यांउभयत इत्यर्थः ॥ देशिकैर्देशविभागवत्तैरित्यर्थः ॥ गात्रं पीठपादाः ॥ अंतःपंक्तिचतुष्टयात्मकत्वजर
स्य पीठ इत्यर्थः ॥ पीठं चतुःकोणात्मकं चतुरस्रमित्यर्थः ॥ तद्देवैकहस्तायामं दैर्घ्यं यस्य पीठं पद्मकरणप्र
कारमाह ॥ मानेनेति ॥ एकहस्तमध्ये यं चांगुलानुभयतो वहिस्त्यक्त्वा एकोनविंशत्यंगुलैर्हस्तं कुर्यात् ॥ आरे
ष्वंक्तत्वेत्यर्थः ॥ अपसव्येन दक्षिणेत्यर्थः ॥ चतुरष्टांगुलवासार्द्धमित्यर्थः ॥ अंगुलानीति ॥ तस्यैकोनविं
शमंडलस्य वहिश्चतुर्विंशांगुलं मंडलमित्यर्थः ॥ इदं च दलाग्रमंडलं ॥ ततनइति इदशृंगं पद्मक्षेत्रं षोडशभि
र्भागैर्विभज्ये हत्वाग्रकरणार्थमित्यर्थः ॥ विभागप्रकारमाह ॥ दिग्विदिग्भ इति ॥ इदं च सूत्रपातनमाराकर

र्णार्थं चक्रमंडलपर्यन्तकार्यं ॥ अपसव्येन दक्षिणाकरेणेत्यर्थः ॥ यत्तु दामोदरेणाग्रे दक्षिणाकरश्चेवणाद्य
सव्ये करेणेति व्याख्यानं तन्निर्मूलं ॥ अत इति चक्रं चक्रपीठ इत्यर्थः ॥ उपपीठं चक्रपीठाद्बहिर्दत्तं ॥ यत्तु दा
मोदरेणोपपीठं चपीठाद्बहिः सर्वतः कोष्ठं दयं द्वयमिति व्याख्यानं तच्चिंत्यं ॥ कोणसंकीर्णः कोणस्थिता इ
त्यर्थः ॥ ॥ इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमज्ञादयं चानन्तरामकृष्णभट्टसूनुदिनकरभट्टसूनु
विश्वेश्वरकृतायां विश्वेश्वरीपद्धतौ मंडपादिनिर्माणप्रकारः ॥ ॥ अथ महादानानि ॥ ॥ तत्र सर्वदा
नप्रकृतित्वात्प्रथमं तुलादानम् ॥ मात्स्ये ॥

॥कि॰भ॥
॥३२॥

॥राम॥
॥३२॥

निसपञ्चपात्राणिसवितस्तराणि ॥ हस्तप्रमाणानिनिलाजप्रभूधूपोपहाराणिशुभ्रोभनानि ॥ पूर्वोत्तरे हस्त
मिताञ्चवेदीग्रहादिदेवेभ्य प्रपूजनाय ॥ अर्च्चाविहीनं त्र सश्रिवाञ्जनानांन त्रैव कार्यफलमाप्नुवन्ति ॥ लोके श
वर्णाः परिनः पताकामध्यध्वजः ॥ किंकिणिकायुतःस्यात् ॥ द्वारेषुकार्याणि च तोरणानि चत्वार्यपि क्षीरिव
नस्पतीनां ॥ द्वारेषु कुम्भद्वयमत्र कार्यं स्त्रगंधधूपांबररत्नयुक्तं ॥ शाके प्रदीपं दनदेवदारुश्रीपर्णीबल
प्रियकाञ्जनानां ॥ संभद्वयं हस्तयुगावखातं कुम्भाग्रजं यच्च करोति नीचं ॥ तदर्द्धतः हस्तचतुष्टयं स्याद्यथोत्तरां
गंच तदंगमेव ॥ समानजातिश्च तु पार्श्ववर्त्ती स्याद्वा हैमेन मध्ये पुरुषे प्रयुक्ता ॥ दैर्घ्येण साहस्तचतुष्टयं स्यात्सु
पुत्रमस्यान्स्वदशांगुलानि ॥ सुवर्णपद्माभरणा च कार्या सलोहपाशा द्वयमुखलाभिः ॥ सुतासुवर्णोनवर
लमालाविभूषिता मात्यविलेपनाभ्यां ॥ वकैलिखेद्वारिजगर्भयुक्तं नानारजोभिर्विविधप्रकीर्णं ॥ वितान
कंचोपरि पंचवर्णं संस्थापयेत्पुष्पफलोपशोभि ॥ अथर्त्त्विजो वेदविदश्च कार्याः सुरूपवेषान्वयशीलयु

॥वि॰भ॥
॥३४॥

ज्ञाः॥ विधानदक्षाः पटवोनुकूला येचार्यदेशप्रभवा द्विजेन्द्राः॥ गुरुश्चवेदान्तविदार्यदेशसमुद्भवः शीलकुला
भिरूपः॥ आप्तः पुराणाभिरतोतिदक्षः प्रसन्नगंभीरसरस्वतीकः॥ सितांवरः कुंडलहेमसूत्रकेयूरकंठाभ
रणाभिरामः॥ पूर्वेणचऋग्वेदविदैर्भवेनां यजुर्विदौ दक्षिणतश्चकार्यौ॥ स्थाप्यौद्विजौ सामविदौ चपश्चाद
थर्वणाउत्तरतश्चकार्यौ॥ विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानां॥ ब्रह्माच्युतेशार्कवनस्प
तीनां स्वमंत्रतो होमचतुष्टयं स्यात्॥ जाप्यानिसूक्तानि तथैव तेषामनुक्रमेणैव यथास्वरूपं॥ होमावसा
नेकृतनृत्यनादो गुरुर्गृहीत्वावलिपुष्पधूपं॥ आवाहयेल्लोकपतीनूक्रमेण मंत्रैरमीभिर्यजमानयुक्तः॥
एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश॥ संवीज्यमानोप्सरसांगणेन रक्षाध्वरं नो भगवन्न
मस्ते॥ एह्येहिसर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्ट॥ तेजोवतालोकगणेन सार्द्धं ममाध्वरं रक्षक
वेनमस्ते॥ एह्येहिवैवस्वतधर्मराज सर्वामरैरर्चितधर्ममूर्ते॥ शुभाशुभानन्दशुचामधीशशिवायनः पा

॥राम॥
॥३४॥

हि मखं नमस्ते ॥ एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ॥ ममाध्वरं पाहि पिशाचनाथ लो-
केश्वरस्त्वं भगवन्नमस्ते ॥ एह्येहि पाशोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रामर-
रगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सहसिद्धसंघैः ॥
प्राणाधिपः कालकवेः सहायगृहाण पूजां भगवन्नमस्ते ॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रग-
णेन सार्द्धं ॥ सर्वौषधीभिः पितृभिः सहैव गृहाणपूजां भगवन्नमस्ते ॥ एह्येहि विश्वेश्वर त्रिशूलकपालखट्वांगध-
रेण सार्द्धं ॥ लोकेशभूतेश्वर यज्ञसिध्यै गृहाण पूजां भगवन्नमस्ते ॥ एह्येहि पातालधरामरेन्द्र नागांगनाकि-
न्नरगीयमान ॥ यक्षोरगेन्द्रामरलोकसार्द्धं मनन्त रक्षाध्वरमस्मदीयं ॥ एह्येहि विश्वाधिपते मुनीन्द्रलोकेन
सार्द्धं पितृदेवताभिः ॥ सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवाय ॥ त्रैलोक्ये यानि भूतानि
स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥

ञ्च यथो मनवो गावो देवमानरस्तथा ॥ सर्वे मम मखे रक्षां कुर्वन्तु च शुभान्विताः ॥ इमा वा ह्यसुरा ह्यन्यथा ह्यन्वि ग्भो
हेमभूषणां ॥ कुंडलानि च सूत्राणि हेमानि कटकानि च ॥ तथांगुलीयविन्यासिवासांसि वासायनानि च ॥ ह्यिगुणं
गरवे दद्याद्भूषणाद्यादनादिकं ॥ उपेषुः शांतिकाध्यायजायकाः सर्वतो दिशं ॥ तत्राषितास्तनः सर्वे कृत्वैव म
धिवासनं ॥ आदावंते च मध्ये च कुर्यात्स्वस्तिवाचनं ॥ ततो मंगलशब्देन स्नापितो वेदपुंगवैः ॥ त्रिः प्रदक्षिण
माहृत्य गृहीतकुसुमांजलिः ॥ शुक्लमाल्यांबरो भूत्वा नानुलामनुमंत्रयेत् ॥ नमस्ते सर्वदेवानां शक्तिस्त्वंस
त्यमाश्रिता ॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥ एकत्रः सर्वसत्त्वानि तथानंतशतानि च ॥ धर्म
धर्मकृतां मध्ये स्थापिता सि जगद्धिते ॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ॥ मां तोलयन्ती संसाराद्धु द्ध
रस्व नमोऽस्तु ते ॥ योऽसौ तत्त्वाधियो देवः पुरुषः पंचविंशकः ॥ स एषो धिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥ नमो
नमस्ते गोविंद तुलापुरुष संज्ञक ॥ त्वं हरे तारयस्वास्मान्स्मात्संसारसागरात् ॥ पुण्यं कालमथासाद्य कृत्वैव(

मधिवासनं ॥ पुनः प्रदक्षिणं कृत्वा तां तुलामारुहेद्बुधः ॥ सखड्गवर्मकवचः सर्वाभरणभूषितः ॥ धर्मराजमथा
याये हेमं सूर्येण संगतं ॥ कराभ्यां व्रज्ञुष्टिभ्यां पश्यन्नास्ते हरेर्मुखं ॥ ततो परे तुलाभागे न्यसेयुर्द्विजपुंगवाः ॥
समादभ्यधिकं यावत्कांचनं चातिनिर्मलं ॥ पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नरेश्वर ॥ क्षणमात्रं ततः स्थित्वा पुन
रेवमुदीरयेत् ॥ नमस्ते सर्वभूतानां साक्षिभूते सनातनि ॥ पितामहेन देवि त्वं निर्मिता परमेष्ठिना ॥ त्वया धृ
तं जगत्सर्वं सहस्थावरजंगमं ॥ सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ॥ ततउत्तीर्य गुरवे पूर्वमर्धं
निवेदयेत् ॥ ऋत्विग्भ्यो परमर्धं च दद्यादुदकपूर्वकं ॥ गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत् ॥ प्राप्य ते
षामनुज्ञां तं तथान्येभ्योपि दापयेत् ॥ दीनानाथविशिष्टादीन्पूजयेद्ब्राह्मणैः सह ॥ न चिरं धारयेद्गेहे सुवर्
णं प्रोक्षितं बुधः ॥ तिष्ठेद्भयावहं यस्माच्छोकव्याधिकरं नृणां ॥ शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलं ॥ अ
नेन विधिना यस्तु तुलापुरुषमाचरेत् ॥ प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् ॥ विमानेनार्कवर्णेन किं

॥ वि॰भ ॥
॥ ३६ ॥

किरीजालमालिना ॥ पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् ॥ कल्पकोटिशतं यावत्तत्र लोके महीयते ॥ क
र्मक्षयादिह पुनर्भुवि राजराजो भूपालमौलिमणिरंजितपादपीठः ॥ अश्रान्तिनो भवति यज्ञसहस्रयाजी दीप्त
प्रतापजितसर्वमहीपलोकः ॥ योऽधीयमानमपि यः प्रणिभक्तियुक्तः कालान्तरे स्मरति वाचयतीह लोके ॥ यो
वा शृणोति पठतीश्च समानरूपः प्राप्नोति धाम स पुरंदरदेवजुष्टं ॥ आद्यं सर्वमहादानप्रकृतिभूतमिति सम्मो
दः ॥ ननु ॥ द्वादशं विश्ववक्त्रं चेत्यत्र द्वादशेत्यस्यानुपपत्तेः ॥ प्रकृतित्वं चेतनस्य करणोत्वद्धर्माम्नानादेव सि
ध्यति ॥ अतः प्रथममितिमर्थः ॥ तस्मादित्यनेन गोविंदादित्रयपूजा सर्वमहादानांगत्वेनोक्ता ॥ अत्र दानकर्मो
त्कीर्तनार्थः ॥ तत्वनुष्ठानेकमः ॥ फलभेदेन प्रयोगविधिभेदे च कामोष्टिवत्क्रमाकांक्षाभावात् ॥ एषा (
मनन संकुर्यात् वासुदेवप्रसादनं इति वचनात् ॥ वस्तुतो वचनमेवैतेषामनियमेनानुष्ठानबोधकम् ॥ अत
यानुपि तप्रकृतेर्विकृतावधिकारित्वेन तत्तदानस्य सर्वदानप्रकृतित्वेनाकृततुलादानस्यापदानान्तरेऽनधिका

॥ राम ॥
॥ ३६ ॥

रित्विग्भ्रमंगान् ॥ पुरणानि थिमिनि ॥ भद्रादिदोषरहितां महास्नानयोग्यां पूर्वोक्तगुणगणादिरूपां ॥ आसाद्य आसन्नां ज्ञा
त्वा ॥ महादानादिनात्पूर्वदिनं शप्येमर्थः ॥ ब्राह्मणवाचनं पुण्याहवाचनं ॥ आगवंनेचमध्येचकुर्यात् ब्राह्मणवाच
नं ॥ गादोकर्मारंभे ॥ अन्नेदानान्ते ॥ मध्ये अधिवासनांते ॥ अरत्निमात्रमिति ॥ अत्रारत्निशब्दोहस्तपरः ॥ अंगुल
स्यप्रमाणंतु षड्यवाः पार्श्वसम्मिताः ॥ चतुर्विंशांगुलो रत्निस्तदर्द्धं वितनिः स्मृता इति मदनरत्ने कात्यायनः ॥ शाद
शांकरज्ञानि परं ॥ यस्मिन्देशे च काले च सम्मता यथा यवाः ॥ तेषाम् ष्टोदरारणांस्यादंगुलं तद्विजन्मनां ॥ स श्रेष्ठद
रैस्कम्भ्रज्ञराणां शंकरादेयथा रत्नेरिति मेरुतंत्रवचनात् ॥ चतुर्भजाननमिति ॥ चत्वारि भद्राणि शोभनानि आ
सनानि द्वाराणि यस्मेत्यर्थः ॥ संपूर्णाकुंभानीति ॥ जलपूर्णशानि कलशावंतीत्यर्थः ॥ महासनानीति ॥ होतृब्र
ह्मोपवेशनार्थं आसनद्वयवंति ॥ सुनाग्रेनि ॥ आज्यस्थालीनि लस्थालीरूपनाम्रपात्रद्वयपुनानि ॥ सप्यज्ञपा
त्राणि प्रोक्षणादीनि काष्ठमयानि ॥ नवनाम्रमयत्वं प्रोक्षणपादिद्वयेभवन्ति निवाच्यं ॥ नत्र काष्ठमयत्वविधा

॥ विभ ॥ नेनाविरोधसंभवेविरोधायोगात्॥सविद्याराशिासकुशानि॥अथवानन्नदन्विकमधुपर्कार्थविष्टरसहिता
॥ ३७ ॥ नि॥अनेनचकुंडसमीयेमधुपर्कःकार्यइतिद्योतितं॥पुष्पेति॥वह्निज्ञान्विकपज्ञार्थकपुष्यधूपाधुपहारपु
क्तानि॥पूर्वोक्तरेखनिमहावेद्याईशान्याभित्यर्थः॥नक्षत्रणंपूर्वमुक्तं॥यज्ञादिति॥अज्ञादिपदेनाधिदेवता
दि॥अर्चेति·अर्चापतिमा॥नक्षत्राणामुक्तानि॥एतेनेनवग्रहस्थिवाज्ञातानांपतिमानियमः॥फलमाल्यव
स्त्रैरिति·गंधादीनामप्युपलक्षणं॥लोकेशेति·लोकेशावर्णाःप्रागुक्ताः॥मात्स्यानुक्तत्वात्पूर्वोक्ताध्वजानाव
स्थपकाःपरितः॥मंडपसमंतात्॥पतत्कालक्षणमुक्तं॥द्वारेष्वितिक्षीरिवनस्पतयःपूर्वमुक्ताः॥द्वारेषुकुं
भद्वयमिति॥सर्वद्वारसंभसमीपइत्यर्थः॥स्त्रगंधेत्यादिसमस्तप्रकारोपलक्षणार्थमितिकेचित्॥अप
रेतुयथाश्रुतमेवकुंभोपकरणानीत्याहुः॥नन्मध्येतोरणंकुर्यादितिसामान्यतउक्तंतुलातोरणंविशेष्य ॥ राम ॥
ति॥शाकेति·शाकःसायः॥इंगुदीइंगुदाः॥पुत्रंजीवइतिरूपनारायणाः॥श्रीपर्णीकंभारीप्रियकस्तमालः॥ ॥ ३७ ॥

कद्देवश्च निकेचित्॥ अंजनो अंजनः कंचनारतुल्य पत्रो वृक्षविशेषः॥ स्तंभद्वयमिति॥ इदंच स्तंभद्वयं पूर्वप
श्चिमयो दक्षिणोत्तरयोर्वा निखेयं॥ दक्षिणोत्तरस्तु वर्णस्यादुत्तरेण तराधिप इति गोपथब्राह्मणास्य॥ यानार्थे इ
त्यमाराण्य पूर्वशिकोत्तु पोनमइति स्कान्दस्य च मात्स्याविरोधात्॥ अवस्थानं मध्यगतं॥ उछ्रितं भूम्युपरिखर्व
मानं॥ तथा च सप्तहस्तस्तंभमध्ये हस्तद्वयं निखननं॥ एकहस्तचूडा॥ चतुर्हस्तो मध्यः॥ तथा च दामोदरीये हृ
न्वारदः॥ हस्तद्वयं तु वैखानं मध्ये हस्तचतुष्टयं॥ हस्तमात्रं प्रमाणं तु स्यादूर्ध्वं यक्षयोर्द्वयोः॥ चतुर्थ्वनिच पार्श्वेषु
मानं स्याच्चतुरंगुलमिति॥ एतेन तोरणकाष्ठत्रयस्यापि चतुरंगुलचतुरस्रतोक्ता॥ यत्तु पामोदरेणोत्तरंग
स्य चतुरंगुलं चतुरस्रत्वं स्तंभयोस्तु दशांगुल स्तत्रेणावर्त्तलस्थौल्य मात्रावारत्तु रोधादि त्युक्तं तत्प्रमाणाभावाच्चि
न्त्यं॥ उत्तरंगं स्तंभद्वयोपरिकाष्ठं॥ तदंगं तत्सजातीयं॥ तुलालक्षणामाहस्यमानेति॥ स्तंभद्वयसजातीयकाष्ठ
निर्मितेत्यर्थः॥ अवलंब्याउत्तरंगलग्नाकृष्टे अंगुष्ठेनावलंब्येत्यर्थः॥ अंकुटप्रमाणं वक्ष्यते॥ पुरुषेणगोविंदप्र

॥ वि भ ॥
॥ २८ ॥

ति मया॥ नखक्षतए मुक्तं॥ तुलाप्रमाणामाह द्वेदैर्घ्यएगेति॥ पृथुत्वं स्थौल्यं दशांगसूत्रवेष्टनपरिमितवर्तुलत्वं॥ मध्ये
प्रांतयोश्च उक्तस्थलत्वापरित्यागेन वज्रस्येति दाक्षिणात्याः॥ वर्णाकुलावन्तर्वा वर्तुलेति दामोदरः॥ सुवर्णेति॥ य
थाशक्ति मध्ये प्रांतद्वये सुवर्णपत्राभरणयुतेन्यर्थ इति दामोदरः॥ सलोहेति॥ लोहयाश्चद्वयेन वर्त्तितया शृंख
लाभिर्युतेन्यर्थः॥ शृंखलाः लोहस्य नत्वेव निरूपपदप्रयोगात्॥ शृंखला स्त्रिस्वश्च नपुंसा वा॥ सुवर्णेनेति शोभा
र्थं मुखे सुवर्णमिति दानसागरः॥ रत्नमालां कण्ठहारः॥ विश्वकर्माणि॥ तुलाप्रमाणं स्मृतमंगुलानि द्वे दैर्घ्यं खि
ले षस्मवति प्रमाणो॥ प्रांतद्वये त्वंगुलपद्ममुक्तं मानं तुलास्थोन्नरमंगुलानां॥ सुर्विंशतिः पंचचधातुवं धावंधेष्ठ
धिष्ठानसुराणि वेश्याः॥ ईशः शशी मारुतरुद्रसूर्याः स्याद्विश्वकर्मा गुरुरंगिरोग्नी॥ प्रजापतिर्विश्वजगद्विधा
ता पर्जन्यशंभुपितृदेवतानां च॥ सोमश्च धर्मो मरराज साश्विज्ञले शामित्रावरुणो मरुद्गणाः॥ धनेश गंधर्वजले
शविष्णुरेते च जपविधानिरेव देवाः॥ स्यान्मध्ये च विप्रः पुरुषः सरस्कोपस्तोत्यमानस्फलयामहान्मा॥ रत्नाविधेया

॥ राम ॥
॥ २८ ॥

स्तपनीयमथवारत्नाश्चिता दैवज्ञमूर्त्तयस्ता: ॥ षडंगुल: स्याच्चतुरस्रपिण्ड: प्रान्तद्वयेविस्तरनंननामा ॥ तुतोर्द्ध्वभा
गेकलशद्वयंस्यात्तथांकुठद्वंद्वमधस्तलान्ते ॥ षडंगुलोयंकुठकश्चपिंडोयेकांगुलोविस्तरनंननामा ॥ पाशद्वयं
तच्चतुरंगुलंस्यादेवंमयानेकथितंप्रमाणं ॥ मध्यांकुटेसंकलितानांगुलानि पंचाधिकाविंशतिरेवदैर्घे ॥ एकांगु
लोस्याभवतीहपिंडस्तत्राधिदेवः किलवासुकिः स्यात् ॥ एकैकरज्जुस्तंभनेंगुलानि त्रिःसप्तनिपिंडगतांगुलाव
तच्चेलकद्वंद्वमथांगुलानि त्रिंशत्तथापंचदशाधिकास्यात् ॥ नक्षत्रवंधंभ्रभकाष्ठवाठपिंडेगुलद्वंद्वमथोवि
धेयं ॥ अथद्वयेस्मिन्नधिदेवतास्यात्तुलांनरेभ्यमिथनिर्निवेश्यइति ॥ ईशादिदेवतावाहनंमात्स्यात्तुकत्वाहना
वश्यकमिमिगिरामोदरः ॥ विशेषोलैंगे ॥ भल्लजोनुद्दढौविधानंबंधनेनतुकारयेत् ॥ शिक्याधस्तात्सकर्त्तव्यौ पंचप्र
देशविस्तरौ ॥ सहस्रेरात्तकर्त्तव्यौयलेरोधारकावुभौ ॥ शनाद्द्केनवाकुर्यात्तलानांषट्शतेनवा ॥ चतुस्तालप्र
विस्तारंमध्यमंपरिकीर्त्तितं ॥ सार्द्धत्रितालविस्तारंकनीयश्चविधीयते ॥ पंचमात्रंचतुर्मात्रंत्रिमात्रंफलमुच्यते

॥ वि·भ॥ ॥३९॥

चतुर्धारससमोपेनं द्वारमंगुलिनाथवा॥ कुंडलैश्चसमीपेनंश्चभ्रणसिक्कसमन्वितैः॥ कुंडलेकुंडले कार्यंश्रृंखलाप
रिमंडितं॥ श्रृंखलाधारवलयमवलंबेनयोजयेत्॥ प्रादेशं वा चतुर्मात्रंभ्रमिंमत्काववलवयेदिति॥ श्रृंखलानाम्रं
आधारकौ· यजमानसुवर्णाधारणार्थे याचे॥ पूर्वशिकोनत्पोन्नमइनिस्कांदान्॥ शिक्यमपीत्यपि॥ अंगुष्ठमध्य
मांनरंजतः॥ चक्रमिति षोडशारमित्यर्थः॥ पुष्पकीर्णामिति॥ षोडशारं पुष्पविकीर्णां कुर्यादित्यर्थः॥ नतिर्मारां
प्राग्वत्॥ होमन्वतुष्टयमिति कुंडचतुष्टयाभिप्रायं॥ होमद्रव्यं तत्र यथ्याज्यं द्रव्यमनादेशे होमे घृतं विधीयते॥
मंत्रस्य देवतायाश्च प्रजापतिरिति स्थितिरिति द्रुगोगपरिशिष्टात्॥ आज्यमेव गृह्यते तथापि तिलाज्यपुष्पधूपो
पलराशीन्यभिधानात्तिलानां द्रव्यंत्वं॥ कात्यायनः॥ पायसंतु निर्धान्यदध्यापर्व पूरिका रसादिना चेद्भुवमात्रपरि
का॥ देवेन तीर्थेन च हूयते हविः स्वंगारिणि स्वर्चिषि तच्च यावके॥ विशेषो गोभिले॥ उक्ताने नैव हस्तेन अंगु
लाग्रेणपीडितं॥ संहतांगुलिपाणिस्थवाग्यतो जुहुयाद्धविः॥ देवीपुराणे॥ होमेभोजनकाले च संध्यायो रुन

॥राम॥ ॥३९॥

योरपि ॥ स्थावोनःपुनरावामेदस्तत्तु सहकस्महकृत् ॥ गणाधिपतये देयाप्रथमाहुतिराहुतिः ॥ अन्यथा विफलं विप्र
भवतीह न संशयः ॥ नवैव ॥ होमे यज्ञादिपूजायां शतमष्टाधिकं भवेत् ॥ अष्टाविंशतिरष्टौ वा यथाशक्ति विधीय
ते ॥ अष्टोत्तरसहस्रं वा नत्वं ख्यापरिकीर्त्तिता ॥ षट्कने अष्टोत्तरशतमष्टाविंशत्यष्टान्यतमान्वयो नापरस्य ॥ स्व
कस्यां एवोकर्तुमशक्यत्वात् ॥ अत्र इदमप्यवधेयं नमने स्वाहाकारणानंतरमाहुतिप्रक्षेपः कार्य इति केचित् ॥ सवष
त्रिकुंडपक्षाहुतिकर्तुमशक्यत्वादेकदैव होमारंभकाले कार्यः ॥ तथा स्नानस्कवरूपणसेतु हुनोमि ॥ ध्वियं हरेत्
भुंजानस्य यमस्त्वायुस्तस्मात्तद्वा हरेन्निष ॥ स्वमंत्रतत्वानि स्वस्वशाखीयमंत्रैरित्यर्थः ॥ तत्र देवताप्रकाशके रित्य
त्र ॥ जपादीनि होमकाले जप्यानीत्यर्थः ॥ गंधपुष्पैरलंकृत्य स्वरयातान्समंततः ॥ पठध्वमिति नानारूपादावायं
स्वभिपूजयत् ॥ यजध्वमिति वयूयाश्वातकान्ननेरेवतु ॥ उत्कृष्टमंत्रजप्येनेति स्वध्वमिति जापकानिति नडागो
न्सर्गस्थमान्स्सहोन्तुसाह्वपैराजापकानां नियोगदर्शनात् ॥ यथास्वरूपमिति दशावैयंचर्वैमिमादिनन्तनत्व

रूपमननिक्रम्येत्यर्थः॥ होमावसानइति अत्रचावाहनपदं पूजनस्याप्युपलक्षकं गृहीत्वा बलिपुष्पधूपामेत्युप
क्रमात्॥ इदंचावाहनादिमहावेदेः पूर्वादिदिक्षुनिदामोदरः॥ अत्रयजमानयुक्तश्लेनेननस्थाप्यावाहनादिकर्त
व्यं॥ अन्यथाहत्यावाप्रस्तुरानस्यादन्विग्भ्योहेमंभूषणमित्याद्युक्तिमग्रंथानुपपत्तेः॥ त्रैलोक्येयानीत्यादिइदंच
पूजनमाचार्यात्मंडपपूर्वद्वारीतिदामोदरः॥ नत्वमंत्रैरेवनमंत्रनाम्नोःसमुच्चयः॥ आह्वानिकल्पनेमानाभावा
त्॥ केचित्तुपत्नेकमेवत्रैलोक्यस्थेभ्यस्थावरेभ्यइतिक्रमेणपूजनमाहुः॥ दिग्गणामिति॥ दिग्गणमूलकंनत्संख्या
कंवेत्यर्थः॥ जयेयुरिति॥ अधिवासनसमाप्तौपुनर्जयेयुरित्यर्थः॥ नवेषितार्थिन॥ एवमधिवासनंकृत्वानेस
वैनत्रैवमंडपेउषितास्युरित्यर्थः॥ उपोषिताइतिपाठेप्ययमेवार्थः॥ अथवाकृतोपवासाइत्यर्थः॥ अस्वास्थ्यादौ
तुसद्योप्यधिवासनं॥ सद्योधिवासनमपिकुर्याद्योषितकलेंद्रियइतिदामोदरीयवचनात्॥ एतेनोपरागादाव
पिसद्योधिवासनमितिदामोदरः॥ अधिवासनप्राक्स्यवासवाविन्याह्निकांनेरदानमितिग्रहकालत्वमिति

सर्वे निर्बंधाः॥ पिंडवरणस्य अधिवासनशब्दस्य अधिवास्यंते देवा अस्मिन्निति कर्मणि योगरूढत्वेन ननो मंगल
शब्देनेत्यत्र न नः शब्दस्य अधिवासनाव्यवहितानंतर्पवाचित्वाद्वा नानामेकाद्दसाध्यत्वमिति मात्स्याशयइत्याहुः
आद्यविनिकुर्यादिति निर्णयः॥ मध्ये अधिवासनसमाप्ताविन्यर्थः॥ इदंचाधिवासनस्याहे राजनाधनत्वेशान्तः॥ अ
न्यथानदानीमेव॥ यम॥ पुण्याहवाचनं दैवेज्ञस्मरणस्य विधीयते॥ एतद्देवनिर्णयकारं कुर्यान्मक्षत्रियवैश्ययोः॥
ततस्त्यादि मंगलशब्दो मृदंगादिध्वनिर्मंत्रघोषाभ्य स्नापितइति वैदिकपौराणमंत्रैः शान्तिकलशोदकेनाभिषि
क्तइत्यर्थः॥ अभिषेकदेशो मंडपेशानभागे॥ अथ यजमानो यह्वेषाः सागृहीत्वा भुवो देवोइत्याश्वलायनवच
नात्॥ अनुमंत्रणं च पश्चादुपविष्टेन कर्तव्यं॥ कुसुमांजलिं चानुमंत्रणोत्तरं तुलोपरिक्षिपेत्॥ अन्यथाविनि
योगात्॥ पुराणं कालमित्याद्यनुवादः॥ प्रदक्षिणां कृत्वेति त्रिरिति पूर्वोक्तं संबध्यतइति केचित्॥ आरुह्येदित्यु
त्तरफलकइति शेषः॥ दक्षिणेन सुवर्णस्य उत्तरेण राधियञ्जनिगोयथवासस्नान्॥ सत्वकेनिपुष्टहेतिक

त्तद्विषयं॥ननुखड्गादीनांराजधर्मत्वमनयाराज्ञाषोडशराजनानिनंदिनाकथितानिच॥जलाधिरोहणाधानिष्टगुना
निपथ्यानथं॥आरोहयेद्विधानेनरूद्राध्यायेनवैनृपमितिनिर्लिंगान्॥पुष्पिकामस्कुर्वीतनृमिसंस्थंनराधिप(
इतिमात्स्यात्क्षत्रियाणामेवतुलादानाद्यधिकारइतिचेन्न॥वर्णानामाश्रमाणांचचातुर्वर्ण्येयुधिष्ठिरेस
त्रचातुर्वर्ण्यपदेनसर्वेषामधिकारबोधनात्॥अतोराजयदंतिकसमवायेनक्षत्रियाद्यवज्ञाराजपरः॥
नराधिपनृपादिपदंतुयौगिकत्वादविरुद्धमेव॥धर्मराजमिति॥धर्मराजंसव्येनसूर्यंदक्षिणेन॥सौवर्णंच
मेराजंतुसव्येधृत्वाकरेणतः॥भास्करंदक्षिणेचैवमुष्टिनेध्यापयत्नतइतिरामोदरीयवचनात्॥हरेनितु
लामध्यस्थितगोविंदपुत्तिमायाइत्यर्थः॥नतोयरइति॥अत्रावरोहणानंतरंनतोयरेतुलाभागइत्यभिधा
नाद्यजमानाधिरोहणानंतरंसुवर्णप्रक्षेपःसिध्यति॥नयनीयमग्रतःकृत्वापश्चात्तौलोनराधिपइतिगोप
थब्राह्मणांतुसुवर्णमानीयेत्यर्थादविरुद्धं॥पुष्पिकामइतिगुणफलसंबंधः॥ततोवतीर्येत्यादि॥निवेदयेत्स

वेदव्यासैकदासंकल्पं कृत्वा गुर्वादिभ्यः प्रतिपादयेदित्यर्थः ॥ दामोदरदानसागरे ॥ निवेदयेत्स्वसदस्यादित्यर्थेह
त्वा संकल्पद्वयमिति निरूप नारायणरत्नाकरपृथ्वीचंद्रोदयहेमाद्र्यः ॥ यत्तु नवा वस्त्रानिमिश्रैः संकल्पद्वयेदान
द्वयपक्षे तेषां माधं तुलादानमिति बोधितदानैकत्ववाधश्चानुक्तं नन्विष्टं ॥ राजसूयवत्सुदाये एकत्वान्नवप
संभवादिति ॥ पितृचरणास्तु आत्विग्भ्यो परमर्शमित्यनेनाष्टौ संकल्पा विधीयंत इत्याहुः ॥ अपि नाम ह्रदवरणास्तु
एकसंकल्पपक्षे सर्वर्त्विक्हस्ते परिगृह्य संकृत्वा संकल्प इति वदंति तुलातो ऽवतीर्य तुलाद्रव्यमर्द्धं गुरवे ऽर्द्धम्
त्विग्भ्यो देयमिति संप्रदायार्थः ॥ सामेति ॥ नवग्रामार्त्तनेके ॥ एकोगुरवे ऽन्यत्विजामेक इति नद्वयमिति मन्ये ॥ सर्वे
षामेक इत्यपरे ॥ अन्ये केचित् ॥ अनेन ग्रामादि दानेन पूर्वोक्तार्धार्द्धदानेन विकल्पः ॥ तथा च गुर्वादिभ्यो ऽर्द्धा
र्द्धं न देयं किंतु तेभ्यो ग्रामादि दत्वा तुलाद्रव्यं तेभ्यो ऽन्येभ्यो ऽपीच्छाकृत विभागेन देयमपि शब्दात् ॥ यत्तु दामोदरे ०
रामास्मिन्नपि पक्षे गुर्वृत्विग्भ्यो ह्येनार्धार्द्धसंकल्पो तुलादानस्य दृष्टार्थत्वादित्युक्तं तन्न ॥ तस्याशैकरणा तु ज्ञानवद्

दृष्टार्थत्वात् ॥ दीनानाथेत्यादिना अन्येषु दर्शितान् इत्याहुः ॥ आत्रेयहिरण्यदानवत्तुलादानांगभूतमदृष्टार्थं ग्रामा
दिदानमित्यन्ये ॥ दक्षिणात्वेन दानमित्यपरे ॥ केचित्तु ग्रामादीनां दक्षिणात्वाश्रवणात् ॥ आत्मालंकारंकत्रे द(
ग्रामसहस्रं दक्षिणा ग्रामवरं वेति निगोपथब्राह्मणे साकाक्षसहस्रधावत्स्य सुवर्णविषयत्वावधारणात्सर्वे
षामेव दानानां सुवर्णं दक्षिणा परेति श्रवणात्तन्नत्संख्याकसुवर्णस्य दक्षिणात्वेन दानं पश्चात्तु ग्रामादिदा(
नमित्याहुः ॥ अत्र पितृचरणाः ॥ सहस्रसुवर्णा दक्षिणा विधायकगोपथब्राह्मणस्य देयद्रव्यान्तरनीयां ग्राद(
क्षिणां परिकल्पयेत् ॥ अत्र तु दक्षिणादाने दशांशं वापि शक्तित इति स्कांदेनोपसंहारात् ॥ सहस्रत्रयसुवर्णे
स्तोलनं नहि विषयमिदं ॥ न च गोपथब्राह्मणस्य तुलादानविषयस्य सर्वदानविषयेण स्कांदेनोपसंहार इ
ति वाच्यं ॥ अस्यापि सहस्रत्रयासहस्रत्रयगोलनविषयत्वेन सामान्यशास्त्रत्वादित्याहुः ॥ यत्तु मदनरत्ने गोपथे(
ब्राह्मणोक्तं संख्यारत्नेष्ठत्वेनीमुक्तं ॥ नदत्युक्तं ॥ ग्रामेपि न दत्वया पत्ने ॥ प्राप्येति ॥ अतज्ज्ञानस्यादृष्टार्थत्वा दस्य

द्रव्यं धिनानाथेभ्यो देयमिति केचित्॥ अनुज्ञानस्य द्रव्यार्थत्वात् गुर्वर्त्विग्भ्यो यथाशक्ति दत्वाऽवशेषमेवान्येभ्योपि देयमि
त्यन्ये॥ तन्मक्षे च पूर्वोक्तो विभागो नास्ति॥ पूजयेत्॥ दानेनेति शेषः॥ शेषं स्पष्टं॥ अत्रापि तत्त्वदर्शनाः हिरण्यग
र्भपरिमाणे कामिको क्रमः षिस ह्वस्व कर्षादि सुवर्णपरिमाणं मात्स्यानुक्तत्वात्तस्य चान्येनानुपसंहारादनावश्य
कमिति सर्वनिबंधाः॥ तथा चात्रापि यत्नाका परिमाणश्च जनतुलान्येरणारोपरणादि क्रियमयजमानसुवर्णाधार
पात्रयोः साम्ययत्वतुलावंधेषु देयतावाहनाष्टकुंडादि सर्वं मनावश्यकमिमाहुः॥ ॥इति श्रीमन्नारायण
भट्टसूरिसूनुश्रीमद्रामकृष्णभट्टात्मजदिनकरभट्टसूनुविश्वेश्वरकृतायां विश्वेश्वरीपद्धतौ तुलादा
नविधिः॥ ॥अथ मात्स्योक्तत्वाच्चतुःकुंडीयपक्षे रत्नतुलादानप्रयोगः॥ ॥कर्त्ता शुभदिने मंडपदेशे गत्वा गणपति
कूर्मपृथ्वीः पूजयित्वा ताम्रपात्रेपु ध्यादिपुत्तमर्घं गृहीत्वा॥ आगच्छ सर्वकल्याणि वसुधे लोकधारिणी॥ उद्धृतासि
वराहेण सशैलवनकानना॥ मंडपं कारयाम्यद्य तत्त्वं दूर्ध्वं शुभलक्षणं॥ गृहाणार्घमया दत्तं प्रसन्ना शुभदा भवेत्य

॥ वि·भ ॥ र्घं दत्वा पूर्वोक्तप्रकारेण भूसमत्वप्राचीसाधने कृत्वा पूर्वोक्तोत्तममध्यमाधमानामन्यतमं मंडपं कुर्यात् ॥ मात्स्ये तु विं
॥ ४३ ॥ शत्यष्टादशहस्तो नोक्तो ॥ मंडपकरणं च यंच शंकुविहरेण वज्रसूत्रं कृत्वा मंडपकरणं त्रेधा विभज्यांकयित्वां तां च
तुर्दिक्षु पातयित्वा विहृष्टकोणेषु वच्चूडांत्यक्त्वा पंचहस्तान्तं भान्त्यजान् ॥ ततस्तां कोणाभ्यसृतीयभागे पातयित्वा
मध्यगततत्संपातेषु चतुरः स्तंभान्नवूदंन्यक्त्वा षड्हस्तान्विस्तरेन ॥ ततोदिक्षूत्तममध्यमाधमेषु अष्टांगुलाधिक
द्विहस्तचतुरंगुलाधिकद्विहस्तद्विहस्तमितानि द्वाराणि कार्याणि ॥ ततस्तंभेषु निर्यक्काष्ठानि दत्वा मध्ये कलशा
कारमुत्संकृत्वा कटैर्मंडपं पछादयेत् ॥ ततो द्वाराद्बहिः करमात्रे मध्यश्चोदुंबरप्लक्षवटकाष्ठैः कृतान्तुत्तमादि
षु सप्तषट्पंचहस्तप्रमाणान्तोरणस्तंभान्निखनेत् ॥ सर्वस्तंभानां स्थूलता द्वाणांगुलसूत्रेण कार्या निखननं
पंचमांशेन ॥ ततस्तडयोरिक्रमेणोत्तमादिषु सार्धद्विहस्तसपादद्विहस्तमितफलकानि दत्वा तडयष्टिंशांखच ॥ राम ॥
क्रगदपद्मानि कार्याणि ॥ कर्मणः कर्तुर्वा शेवत्वेविभ्रतान् ॥ तेवनवांगुलदीर्घाः ॥ एवं मंडपं कृत्वा तन्मध्ये सपूक ॥ ४३ ॥

रां पंच करां वा हस्तमात्रोच्छ्रितां हेमाद्रिमते वितस्तिमात्रोच्छ्रितां वेदिं कुर्यात् ॥ ततो वेद्याश्चतुर्दिक्षु सूत्रममध्यममंड
पयोः संचारार्थं सपादकरं मेखलार्थं च नवांगुलानि विस्तारय पूर्वादि चतुरस्रार्द्धचंद्रहस्तत्रपद्माकाराणि सर्वाणि वा
चतुरस्राणि हस्तानि वा हस्तमितानि कुंडानि कुर्यात् ॥ तत्र चतुरस्रप्रकारः ॥ पूर्वमुक्तः ॥ अर्द्धचंद्रं तु प्राचीसूत्रं
चतुर्विंशतिधा विभज्य पूर्वतः पश्चाच्च पंचांगुलानि मुक्त्वा मध्ये एकोनविंशत्यंगुलव्यासार्धेन पश्चिमतो हस्तत्रा
र्द्धं कृत्वा पूर्वभोज्या समनया पानये दिति ॥ हस्तकुंडं तु सार्द्धत्रयोदशांगुलेन व्यासार्द्धेन भ्रमणं कुर्यादिति ॥ प
द्मकुंडं चतुरस्रं कृत्वा चतुरंगुलषडंगुलनवांगुलद्वादशांगुलपंचदशांगुलमितैर्व्यासार्द्धैः पंचवृत्तानि कृत्वा ते(
षु चत्वार्यष्टौ वा दलानि कुर्यात् ॥ चतुर्दलपक्षे तानि विदिक्षु अष्टदलपक्षे तानि दिग्विदिगंतरालेषु ॥ तत्र प्र
थमे वृत्ते कुंडविस्तारचतुर्थांशोन्मितां कर्णिकां द्वितीयके शराणि तृतीयचतुर्थयोर्दलमध्यानि कृत्वा पंचमे
दलाग्राणि कुर्यात् ॥ तत्करणप्रकारस्तु पिनामशंकौ लिख्यते ॥ अष्टदलपक्षे दिग्विदिक्कंदंतरालेष्वेवो(

॥ वि॰भ ॥
॥ ७५ ॥

सूत्राणि दत्वा वा षड्वृत्तसंबंधिनो दिग्विदिक्स्थसूत्रां कस्पउयांत्वृत्तसंबंधिनश्च दिगंकस्य यावदंतरं तावता सूत्रे
ण कर्कटेन वा उभयांकतउयांत्य वृत्तमध्ये कर्पित्वा वहिर्भ्रामयेत् ॥ एवं दलाद्यार्द्धं कुर्यात् ॥ एवं चतुर्दलपक्षे दिग्वि
दिक्षु चत्वारि सूत्राणि दत्वा दलाद्यारिण कुर्यात् ॥ स्त्रीकर्त्तृकदानादौ तु सर्वाणि योनिकुंडान्येव ॥ तत्र कारस्कचतु
रस्रं कृत्वा प्राचीसूत्रं पूर्वतः पंचांगुलानि वर्द्धयित्वा तदंताउदक्सूत्रां तयोः सूत्रे दद्यात् ॥ ततः कर्णसूत्रचतुर्थां
शेन षष्ठीचांहत्वार्द्धचंद्रं कुर्यात् ॥ ततः सर्वकुंडानां मेखलाः कुर्यात् ॥ तत्र प्रथमायामुच्चता विस्तारो ऽष्टांगुला द्वितीया
यां त्र्यंगुलो तृतीयायां चतुरंगुलौ सर्वात्रवा ॥ ततः पूर्वदक्षिणकुंडयोर्दक्षिणतः पश्चिमोत्तरकुंडयोः पश्चिमतः कुं
डार्द्धदीर्घं कुंडत्र्यंशार्द्धेन पश्चिमतः क्रमतहृत्वार्द्धचंद्रं कुंडमध्ये एकांगुलप्रविष्टां पश्चिमतः क्रमतनालमेकांगुलव
संयोनिं कुर्यात् ॥ ततो मंडपेशानतवमभागमध्ये हस्तमितां हस्तोच्चां सर्वशममग्रामं वा वेदिं कुर्यात् ॥ ततो नै
र्ऋतेनार्द्धमेव वास्तुवेदिं कुर्यात् ॥ ततः षोडशारं कुर्यात् ॥ तद्यथा वेद्युपरि मध्ये त्रिहस्तायाम त्रिहस्तविस्तारं

॥ रान ॥
॥ ४४ ॥

नवनवरेखाभिः चतुःषष्टिकोष्ठात्मकं चतुरस्रमुद्धरेत् ॥ एवं चतुर्नवनवांगुलकोष्ठानि संपद्यन्ते ॥ ततोन्त्यपंक्तिषु
चतुर्दिक्षु कोष्ठद्वयद्वयं मक्रमा चत्वारि मध्यकोष्ठानि मार्जयेत् ॥ ततउपान्त्यपंक्तिषु पार्श्वयोः कोष्ठत्रयं त्रयं म(
क्रामध्यकोष्ठद्वयं द्वयं मार्जयेत् ॥ तेन चतुर्दिक्षु षट्पदानि चत्वारि द्वाराणि भवंति ॥ ततो मध्येस्थितकोष्ठषोड
शके मध्यानि चत्वारि कोष्ठान्यवशिष्य परितः पंक्तिचतुष्टयस्थितानि द्वादशकोष्ठानि मार्जयेत् ॥ पद्मपीठं ॥ त
तो वाह्यपंक्तिषु एकैकं कोणकोष्ठं विहाय द्वारांतरालवर्तीनि यंचपंचयपदानि मार्जयेत् ॥ तेन मध्यस्य चतुरस्र
पीठस्य पादाः स्युः ॥ ततो मध्यकोष्ठचतुष्टयं मार्जयित्वा तन्मध्ये त्रयोदशांगुलमितेन व्यासार्द्धेन षड्विंशत्यंगुलं वृ
त्तं संपाद्य तन्मध्ये द्वादशांगुलमितेन चतुर्विंशत्यंगुलं वृत्तं संपाद्य पुनस्तन्मध्ये चतुरंगुलमितेनाष्टांगुलं वृत्तं कृ
त्वा तन्मध्येपि षडंगुलमितेन चतुरंगुलं कर्णिकात्मकं वृत्तं कृत्वा तत्पीठंनरजसापूरयित्वा तदवधि रेखां सितेन
रजसा कृत्वा तद्बहिरष्टांगुलात्मके वृत्तेपीतरक्तसितरजोभिः संपादितमूलमध्याग्राणि षोडशकेसराणि कुर्यात्

तदवधिरेखामपिसितेनरजसाकृत्वाचतुर्विंशत्यंगुलात्मकेनतद्बहिर्हस्तेनसितेनरजसाष्टदिक्षुरेखायाराणष्टौपाद्याणि
हरितेनरजोरंजितान्यग्राणिकृत्वांरत्नांतरेखामपिसितेनरजसाकृत्वातद्बहिरेकांगुलव्यवहितांवहिर्हस्तरेखामपि
तेनैवरजसाकृत्वाहस्तद्वयांतरपरितोष्टदलायसंधिविहैःषोडशधाविभज्यप्रतिभागंयवाकारानूषोडशारा(
न्श्यामपीतारुणरजोभिःकृत्वातदंतर्यथाशोभंरजोभिःपूरयेत्॥ तद्बहिःसितपीतारुणश्यामहरितैःपञ्च
रेखालिखेत्॥ तद्बहिःपीठक्षेत्रंचतुरस्रंयथाशोभंरजोभिर्भूषयित्वापीठावधिरेखांसितेनरजसाचतुरस्रां
लिखेत्॥ वारक्षेत्राणिपूर्वादितःपीतश्यामश्वेतहरितरजोभिःपूरयित्वाग्नेयादिकोणकोष्ठचतुष्टयंलोहित
हरितश्यामधवलैःपूरयेत्॥ आग्नेयादिपीठपादचतुष्टयंक्रमात्सितरक्तपीतकृष्णरजोभिःपूरयेत्॥ ततः
सितेनरजसांगुलोत्तरेणवीथ्यश्चतुरस्रेरेखांकुर्यादिति॥ ततोवेद्युपरिपूर्वपश्चिमयोःसमांभूमिंविहायस(
मंततश्चतुरंगुलंचतुरस्रंसप्तहस्तंहस्तचतुष्टयांतरालमुक्तकाष्ठस्तंभद्वयंनिखेयं॥ सप्तहस्तमध्येभूमौह(

स्तदयं ॥ रफकटस्तस्य चूडा ॥ ततस्तस्य हृदामेवोत्तरंगं पंचहस्तं षडंगुलदीर्घतो हकटकयुतं दद्यात् ॥ ततः सार्द्ध
चतुर्हस्तां द्वादशांगुलसूत्रवेष्टनयोग्यां मध्येपान्तयोश्चतुरंगुलं त्वतुरस्रां मन्यत्र वर्तुलां शान्तयोरधः कनकटकां
मध्येचोपरिकनकषडंगुलां कटकामुत्तरंगे वलंवयेत् ॥ एतानि चत्वार्यपि काष्ठान्येकजातीयवृक्षजानि ॥ तेव(
हृक्षामात्स्यानुज्ञेया: ॥ ततस्तलां तुलासमदीर्घैः यथाशक्तिसुवर्णपट्टैः संयोज्य पंचविंशति सुवर्णपट्टैर्वेधये(
त् ॥ ततस्ता स्त्रयतानां सहस्राष्टशतनवष्टशनैः क्रमात्पंचचतुः सार्द्धत्रिपादेशविस्तारं वर्तुलं पंचचतुरंगस्रांगुलो
छ्रितं भृंरवलानि वेशार्थं चतुर्भिर्वलयैरन्वितमाधारद्वयं तोरणभ्रंरवलाचतुष्टयेन तुलापां नेवलंवयेत् ॥ मा(
त्स्येनाप्रमयाधारानुक्तैः काष्ठमयावपितौ भवतः ॥ आधारभूम्योः चतुरस्रांगुलं प्रादेशमात्रं चान्तरं कार्यं ॥
ततो यजमानो दानदिनात्पूर्वदिने आचार्यत्विग्भिः सहोपवासं क्षौरेकृत्वा देशकालौ संकीर्त्य ॥ ॐ प्रतिलो(
काधिपस्यानाधिकरणकैकमन्वन्तर रत्नदुत्तरार्कवर्णाकिंकिणीजालमालिविमानकरणकवहुत्सरः पूज्यमा

नाम्यकर्तकविघ्नपुरंगमनकल्पकोटिश्चनावच्छिन्नविघ्नलोकमहिनत्वनउत्तरेहलौकिकभूयात्समौलिमरंजि
नयाद्पीठश्रद्धाविनसहस्रयाजिदीक्षयनायजिनमहीपतोकराजराजत्वभवनकामः श्वसद्योवातुलांपुरुष
मखदानंप्रनिपादयिष्येइतिवा ॥ नदंगनयागशेषपूजनंगोविंदोमापतिविनायकपूजनंपुण्याहवाचनं
मातृकापूजननांदीश्राद्धमाचार्यत्विग्जापकशांतिपाठकानांवरणंकरिष्ये ॥ इति संकल्पः ॥ विनायकपूजनां
तंकृत्वाब्राह्मणान्वस्त्रादिभिःपरिशोध्यामुकद्रव्यतुलादानमहंकरिष्येतत्रभवंतोमामनुज्ञांतंत्विमुक्त्वाक्रिय
नामितिवाचयित्वापुण्याहवाचनांदिनांदीश्राद्धानेकृतेब्राह्मणानामगोत्रेसप्तमुद्धार्यायअस्मिन्कर्मणिआचार्य
त्वेनत्वामहंवृणेइतिवृत्वाआचार्यस्ययथास्वर्गेशक्रादीनांवृहस्पतिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्र
तेतिप्रार्थयेत् ॥ ततःपूर्वकुंडेहोमंकर्तुंऋत्विक्त्वेनत्वामहंवृणेइतिहोत्रन्वेदिनो ॥ ऋग्वेदःपद्मपत्राक्षोगाय
त्रःसोमदैवतः ॥ अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ इतिवृणुयात् ॥ दक्षिणकुंडेहोमंकर्तुंऋत्विक्त्वेन

त्वामहं हरोइति सो यजुर्वेदिनो॥ कानराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुर्देवतो॥ काश्यपायेयस्कविर्षं उक्षाभिरुक्तं मेमस्वे
भवेति यश्चिमकुंडे होमकर्तृ आश्विन्के नत्वामहं पृरोइति सामवेदिनो॥ सामवेदस्कपिंगाक्षोजागतः शक्रदेवतः
भारद्वाजस्कविप्रेत्य आश्विन्कं मेमस्वेभवेति॥ उत्तरकुंडे होमकर्तृ त्वामहं हरोइत्यथर्ववेदिनो॥ हरन्ते अथ(
र्ववेदेत्रष्टुभो रुद्रदेवतः॥ वैशंपायनविर्षं ज आश्विन्कं मेमस्वेभवेतिवृणुयात्॥ ततो श्रोत्रिन्नुरो वा आयकान्दार
यतांश्च वृणुयात्॥ शक्तो समां सर्वेषां साचार्यत्विजां वा मधुपर्कं कुर्यात्॥ तत्र प्रथममाश्वलायनानां॥ अर्चके
नविष्टरो२गृह्यतामिन्युक्ते॥ अर्चः प्रतिगृह्णामि इति प्रतिगृह्य अहं वर्ष्म सजातानां विद्युतामिव सूर्यः॥ इमं
तमभितिष्ठामि यो मा कश्चाभिदासती त्युदर्योविष्टरेउपविशेत्॥ एवमर्चकेन पाद्यं३ अर्घ्यं३ आचमनीयं३
प्रतिगृह्यतामित्युक्ते॥ अर्चः प्रतिगृह्णामीति प्रतिगृह्णीयात्॥ ततोर्चकेन कांस्यपात्रे दधिमध्वानीयकांस्य(
पात्रेणापिधाय मधुपर्को मधुपर्कः प्रतिगृह्यतामित्युक्ते॥ अर्चः मित्रस्यत्वा चक्षुषा प्रतीक्षे देवस्यत्वा सवितुः

॥ विभ ॥
॥ ४८ ॥

प्रसवेश्विनालोश्रवसवस्त्वागायत्रेणछंदसाभक्षयंतु॥रुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्वादित्यास्त्वाजागतेनछं
दसाभक्षयंतु॥विश्वेत्वादेवाअनुष्टुभेनछंदसाभक्षयंत्वितिमंत्रैःपूर्वदक्षिणपश्चिमोत्तरेषुकिंचित्किंचिन्मस्य
भूतेभ्यस्त्वेतिनिरूर्ध्वमुत्कृष्यावमनीयेनामृतोपस्तरणमसीत्याचम्यपुनर्लौकिकोदकेनाचम्यविराजोदोहे
सीतिषाड्याचम्यविराजोदोहमसीयेतिद्वितीयंप्राश्याचम्यमयिदोहःपाद्यायैविराजइतितृतीयंप्राश्याचम्या
मृतापिधानमसीत्याचमनीयेनाचम्यपुनर्लौकिकोदकेनाचम्यसत्यंयशःश्रीर्मयिश्रीःश्रयतामित्याचम
नीयेनाचम्यपुनर्लौकिकोदकेनाचामेत्॥ततोर्घ्यकेनगोः२प्रतिगृह्यनाभिमुक्तेमातारुद्राणामितिमंत्रंप
ठित्वामंत्रंपठित्वाओमुत्सृजतेत्युत्सृजेत्॥ततोर्घ्यकोदीयवस्त्रालंकारादिदद्यात्॥अथकाम्यायनानां॥क
र्त्रीसाधुभवानास्तमर्चयिष्यामोभवंतमित्याह॥अर्चयेत्यर्थःततोर्घ्यकादन्येनविष्टरः२प्रतिगृह्यतामिति
निरुक्तेनिष्टनार्घ्यकेनदत्तंविष्टरंनिधनर्घ्यस्त्स्त्रीमादायासनेनिधायवर्ष्मोस्मिसमानानामुद्यतामिवसूर्यः

॥ राम ॥
॥ ४७ ॥

इदंन्नमधिनिष्ठामियोमाग्रायैविराजोदोह इति मंत्राहृत्वा दक्षवामपादौक्षालयेत् ॥ ततःपुनरपेन पाद्यंविष्टि
र्निवेदितं विष्टरं वर्ष्मोस्मीति यज्ञामाक्रामेत् ॥ ततोन्येनार्घ्यो र्घ्यो र्घ्य इति त्रिर्गंधपुष्पाक्षतकुशतिलसर्षपद
धिदूर्वायुतं निवेदितमर्घ्यमापस्थयुष्माभिः सर्वान्कामानवाप्नवानि तादायशिरेन मानीयसमुद्रं वः प्रहिणो
मि स्वांयोनिमभिगच्छत ॥ अरिष्टा अस्माकं वीरामापरासेचि मत्पय इति भूमौ निनयेत् ॥ ततोन्येनत्रिर्निवे
दितेकर्त्रीदत्तमाचमनीयमादाय आमागन्यशसा संसृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानामधिपतिं प
शूनामरिष्टं तनूनामिति सकृदाचम्यस्मार्त्तं आचमनं कुर्यात् ॥ ततो दधिमध्वाज्यरूपं मधुपर्कं कांस्यवया
पिहितं त्रिरन्येनोक्ते ॥ कर्त्रा निवेदितं मधुपर्कम् तत्स्य मे वो घय ॥ मित्रस्य त्वा चक्षुषा प्रतीक्ष इति दष्ट
मदेवस्य त्वा ॥ प्रतिगृह्णामीत्यनेन प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षानापिकया नमः श्यावास्यान्नशने यत्त आ
विद्धं तत्ते निष्कृन्तामीत्यालोड्य तत्स्थी मंगुष्ठनामिकाभ्यां पात्राद्बहिर्निमृज्य पुनरेवं त्रिः कृत्वा यं मधुनो मधव्यं

॥ वि॰प ॥
॥ ४८ ॥

परमं हृदयमन्त्राद्यंनेनाहं मधुनो मधव्येनयरमेण रूपेणान्नाघेन परमो मधव्योन्नादो सानीति ॥ अनामिकांगु
ष्ठाभ्यां मंत्रा हस्ता त्रिः प्राश्य शेषमन्यस्मै दद्यात्सर्वं वाभ्रीयात् ॥ अथाचम्य वाङ्म आस्येस्त्विति मुखं ॥ नसोर्मे बल
मस्त्विति युगपन्नासिके ॥ अक्ष्णोर्मे चक्षुरस्त्विति युगपच्चक्षुषी ॥ कर्णयोर्मे श्रोत्रमस्त्विति मंत्रा हस्ता दक्षवा
मे श्रोत्रे ॥ बाह्वोर्मे बलमस्त्विति मंत्रा हस्ता बाहू ॥ ऊर्वोर्मे ओजोस्त्विति युगपदूरू ॥ अरिष्टानि मेंगानि संतु ॥ तनू
स्तन्वा मे सह संत्विति शीर्षादिपादांतमंगानि हस्ताभ्यां ॥ ततः कर्त्ता शास्त्रपारिणां वा नो दकाय गोगौरालभ्य
तामिति निवेदयेत् ॥ अर्च्यः मानारुद्राणामित्युक्तो ममाभ्यर्चयाप्याहन इत्येवं सत्साधकस्य नाम गृहीत्वा ईमित्यु
पांशूक्त्वा उत्सृजन नृणाम्यान्विमुञ्चेर्वदेत् ॥ ततः कर्त्ता गन्धवस्त्रादीनि दद्यात् ॥ अथ सामगानां ॥ कर्त्तेनरे
गामुपतिष्ठेत वडिशाक्षोनि हृदनुष्टुप् धेनुः ॥ गो रूपस्थानेवि ॥ ॐ अर्हणा पुत्रवाससा धेनुरभवद्यमे ॥ सा नः ॥ राम ॥ ॥ ४८ ॥
पयस्वती दुहा उत्तरामुत्तरां समां ॥ ततो र्घ्यमिति पठन्नासनं दद्यात् वसिष्ठो यजुर्विराडासनं ॥ आसनोपवेशनेवि॰

इदमहमिमांपद्यांविराजमन्नाद्यायाधितिष्ठामीति ॥ ततःकर्त्तापंचविंशतिकुशैर्घ्रौविष्टरैर्विष्टरेविष्टरोप
तिगृहेनामिनिदध्यात् ॥ अर्घ्यस्तयोरेकंवसिष्ठोनुस्तुवौपध्यःविष्टरनिवेशनेवि ॥ ॐ यांईषधीसोमराज्ञीर्व
ह्वीःशतविचक्षणा ॥ नामधमस्मिन्नासनेच्छिद्रःशर्मयच्छनेन्यासनेनिधायच्छिनीयंपाद्योरधोदध्यात् ॥ मं
त्रेणावसिष्ठोनुस्तुवौपध्यः ॐ याईषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु ॥ नामधमस्मिन्यादपोरच्छिद्रःशर
मंयच्छनेति ॥ ततःकर्त्तागंधदूर्वाक्षतपुष्पाद्येनंपद्यंत्रिर्निवेदयेत् ॥ अर्घ्यंगृहीत्वानत्रच्छायामपश्यन्नवेक्षेत
वसिष्ठोयजुरापःपाद्यावेक्षणे ॥ ॐ यन्नोदेवीःश्रीनिपद्यामायस्तनोमाच्छिरागच्छतु ॥ अर्घ्यस्तेनपूर्वंवामन
तोदक्षिणंततोद्वौस्वयंक्षालयेत्त्रिभिर्मन्त्रैः ॥ वसिष्ठोभृरिगायत्रीसव्यपादः ॥ तक्षालनेवि ॥ ॐ सव्यमवनेनि
जेस्मिन्राष्ट्रेश्रियमावेशयामीतिदक्षिणं ॥ वसिष्ठोयजुरुभयपादे ॥ ॐ पूर्वमन्यमपरमन्यमुभौपादाववने
निजेराष्ट्रस्यर्ध्याउभयस्यावरुध्येइत्युभौ ॥ ततःकर्त्तासकांचनेनजलेनतस्यपादावाचान्तःसीपक्षालप्राप्त्व

त्रिरर्घं निवेदयेत् ॥ अर्घं सम्प्रतिगृह्य सैकदेशं शिरसि क्षिपेत् ॥ वसिष्ठो भृरिगायत्री राष्ट्रिः अर्घग्रहणे वि० ॐ
अन्नस्याष्ट्रिरसि राष्ट्रिस्ते भूयासं ॥ ततः कर्त्ता विष्टरवमनीयं निवेदितमर्घ्यः प्रतिगृह्य वसिष्ठो भृरिगनयप्त
गायत्र्यापश्चाचमनीयं देवता आचमने वि ॥ ॐ यशोसि यशो मयि धेहीति ॥ ततः अर्घ्यः कर्त्ता दधि मधु घृतं च
कांस्यस्थं कांस्येन पिहितं मधुपर्कं त्रिर्निवेदितं प्रतिगृह्ला मीम्यक्का ॥ वसिष्ठो यजुर्मधुपर्कः तद्ग्रहणे विनि
योगः ॥ ॐ यशसो यशोसीति प्रतिगृह्य वसिष्ठो यजुर्मधुपर्कः ॥ तत्प्राशने वि० ॐ यशसो भक्षोसि महसो भ
क्षोसि श्रियं मयि धेहीति कनिष्ठांगुष्ठाभ्यां प्रथमं ॥ अनामिकांगुष्ठाभ्यां द्वितीयं ॥ मध्यमांगुष्ठाभ्यां तृतीयं
मंत्रावृत्त्या ॥ तूष्णीं चतुर्थं प्राश्य शेषमस्मै दत्वा वामेन ॥ ततो नापिते न गौरिति त्रिर्दत्वा गामुत्सृजेत् ॥ व
सिष्ठो बृहती गौः गोमोक्षणे विनियोगः ॥ मुंच गां वरुणपाशाद्द्विषंतमभिधेहि तं जहि ममुष्य चोभयो रुत्सृजे
गामत्तु तृणानि पिवत्वूदकं ॥ ततो र्च्यो गामनुमंत्रयेत् ॥ मातारुद्राणामिति ॥ अयं वेदत्रयसमानः ॥ अथा

थर्वणानां ॥ आर्चको दर्भानानाय्य विष्टरान्कुर्विन्यर्च्यं वदेत् ॥ सवज्ञानेनत्वाकर्मणा संनह्यामीत्येवशाखं पाद्या
र्थं सन्येनत्वाकर्मणा संनह्यामीति द्विशाखमासनार्थं ॥ वचसा त्वा कर्मणा संनह्यामीति त्रिशाखं मधुपर्कार्थं
च ऊर्जान्विष्टराक्षत्वा ॥ अनिसृष्टो देष्यो यो स्मान्द्वेष्टि यं च वयं द्विष्मोस्य वदान्तुरित्यर्धकं यद्वृषंत्न दद्मसे दयान् ॥ ननः
कर्नीयाधंभो इति दत्तं पाद्यं मर्घ्यं मिमं त्रयेत्वनुर्भिः ॥ हिरण्यवर्णाः शुचयः पावका यासु जातः सविता यास्व
ग्निः ॥ या अग्निं गर्भं दधिरे सुवर्णास्ता न आपः शंस्योना भवन्तु ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अव
पश्यं जनानां या अग्निं गर्भं ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ॥ या अग्निं गर्भं ॥ ननो ०
र्चो मयि पित्र सचन यश्च धारयाणीति पाद्ये कदेशेन दक्षिणं ॥ मयि क्षत्रं च विशं च धारयाणीति वामं पादं ०
प्रक्षाल्य ॥ इदं पादोवचनेनोक्तो ब्राह्मणांय शस्साचनं ॥ अपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे इति पाद्यवनु मंत्या
संचयामुरिनिवदन् ॥ नमीक्षेमाननोर्चः कर्ता सद्विशाखविष्टरमासनं भो इति दत्तमासनं प्रतिगृह्योविस्व

॥ दा.वि ॥
॥ ५० ॥

रीं पृथिवीमावदामि क्षमां भूमिं ब्रह्मणा वावृधानां ॥ ॐ जः पुष्टिं विभ्रती मं त्रभागं घृतं त्वाभि निषीदम्भूमे इति स
विष्टरेषत्वमुखउपविशेत् ॥ ततः कुशाखे विष्टरे द्वयोयोस्मान्द्वेष्टि यं च वयं द्विष्मोस्य च पादुरिति तं पद्वपन्या
मेस्थापयेत् ॥ ततोदात्रार्घ्यं भो इति निवेदितमर्घ्यं ॥ अन्नानां मुखमसि मुखं महं श्रेष्ठः समानानां भूयासं ॥ आ
पोमृतस्यामृतं मा हृणुदासा अस्माकं वहद्वो भवंतु अश्वाव जो मनम पास्कपृष्ठो भूर्भुवः स्वर्जनदेमिम्मर्वको गृ
हीत्वाभिमंत्र्यात्माभिमुखं निनीयनेजोस्यमृतमसीति तेन ललाटं स्पृशेत् ॥ ततोदात्रा आचमनीयमो इति दे
त्तं भुक्तं जलमर्घ्यो गृहीत्वा ॥ जीवास्याजीवासं सर्वमायुर्जीवासं उपजीवास्योपजीव्यसं सर्वमायुर्जीव्यासं सं
जीवास्य संजीव्यासं सर्वमायुर्जीव्यासं जीवनास्य जीव्यासं सर्वमायुर्जीव्यासमिं जीउव देवाजीवाजीसमहं स
र्वमायुर्जीव्यासमित्याचामेत् ॥ ततोदाता दधि घृतयुतं मधु कांस्यस्थं तेनापिहितमधास्थेन शारवविष्टरमूर्ध
स्थितेन कशाखविष्टरं मधुपर्कं मां निदत्तेन नकरस्थमेवार्च्योजुमं त्रयेन्मंत्रैः ॥ मधुवाता ॥ मधुनक्तम् ॥ मधु(

॥ राम ॥
॥ ५० ॥

मान्त्र इति त्रिभिः॥ एतनरैनैः प्रत्यभिमंत्र्य सूर्यस्यत्वा चक्षुषा प्रतीक्षे इति प्रेक्ष्य अमृतोहममृतो म आत्मामृतं मेच
क्षुरमृतं मेश्रोत्रममृतो मे प्राणोऽमृतो मे अपानोऽमृतो मे व्यानोऽमृतो हं सर्वः देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां प्रसूतः प्रशिष्या परिगृह्णामीति परिगृह्य स्थंडिले प्रागदंडं निधाय॥ पृथिव्यास्त्वा नाभौ सादया
म्यादित्या उपस्थे इति भूमौ निधाय। अंगुतिद्वयेन प्रदक्षिणामालोड्यानामिकांगुष्ठाभ्यां गृहीत्वा द्वादशवारं प्राश्नी
यात्॥ यथा॥ ओं भूः तत्सवितुर्वरेण्यं भूः स्वाहेति प्रथमं॥ ओं भुवः भर्गो देवस्य धीमहि॥ ओं भुवः स्वाहेति द्वितीयं॥ ओं
स्वः धियो यो नः प्रचोदयात्॥ ओं स्वः स्वाहेति तृतीयं॥ जनत्स्वाहा। तपत्स्वाहेति करत्स्वाहा। सहत्स्वाहा॥ महत्स्वाहा।
तत्स्वाहा॥ शं स्वाहा॥ ओं मिमेकादशांतु ह्रीं द्वादशं पापप्रणवस्योद्धिष्टं विप्राय प्रभुद्राय वा दद्यात्॥ ततो दानागोर्गौ
रिति द्वादशगां॥ भूतमसि भवदस्य तं प्राराणो वरुर्भवं॥ ज्येष्ठं यत्राममनाग ततो भूर्भुवः स्वर्जनयदोमित्यनिसृज्यं
मानादित्यानां दुहिता वसूनां स्वसा रुद्राणाममृतनस्य नाभिः प्रणुवोचं वधिष्ठो नृणा निगौरस्तु॥ स्वयवसाद्गग

वतिगच्छतीमनुर्मंत्रंयजमानस्यममत्वपापात्कृतइतिनिवेदेत्॥ ततोयजमानःसपत्नीकःपूर्णकलशहस्तोमंड
करोर्णभिरितिमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविश्योपविश्यदेशकालौस्मृत्वाकरिष्यमाणतुलादानांग
तयाधिवासनंकरिष्येतदंगतयागणेशपूजनमंडपदेवतास्थापनादिकरिष्यइतिसंकल्पगणेशंपूजयेद्
ब्रह्मसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥ अपक्रामंतुभूतानिपि
शाचाःसर्वतोदिशं॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभेइतिसर्षपान्विकीर्यपंचगव्येनकुशैःभुवीवाह
व्येनित्वेनापोहिष्ठेतितृचेनप्रोक्ष्यकृतांजलिःस्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंपठेत्॥ ततोनैर्ऋत्येवास्तु
वेशाईशानादिविदिक्षुविशंतुभूतलेनागालोकपालाश्चसर्वतः॥ अस्मिन्मंडपेतिष्ठंतुआयुर्बलकराःस
देतिचतुरःशंकून्रोपयित्वा॥ अग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः॥ तेभ्योबलिंप्रयच्छामिपुण्यमो
दनमुत्तममिमितिनैर्ऋत्यांकुपार्श्वेमाषभक्तबलीन्दत्वासुवर्णादिशलाकया॥ शांतायशोवतींकांताविशालाप्राण

वह्निनी ॥ सनीवसु मनीनंदासुभद्रेनिशागायना ॥ हिरण्यपासुवनालक्ष्मीर्विभ्रू निर्विमलाप्रिया ॥ जयाकाला
विशोकाचेति दक्षिणोत्तरायणा वज्रुर्थ्यं ननमोन्ननामभिरेखाः कृत्वा मध्यकोष्ठचतुष्टयमेकीकृत्य कोणे
षुरेखाद्वयं त्वा देवताआवाहयेत् ॥ मध्यपदचतुष्के हृदयेब्रह्मा ॥ पूर्वपदद्वये दक्षिणास्तने ऽर्यमा ॥ दक्षिणा
पदद्वयेजठरे दक्षिणे विवस्वान् ॥ पश्चिमपदद्वये वामस्तने पृथ्वीधरः ॥ आग्नेयपदार्धयोर्दक्षिणहस्ते सा
वित्रसावित्रौ ॥ नैर्ऋत्यपदार्धयोर्द्वयोरामेंद्र्यो विबुधाधिपजयौ ॥ वायव्यपदार्धयोर्वामहस्ते राजयक्ष्म
रुद्रौ ॥ ईशानेपदार्धयो रुद्ररुस्रखयोरापायवत्सरौ ॥ ईशानद दक्षिणकर्णे शिरसि शिखी ॥ न दक्षिणस्यार्धपदे
दक्षिणनेत्रे पर्जन्यः ॥ न दक्षिणपदद्वये दक्षिणश्रोत्रे जयंत ॥ न दक्षिणायदद्वये दक्षिणांसे कुलिशायुधः
न दक्षिणपदद्वये दक्षिणबाहौ सूर्यः ॥ न दक्षिणायदद्वये दक्षिणवाहावेव सत्यः ॥ न दक्षिणसार्धपदे दक्षि
णकूर्परे भृशः ॥ न दक्षिणाग्नये पदार्धे दक्षिणबाकाशः ॥ नन्म पश्चिमाग्नेयपदार्धे दक्षिणप्रबाहावेवायुः ॥ न द

॥द्वा·वि॥
॥५२॥

क्षिणासार्द्धपदे दक्षिणामणिबंधे पूषा॥ नमोग्निमयदह्वये दक्षिणापार्श्वे वितथः॥ नमोग्निमयदह्वये द
क्षिणापार्श्वे एव गृहक्षतः॥ नमोग्निमयदह्वये दक्षिणारैयमः॥ नमोग्निमयदह्वये दक्षिणजानौ गंधर्वः॥ नमो
ग्निमसार्द्धपदे दक्षिणजंघायां भृंगराजः॥ नमोग्निमनैर्ऋत्यपदार्द्धे दक्षिणस्फिचि मृगः॥ नउन्नरार्द्धपादयोः
पितरः॥ नउन्नरसार्द्धपदे वामस्फिचि दौवारिकः॥ नउन्नरयदह्वये वामप्रवाहवे वअहिः॥ नमोवाय्यदह्वयेवा
मकूर्परे सुखः॥ नमोवाय्यदह्वयेवामवाहौ भल्लाटः॥ नमोवाय्यदह्वयेवामवाहवेवसोमः॥ नमोवाय्यदह्वयेवा
मांसे सर्पः॥ नमोवाय्यसार्द्धपदे वामश्रोत्रे अदितिः॥ नमोवाय्यसार्द्धपदे वामनेत्रे दितिः॥ उन्नरे वास्तोष्पनइनिवा
स्तुप्रनिमां॥ ईशानादिविदिक्षुः॥ चरकी·विदारी·पूतना·पापराक्षसी॥ पूर्वादिदिक्षु स्कंदः॥ अर्यमा॥
जंभकः॥ पिलिपिच्छः॥ नदस्तसंपूज्यव्रुसणोरषपायसवलिर्नमर्दयेवव्रक्षादिभ्यः पायसवलीन्दद्यात्
नरक्यादिभ्यो माषभक्तवलीन्॥ ननः पावमानीभिरक्षोहणामिनि सूक्तेनवीन्नसूत्त्या मंडपं वेष्टयेत्॥ ननः

॥राम॥
॥५२॥

पूर्वस्यां अग्निमीळे पुरोहितमिति सूक्तेनोरणं निधाय पूजयित्वा तत्र राहूह्वहस्यतीत्यस्य कलशं संस्थाप्य तत्र
ऋग्वेदमावाह्य पूजयेत्॥ ततो दक्षिणे इषेत्वेति स्तुमग इति तोरणं निधाय पूजयित्वा सूर्यागारकौत्यस्य कलशं
संस्थाप्य धरामवाह्य पूजयेत्॥ ततः पश्चिमे अग्न आयाहीति स्रुकर्मनोरणं निधाय पूजयित्वा भृगुक्रतुधौत्य
स्य कलशं संस्थाप्य वाक्यानिमावाह्य पूजयेत्॥ ततउत्तरे शन्नो देवीरिति सूक्तेन तोरणं निधाय पूजयित्वा सो
मकेतुग्रहीत्यस्य कलशं संस्थाप्य विघ्नेशमावाह्य पूजयेत्॥ ततः पूर्वे पनि द्वारशाखमेकैकं कलशं संस्था
प्य तत्रैरावतं संपूज्यः॥ ऋग्वेदः पद्मयत्राक्षो गायत्रः सोमदैवतः॥ अत्रिगोत्रस्तु विप्रेंद्र ऋत्विकत्वं मेमस्ते
भवेति ऋग्वेदिनो द्वारपालान्वुयवेश्या म्रिमीलइति पूजयेत्॥ ततइंद्रं ध्यात्वा एह्येहि सर्वामरसिद्धसाध्यै र
भिष्टुतो वज्रधरानरेश॥ संवीज्यमानो ऽप्सरसां गणेन रक्षाध्वरन्नो भगवन्नमस्ते॥ ओं इंद्र इहागच्छ इहति
ष्ठेतींद्रंकलशायोरावाह्य॥ आभुः शिशानइति पीतोपनाकाश्वजोडछिन्न॥ ततो नारीमंडपमितीद्रं संपूज्य

इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः॥ शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति नत्वा॥ इंद्राय सांगा
य सपरिवाराय सायुधाय सशक्तिकायैष माषभक्तबलिं समर्पयामीति बलिं समर्प्याचामेत्॥ ततआग्नेये
कलशं संस्थाप्य पुंडरीकमष्टोत्तरं च तत्र पूजयित्वाग्निं ध्यात्वा॥ ॐ एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितो
भिजुष्ट॥ तेजोवतां लोकगणेन सार्द्धं ममाध्वरं याहि कवे नमस्ते॥ ओं अग्ने इहावाहय॰ अग्निन्दूतमिति रक्तोत्प
लाकाध्वजाउद्धृत्याग्निं इत्यमित्याग्निं संपूज्य॥ आग्नेयः पुरुषो रक्तः सर्वदेवमयोव्ययः॥ धूम्रकेतु रजोध्य॰
क्षस्तस्मै नित्यं नमो नमः इति नत्वा बलिं समर्प्याचामेत्॥ ततो दक्षिणे पूर्ववत्कलशद्वयं संस्थाप्य तत्र वा
मनदिग्गजं संपूज्य कानराक्षीयजुर्वेदस्तद्वक्षुभो विष्णुदेवतः॥ काश्यपेयस्तु विधेयं अक्षान्तिकत्वं मेम स्वेभ
वेति यजुर्वेदिनाउपवेश्य॥ इषेत्वोर्जेति पूजयेत्॥ ततो यमं ध्यात्वा॥ एह्येहि वैवस्वत धर्मराज सर्वामरै
रर्चित धर्ममूर्ते॥ शुभाशुभानंदशुचामधीश शिवाय नः पाहि मखं नमस्ते॥ ओं यम आवाहय॥ आयंगौरि॰

तिक्रूस्यपताकाध्वजावृक्षिन्यमापसोमनिनियमंसंपूज्य॥ महानहिषमारुह्यदंडहस्तंमहाबलं॥ आवाह
यामियज्ञेस्मिन्मजयेन्द्रनिगृह्यनांइनिनत्वावलिंसमर्थ्याचामेत्॥ ततोनैऋत्यांकलशंसंस्थाप्यनऋक्
दंडजयंचपूजयित्वानिऋतिंध्यात्वा॥ ॐ एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः॥ ममाध्व
रंपाहिपिशाचनाथलोकेश्वरस्त्वंभगवन्नमस्ते॥ भोनिऋतेआवाह्यमोसुराइनिनीलोपताकाध्वजावृक्षि
न्यमोसुराइनिनिऋतिंसंपूज्य॥ निऋतिंखड्गहस्तंचसर्वलोकैकपावनं॥ आवाहयामियज्ञेस्मिन्पूजेयंप्र
तिगृह्यतामितिनत्वावलिंसमर्थ्याचामेत्॥ ततःपश्चिमेकलशद्वयंस्थापयित्वानत्रांजनदिग्गजंसंपूज्य
सामवेदरूपिंगाक्षोजगतःशक्रदेवतः॥ भारद्वाजस्तुविप्रेंद्रज्ञानविकत्वंमेभवेतिसामवेदिनोडपवेस्प
अग्नाआयाहीतिपूजयेत्॥ ततोवरुणंध्यात्वा॥ ॐ एह्येहियादोगणवारिधीनांगणेनयर्जन्यसहाप्सरो
भिः॥ विद्याधरेंद्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते॥ भोवरुणआवाह्यइमंमेवरुणोतिश्वेतो

पताकाध्वजावृक्षिन्नमनत्वायायीनि वरुणां संपूज्य ॥ पाशहस्तं च वरुणमर्णसां पतिमीश्वरं ॥ आवाहयामि यज्ञेस्मि
न्वरुणाय नमो नमः इति नत्वा बलिं समर्प्पचामेन् ॥ ततो वायव्यं कलशं संस्थाप्य तत्र पृथ्वं दत्तं सिद्धार्थं च संपू
ज्य वायुं ध्यात्वा ॐ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः ॥ प्राणाधिपः कालकवेः सहाय गृहाण
पूजां भगवन्नमस्ते ॥ ओं वायो आवाह्य वायो इहानमिति ॥ धूम्रायन काध्वजावृक्षित्य नव वाय वह इसन इति वायुं
संपूज्य ॥ वायुमाकाशगं चैव यव वनं वेगवजतिं ॥ आवाहयामि यज्ञेस्मिन्नुजेयं प्रतिगृह्यतां ॥ अनाकारो महौजाश्
श्च यश्चाहस्तगतिर्दिवि ॥ तस्मै पूजाय जगतो वायवे हं नमामि च इति नत्वा बलिं समर्प्पचामेन् ॥ ततउत्तरे क
लशं ध्वयं संस्थाप्य तत्र सार्वभौम दिग्गजं संपूज्य ॥ हृन्नेत्रो थर्ववेदो ऽनुष्टुभो रुद्रदेवतः ॥ वैशंपायन विप्रेन्द्र
कान्ति कत्वं मेम खे भवेति अथर्वा वेदिनो उपवेश्य ॥ शान्तो देवीरिति संपूज्य ॥ कुवेरं ध्यात्वा ॐ एह्येहि यज्ञेश्व
र यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्धं ॥ सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥ ओं सोमः

आवाह्यग्न्यापायस्वेति हरितो पताकाध्वजावृच्छित्य सोमो धेनुमिति सोमं पूजयित्वा ॥ सर्वनक्षत्रमध्येनुसोमोरा
जावस्थितः ॥ तस्मै सोमाय देवाय नक्षत्रयतये नमः इति नत्वा वलिं समर्प्याचामेत् ॥ ततईशान्यां कलशं नि
धाय तत्र शुक्लनीकं मंगलं वसं पूजय ईशानं ध्यात्वा ॥ ॐ एह्येहि यज्ञेश्वर नस्त्रिशूलकपालखट्वांगधरेणसार्द्धं
लोकेश यज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ भो ईशान आवाह्य ॥ अभित्वा देवसवितरित्यृश्वेतो पत
काध्वजावृच्छित्य तमीशानमिनीशानं ॥ हयस्कंधसमारूढ शूलहस्त त्रिलोचन ॥ आवाहयामि यज्ञेस्मिन् पूजे
यं प्रतिगृह्यतां ॥ सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नम इति न
त्वा वलिं समर्प्याचामेत् ॥ ततईशानपूर्वयोर्मध्ये नंतं ध्यात्वा ॥ ॐ एह्येहि पातालधरामरेंद्र नागांगनाकिन्न
रगीयमान ॥ यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं ॥ भो अनंत आवाह्य आयङ्गौरिति मेघ
वर्णोयताकाध्वजावृच्छित्य आयंगौरित्यनंतं पूजयित्वा यो सावनंतरूपेण ब्रह्मांडं सचराचरं ॥ पुष्पवत्धारय

॥ दा·वि ॥
॥ ५५ ॥

म्र्धिर्लस्मै नित्यं नमो नम इति नत्वा बलिं समर्पयामेत् ॥ ततः पश्चिमनैर्ऋत्यमध्ये ब्रह्माणं ध्यात्वा ॥ ॐ ह
ह्येहि सर्वाधिपते सुरेन्द्रलोकेन सार्द्धं पितृदेवताभिः ॥ सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवा
य· भो ब्रह्मन् ॥ आवाहयेत् ब्रह्मजज्ञानमिति रक्षोपनाकाध्वजात्तु छिन्नेनैव ब्रह्मणा मध्यर्चा ॥ पद्मयोनिश्चतु
र्मूर्तिर्वेदवासः पितामहः ॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नम इति नत्वा बलिं समर्पयामेत् ॥ ततइं
द्रस्य हस्तो वरुणास्ये निमदाध्वजमुछित्य ब्रह्मजज्ञानमिति नत्व ब्रह्माणां संपूज्य मंडपस्तंभेषु सर्वेभ्यो दे
वेभ्यो नः वंशेषु किन्नरेभ्यो नमः ॥ पृष्ठेयतं गेभ्यो नम इति पूजयेत् ॥ ततः पूर्वस्यां किंचिन्निम्नमिसुपलिप्य ॥ त्रै
लोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥ देवदानवगंधर्वा
यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥ सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ॥ ब्रह्मा
विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह ॥ रक्षन्तु मंडपं सर्वे घ्नन्तु रक्षांसि सर्वशः ॥ त्रैलोक्यस्थेभ्य रेभ्यो भूतेभ्यो नमः

॥ राम ॥
॥ ५५ ॥

ब्रह्मणे नमः ॥ विष्णवे नमः ॥ शिवाय नमः ॥ देवेभ्यो० ॥ गंधर्वेभ्यो० ॥ यक्षेभ्यो० ॥ राक्षसेभ्यो० ॥ पन्नगेभ्यो० ॥ ऋषि
भ्यो० ॥ मनुष्येभ्यो० ॥ गोभ्यो० ॥ देवमातृभ्यो० ॥ संपूज्य माषभक्तबलिं दद्यात् ॥ ततो यजमानः प्राग्द्वारेण प्रवि(श्य)
श्य दक्षिणकुंडपश्चिमे उपविश्य यथाविहितं कर्म कुरुते निर्गुर्वादीन् प्रेष्येत् ॥ तत आचार्यः पूर्वादिकुंडेशाने
त्वन्तरः कलशान् संस्थाप्य वरुणं संपूज्य यजध्वमिति निरीहन् उक्तस्तमंत्रजाप्येन निष्ठध्वमिति जापकान् ॥
पठध्वमिति पारायणांश्च प्रेष्येत् ॥ ततोग्निजो देशकालौ संकीर्त्यामुक कर्तुला कर्मणः पत्निषनिष्ठांकरिष्ये तदं
गतया मेखलायो निदेवतास्थापनं च करिष्ये इति संकल्प्याद्याय तं तं संपूज्य प्रोक्ष्योपरि मेखलायां इदं वि(ष्णु)
स्तुरिति विष्णुं ॥ मध्यमेखलायां ब्रह्मजज्ञानमिति ब्रह्माणं ॥ अधोमेखलायां कद्रुद्रायेति रुद्रं ॥ योनौ गौरी
मावाह्य संपूज्याग्निं प्रतिष्ठापयेयुः ॥ तत आचार्यः महावेदेरैशान्यां ग्रहवेदिकायां सर्वतोभद्रे मंडले देवता
स्थापयेत् ॥ ब्रह्मजज्ञानं गोत्रमो वादे वो ब्रह्माग्निपूमध्ये ॥ अथ उत्तरादि ॥ अथाग्न्यस्व गोन मः सोमो गाय

त्रीसोमं ॥ अभित्वाजागर्निःशुनःशेपईशानोगायत्रीईशानं ॥ इंद्रंवोमधुछंदा ॥ इंद्रोगायत्री ॥ इंद्रं ॥ अग्निका
राद्वोमेधातिथिरग्निगायत्री ॥ अग्निं ॥ यमायसोमंयमोयमोनुष्टुप् यमं मोषुणोघोरःकण्वोनिर्ऋतिर्गाय
त्रीनिर्ऋतिं ॥ तन्वायामिवरुणं वायोशतंवामदेवोवायुरनुष्टुप् वायुं ॥ वायुसोममध्यादिषुजन्मयाअत्र
मैत्रावरुणोवसिष्ठोवसवस्त्रिष्टुप् वसून् ॥ आरुद्रासःश्यावाश्वएकादशरुद्रोजगती ॥ एकादशरुद्रा
न् ॥ त्वांनुसामदेमत्स्योद्वादशादित्यागायत्री ॥ द्वादशादित्यान् ॥ अश्विनावर्त्तिराहूगणोगोतमोश्विना
वुष्णिक् ॥ अश्विनौ ॥ अभित्यंदेवंवामदेवःसप्तयक्षाःप्रकृतिःसप्तयक्षान् ॥ आयंगौःसर्पराज्ञीसर्पगाय
त्रीसर्पान् ॥ अप्सरसामेनसखाप्रभृंगोगंधर्वाप्सरसोनुष्टुप् गंधर्वाप्सरसः ॥ त्वमस्मसोममध्येकुमारंमा
ताकुमारःस्कंदस्त्रिष्टुप् कुमारं ॥ ऋषभमृषभोवैराजो ॥ ऋषभोनुष्टुप् ऋषभं ॥ अदितिर्लोकोहहस्यानिर्द
क्षोनुष्टुप् दक्षं ॥ त्वमेदमघोनामग्निवर्णासोमरिदुर्गात्रिष्टुप् ॥ दुर्गां ॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गाय

त्रीविष्णुं ॥ ब्रह्माग्निमध्ये ॥ उदीरतांशंखस्वधाविष्णु ॥ स्वधां॰ ब्रह्मयमयोर्मध्ये परंमृत्योः संकुसुको मृत्युरोगाः
त्रिष्टुपमृत्युरोगान् ॥ ब्रह्मनिरृतिमध्येगणानांत्वागणपतिं ॥ ब्रह्मसवरुणयोर्मध्येशन्नोदेवीरांवरियः
सिंधुद्वीपआपोगायत्रीआपः ॥ ब्रह्मवायुमध्येमरुतोयस्यराह्नगणोमरुतोगायत्री ॥ मरुतः ब्रह्मणः पा
रमलेस्योनामेधानिथिभूमिगायत्री॰ भूमिं ॥ नत्रैव॰ इमंमेगंगेसिंधुक्षित्रियमेधागंगायमुनासरस्वत्योज
गनीगंगादिनदीः ॥ नत्रैवधाम्नोधाम्नोवामदेवः सप्तसागराअनुष्टुप्सप्तसागरान् ॥ सोमादिसन्निधौवहिः
आयुधानि ॥ गदां॰ त्रिशूलंवज्रशक्तिदंडखड्गपाशंअंकुशं ॥ पुनरुत्तरादि॰ गौतमं ॥ भारद्वाजं॰ विश्वामित्रं
कश्यपं॰ जमदग्निं॰ वसिष्ठं॰ अत्रिं॰ अरुंधतीं ॥ पूर्वादिशंसैंद्री॰ कौमारीं॰ ब्राह्मीं॰ वाराहीं॰ चामुंडां॰ वैष्णवीं॰ माहेरीं॰
वैनायकीं॰ नदस्कगृहवेश्मनिवायव्यपूजयित्वावलिंदत्वानउपरिवस्त्रादौग्रहमंडलमालिख्यग्रहपीठदेव
तास्थापयेत् ॥ नग्रथा॰ आकृष्णेनहिरण्यस्तूपःसविताः त्रिष्टुप्सूर्यावाहनेविनियोगः ॥ ॐ भूर्भुवःस्वःसमावा

॥ दा॰ वि ॥ घकलिंगदेशोद्भवकाश्यपगोत्रसूर्यइहागछइहतिष्ठेतिस्थापयेत् ॥ स्वंसर्वेत्र॰ आप्यायस्वगोतमःसोमोगा
॥ ५८ ॥ यत्री॰ ॐ भूर्भुवःस्वर्यमुनातीरोद्भवआत्रेयसगोत्रशुक्लवर्णसोम ॥ अग्निर्मूर्द्धाविरूपोंगारकोगायत्रीॐभूर्भु
वःस्वरवंतिसमुद्भवभारद्वाजसगोत्रपीतवर्णभौम ॥ उद्बुध्यस्वबुधःसोमोबुधस्त्रिष्टुप्॰ ॐ भूर्भुवःस्वर्मग
धदेशोद्भवआत्रेयसगोत्रपीतवर्णबुध ॥ बृहस्पतिर्गृत्समदोबृहस्पतिस्त्रिष्टुप्ॐभूर्भुवःस्वःसिंधुदेशोद्भव
आंगिरससगोत्रपीतवर्णबृहस्पते ॥ शुक्रःपाराशरःशुक्रोद्विपदाविराट्॰ ॐ भूर्भुवःस्वर्भोजकटदेशोद्भवभा
र्गवसगोत्रशुक्लवर्णशुक्र ॥ पाशमग्निरितिरिविविटिशनिरुष्णिक् ॐ भूर्भुवःस्वःसौराष्ट्रदेशोद्भवकाश्य
पसगोत्रकृष्णवर्णशनैश्चर ॥ कयानोवामदेवोराहुर्गायत्री॰ ॐ भूर्भुवःस्वःराठिनापुरोद्भवपैठीनसिस
गोत्रश्यामवर्णराहो ॥ केतुंमधुछंदःकेतवोगायत्री॰ ॐ भूर्भुवःस्वरंतर्वेदीसमुद्भवजैमिनिसगोत्रचित्र ॥ राम ॥
वर्णकेतो ॥ ॥ अथाधिदेवताः ॥ ॥ त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्॰ ॐ भूर्भुवःस्वरीश्वरइहागछेतिस्थापय ॥ ५८ ॥

क्षिरानःस्वमयेपि॰गौरीर्मिमायदीघ्रनमाउमाजगती॰ॐभूर्भुवःस्वरुमेपदंकंदोदीघ्रनमास्कंदस्त्रिष्टु
पू॰ॐभूर्भुवःस्वर्विष्णो॥ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुपू॰ॐभूर्भुवःस्वर्ब्रह्मन्॥इंद्रवोमधुच्छंदेसे इं
द्रोगायत्री॰ॐभूर्भुवःस्वरिंद्राय॥यमंसोमंयमोयमोनुष्टुपू॰ॐभूर्भुवःस्वर्यम॰मोघुराणाघोरःकरावःका
लोगायत्री॰ॐभूर्भुवःस्वःकाल॥उषोवाजंप्रक्कारावश्विन्नग्ज्ञोहद्दस्मनी॰ॐभूर्भुवःस्वश्विन्नग्ज्ञ॥स्वयप्रम
धिदेवता॥अग्निकाराबोमेधातिथिरग्निर्गायत्री॰ॐभूर्भुवःस्वरग्ने॥अस्पुमेमेधातिथिरापोनुष्टुप्॰ॐभू
र्भुवःरपः॥स्योनामेधातिथिर्भूमिगायत्री॰ॐभूर्भुवःस्वभूमे॥इंजग्धेस्थानिर्यृत्समदइंद्रस्त्रिष्टुप्॰ॐभूर्भु
वःस्वरिंद्रः॥इंद्राणीचहूषाकपिरिंद्राणीपंक्तिः॰ॐभूर्भुवःस्वरिंद्राणी॥प्रजापतेहिरण्यगर्भःप्रजाप
तिस्त्रिष्टुपू॰ॐभूर्भुवःस्वःप्रजापते॥आयङ्गौःसर्पराज्ञीसर्पागायत्री॰ॐभूर्भुवःस्वःसर्पाः॥ब्रह्मजज्ञानंगौ
तमोवामदेवोत्रिष्टुप्॰ॐभूर्भुवःस्वर्ब्रह्मन्॥ननउन्नरनोगणानांगृत्समदोगणायनिर्जगती॰ॐभूर्भुवःस्व

॥ स०वि ॥
॥ ५८ ॥

गणपते ॥ जानवेदसेकस्यपोदुर्गात्रिष्टुप्‌ ॐ भूर्भुवः स्वर्दुर्गे ॥ नववायो वध्व आंगिरसो वायुर्गायत्री ॐ भूर्भुवः
स्वर्वायो ॥ आदित्यस्य आकाशो गायत्री ॐ भूर्भुवः स्वराकाश ॥ एषोउषाप्रस्करावो श्विनौगायत्री ॥ ॐ भूर्भुवः स्व
रश्विनौ ॥ ननो दिक्षु दिक्पालानां ॥ यथा इंद्रं वो विश्व नः ॥ अग्निरूनं ॥ यमाय सोमं ॥ सो षुणः ॥ नत्वा यामि ॥ न
ववायो ॥ सोमो धेनुं ॥ नमीशानं ॥ ननइंद्राग्नि मध्ये ऽपया ॥ अत्रमेत्रावरुणौ वसिष्ठो वसवस्त्रिष्टुप्‌ ध्रुवो
ध्वरस्तथा सोम आपश्चैवानिलो नलः ॥ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिता इति वसून्‌ ॥ इंद्रेशानम
ध्ये त्वानु सा मदेनस्तो द्वादशादित्या गायत्री ॥ धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥ इंद्रो विवस्
स्वान्‌ पूषा च पर्जन्यो दशमः स्मृतः ॥ ननरस्त्वष्टा ततो विष्णुरजघन्यो ऽजघन्यजः ॥ इत्येते द्वादशादित्या ना
मभिः परिकीर्तिता ॥ इति द्वादशादित्यान्‌ ॥ अग्नि यम मध्ये आरुद्रास इपानाश्च एकादश रुद्रा जग
ती ॥ वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधी

॥ राम ॥
॥ ५८ ॥

भ्वरश्चैव कपाली च विशांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रास्त्वेकादश स्मृता इत्येकादश रुद्रान् ॥ यमनिर्ऋति
मध्ये गौरीमिमाय दीधेनमा गौर्यादयो जगती गौरीत्यादि षोडश मातॄः निर्ऋतिवरुणमध्ये गणानां त्वेति गण
पतिं ॥ वायुसोममध्ये मरुतो यस्य राह्नगणो मारुतो गायत्री ॥ आवाहः प्रवहश्चैव उद्वहः संवहस्तथा ॥ विव
हः परावहश्चैव नभाय रिवहो निलहति सप्त मरुतः ॥ वेषामेव यथावकाशं ब्रह्मजज्ञानमिति ब्रह्माणं ॥ इ
दं विष्णुरिति विष्णुं ॥ कद्रुद्राय घोरः करालो रुद्रो गायत्री ॥ अग्निरस्मि विश्वामित्रोर्क त्रिष्टुप् वनस्पते गर्गो
वनस्पतिस्त्रिष्टुप् न नस्त द्रुत्कृतवे इति प्रतिष्ठाप्य संपूज्य शाम्यां कलशं संस्थाप्य देवदानवसंवादे मथ्य
माने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिता ॥
त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वस
वो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे ज

लोद्भव॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदेति प्रार्थयेत्॥ ततः ऋत्विजः स्वस्वशाखीय मन्त्राधानादि कुर्युः
तत्तच्छाखेदिना मन्त्राधानं॥ नवग्रहानधिदेवताः प्रत्यधिदेवता विनायकादिपंचदेवताः दशदिक्पालान्॥ अ
ष्टौ वसून् षड्दशादित्यान् एकादशरुद्रान् सप्त मरुतः ब्रह्मविष्णुरुद्रार्कवनस्पतीं प्रत्येकमष्टोत्तरशतसं
विंशत्यष्टान्यतमसंख्यया समिदाज्यतिलाहुतिभिः पक्षे चतुर्वाहुतिभिश्च शेषेणास्विष्टकृत्समित्याद्यान्
भागान्ते कुर्यात्॥ स्वमिन रेपि॥ ततो यजमानो दक्षिणाड्य विद्यपत्नन्छाखोक्त पूर्वांगदेवताभ्यः प्रधा
नदेवताभ्य उत्तरदेवताभ्य इदमुपकल्पितं तिलाज्यद्रव्यं संप्रददे न मम यथा देवतमस्त्वित्यागं कुर्यात्॥
अथ प्रधानदेवताहोमं कुर्युः॥ तत्तच्छाखेदिनां तन्त्रं न्यास्थापनस्त्वोक्ताः॥ वस्त्रादीनां तु हेमादिमते ॐ ध्व
राय स्वाहेत्यादिना मन्त्रैर्होमः॥ मदनरत्नादौ तु ज्याजन्यादिके रुक्ताः॥ ध्वजदव्यानि॥ दशामीत्प
कादशानां हिरण्यरूपः सविता त्रिष्टुप् आघने वन्योजगन्योज ये विनियोगः॥ तं सोमेनित्र योविंशात्वे

स्यौगोनमःसोमस्त्रिष्टुप्पंचम्याविनात्रिष्टुदिद्दशागायत्र्यःसप्तदशुग्निकज्जयेविनि०समिधाग्निमिति
त्रिंशानांविरूपांगिरसोग्निर्गायत्रीजपेवि०उद्बुमितिद्वादशार्चस्यविश्वेदेवाऋषयःउधोदेवताआद्यास्त्र
यस्त्रिष्टुभःचतुर्थीगायत्रीपंचमीबृहतीषष्ठीगायत्रीनतोद्वेत्रिष्टुभौनतोजगतीजपेवि०यस्तस्तंभेमे
काद्दशानांवामदेवनवानांबृहस्पतीरंत्ययोरिंद्राबृहस्पतीत्रिष्टुप्द्दशमीजगतीजपे०भुक्तंनइतिचतु(
र्णांभरद्वाजःपूषात्रिष्टुप्द्वितीयजगतीजपे०आपोहिष्ठेतिनवानांमांबरीषसिंधुद्वीपआपोगायत्रीपं
चमीवर्द्धमानासप्तमीप्रतिष्ठाअंत्येनुष्टुभौजपेवि०कयानइतिपंचदशानांवामदेवइंद्रोगायत्रीनृती
यायाद्विबृहस्त्र्युजंतीनिद्दशानांमधुच्छंदासिन्त्यणांभंनयोश्वंद्रःशेषाणांमरुतोगायत्रीजपे०इमारु
द्रायेत्येकादशानांकुत्सोरुद्रोजगतीअंत्येत्रिष्टुभौआपोहिष्ठेतिनव॥प्राणाग्निजेत्येकविंशतीनांमे(
धातिथिश्वनसरणामश्विनौचतसृणांसवितात्रयोग्निर्द्वयोर्देवौद्वयोर्द्यावापृथिव्यौपृथिवीविष्णु

गायत्री ॥ आ नो देवेति षण्णां मेधातिथिर्विष्णुर्गायत्री ॥ अग्न आ याहीति विंशानां भर्गोऽग्निः प्रगाथः ॥ इंद्रं
विश्वेत्यष्टानां मधुच्छंदा इंद्रोनुष्टुप् ॥ आयं गौरिति तिसृणां सर्पराज्ञी आत्मा गायत्री ॥ परं मृत्यो इति तिसृणां संकु
सुको मृत्युस्त्रिष्टुप् ॥ स चित्र चित्रं भरद्वाजो मरुतस्त्रिष्टुप् ॥ अग्निं दूतमिति द्वादशानां मेधातिथिरग्नि
गायत्री ॥ कस्य नूनमिति पंचदशानामाजीगर्तिः शुनःशेफः आद्याया कः द्वितीयाया अग्निस्ततस्तिसृणां स
विता ततो वरुणस्तिस्रो गायत्र्यः शेषास्त्रिष्टुभः पवमानसोमो गायत्री ॥ इमं स्तनामीति षण्णां वृषकपि
ञ्जलानुष्टुप् अंत्या पंक्तिः ॥ प्रजापते न त्वत् ॥ कालिको नाम त्यस्य वसिष्ठः सर्पो अनुष्टुप् ॥ ब्रह्मा देवा
नां प्रथमर्दनो ब्रह्मा त्रिष्टुप् ॥ आ स न इति नवानां कुसीदो गणपतिर्गायत्री ॥ जातवेदसे ॥ ऋणाग्निरुष्
णिनो वा पुरुषोष्णिक् ॥ आदित्प्रत्नस्य ॥ एषो उषा ॥ इंद्रं विश्वेत्यष्टानां मधुच्छंदा इंद्रोनुष्टुप् ॥ अग्निः स
प्तिमिति सप्तानां सौचीको वैश्वानरोऽग्निस्त्रिष्टुप् परे पिबा सोममिति षोडशानां यमः पंचानां यमः षष्ठ्या आं

॥ राम ॥
॥ ६० ॥

गिरसस्त्रिसरणां पितरस्त्रिसरणांभ्वानौ च वनस्सरणां यमः त्रिष्टुप् ॥ अंग्ने हृदन्पतुष्टुभौ ॥ वेश्यादिर्वैयभ्वो निरु
निरुक्तिक ॥ मोसुवरुणोनि पंचानां वशिष्ठो वरुणो गायत्री अंन्या जगती ॥ वात आवात्विति निसरणामुलोवा
यु गौ नीत्वं सोमे नित्र यो विंशति ॥ इमा रुद्राये न्ये कादशा सहस्रशीर्षा षोडशान्त्व मित्रस्य यथाम र्गो ग्निहृदनी
नि ॥ जया अत्र इमा गिरः आदित्ये भ्य इति सप्तानां कर्म आदित्या त्रिष्टुप् ॥ आने पिनरिति पंचदशानां कुत्सो
रुद्रस्त्रिष्टुप् ॥ मरुतो यस्येति द्वयानां गोतमो मरुतो गायत्री ॥ हिरण्यगर्भ इति दशानां हिरण्यगर्भ कत्रि
ष्टुप् ॥ सहस्रशीर्षा षोडश ॥ आ ने पितः पंचदशाः चित्रं देवानां षसां कुत्सः सूर्यस्त्रिष्टुप् वनस्पते निति स
णां गर्गो वनस्पतिस्त्रिष्टुप् ॥ ततः प्रधान होमो त्तरं ग्रंथे दीक्षित्स्वष्टकृदादि प्रायश्चित्त होमांतं कुर्यात् ॥
धारयालक्ष्वा होमश्री सूक्तादीनि जपेयुः ॥ श्रीसूक्तं पवमानं च सोमसूक्तं सुमंगलं ॥ शान्त्यध्यायं च रुद्रस्
क्तं रक्षोघ्नं वेनिवहूचौ· दक्षिणानि धारयालौ रुद्राणं पुरुष सूक्तकं ॥ श्लोकाध्यायः शुक्रि पंचमंडलाध्याय

॥ द॰वि ॥ मेवच ॥ वामदेव्यहृहस्त्वामज्येष्टसामरथंतरं ॥ तथापुरुषसूक्तंचरुद्रसूक्तंमनःपरं ॥ आज्यदोहानिसामा॰
॥ ९१ ॥ निशांतिकाध्यायमेवच ॥ भारुंडानिचसामानि यश्चिमेद्वारपालको ॥ अथर्वांगिरसंनीलंरुद्रंदेव्यपराजितं
देवींचमधुसूक्तंइमस्तोमं ॥ सुमंगलकानिकद्रुञ्जत्रेषशांत्यध्यायःशान्त इन्द्राग्नीः इन्द्रस्त्वयोजातस्वरक्षो॰
घ्नकराशुषेनि॰ श्लोकाध्यायो देवसवितः॰ अकेयंज्ञावंवावंमंडलाध्यायो यदेनन्मंडलमिति ॥ आदित्योवार
षस्यनमंतमितिवामदेव्यंकयानः ज्येष्टसाममूर्द्धानंदिवः ॥ रथंतरंअभित्वाशूरयोरुषंसहस्रशीर्षा॰
रुद्रसूक्तंभवोराजानमिति ॥ चौवर्गो॰ आज्यदोहानिदेवव्रतानि ॥ शांतिकाध्यायः ॥ अवोध्यग्नि॰ भारुंडानि
इमंस्तोममित्यादीनि ॥ अथर्वछंदोगायत्रहृदजाय ॥ आंगिरसंआंगिरसोजन्मानः नीलरुद्रंआरुद्रपवे
षु ॥ अपराजितायशिवतमोनीति ॥ मधुसूक्तंमधुवाताः रोधसंअंभयंद्यावापृथिवी ॥ शांतिकाध्यायः ॥ ॥ राम ॥
शन्नइंद्राग्नीनि॰ जापकास्तु ॥ शन्नइंद्राग्नीतिचाग्वेदिनोऋत्वंवावमिनिचयजुर्विदांस्त्वंयजुर्वेदिनो ॥ अ॰ ॥ ९१ ॥

वो ध्यानिर्महिद्वीरणमिनिसामवेदिनो ॥ शान्नइंद्रश्चान्यथर्ववेदिनौ जयेयुः ॥ नत्नग्रहादिसूक्तानिवजापक
द्वारयालाजपेयुः ॥ अथयजुर्वेदिनांहोममंत्राजप्यानिच ॥ आकृष्णेन·इमंदेवा·वरुणांसोमोयजुः ॥ अग्निर्मू
र्द्धा·उद्बुध्यस्वाग्ने परमेष्ठीवुधस्त्रिष्टुप् ॥ वृहस्पते ॥ अन्नात्प्रजापत्यश्विसरस्वतींद्राः भृक्कोजगती·शन्नोदे
वीर्दध्यङ्ङाथर्वणःशानिर्गायत्री·कयानः·केतुंकृण्वन् ॥ अथाधिदेवादीनां ॥ त्र्यंबकं·श्रीश्चेत्युजरनाराय
णाउमात्रिष्टुप् ॥ यदकंदः विष्णोररागस्युत्वर्घोविष्णुर्यजुः ॥ आवृत्सन्प्रजापतिर्ब्रह्मायजुः ॥ सजोषाइंद्र
विश्वामित्रंइंद्रस्त्रिष्टुप् ॥ असियमोभास्करजमदग्निदीर्घथाश्वलायनस्त्रिष्टुप् ॥ कार्षिरसिदध्यङ्ङाथ
र्वणःकालोनुष्टुप् ॥ चित्रावसोत्रायपयश्विन्नरशमोहृहती ॥ अग्निंदूतंविरूपोग्निर्गायत्री ॥ अश्वनर्हेहृद
स्योनरायःपुरुहसिक·स्योनापृथिवीइंद्रोविष्णुःचानारमिंदं ॥ अदितेर्दध्यङ्ङाथर्वणाइंद्राणीयजुः ॥ प्र
जापतेनत्व·नमोस्तुदेवाःसर्पअनुष्टुप् ॥ ब्रह्मजज्ञानं ॥ गणानांत्वा· ॥ अंबेअंबिकेप्रजापतिरुर्गानुष्टुप्·

॥ दा॰वि ॥ वातोवा॥गंधर्वान्तउष्णिक॥तुर्ध्वास्यप्रजापतिराकाशउष्णिकअश्विनोरश्विनावश्विनोयजुः त्रातारं·अग्निं
॥ ६२ ॥ हुतं·असिपमः॥स्यान्तेवरुणोनिर्ऋतियजुःइमंमेभुनःशेषोवरुणोगायत्री·वातोवा·वयंसोमवंधुःसोमो॰
गायत्री·नमीशानं·नमोस्तुसर्पेभ्यः·ब्रह्मजज्ञानं·सुगावोदेवा·देवावसवस्त्रिष्टुप्॥यज्ञोदेवानांइन्द्रआदि
त्यावसवस्त्रिष्टुप्॥यस्मिनावंनश्चपरमेष्ठीरुद्रअनुष्टुप्·मरुतोयस्यगोनमोमरुतोगायत्री·आब्र॰
ह्मन्प्रजापतिर्ब्रह्मयजुः॥इदंविष्णुःमानस्तोके·चित्रंदेवानां॥अयंहित्वाप्रजापतिर्वनस्पतिर्यजुः॥अथ
जप्यानि॥विश्वाडिनिसप्तदश॥आषाढंयुत्सुविनिचर्मणीगोनमःसोमस्त्रिष्टुप्॥अग्निर्मूर्धा·उद्बुध्य·बृ
हस्पते·अन्नात्परि·द्यावोदेवी·कयानः·केतुंकृण्वन्·नमस्तेरुद्रमन्यवइतिरुद्रःश्रीश्वर्नेः·यत्क्रंदः·सह
स्रशीर्षाषोडश·आब्रह्मन्·आशुःशिशानइतिद्वादशानां·अप्रतिरथइन्द्रस्त्रिष्टुप्॥असियमइतिमा ॥ राम ॥
गेवजमदग्निर्दीर्घतमापमस्त्रिष्टुप्॥कार्षिरसिदध्यङ्ङाथर्वणअनुष्टुप्·चित्रावसवोत्रयप्योरा ॥ ६२ ॥

त्रिर्जगती॥ अस्याजरासइतिसप्तदशानांवत्सप्रीवीरूपगौतमविरूपकुत्सवामदेवभरद्वाजविश्वामित्र
मेधातिथिपराशराश्रिदुर्हिताविश्ववारामभरद्वाजवषिष्ठवामदेवगृत्सोधनकाक्षऋषयः॥आद्यवोरिंद्रवा
यून्नोमित्रावरुणभक्ताग्नींद्राग्न्यग्निविश्वेदेवामग्निमरुतमरुद्द्यादित्याग्निसवितारोदेवतात्रिष्टुप्पंति
स्तोगायत्र्यः ननास्त्रिष्टुप्जगतीत्रिष्टुभौगायत्र्योत्रिष्टुभौबृहतीत्रिष्टुभोजपेवि· आयाहिघ्रानिस्वःस्या
न्मा पृथिवीसहस्रशीर्षाषोडशआभ्युः शिशानोद्वादशःअदितेरास्ना· दध्यङ्ङाथर्वणाइजराणांयजुः हिरं
रण्यगर्भइतिवत्तुर्णांहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् नमोस्तुसर्पेभ्यः३ब्रह्मजज्ञानं·गणानांत्वा·अंवे
विकेनिपुत्वान्वायवइतिषत्सांयूत्समदश्चरुमीढाजमीढप्रजापत्यांगिरसोवभ्रवावायुर्गायत्रीद्वि
तीयपंचस्यावनुष्टुप्त्रिष्टुभौ·उर्गग्रभस्येतिद्वाशानांप्रजापतिरग्निरुस्तिकः· यावांकशामेधातिथि
राश्विनौगायत्री·आभ्युःशिशानः१२ अस्याजरासः१७ यमायत्वा·अग्नुन्वंतं·इमंमेवरुणेतिद्वयोःशुनः·

शेषो वरुणो गायत्री त्रिष्टुभौ॰ नियुत्वान् ६ आषाढं ४ रुद्राध्यायः नमोस्तु सर्पेभ्यः ३ ब्रह्मजज्ञानं॰ सुगा वो देवाव
सवस्त्रिष्टुप्॥ इमा गिरो गृत्समद आदित्यास्त्रिष्टुप्॰ शुक्रज्योतिश्चेति षण्णां सप्तर्षयो मरुतो गायत्र्यश्चाद्यच
तुर्थ्यावुष्णिहौ पंचमी जगती॰ आ ब्रह्मन् इदं विष्णुः रुद्रः विश्वा इद्धहृत्नि वत्तु १७ वनस्पते वीड्वंगः नतनस्त्वष्टह्वना
सायश्चिन्नहो यांनं कर्यान्॥ अथ सामगानां॥ उदुत्यं पञ्चकस्य एतः सूर्यो गायत्री हेमे वि० यज्ञेयज्ञ यांसि सोमः सो
मो गायत्री॰ अग्निर्मूर्धा॰ अग्ने विवस्वन् जमदग्निर्वुधो वृहती॥ हव्यसनेय त्रिके यावप्रतिरथो हृहस्पतिस्त्रि
ष्टुप् शंकंनभरद्वाजः भुक त्रिष्टुप्॰ शन्नो देवी कया नः केतुं कृण्वन्॥ आ वो राजानं वामदेवो रुद्रस्त्रिष्टुप्॰
आपो हि ष्ठा स्योना पृथिवी॰ इदं विष्णुः त्वमिन्द्रप्रथा गोतमो ब्रह्मा वृहती॰ इंद्र मिद्देवतानश्युत्कमुगिंद्रस्त्रि
ष्टुप्॰ आयं गौः॥ ब्रह्मजज्ञानं॥ वित्र ग्रशि शाश्विनग्न श्विन्नग्न्ना जगती॰ अग्निन्दूतं॰ उन्नमगोनम आपस्त्रि
ष्टुप्॰ पृथिव्यां न्तरिक्षं विष्णुः पृथिव्युष्णिक्॰ सहस्रशीर्षाः इंद्रो यंद्रो इषो वृधीय इंद्रो गायत्री॥ एकाष्टकावसि

ष्ट इंद्रशगी त्रिष्टुप् प्रजापतये ॥ नवेदिंद्रावमं वसिष्ठसर्यो त्रिष्टुप् स्पपत्रसा· आनूनो रत्नीनो गणपतिगीय
त्री· इमं स्तोमं कुत्सो दुर्गा जगती ॥ कारणाद्धिभृ रिंद्रो वायुस्तोमकः आदित्यंत्लस्पः· स्पो उपात्वामिद्धि भरद्वा
ज इंद्रो बृहती· अग्निर्हत्वारिश्रो नो ग्निर्गायत्री· नाकेसुपर्णं यमस्त्रिष्टुप्· वेश्याहीत्यादिश्यो निजनि रुक्मिकः
इममम्मे वा न अवानःप्रतीचीनेकाष्ठो नो वायुर्गायत्री· स्वादिष्ठया· नधोगायस्रुद्र इंद्रानो गायत्री· समानो अ
ध्वाउशनाअनंतस्त्रिष्टुप्· ब्रह्मजज्ञानं· नमग्निमसीवामदेवो वसवो विराट्· आदित्यैरिंद्र भरद्वाजआदि
त्यो विराट्· आवोराजानं वामदेवो रुद्रस्त्रिष्टुप्· पवमाना असृक्षत आ द्ररसत्नस्त्नो बृहती· ब्रह्मजज्ञानं· इ
द्रं विष्णुः आन्वासोम ईशानो बृहती· इंद्रायमद्वने गौरिवीनो कागायत्री· वनस्पते वीड्वंगो वाश्रव्यो वनस्पति
स्त्रिष्टुप्· ॥ अथ प्रजयानि ॥ तत्र येषां मंत्राणां गीनि रसिने षां संहितानामेव जयप्रजनिरुपनारायणादयः
उत्य· प्रकाश्यमिनि द्वादशस्वाध्यानां निरूणां वा जजिदं त्यानमादित्य त्र्याषिः सोमो देवता न्यध्याय स्वस्ति

॥ दा·वि ॥
॥ ६४ ॥

पुभः शेषागायत्र्योज०अग्निर्मूर्द्धा·अग्ने विवस्वज्ज्ञमदग्निर्ड्धो ष्टहनी·ह्रस्मने·भुक्तंने·शन्नोदेवी·कयानः
केनुंक्षरापनू·आवोराजा·नक्षगाय·आजमेराहानि·देवा निशनिचतुष्टयं रुद्रसंहिता॥आमोहिव्या·आमंद्रैः
आनोविश्वासुहव्यः प्रसेनानिनि त्रिनयेस्कंदसूक्तं· इदंविष्णुः पक्षस्य हस्मः प्रकाव्यमुशनेवेनि त्रिनयं
विष्णुसंहिता॥त्वभिक्षपपाः आयक्रौः ब्रह्मजज्ञानं· चित्रशद्धिद्राः· अग्निन्दूतं· उदुत्तमं· पृथिवींनरिक्षे·
सहस्रशीर्षा १६ इंद्रायेदा·एकाष्टका·प्रजापते·नवेदिंडं·एषब्रह्मा· अदर्दहे·मुष्वाणासः· आतूनइनि
त्रयोवर्गाः विनायकसूक्तं· इमंस्तोमं· प्राणाग्निभ्युः एषोउषास्वाभिद्रिहवामहे॥अग्निर्होत्राणी· नाके
सुपर्णं विश्वाहि· इममे·वानभावानुपकाव्यमुशनेव·१२ रुद्रसूक्तं॥विष्णुसूक्तं·ब्रह्मजज्ञानं·अदित्यैरिंद्रः·प
वमानाः ब्रह्मजज्ञानं· विष्णुसूक्तं·रुद्रसूक्तंचेति· ननोव्याहानिरोमादि·॥पूर्णारुनिग्नाविशारवाक्तं सामवे ॥ एम ॥
दीं कुर्यान्·॥अथाथर्ववेदिनां· विधासहिमथर्वादित्योजगतीः शाकंभूममथर्वासोमोनुष्टुप्·त्वयामन्यो ॥ ६४ ॥

ब्रह्मा यमस्त्रिष्टुप्॰ यत्राजा नदिभजनविष्णुर्वधपंक्तिः॰ हृदयस्यनिर्नो ब्रह्मा हृदयनिस्त्रिष्टुप्॰ शुक्रोस्यथर्वाशुक्रोनु
ष्टुप्॰ सहस्रबाहुर्नारायणः शान्तिरनुष्टुप्॰ दिव्यं चित्रं कौशिको रुद्रस्त्रिष्टुप्॰ यस्ते पृथुरथर्वा केतवस्त्रिष्टुप्॰ म
नो विदन्ब्रह्मेश्वरोनुष्टुप्॰ आपो हि ष्ठा अग्निरिव मन्यो ब्रह्मा स्कन्दस्त्रिष्टुप्॰ यनद्धिष्णुरथर्वा विष्णुर्गायत्री॰ ब्रह्मज
ज्ञानं ॥ इंद्रेमं ब्रह्मेंद्रोनुष्टुप्॰ यः सप्रथमो ब्रह्मा यमस्त्रिष्टुप्॰ रोहितः कालोथर्वा कालोनुष्टुप्॰ यद्यज्ञानं कौशिक
श्विनग्रोनुष्टुप्॰ समास्त्वा ब्रह्माग्निस्त्रिष्टुप्॥ शन्नो देवी॰ भूमे मतिर्ब्रह्मा भूमिरनुष्टुप्॰ इदं विष्णुरथर्वा विष्णु
र्गायत्री॰ इंद्रजुषस्व ब्रह्मेंद्रोनुष्टुप्॰ प्रेन पादनथर्वेंद्र रणनुष्टुप्॥ नक्तं जानाथर्वा प्रजापतिरनुष्टुप्॰ सर्पानुस
र्पाथर्वा सर्पाः पंक्तिः॰ यदिशामथर्वा ब्रह्मा त्रिष्टुप्॰ निर्लक्ष्म्यं विरणो विनायकोनुष्टुप्॥ एननाजिनमथर्वा
दुर्गा त्रिष्टुप्॰ अंतरिक्षे वायवे ब्रह्मा वायुरनुष्टुप्॰ आम्नते थर्वाकाशस्त्रिष्टुप्॰ सन्नयाथां गिरा अश्विना व
नुष्टुप्॰ इममिंद्र ब्रह्मेंद्रस्त्रिष्टुप्॥ अग्नेर्मन्वे ब्रह्माग्निस्त्रिष्टुप्॰ यमो मृत्युर्ब्रह्मा यमस्त्रिष्टुप् अभिमंत्रिनिर्ऋति

॥ शा॰वि ॥ रथर्वा निर्ऋतिरनुष्टुप्॰ येयथ्याञ्जहंत्यथर्वा वरुणो त्रिष्टुप्॰ वायोः सवितुरथर्वा गुत्रिष्टुप्॰॥ यउन्नरनो ब्रह्मा
॥ ६५ ॥ सोमस्त्रिष्टुप्॰ धाता दत्यतंगिरा ईशानो गायत्री॰ अनंनंविननमथर्वा नंनः पंक्तिः ब्रह्मा परंगुञ्जनामथर्वा ब्र(
ह्मा त्रिष्टुप्॰ प्राणा वहब्रह्मा वसवस्त्रिष्टुप्॰ आदित्येभ्यो ब्रह्मा आदित्यस्त्रिष्टुप्॥ रुद्रजताशयंब्रह्मा रुद्रास्त्रि
प्॰ मरुन्नामन्वा थर्वा मरुतस्त्रिष्टुप्॰ इमावसब्रह्मा त्रिष्टुप्॰ नछिद्मोब्रह्मा विष्णु गायत्रीवक्षो विराजो ब्रह्मा
केत्रिष्टुप्॰ वनस्पतेवीड्वङ्गः॥ अथजप्यानि॰ विषासहिं सहमानमिति षस्यामथर्वा सूर्यो जगती॰ शाकधूम
मिति चतुर्णामथर्वा सोमोनुष्टुप्॰ भुञ्कोशीत्यथर्वा भुञ्कोनुष्टुप्॰ प्राणायनमइति निस्तृणां ब्रह्मा शानिस्त्रि)
त्वया मन्मो इति सप्तानां ब्रह्मा भौमस्त्रिष्टुप्॰॥ सोमस्याशौ इति चतुर्णामथर्वा बुधोनुष्टुप्॰ भजादभिश्रेयइ
निब्रह्मा बृहस्पतिस्त्रिष्टुप्॰ भुञ्कोशीत्यथर्वा भुञ्कोनुष्टुप्॰ प्राणायनमइति निस्तृणां ब्रह्मा शानिस्त्रिष्टुप्॰ राहो ॥ राम ॥
राजानं ब्रह्मा राहुस्त्रिष्टुप्॰ यसेपृथुरिति नत्वस्याथर्वाः केनवआ घो त्रिष्टुभौ अंत्यानुष्टुप्॰ मानोविदीदनि ॥ ६५ ॥

चतुर्णां ब्रह्मा रुद्रस्त्रिष्टुप्· अग्निरिव मन्यो ब्रह्मा स्कन्दस्त्रिष्टुप्· यन्न इंद्र इति पंचानामथर्वा विष्णुस्त्रिष्टुप्· अंन्या
गायत्री· ब्रह्मजज्ञानमिति सप्तानामथर्वा ब्रह्मा त्रिष्टुप्· इंद्रोजयाति नव वसव ब्रह्मेंद्रस्त्रिष्टुप्· अंन्या गायत्रीय
मो मृत्यु रिति नव स्व ब्रह्मा यमस्त्रिष्टुप्· ऐ हि नः काल इति नव यो रथर्वाः कालोनुष्टुप्· आपरस्मादिति नव नस्त
रणामथर्वा विश्वरूपस्त्रिष्टुप्· अग्नेर्मन्व इति नव स्व ब्रह्माग्निस्त्रिष्टुप्· शन्नो देवीरिति नव नस्तरणयो गायत्रीम
न्य द्ह हृन्नमिति ब्रह्मा प्रजापतिस्त्रिष्टुप्· इंद्रोजयाति ब्रह्मेंद्रस्त्रिष्टुप्· प्रेनेपाद वथर्वेंद्राणनुष्टुप्· प्रजा
पते इति द्वयोर्ब्रह्मा प्रजापतिस्त्रिष्टुप्· शोरकेन्य स्थानां· अथर्वा सर्पाः पंक्तिः ब्रह्मजज्ञानं निलेक्ष्यं चतुर्णां द्र
विराणां दाविनायको नुष्टुप्· पृतनाजितं वायोः सवितृरिति द्वयोर्वायुस्त्रिष्टुप्· पुरंघो ब्रह्मणा इति चतुर्णां
ब्रह्मा काशोनुष्टुप्· अश्विना ब्रह्मणा ब्रह्माश्विनौ त्रिष्टुप्· इंद्रोजयाति· अग्नेर्मन्वः ३ यमो मृत्युः ३ यस्मा
ल आसनीनिति सप्तानां ब्रह्मा निर्ऋतिरुद्रिक· उत्तमं ब्रह्मा वरुणास्त्रिष्टुप्· वायोः सवितृः २ शाकध्रूमं ४

॥पा·वि॥ ॥६६॥

मानोविदन् ४ आरभकश्चेरमः ब्रसजज्ञानं ७ यानावरु· आदित्येभ्यो अंगिरोभ्यः मरुतामन्वे· ब्रुसजज्ञानं ७
यन्नइंद्रोअखनत् मानोविदन्·४ वियामहिं ६ वनस्पतेवीड्वंगः॥ ततोभ्यानानाहोमादिपूर्णाहुतिप्रान्भा
विकुर्यात्॥ ततःसावार्योयजमानःपूर्वद्वारादितः एह्येहीत्यादिभिर्मंत्रैर्दशादिक्पालानावाह्यगंधादिभिः
पूजयित्वानाममंत्रैर्माषभक्तबल्यादित्रैलोक्येयानिभूतानीत्यादिभूतबलिंतत्प्राग्वत्कुर्यात्॥ ततस्कला
यज्ञस्यपूर्वस्यांशुभद्रनामतोरणंमहावीर्यमहाकायंसुवर्णसदृशप्रभं· अत्रद्वारेस्थितःशैलोमाल्यवां
श्चमहाद्युतिः॥ ॐ एह्येहिसुभद्रतोरणत्वावाहयामीत्यनेनपूजयेत्॥ दक्षिणस्यांगतस्यभीमाख्यनाम
तोरणं·॥ महावीर्यमहाकायंभिन्नांजनचयप्रभं· तत्रद्वारेस्थितःशैलोविंध्यनामामहावपुः॥ ॐ एह्ये
हिभीमतोरणत्वावाह्यइत्येनेनपूजयेत्॥ पश्चिमांदिशामाश्रित्यसुदंष्ट्रनामतोरणंद्वारितत्रस्थितः
शैलोगंधमादनसंज्ञकः॥ ॐ एह्येहिसुदंष्ट्रतोरणत्वावाह्यअनेनआयाहीतिप्रपूजयेत्॥ उत्तरस्यांदिशि

॥राम॥ ॥६६॥

तथाविकटंतामनोहरां·महाकायंशुद्धस्फटिकसन्निभं॥तत्रचारिस्थितः शैलोहिमवांश्चमहाद्युतिः॥ए
षेहिविकटेनोहरेणत्वावाहयाम्यहं देवीतिपूजयेत्· इदंचमात्स्यानुकृत्वादत्तावश्यकं॥ततोपञ्चमातोदेव्यांषो
डशारंकृत्वातत्रतुलामवस्थाप्यतुलायेनमहातिषोडशोपचारैः संपूज्यतत्रोदकांस्थापनिमासुतामभिमं
त्रैः देवताआवाहयेत्·नाम्नईशाय·शशिने·मारुताय·रुद्राय·सूर्याय·विश्वकर्मणे·गुरवे·अंगिरोग्नि
भ्यां·प्रजापतये·विश्वेभ्यो देवेभ्यः जगद्विधात्रे·पर्जन्यशंभुभ्यां·पितृभ्यः सोम्याय·धर्माय·अमरराजाय·अ
श्विभ्यां·जलेशाय·मित्रावरुणाभ्यां·मरुद्गणेभ्यः धनेशाय·गन्धर्वाय·जलेशाय·विष्णवे·इत्यावाहयेशं
तक्ष्येऽनंतंभुजंखलायां·वासुकिंपीठाधोभूमिंपीठकमध्येभूम्याधिपतिंभुजंखलासुसर्पांश्चावाहयेत दक्ष
हृदावेदितिषनिक्षाप्यसंपूज्यचतुर्भुजंगोविंदप्रतिमांसंपूज्यधावदशांगुलमौक्तिकवस्त्रंजामध्येवलंवयेत्
ततः सूर्यधर्मराजपतिमेपूजयेत्·॥ततः स्वस्वशाखोक्तंशांतिंपठित्वाकृतस्यतुलाधिवासनकर्मणः सं

पूर्णतायेऽग्निविग्भ्यः॥ आचार्याय दक्षिणां दद्यात्· अस्मिन्दिने सर्वे उपवासं कृत्वा रात्रौ जागरणं कुर्युः॥ सद्योवाधि
वासनं॥ ततःप्रातर्यजमानः संक्षेपेण पुण्याहवाचनं कुर्यात्॥ ततऋत्विजो यथासंपूर्णाहुत्यादिकर्म समाप्य
महावेदेः पश्चिमतः सकुटुंबं यजमानं वैदिकैः सुरास्त्वेत्यादिपौराणैश्चाभिषिंचेयुः॥ ततः सर्वौषधिभिरु
द्वर्तितो यजमानो विभूतिं धारयेत्॥ अत्र तुलायास्तु देवानां च पूजां कुर्याद् इति मदनरत्नः॥ ततःकु
सुमांजलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्यनत्यश्चिमे उपविश्यप्रार्थयेत्॥ ॐ नमस्ते सर्वभूतानां शक्ति
स्त्वं सत्यमाश्रिता॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना· एकतः सर्वसत्यानि तथानृतशतानि
च॥ धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते· त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता· मां तोलयंती
संसाराउद्धरस्व नमोस्तु ते॥ योसौ तत्वाधिपो देवः पुरुषः पंचविंशकः· स एकोधिष्ठितो देवि त्वयि तस्मा
त्नमो नमः॥ ॐ नमो नमस्ते गोविंद तुलापुरुषसंज्ञक· त्वं हरे तारयस्वास्मानस्मात्संसारसागरात्॥ इति

तुलागोविंदयोरुपरिपुष्पाणिक्षिप्वापुनस्तांप्रदक्षिणीकृत्य दक्षिणहस्ते सूर्यं वामहस्ते धर्मराजमादाये
ष्टदेवतांगृहीत्वोन्तरशिको प्राङ्मुखो गोविंदं पश्यन्नासीत॥ दक्षिणे सुवर्णमधिकंभूसमेवा दद्यात्‌ सुव
र्णं दत्वा पश्चादारुहेदिति गोपथब्राह्मणे॥ ततो यजमानस्तुलायामेव स्थित इमान्मंत्रान्पठेत्॥ ॐ नमस्ते
सर्वभूतानां साक्षिभूते सनातनि। पितामहेन देवि त्वं निर्मिता परमेष्ठिना। त्वया धृतं जगत्सर्वं सहस्थाव
रजंगमं॥ सर्वभूतात्मभूतस्थे नमस्ते सर्वधारिणि॥ पुनंतु मादेवजनार्दनिज्ञावंचपठेत्॥ यथापवित्र
मतुलमपत्यं जातवेदसः॥ तथा स्वेन पवित्रेण सुवर्णं हि पुनातु मां॥ रुद्रस्य तु महत्तेजः कार्तिकेयस्य संभ
वः॥ तथा स्वेन॰ पवित्रत्वाद्यथा देवैः शिरसा धार्यते सदा॥ तथान्यथाग्निदेवताः सर्वाः सुवर्णं च तदात्म
कं॥ तथा॰ यत्कृतं मे स्वकायेन मनसा वचसा तथा॥ दुःकृतं तत्सुवर्णस्य पातु शक्तिसदाप्रभु भामिनिय
ठेत्॥ ततो वनीर्य यश्विमेडयविद्रपकुडायाणिः॥ ड्वोयरितुलासादिप्राक्षिप्यप्राणानायमकुडानित

॥दा·वि॥
॥६८॥

यवजलहस्तो देशकालौ संकीर्त्य अमुकशर्माहं एकैकमन्वंतरावच्छिन्नेत्यादिपूर्वोक्तफलमुक्षिरवाब्रसह
त्यादिसकलपापक्षयद्वाराश्रीपरमेश्वरप्रीतिकामो वाग्गुर्वर्त्विजां नामगोत्रेसमुच्चायाग्निदेवतं हिरण्यं
पितृदेवत्यं रजमान्मसमनोलिनं गुर्वर्त्विग्भ्यो हं संप्रददे न ममेति सरस्निकहस्तो यरिस्थितगुरुहस्ते संक
ल्पयेत्॥ ततो ईश्वरवेदमूर्त्विग्भ्यो दद्यात्॥ जापकादिभ्योधिवासन दक्षिणामात्रं॥ यदानुयथेछविभाग
पक्षस्य पोमेन यथाशक्ति रत्नैश्च गुर्वर्त्विजः परितोष्य तुलाडवं तेभ्यस्स दत्वा जापकेभ्यो घारपालेभ्यो
ऽन्येभ्यश्च नानागोत्रेभ्यो दीनांधकृपणेभ्यश्च यथा विभज्य दद्यात्॥ ते च सर्वे मीनुक्ता देवस्य वाणिपृ
ल्लमि इत्युक्त्वा स्वशाखीयां कामसूक्तिं पठेयुः॥ ततः कृतस्य तुलापुरुषमहादानस्य सांगतासिध्यर्थं मि माक्तु
कर्णानग्निदेवतां गुर्वर्त्विग्भ्यो हं दक्षिणां संप्रददे इति सहस्तं सुवर्णान् तोलितसुवर्णान् ततीयांशं दशां
शं वा गुर्वर्त्विग्भ्यो दक्षिणां दद्यात्॥ ग्राम रत्नानां वा दक्षिणात्वेन दानं॥ ततो यजमानो यथाशक्ति ब्राह्म

॥राम॥
॥६८॥

णाभोजनसंकल्पं कृत्वा पुनः पुण्याहवाचनं कृत्वाग्रहादीनां पुनः पूजां कृत्वा उत्तिष्ठः यान्तु देवगणा इति (
विसर्ज्य पीठमंडपविनानादिवाचार्याय दत्वेषानि पापाग्नीनां पुनः पूजनं कृत्वा गच्छ गच्छेति विसर्जयित्वा यस्य
स्मृत्या प्रमादात्कुर्वतामिति निजपित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत ॥ एककुंडीयपक्षे मंडपाकरणप
क्षे वनपूजां विनास्वमेवप्रयोगः ॥ मीमांसैकधुरंधरः श्रुतिधरोन्यायेपिवागीश्वरः साहित्यामृतसागरः
सुजननावल्लीरसालद्रुमः ॥ यंविद्वन्मीमांसेरवगोदिवाकरः शास्त्रनविश्वेश्वरं तेनाकारिनवीनपद्धतिरि
यं नृसिंहवम्भ्याः सताम् ॥ अथ नाम्नादिकृतौ विधिः ॥ ॥गोपथब्राह्मणे॥ ॥अथ चेन्निःस्वयक्षः स्याघ
यास्यपश्चनेधनं धानुभिः सहतैलस्कवासोभिश्वरसैस्तथा व्रीह्यादिभिः सर्वधान्यैर्यथासंपद्यनेगृहे
यत्पापं स्वकुलेजानां त्रिसप्तपुरुषैः कृतं ॥ तत्सर्वं नश्यनिक्षिप्तमग्नेन्तुलं यथा तथा ॥ अनामयं स्थानमपु
वाप्य दैवैरलंघनीयं सुकृतं हिरण्यं ॥ समस्तदोषात्परिमुक्तपापो दिवीडवद्राजनिस्वर्लोके ॥ भविष्ये

॥ रा·वि ॥
॥ ६९ ॥

तथासिनतृतीयायांनार्यःसौभाग्यदांतुलां॥कुंकुमेनश्यपद्मिनिलवणेनगुडेनच·नतत्रमंत्राश्चोमावाए
वमेवप्रदीयतेइति·विश्वामित्रः॥आदित्यराहुणाग्रस्तेसुवर्णंस्तोलयेत्ततः· सोमग्रहेतुरूप्येणयथा
दानंतथाश्रृणु·प्रवर्गस्यमुखेज्ञानतउत्पन्नःपतिदेहतः सर्वपापहरायेनहृदामिषयतांविभुः॥इतुत्वा
र्यंजलतत्रनिक्षिपेद्विजसत्तम॥शीर्षंतेपिनरःकांस्यनाम्नैवैवपिनामतः॥लवणसिंधुजेलक्ष्मीःप्री
यतांपार्वतीगुडे॥गंधैर्गुडैर्वावासोभिःसौभाग्यंलवलेपरं·प्रीयतांविश्वधात्रीतिदानमंत्रोविधीयते·
तुलापुरुषतोराजन्यातितत्परमंपदं॥सर्वयापविश्रुग्नात्मामुक्तिंयात्यपुनर्भवां·हत्वातुब्रासणंभू
पतोलयेदात्मतस्ततः॥सुवर्णेनात्मतुल्येनब्रह्महत्यांव्यपोहति·स्कांदे॥लोहनामाभवत्पूर्वंदानवःसुम
हाबलः सदेवैःसमरेक्रुद्धैर्वैरुधाशकलीकृतः॥तदंगसंभवंसर्वंलोहंयत्तृझपतेक्षितौ॥आत्मानंतोल
यित्वातुइमांलोहंवतत्समं॥द्विजायशिवभक्तायतथान्यस्मैद्विजातये॥पादुकोपानहछत्रचामरास

॥ राम ॥
॥ ६९ ॥

नसंस्तुतं ॥ अयने विष्णवे पुरोषव्यनीयानादिपर्वसु ॥ अमायुक्तः शुचौ देशे विशेषात्तत्परायणः ॥ पंचामृतेन सं
स्नाप्य देवदेवमुमापतिं । केवलेन घृतेनाथ पयस्यमानेन धुर्जटिं । सुगंधिचंदनजलेस्ततः संस्नापयेद्विभुं ।
चंदनागरुकक्कोलकर्पूरमृगनाभिभिः विलिप्य परमेशानं सुमनोभिस्तथार्चयेत् ॥ भक्ष्याणि वेद्यनैवेद्य
मनवेघनवेनसा । ॥ ननःश्वरणाय्यजगनामीश्वरं प्रार्थयेदिति । ॥ देवदेव जगन्नाथ कृपालो परमेश्वर । मा
ड्रस्व संसारपंकसंकोचडुःखितं । ॥ इति संप्रार्थ्य यो दद्याच्छोहमान्नमसमं नरः ॥ स याति शिवसालोक्यं या
वदिंद्राश्चतुर्दश ॥ ननउनरिलायानः पृथिव्यामेकराड्भवेत् ॥ एतेषु च सर्वेषु सुवर्णदक्षिणाविशेष
मीन्तरे ॥ तुलादानं प्रवक्ष्यामि सर्वपापप्रणाशनं । यज्ञो याचरितं पूर्वं लक्ष्मीनारायणेन च ॥ पुण्ये दि
नमथासाद्य तत्नीयायां विशेषतः ॥ गोमयेनोपलिप्तायां भूमौ कुर्याद्दृढं शुभं । दारवं शुभ कृत्तस्य च तु
र्हस्तं प्रमाणतः ॥ सुवर्णेन च वध्नीयान्नवशक्त्या घटितं धटे ॥ सौवर्णं स्थापयेत्तत्र वासुदेवं चतुर्भुजं ।

॥ दा॰ वि॥ ॥ ७०॥

शिक्यद्वयं तु वध्नीयात्स्थापयेत्पिठके ततः ॥ ततारुह्येत्स्नातवस्त्रश्च सर्वालंकारभूषितः ॥ अभीष्टदेवतां पृष्ठस्था
पयित्वा घृतादिभिः ॥ तुलादानस्य सर्वस्य विधिरेष प्रकीर्त्तितः ॥ अत्र विधिरेषप्रकीर्तित इति वचनाद्देता
वन्येवेतिकर्त्तव्यतेति दामोदरः ॥ तत्रैव ॥ प्रथमा तु घृतस्योक्ता तेजोवृद्धिकरी तुला ॥ माक्षिकेण तु सौभाग्यं
तैलेन वहुलापत्यः ॥ वस्त्रेणा दिव्यवस्त्राणि प्राप्नोति तुलाया ध्रुवं ॥ लवणेन तुलावर्णमरोगित्वं गुडेन च ॥
असपत्नी शर्करया सुरूपं चंदनेन च ॥ अविमुक्ता भवेद्भर्त्री तुलाया कुंकुमस्य च ॥ न संतापो हृदि भवेत्क्षीर
स्य तुलया तथा ॥ सर्वकामप्रदाः सर्वा सर्वपापक्षयंकराः ॥ यादृशानि तुलाः सर्वाः स्वर्गायालयमाश्रयात्
मंत्रेणा दद्याद्दर्भिर्मंत्रितां तु सकृत्तुलामेकतमां द्विजेभ्यः ॥ सयानि गोर्याः सदनं सुपूर्णं पतनोकदेभर्ग्यस्य
तु पाश्चुतेपमान् ॥ त्वं तुले सर्वभूतानां प्रमाणं परिकीर्त्तिता ॥ मां तोलयंति संसारादुद्धरस्व नमोस्तु ते ॥ ॥ राम॥ ॥ ७०॥
इत्यारुह्य क्षणं स्थित्वाविं नीयत्वा हरिं प्रिया ॥ अवरुह्य ततो दद्याद्द्रव्यादं यथाविधि ॥ गुरुसंप्रमविधि

वस्त्रवालंकारभूषणैः ॥ अत्रार्द्धयादेवागुरवे दद्यादित्यन्वयः ॥ शेषं द्विजेभ्यो दातव्यमित्यभिधानात् ॥ वि
सर्जयेत्तमस्कृत्य भोजयित्वा विधानतः ॥ शेषं द्विजेभ्यो दातव्यं स्त्रीभ्यो न्येभ्यस्तथैव च ॥ इष्टवंध्रुविद्विशिष्टा
नामाग्निनां कुटुंविनां ॥ कदलीदलसंस्थांतु पञ्चपिण्डांहिमाद्रिजां कर्पूररसनुनां पुष्पकुंकुमेनातलभेतु
नां ॥ विधिनानेन यो दद्यात्तुलादानं विमत्सरः ॥ सलोकमेति पार्वत्याः सेव्यमानोप्सरोगणैः ॥ नत्रोष्यका
लं सुचिरमिहलोके नृपो भवेत् ॥ हेमप्रपाप्रकारः ॥ आत्मतुल्यं सुवर्णं वा रजतं रत्नमेव वा । यो ददाति द्वि
जाग्र्येभ्यस्तस्यायेतत्फलं भवेत् ॥ एतत्पूर्वोक्तदानजं ॥ तत्त्वब्रह्महत्यादिपापेभ्यः पदियुक्तो भवेन्नरः ॥ स
तत्पापविनिर्मुक्तः प्रोक्तं विष्णुपुरं व्रजेत् । ॥ तुलापुरुषभूमीन्द्रदीयमानेव येनराः ॥ पश्यन्ति यानि तेपि
यांयेव सुरलमोदकाः ॥ गुडं वा यदि वा खंडं लवणं वापि तैलिनं ॥ यो दद्यादात्मना तुल्यं नारी वा पुरु
षोपि वा ॥ पुमानश्वमुग्वत्सस्यान्नारीस्यात्पार्वतीसमा ॥ सुभगरूपसंपन्नाभुजीतां तेत्रविष्टपं ॥ हिरण्य

॥ दा·वि ॥
॥८१॥

दक्षिणायुक्तं सवत्सं भूषणान्वितं ॥ अलंकृत्वा द्विजायैतं परिधाप्य च वाससी। एवं आदित्यो लिनं यश्चा द्विज
यथाविपाद्येन् ॥ सर्वकामसमृद्धात्मा नेनकालं वसेद्दिवि ॥ रोगलन्तुलागामडे ॥ जुलाप्रुरुषदानं तुभ्यमुर
मन्तुं जयोदितं ॥ अथतो हं प्रदानवं सर्वरोगोपशान्तये। कांसं च यक्ष्मणो देयं त्रपुरार्द्धो विकारके। अपस्मा
रे तु सीसं स्यात्ताम्रं कुष्ठे सुदारुणे ॥ पित्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः ॥ सुवर्णं सर्वरोगेषु प्रदद्यान्मृ
त्युनोदितं ॥ फलोद्भवं तथा दद्याद्ग्रहणी दीर्घदारुणे ॥ गोडंभस्मकरोगे च योगं तु गंडमालके। योगं पूगीफ
लं ॥ जांगलं चाग्निमांद्ये च रोमान्यानेन्तु पोष्यकं ॥ जांगलकायुजं ॥ मधूद्भवं तथा देयं कासश्वासजलोदरे ॥ घृ
तोद्भवं तथा देयं छर्दिरोगोपशान्तये ॥ क्षीरं पित्तविनाशाय दधिस्याद्ग्रगरारोगे ॥ लवणं वेपनाशाय
पेष्टं दद्रुविनाशने ॥ अन्नं च सर्वरोगस्य नाशने स्मृतमेव चेति ॥ एषां द्रव्याणामधिदेवतास्त्वेव ॥ अ
धिदेवं जलो हेत्र महाभैरव तुष्यते ॥ कांस्ये त्रपा वह्निनो च वायुश्च सीसके स्मृतः ॥ ताम्रे सूर्यस्तथा प्रोक्तः

॥ राम ॥
॥८१॥

पेन्नले चक्रकस्तथा ॥ रौप्ये चापि नरोज्ञेयाः सुवर्णे सर्वदेवताः ॥ फले सोगुडे चापस्सांबूले तु विनायकः ॥ गंधर्वा
कुंकुमे चैव जांगले ग्निस्तथा स्मृतः ॥ मधौ यक्षाः प्रयत्नेन घृते मृत्युंजयः स्मृतः ॥ क्षीरे नारागणाः सर्वे दध्नि स
र्पाः प्रकीर्त्तिताः ॥ लवणे पार्वती देवी सप्तद्वीपानु देवता ॥ पिष्टे प्रजायति र्देवो अन्ने सर्वाश्च देवताः ॥ आर्निर्ये
दासाम्या त्वं वाषा मृत्यासुराण देयजं ॥ नित्यं मृत्युंजयं प्राप्तं विधिना यत्प्रदीयते ॥ तदेव सर्वशांत्यर्थं भव
तीति न संशयः ॥ तुलापुरुषदानेन मृत्युंजय निमानव इति ॥ ॥ उत्तुपयोगि निर्णयः ॥ ॥ अथप्रयो
गः ॥ ॥ कर्त्ता देशकालौ संकीर्त्य अमुककामनया श्री परमेश्वरप्रीत्यर्थं ममुकद्रव्यं तुलादानमहं करि
ष्ये इति संकल्प्य ॥ यथा तु सुवर्णरजतादिभिलितास्त सप्तादि तुलाः क्रियंने नपापक्षय एवं फलमुक्त
रवं ॥ रोगनिरासार्थं तुलायां तु स्वस्पष्टि शर्वामुकरोगनिरसेनाक्षिप्रारोगणार्थं मिति संकल्प्य ॥ तत्तोग
रोशायूजनं प्रणापह वाचने कृत्वा वार्घकृत्वाव स्त्रालिलिः पूजयेत् ॥ आचार्येगौरीप्रीत्यर्थं तुलायां कर्पू

रक्तेन पंचपिंडिकारूपां गौरीं कुंकुमेनालिप्य पूजयेत् ॥ ततो धर्मराजसूर्यविष्णुप्रतिमाः संपूज्य ॥ विष्णुप्र
तिमां तुलामध्ये वध्नीयात् ॥ ततः पूर्वोक्तां तोलनीयद्रव्यादिप्रतिमां ऊर्ध्वोपरि संपूज्य तुलायेन मइति तुलां
च संपूज्य रक्तवस्त्रेण वेष्टयेत् ॥ ततः शक्त्यौ तुलायां धातुमयेषु सूत्रमयेषु वा चतुर्दिक्षु वा नि देवाः पूजयेत्
नाम्ना ईशानाय नमः १ शशिने २ मारुताय ३ रुद्राय ४ सूर्याय ५ विश्वकर्मणे ६ गुरवे ७ अंगिरोभ्यां
८ प्रजापतये ९ विश्वेभ्यो देवेभ्यः १० विधात्रे ११ पर्जन्यशंभुभ्यां १२ पितृभ्यः १३ सोमपायः १४ धर्माय १५
अमरराजाय १६ अश्विभ्यां १७ जलेशाय १८ मित्रावरुणाभ्यां १९ मरुद्गणेभ्यः २० धनेशाय २१ गंधर्वा
य २२ जलेशाय २३ विष्णवे २४ ततः कर्त्तालंकृतः कुसुमांजलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्य पवित्र
प्रार्थयेत् ॥ ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृतशतानि च ॥ धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते ॥ त्वं तुले सर्वभूतानां

नांप्रमाणाम्यहंकीर्त्तिता ॥ मांतोलयंतीसंसारादुद्धरस्वनमोस्तुते ॥ योसौतत्वाधिपोदेवःपुरुषःपंचविंशा-
कः ॥ सएषोधिष्ठितोदेवीत्वयितस्मान्नमोनमः ॥ नमोनमस्तेगोविंदतुलापुरुषसंज्ञक ॥ त्वंहरेतारयस्वा-
स्मानस्मात्संसारसागरात् ॥ इतिपठित्वातुलोयस्थितुयावल्लिंगलिपयेत् ॥ पुनस्तुलांत्रिःप्रदक्षिणीकृत्यवा-
महसेधर्मराजंदक्षिणेचसूर्यमंकेस्वेष्टदेवतांवादायपाश्चमुखस्तुलापाउत्तरफलकआरुहेत् ॥ दक्षिणे
नसुवर्णंस्यादुत्तरेणनराधिपइतिस्मरणात् ॥ ततोदक्षिणफलकेआचार्योघृतादिद्रव्यमारोपयेत् ॥ याव-
त्समादधिकंस्यात् ॥ पुष्टिकामेननवमुष्टिसमवधिकार्यःस्वयंचतुलास्थितःसहरेर्मुखंपश्यन्निमंमंत्रंपठेत् ॥
ॐनमस्तेसर्वभूतानांसाक्षिभूतेसनातनि ॥ पितामहेनदेवित्वंनिर्मितापरमेष्ठिना ॥ त्वयाधृतंजगत्सर्वं
सहस्थावरजंगमं ॥ सर्वभूतात्मभूतस्थेनमस्तेविश्वधारिणि ॥ ततस्तुलापावनीयंतोलितद्रव्यंतत्सर्वं
निक्षिप्यदेवाकालोपमंत्रीभीगुरुकामदद्दमशुकद्रव्यमात्मसमंतोलितमाचार्यायामेभोक्तालंकरणंभःस

॥दा.वि॥
॥७३॥

माश्रितनवंध्रुववर्गेभ्योदीनानाथेभ्यश्चसंप्रददे॥ ततःकनकतुलादानश्चनिःस्वासिध्यर्थ्यंयथाशक्तिसुवर्णमाच
चार्यायदक्षिणांसंप्रददे॥ ततोभूयसींदक्षिणांब्राह्मणभोजनंचसंकल्प्यावाहितदेवताविसर्ज्याचार्याय
तुलार्द्धंपादंवाधनिमांचदत्वातुलाशेषंचयथोद्देशंदत्वाप्रमादाद्यस्यस्मृत्वेनिजपित्वाकर्मब्राह्मणांकृत्वा
सुहृद्युतोभुंजीत॥ तुलापुनिग्रहप्रायश्चित्तंचमत्कनकायाप्रश्चित्तसारान्ज्ञेयं॥ मीमांशोकधुरंधरःश्रुनिध
रौन्यायेपिवागीश्वरःसाहित्यामृतसागरःसुजननानावल्लीरसालद्रुमः॥ यंविघ्नन्मणिशेखरोदिनकरःसा
सूनविश्वेश्वरंतेनाकारिघृनादिनोलतनोविधोसम्यीनयेयफनिः॥ ॥अथहिरण्यगर्भमहादानं॥ मात्स्ये॥
अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥ नाम्नाहिरण्यगर्भाख्यंमहापातकनाशनं॥ पुण्यंदिनमथासा
द्यतुलापुरुषदानवत्॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ कुर्यादुपोषितस्तद्वल्लोकेशावाहना
दिकं॥ पुण्याहवाचनंकृत्वैवमधिवासनं॥ ब्राह्मणैराहानयेत्कुंडंतपनीयमयंशुभं॥ द्वासप्तत्यंगुलोच्छ्रायं

॥राम॥
॥७३॥

हेमपंकजगर्भेवत् ॥ त्रिभागहीनविस्तारं प्रशस्तं मुरजाकृतिं ॥ दशास्त्राणिसरत्नानिदात्वं सूचींनथै
वच ॥ हेमनालंसपिठकंवहिरादिन्यसंयुतं ॥ नथैवावरणांनाभेरूयवीमंत्वकांचनं ॥ पार्श्वेनस्था
पयेन्नछत्रमदंडकमंडलुं ॥ पयाकारंपिधानंस्यात्समंनादंगुलाधिकं ॥ मुक्तावलीसमोपेतंपद्मरागदला
न्वितं ॥ तिलजेरणोपरिगतंवेदीमध्येनतोर्चयेत् ॥ ततोमंगलशब्देनब्रह्मघोषरवेणच ॥ सर्वौषधमुद्
कस्नानंस्नापितोवेदपुंगवैः ॥ भृक्तमालांवरधरःसर्वाभरणभूषितः ॥ इममुच्चारयेन्मंत्रंगृहीतकुसुमां
जलिः ॥ नमोहिरण्यगर्भायहिरण्यकवचायच ॥ सर्वलोकसुराध्यक्षजगद्धात्रेनमोनमः ॥ भूर्लोकप्र
मुखालोकास्तवगर्भेव्यवस्थिताः ॥ ब्रह्मादयस्तथादेवानमस्तेविश्वधारिणे ॥ नमस्तेभुवनाधारनम
स्तेभुवनाश्रय ॥ नमोहिरण्यगर्भायगर्भेयस्यपितामहः ॥ यतस्त्वमेवभूतात्माभूतेभूतेव्यवस्थितः
तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ एवमामंत्र्यतन्मध्येभाविशेत्स्तउदङ्मुखः ॥ मुष्टिभ्यांपरि

॥दा·वि॥ गृह्याथ धर्मराजन्चतुर्मुखो ॥ जातमध्येशिरःकृत्वा निषेध्दुहुसपंचकं ॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं
॥७४॥ तथा ॥ कुर्यात् हिरण्यगर्भस्य तन्नस्य द्विजपुंगवाः ॥ गीतमंगलघोषेण रुद्रस्थापयेत्ततः ॥ जातकर्मादिकाः
कुर्यात्क्रियाः षोडशवापराः ॥ स्तुत्वादिकं चगुरवे दत्वा मंत्रमिमं जपेत् ॥ नमो हिरण्यगर्भाय विश्वगर्भा
यवैनमः ॥ चराचरस्य जगतो गृहभूताय वैनमः ॥ माताहं जनितः पूर्वं मर्त्यधर्मा नरोत्तमः ॥ त्वद्गर्भसं
भवाद्देव दिव्यदेहो भवाम्यहं ॥ चतुर्भिः कलशैर्भूयस्तदनैर्द्विजपुंगवाः स्नानं कुर्युःप्रसन्नांगाः सर्वाभर
रणभूषिताः ॥ देवस्यत्वेति मंत्रेण स्थितस्य कनकासने ॥ अद्यजातस्य तेंगानि अभिषेक्ष्यामहे वयं ॥ दि
व्येनानेन वपुषा चिरंजीव सुखी भव ॥ ततो हिरण्यगर्भं तं तेभ्यो दद्याद्विचक्षणः ॥ तेपूज्याः सर्वभावेन ॥ राम ॥
वहवो वा न दातव्या ॥ तच्चोपकरणं सर्वं गुरवे विनिवेदयेत् ॥ पादुकोपानहच्छत्रचामरासनभाज ॥ ७४ ॥
नं ॥ ग्रामं वा विषयं वापि यदन्यमपि तत्भवेत् ॥ अनेन विधिना यस्तु पुरेण हविनिवेदयेत् ॥ हिरण्य

गर्भदानं सब्रह्मलोके महीयते ॥ उरेभ्लोकपालानां प्रतिमन्वंतरं वसेत् ॥ कल्पकोटिशतं यावद्ब्रह्मलोके
महीयते ॥ कलिकलुषविमुक्तः पूजितः सिद्धसंघैर्यमरचमरमालावीज्यमानोप्सरोभिः ॥ पितृशत
मथवधून्पुत्रपोत्रप्रपोत्रानपिनरकनिमग्नांस्तारयेदेकएव ॥ इतिपठ्यइत्थं यः शृणोतीहसम्यक॰
मधुरिपुपुरलोके पूज्यते सोपि सिद्धैः ॥ मतिमपि च जनानां यो ददाति प्रियार्थं विबुधपतिजनानां ना
यकः स्यादमोघः ॥ तुलापुरुषवदिति विशेषो यदिष्टधर्मानतिरिक्तसकलधर्मातिदेशः ॥ उपलक्षणं त
यानुक्तानि चिह्नकल्पानुक्तानि ॥ एतेनोयोषितं इति पुनरुपवासविधानमुपवासप्रतिनिधिनक्ता॰
दिप्रतिषेधार्थमिति परास्तं ॥ ब्राह्मणैरितिःसहार्थे तृतीया ब्राह्मणैः सह स्वयमानयेदित्यर्थः ॥ य
द्वा ब्राह्मणद्वारा आनाययेदिति कुंडपात्रंनयनीयमयमिति ॥ यावतांसुवर्णानदानमनल्पंगृलोछ्रा
यं तत्तृतीयांशान्मूनमष्टचत्वारिंशत्संगलविस्तृतं मध्ये किंचिदुन्नतं मध्यस्थिते सौवर्णीयमंपात्रं

भवतिनावत्सुवर्णैश्चाहं ॥ मात्स्येपरिमाणानुक्तेः ॥ स्थौल्येफलवैशेष्यमितिदामोदरहेमाद्र्यादयः ॥ एतेनकु
र्यान्महस्तकर्षेणअन्नपात्रंहिरण्मयः ॥ सहस्रजंवातत्कृत्वास्वर्णपट्टैस्तुवेष्टयेत् ॥ माषकल्केनचातिप्य
पंचगव्येनपूजयेदितिकामकेनअधःपात्रसहस्रेणहिरण्येनविधीयते ॥ ऊर्ध्वपात्रंतदर्धेनेतिलिंगेन
हिरण्यगर्भंतंकुर्याद्धिरण्यपात्रतुलाकृतमितिविश्वधर्मोत्तरेणचमात्स्यस्यानुपसंहारइतिसर्वसंमत
मितिसिद्धं ॥ प्रशस्तेतिमृदंगाकारत्वोक्त्यामध्येकिंचिदुन्नतमितिदामोदरः ॥ केचिन्मृदंगसमत्वस्यापि
दर्शनात्सममेवेतिमिश्राः ॥ दानसागरेतुप्रशस्तेसप्तधान्यक्षीराभिपूरितमितिपठितंतस्यचाभिरभागद
तिसूत्रेअभिशब्दस्यैकदेशवचनत्वेनव्याख्यानादर्धंक्षीरार्घ्यांतथापात्रंपूरणीयंयथायजमानप्रवेशोना
हतीत्यर्थः ॥ दशेतिअस्त्राणिखड्गचक्रशक्तिदंडपाशध्वजगदाशूलपरशुकुलिशानिसरत्नेति ॥ रत्ना
निपंचनववा ॥ वज्रंचमौक्तिकंचैवमाणिक्यंनीलमेवच ॥ तथामरकतंश्रेयंमहारत्नानिपंचधेन्यागस्त्या

गमान् ॥ मुक्ताफलं हीरकं च वैडूर्यं पद्मरागकं ॥ पुष्परागं च गोमेदं नीलं गारुत्मतं तथा ॥ प्रवालयुक्तान्युक्तानि
महारत्नानि वै नव ॥ निरूपनारायणो विष्णुधर्मोत्तरात्त्व ॥ रत्नादीनि च वहिः पार्श्वन इत्येनयोः सर्वत्र संबंधा
द्धिरण्यगर्भाद्वहिः पार्श्वतः स्थापनीयानि ॥ पात्रं कर्त्तयोदिस्यु विकर्णावेधार्थं ॥ नालनानवालनालाकारं पिट
टकं ज्ञानोपवेशनपट्टकम् ॥ स्थालाकारं नदीनि केचित् ॥ आदित्यप्रनिमोक्ता ॥ नाभेरावरणं नाभ्याच्छादन
वासः ॥ उपविनाशे कांचनत्वभवर्ण दन्पल्लाह्रुनमेव कार्यमिति केचित् ॥ तत्र कांचनत्वश्रवसोपलक्ष
णात्वान्सर्वाणि सुवर्णमयानीत्यन्ये ॥ रत्नान्यपहाय सौवर्णानीति नव्याः ॥ एतानि वै दशायत्तायुधानीति
वराह्युधशब्देन रत्नादिकमेवोच्यत इति दानसागरः ॥ रूपनारायणोनु दशांगाणीति पठित्वा सुवर्णनिर्मि
तादशदशावलकपोह्रनार्थं स्थापनीया इति व्याख्यातं ॥ दशार्द्धानि च रत्नानीति पाठः पंचरत्नानीत्यर्थ इ
ति विद्याधरः ॥ भन्नायपक्षस्वानुक्तेपइति दामोदरः ॥ पद्माकारमिति वर्तुलतोच्यत इति दामोदरस्तत्र

लक्षणायां मानाभावात् ॥ मुक्तेति स्वर्णं तन्मयामुक्तामालया युक्तं ॥ पद्मरागस्य दलं खंडस्तेन मध्येन्वित
मित्यर्थः ॥ मुष्टिभ्यामिति ॥ धर्मराजस्य दक्षिणमुष्टिना तज्जानने धारणोक्तेश्च तु मुखस्य वाममुष्टिना धा
रणं ॥ कुर्युरिति पिधानेन छादनं ॥ वर्निर्जो नव हिरण्यगर्भस्य यजमानस्य गर्भाधानादित्रयं कुर्युरित्य
र्थः ॥ उभयापये यजमानमित्यर्थः ॥ षोडशसंस्कारान् गुरुरेवं कुर्यात् ॥ उभायनकर्तृत्वेन तस्योपस्थित
त्वात् कुर्यादित्येकवचनात् ॥ यत्तु तमोदरेण गर्भाधानादौ सर्वेषां कर्तृत्वात् सर्वसंस्काराणां समानकर्तृत्व
नियमात् सर्वेषां षोडशसंस्कारकर्तृत्वं ॥ कुर्यादित्येकवचनं तु साधुत्वमात्रार्थमित्युक्तं तद्युक्तं ॥ स
मानकर्तृकस्य वचनेन वाधात् ॥ गर्भाधानवैश्वदेवयोः समानकर्तृत्वाभावाच्च ॥ अत्र गर्भाधानादीनां
केषांचित् संस्काराणां कुंडेऽसंभवाद् यत्नांकस्य विवाहासंभवात् कन्यानराणयनेप्रयोजकत्वाद्यत्नैः संस्का
रकरणीभूत मंत्रपाठमात्रमिति तमोदरः ॥ मंत्रा अपि न यजमानशाखानुसारिण एव ॥ नानाशाखी

यानां त्रानिजानं द्वारवाधयनप्रयोजकापत्तेः ।। स्त्रीशूद्रादीनामनधिकारापत्तेश्च ।। न चेष्टापत्तिरिति वाच्यं
गर्वान्निजामहृष्टार्थकमंत्रपाठेन संस्कारसंभवे प्रधानविधिसंकोचे मानाभावात् ।। नेत्रत्राग्वेदे जातकर्म
नामकरणं ।। अन्नप्राशनं चूडाकरणं उपनयनं महानाम्नीव्रतं महाव्रतं उपनिषद्व्रतं गोदानव्रत
मिति चत्वारि वेदव्रतानि स्नानं विवाहः ।। पंचमहायज्ञा इति तिनाडुति ।। यजुर्वेदे तु प्राजापत्यमैंद्रमासे
यसौम्यमिति ।। वेदव्रतानि नामकरणं नास्तीति ।। सामवेदे नामकरणस्थाने अन्नप्राशनं ।। गोदानव्र
तं केशांतव्रतं ।। महानाम्नीव्रतं ज्येष्ठसाम्नीव्रतमिति ।। अथर्ववेदे ।। जातकर्म निष्क्रमणमन्नप्राशनं ।। गो
दानमुपनयनं सावित्रीव्रतं वेदव्रतं सावित्रीव्रतविसर्जनं समावर्तनं विवाहः ।। पंचमहायज्ञा इति तिनाड्
ति ।। एतन्मंत्राश्च प्रयोगे स्फुटाः ।। रूपनारायणस्तु जातकर्म नामकरणं निष्क्रमणमन्नप्राशनं चूडाकरणमु
पनयनव्रतचतुष्टयविवाहपंचमहायज्ञरूपान् षोडश संस्कारान्सामान्यत एव गणयति स्म ।। प्रयोगकाले

चातिरिक्तानपिसंस्कारमंत्रान्लिखतिस्म॥ तन्न॥ अतिरिक्तकरणेमानाभावात्॥ शाखाभेदेनसंस्कारभे
दात्व॥ सूर्यादिकमिति॰ अत्रकेचिदिदानींतनादिदशकमेवदेयं॥ रवक्षादिदशाकंतुदक्षिणादानोत्तरमि
त्याहुः॥ तन्न॥ आदिपदेनसर्वेषांग्रहणात्॥ नचमंत्रेजनितइतिपुल्लिंगनिर्देशादपूर्वमंत्रद्वहाभावा
त्स्त्रीणामनधिकारइतिवाच्यं॥ आत्माभिप्रायेणपुल्लिंगोपपत्तेः॥ तेभ्योगुर्वादिभ्यस्त्रयोदशभ्यः अत्र
तुलापुरुषवत्सर्वोविभागोज्ञेयः॥ तेपूज्याःसर्वभावेनपूर्णभक्त्येत्यर्थः॥ त्रयोदशांतेभ्योपिदेयमिति
पक्षांतरमाह॥ वस्त्रोवेति॥ अत्रापितुलावद्विभागोज्ञेयः॰उपकरणंपादुकादीनिचगुरवेदेयानीति
केचित्॥ वस्त्रनरूउपकारणादीनांप्रागेवदानोक्तेरूपकरणशब्देनपादुकादीनेवोच्यंते॥ विषयो
यामसस्पृहः परिग्रणाइतिमध्यदेशेप्रसिद्धः॥ ॥इतिहिरण्यगर्भमहादानविधिः॥ ॥अथब्रह्मयो
गः॥ ॥कर्त्तादेशकालौसंकीर्त्यमहापातकनाशकल्पकोटिशतावच्छिन्नब्रह्मलोकमहितत्वप्राप्तिलोक

पालण्डाधिकरणकमन्वंतरवासकलिकल्मषविहीनवरुसिद्धसाध्यपूतिनवकूष्मरःकन्दकामरव्या
मरमानावीज्यमानन्वशुक्लपिनद्धानवरुवंधुउन्नयोत्तंसंनारणकामभ्योहिरण्यगर्भमहादानमहं॰
प्रतिपादयिष्यइतिसंकल्प्यमधुपर्कानंतरंतुलाउरूपवत्कृत्वाषोडशारोपरिडण्याणिविकीर्यनदुपरिद्रोण
परिमितांस्तिलान्निधायहिरण्यगर्भकुंडंस्त्वष्टादिघटितंतस्मादित्येनस्वयंवासमानीयतिलोपरिसं
स्थापयनन्मध्येघृतक्षीरेतुल्यपरिमाणेयजमानस्थितियोग्येदेये॥ हिरण्यगर्भपार्श्वेवरखड्गचक्रशा
र्ङ्गदंडपाशध्वजगदाभृत्परशुकुलिशरूपाणिदशास्त्राणितथारत्नदानप्रसूचीनालपिंडकादिम
प्रतिमानाभावरणयज्ञोपवीतदंडकमण्डलून्त्सुवर्णनिर्मितांस्तन्नदाकृतीन्तथापादुकोपा॰
नहछत्रचामरासनभाजनपात्राणिशाकुनान्येवस्थापयेत्॥ कुण्डमध्येहेमंपद्मंन्यसेत्॥ कुण्डोप॰
रिपद्माकारंपूर्वोक्तलक्षणांपिधानंदद्यात्॥ अथसंध्योत्तरमग्निस्थापनादिरात्रिकृत्येशातनभय॰

जमानाभिषेकांते कृते यजमानो गृहीतपुष्पांजलिर्हिरण्यगर्भं त्रिः प्रदक्षिणीकृत्य मंत्रान्पठेत् ॥ नमो हिर
ण्यगर्भाय हिरण्यकवचाय च ॥ सर्वलोकस्य राध्यक्ष जगद्धात्रे नमो नमः ॥ भूर्लोकप्रमुखा लोकास्तव गर्भे व्य
वस्थितः ॥ ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे ॥ नमस्ते भुवनाधार नमस्ते भुवनाश्रय ॥ नमो हिरण्य
गर्भाय गर्भे यस्य पितामहः ॥ यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः ॥ तस्मान्मामुद्धराशेषदुःखसंसा
रसागरात् ॥ ततः पुष्पांजलिना हिरण्यगर्भं संपूज्य पिधानमपसार्य हिरण्यगर्भे प्रविश्य दक्षिणेन पा
णिना धर्मराजं वामेन च चतुर्मुखं धृत्वाजानुद्वयमध्ये शिरः कृत्वोर्द्धमुखः श्वासपंचकमासीत गुरुस्त
चोपरि पिधानं दद्यात् ॥ गर्भनाडीदशायां च गर्भाधानपुंसवनसीमंतोन्नयनप्रधानमंत्रान्स्वस्वशाखीयाग्
र्वेद्विजः पठेयुः ॥ तत्राश्वलायनमंत्राः ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजापति
र्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्कर

स्रजौ ॥ हिरण्यपयी अरणी यन्निर्मथानो अश्विना । तं तेगर्भं हवामहे दशमे मासि सूतवे । नेजमेषपरापतसुपु
त्रः पुनरापत ॥ असै मे पुत्रकामायै गर्भमाधेहि यः पुमान् । यथेयं पृथिवी मह्युत्ताना गर्भमादधे ॥ एवं तं ग
र्भमाधेहि दशमे मासि सूतवे ॥ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां ॥ पुमांसं पुत्रमाधेहि दशमे मासि सू
तवे ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयी
णां ॥ अयं नः शोभ्रुचदग्यमध्नेशुभ्रुध्यारयिं ॥ अयं नः शोभ्रुचदग्रं याः फलिनीर्या अफला अपुष्पा याश्च पु
ष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ ॥ इति गर्भाधानं ॥ यत्ते सुसीमे हृदये हितमंतः प्रजापतौ ॥ म
न्ये हं मां तद्विद्वांसं मा हं पौत्रमघं नियां ॥ इति पुंसवनं ॥ ॥ ॐ भूर्भुवस्स्वरोमिति ॥ इति सीमन्तोन्नयनं ॥ अथ
कामायनानां ॥ ॐ धाता भगं सविता दधातु रुद्रः गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं त अश्वि
नौ देवावाधत्तां पुष्करस्रजौ ॥ रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियं ॥ गर्भो जरायुणावृत उल्वं जहाति

॥गा·वि॥
॥७८॥

जन्मना॥ यत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितं·वेदाहंतन्मांतद्विद्यात्·पश्येमशरदःशतंजीवेमशरदःश
तंशृणुयामशरदःशतं॥ ॥इतिगर्भाधानं॥हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्·॥
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥ अद्भ्यःसंभृतंपृथिव्यैरसाच्चविश्वकर्मणःसम
वर्त्तताग्रे॥तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे॥ ॥इतिपुंसवनम्॥ ॥ॐभूर्भुवः
स्वःविनयामि॥ ॥इतिसीमन्तोन्नयनम्॥ ॥अथसामगानां॥ ॐविष्णुर्योनिंदधातुते॥गर्भंधेहिपुष्क
रस्रजौ॥ ॥इतिगर्भाधानम्॥ ॐपुमांसौमित्रावरुणौपुमांसावश्विनावुभौ॥पुमानग्निश्चवायुश्च
पुमान्गर्भस्तवोदरे॥पुमानग्निःपुमानिन्द्रःपुमान्देवोबृहस्पतिः॥पुमांसंपुत्रंविदस्वतंपुमाननुजायतां
॥ ॥इतिपुंसवनम्॥अथस्नूर्जावतोवृक्षस्तुर्जावफलिनीभवपर्णंवनस्पतेनुत्वानुत्वासूयतांरयिः॥
ॐभूःॐभुवःॐस्वःॐयेनादितेःसीमानंनयतिप्रजापतिर्महतेसौभगाययेनाहमस्यैसीमानंनयामि

॥राम॥
॥७८॥

प्रजामस्यैजरदष्टिंकृणोमि॥ राकामहंसुहवांसुष्टुतीहुवेशृणोतुनः सुभगाबोधतुत्मना॥ सीव्यत्वपःसू
च्याछिद्यमानयाददातुवीरंशतदायमुक्थ्यं॥ यास्तेराकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि॥
ताभिर्नोअद्यसुमनाउपागहिसहस्रपोषंसुभगेरराणा॥ ॐकिंपश्यसिप्रजांपशून्सौभाग्यंमह्यंदीर्घायु
ष्ट्वंपत्युः॥ इतिसीमन्तोन्नयनं॥ अथाथर्वणानां॥ यवेनाद्दिवोयानेरंगादंशान्समामृतां॥ ह्वायोगर्भस्वरे
नोधाःसरैपर्णमिवादधत्॥ यथेयंपृथिवीमहीभूतानांगर्भमादधे॥ एवादधामितेगर्भंतस्मैत्वामवसे
हुवे॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति॥ गर्भंतेअश्विनौवाधत्तांपुष्करस्रजा॥ गर्भंतेमित्रावरु
णौगर्भंदेवोबृहस्पतिः॥ गर्भंतइन्द्रश्चाग्निश्चगर्भंधाताधधातुते॥ विष्णुर्योनिंदधातुते॥ यद्वेदराजाव
रुणोयदुदेवीसरस्वती। यदिन्द्रोवृत्रहावेदतद्गर्भकरणंपिब। गर्भोअस्योषधीनांगर्भोवनस्पतीनांग
र्भोविश्वस्यभूतस्यसोअग्नेगर्भमेहधाः। अधिस्कन्दवीरयस्वगर्भमाधेहियोन्यां॥ वृषासिवृष्ण्यावस्रा

॥ द्यःवि ॥
॥ ९० ॥

जायेत्वानयामसि ॥ विजिहीष्ववहित्मामेगर्भस्तेयोनिनाशयान् ॥ अतुष्टेदेवाउत्रसोमयाठमयादिनं·
धानःश्रेष्ठेनरूपेणास्यांनार्यांवावीन्योःपुमांसंपुत्रमाधेनिदशमेमासिसूतवे ॥ त्वष्टःश्रेष्ठेनसूतवे·स
वितःश्रेष्ठेनसूतवे·प्रजापतेःश्रेष्ठेनसूतवे· ॥ इतिगर्भाधानम् ॥ येनेवेहत्रुभ्यिप्यनाशयामसिनत्वत·
इदंनदंमत्रनत्वदपद्वरेनिदधामिसिआनेयोनिंगर्भएतुपुमान्वाणइवेषुधिं ॥ आवीरोत्रजायतांपुत्रस्तेद
शमास्यः ॥ पुमांसंपुत्रंजनयतंपुमाननुजायतां ॥ भवासिपुत्राणांमातांजातानांजनयाश्चयाः ॥ यानि
भद्राणिवीजान्यृषभाजनयंतिच ॥ तैस्त्वंपुत्रंविंदस्वसाप्रसूर्धेनुकाभव· कृणोमिनेप्राजापत्यमायो
निंगर्भएतुते· विंदस्वत्वंपुत्रंनार्यांस्तुभ्यंशमसच्छमुतस्मैत्वंभव ॥ यासांद्यौपितापृथिवीमातासमुद्रोमूलं
वीरुधांवभूव ॥ तास्त्वापुत्राविद्यायदेवीःप्रावन्त्वोषधयः ॥ इतिपुंसवनं ॥ यानेमानोन्ममार्जंजानाया·प ॥ राम ॥
निवेदनौ ॥ दुर्नामानत्रमाकृधीहलींशठनवन्तयः ॥ पतीलाजुयलालोशांकुंकोकंमलिम्लुचपनीजकम्· ॥ ९० ॥

आश्रेयंवाद्विवाससमृक्षग्रीवंप्रमीलिनं॥मासंहृतोमोपसृपउरूमावसृपोन्तरां॥कृणोम्यस्यैभेषजं
दुर्णामचातनं॥दुर्णामावसुनामावोभासंहृतमिछतः॥अरायानपहन्मसुनामास्त्रैणमिछतां॥यः
कृष्णःकेश्यसुरस्तंबजउततुंडिकाः॥अरायानस्यामुष्काभ्यांभंससोपहन्मसि॥अनुजिघ्रंप्रमृशंतंक्र
व्यादमुतरेरिहं॥अरायांश्वकिष्किणोवजःपिंगोअनीनशत्‌॥यस्त्वास्वप्नेनिपद्यतेभ्राताभूत्वापितेवव
जस्तांसहतामितःक्लीवरूपांस्तिरीटिनः॥यस्त्वास्वपंतींत्सरतियस्त्वादिप्सतिजाग्रतीं॥छायामिवप्रता
न्त्सूर्यपरिक्रामन्ननीनशत्‌॥यःकृणोतिमृतवत्सामवतोकामिमांस्त्रियं॥तमोषधेत्वंनाशयास्याः
कमलमंजिवं॥येशालापरिनृत्यंतिसायंगर्दभनादिनः॥कुसूलायेचकक्षिलाःककुभाःकरुमास्त्रि
माः॥तानोषधेत्वंगंधेनविषूचीनान्विनाशय॥इतिसीमंतोन्नयनम्‌॥ततोगुरुःश्वासपंचकका
लोत्तरंगीतमंगलध्वनिनापिधानमपनीययजमानमुत्थापयेत्‌॥ततोवहिर्निःसृतेयजमानेस्व

शारीयान्योडशसंस्कारसंवंधिनः प्रवाधनमात्रान्पठेत्॥ नचाश्वलायनानां॥ प्रतेददामिमधुनोघृतस्य
वेदंसवित्राप्रसूतंमघोनां॥ आयुष्मान्गुप्तोदेवताभिःशतंजीवशरदोलोकेस्मिन्॥ मेधांतेदेवःसवि
तामेधांदेवीसरस्वती॥ मेधांतेअश्विनौदेवावाधत्तांपुष्करस्रजा॥ अश्माभवपरशुर्भवहिरण्यम
स्तृतंभव॥ वेदोवैपुत्रनामासिसजीवशरदःशतं॥ इंद्रश्रेष्ठानिद्रविणानिधेहिचित्तिंदक्षस्यसुभ
गत्वमस्मे॥ पोषंरयीणामरिष्टिंतनूनांस्वाद्मानंवाचःसुदिनत्वमन्हां॥ अस्मेप्रयंधिमघवन्नृजीषि
निंद्ररायोविश्ववारस्यभूरेः॥ अस्मेशतंशरदोजीवसेधाऽअस्मेवीरांछश्वतइंद्रशिप्रिन्॥ जातकर्म॥
त्वमसुकनामासीति॥ नामकरणमंत्रः॥ अन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणःप्रप्रदातारंतारिषऊ
र्जंनोधेहिद्विपदेचतुष्पदे॥ इत्यन्नप्राशनं॥ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वा
न्॥ तेनब्रह्माणोवपतेदमस्यायुष्मान्जरदष्टिर्यथासत्॥ येनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्

तेनत्नआयुषेवपामिसुश्लोकायस्वस्तये ॥ येनभूयश्चरात्र्यांज्योक्चपश्यातिसूर्यं ॥ तेनत्नआयुषेवपामिसु
श्लोकायस्वस्तये ॥ एतानेवमंत्रान्पुनरपिवारद्वयंपठेत् ॥ इतिचूडाकरणम् ॥ प्रणवव्याहृतिपूर्वंसा
वित्र्यनुवचनमिमन्तुमंत्रः ॥ त्वंव्रतानांव्रतपतिरसि ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्य
जत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ शन्नइन्द्राग्नीभवतामवोभिःशन्नइन्द्रा
वरुणारातहव्या ॥ शमिन्द्रासोमासुविताययोःशन्नइन्द्रापूषणावाजसातौ ॥ कयानश्चित्रआभुवदूती
सदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ स्योनापृथिवीनोभवानृक्षरानिवेशनीयच्छानःशर्मसप्रथाः ॥ त
च्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्पश्येमशरदःशतंजीवेमशरदःशतं ॥ इतिमहानाम्नीव्रतम् ॥ त्वंव्रतानांव्रत
पतिरसिमहाव्रतायस्वाहा ॥ इतिमहाव्रतम् ॥ त्वंव्रतानांव्रतपतिरसिउपनिषदेस्वाहा ॥ इतिउपनिषद्व्र
तीयेनावपन्सविनाक्षुरेणान्यादिचूडाकरणमंत्रैःत्रिःपठेत् ॥ इतिगोदानव्रतम् ॥ ऋतंवमेअमृतंवमे

नन्मउभयंव्रतं॥ निंदाचमेनन्मउभयव्रतं॥ विद्याचमेअविद्याचमेनन्मउभयव्रतं॥ श्रद्धाचमेअश्रद्धा
चमेनन्मउभयव्रतं॥ प्रज्ञाचमेअप्रज्ञाचमेनन्मउभयव्रतम्॥ इष्टंचमेअनिष्टंचमेननाउभयव्रतम्॥
दत्तंचमेअदत्तंचमेनन्मउभयव्रतम्॥ अधितंचमेअनधीतंचमेनन्मउभयव्रतम्॥ कृतंचमेअकृतंच
मेनन्मउभयव्रतम्॥ समंचमेअसमंचमेनन्मउभयव्रतम्॥ श्रुतंचमेअश्रुतंचमेनन्मउभयव्रतम्॥ व्रतं
चमेअव्रतंचमेनन्मउभयव्रतम्॥ यदस्मेसेंद्रस्यसप्रजापतिकस्यसब्रह्माधिकस्यसब्रह्माधिराजन्यस्यसपि
नृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसानूकाशस्यसप्रतीकाशस्यसप्र
तीकाशस्यसदेवमनुष्यस्यसगंधर्वाप्सरसस्यसहारसैपेश्वपशुभिर्ग्राम्यैश्चयन्मआमनः॥ आत्मनिव्र
तंनन्मेसर्वव्रतमिदमहमग्नेसर्वतोभवामिस्वाहा॥ ममाग्नेवर्चोविहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषेम
मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेमपृतनाजयेम॥ ममदेवाविहवेसंतुसर्वइंद्रवंतोमरुतोवि

स्तुरग्निः॥ममांतरिक्षमुरुलोकमस्तुमह्यंवातःपवतांकामेऽअस्मिन्॥मयिदेवाद्रविणमायजंतांमय्याशी
रस्तुमयिदेवहूतिः॥दैव्याहोतारोवनुषंतपूर्वेरिष्टाःस्यामतन्वासुवीराः॥मह्यंयजन्तुममयानिहव्याकूतिःस
त्यामनसोमेअस्तु॥एनोमानिगांकतमच्चनाहंविश्वेदेवासो॥अधिवोचतानःदेवीःषळुर्वीरुरुणःकृ
णोतविश्वेदेवासऽइहवीरयध्वं॥माहास्महिप्रजयामातनूभिर्मारधामद्विषतेसोमराजन्॥अग्नेमन्यु
प्रतिनुदन्परेषामदब्धोगोपाःपरिपाहिनस्त्वं॥प्रत्यंचोयंतुनिगुरुःपुनस्तेऽमैषांचित्तंप्रबुधांविनेशन्
धाताधातॄणांभुवनस्यपस्पतिर्देवंत्रातारमभिमातिषाहं॥इमंयज्ञमश्विनोभाबृहस्पतिर्देवाःपान्तु
यजमानंन्यर्थात्॥उरुव्यचानोमहिषःशर्मयंसदस्मिन्हवेपुरुहूतःपुरुक्षुः॥सनःप्रजायैहर्यश्वमृळ
यहर्यश्वमृळयेन्द्रमानोरीरिषोमापरादाः॥येनःसपत्नाऽअपतेभवंत्विंद्राग्निभ्यामवबाधामहेतान्॥वस
वोरुद्राआदित्याउपरिस्पृशंमोग्रंचेत्तारमधिराजमक्रन्॥अर्वांचमिन्द्रममुतोहवामहेयोगोजिद्धनजि

॥दा·वि॥ विश्वजिघः इमन्तोमज्ञं विरुवेज्जुयस्वास्पकुल्मोहरिवो मेदिनंत्वा॥ इतिसमावर्त्तनम्॥ गृभ्णामितेसौभग
॥८४॥ त्वापहस्तंमया पत्याजरदष्टिर्यथासः॥ भगो अर्यमासविताप्तुरंधिर्मह्यंत्वादुर्गार्हपत्याय देवाः॥ इतिवि
वाहः॥ सूर्याय स्वाहा·प्रजापतये स्वाहा·सोमायवनस्पतये स्वाहा·अग्नीषोमाभ्यांस्वाहा·इन्द्राग्नीभ्यांस्वाहा·
द्यावापृथिवीभ्यांस्वाहा·धन्वंतरये स्वाहा·इंद्राय स्वाहा·विश्वेभ्यो देवेभ्यःस्वाहा·गृहायस्वाहा·गृहदेवताभ्यः
स्वाहा·इंद्रायस्वाहा·इंद्रपुरुषेभ्यःस्वाहा·यमायस्वाहा·यमपुरुषेभ्यःस्वाहा·वरुणायस्वाहा·वरुणपुरुषे
भ्यःस्वाहा·सोमायस्वाहा·सोमपुरुषाषेभ्यःस्वाहा·ब्रह्मणेस्वाहा·ब्रह्मपुरुषेभ्यःस्वाहा· विश्वेभ्योदेवेभ्यः
स्वाहाः सर्वेभ्योभूतेभ्यःस्वाहा·दिवाचारिभ्यःस्वाहाः रक्षोभ्यःस्वाहा॥ इतिभूतयज्ञः॥ स्वधापितृभ्य इत्येक
एवयज्ञमंत्रः॥ सनकादिमनुष्येभ्योहंतत्येकमनुष्ययज्ञमंत्रः॥ गायत्रींपठित्वा·अग्निमीलेपुरोहितंय ॥राम॥
ज्ञस्यदेवमृत्विजं॥ होतारंरत्नधातमं॥ एवमादियथाशक्तिज्ञात्वापठित्वा·नमोब्रह्मणेनमोस्त्वग्नयेन ॥८४॥

मः पृथिव्यै नमः ओषधीभ्यो नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि ॥ इतिबलयजः ॥
अथकाम्यायनानां ॥ ॐ भूस्त्वयि दधामि · ॐ भुवस्त्वयि दधामि · ॐ स्वस्त्वयि दधामि · ॐ भूर्भुवः स्वर्वैत्वयि द
धामि · अग्निरायुष्मान्स वनस्पतिभिरायुष्मान्तेन त्वायुषायुष्मंतं करोमि सोम आयुष्मान्स ओषधीभिरा
युष्मान्तेन त्वायुषायुष्मन्तं करोमि ॥ ब्रह्म आयुष्मत्त् ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मंतं करोमि ॥ देवा आयु
ष्मान्तस्ते मृतेनायुष्मान्तस्तेन त्वायुषायुष्मंतं करोमि ॥ आयुष्मन्तस्ते ब्रतैरायुष्मन्तस्तेन त्वायुषायुष्मंतं
करोमि ॥ पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेन त्वायुष्मंतं करोमि ॥ यज्ञ आयुष्मान्स दक्षिणाभिरायु
ष्मांस्तेन त्वायुषायुष्मंतं करोमि ॥ समुद्र आयुष्मान्स स्रवंतीभिरायुष्मांस्तेन त्वायुष्मंतं करोमि ॥ इत्यस्य
मंत्रस्य वारत्रयं जपः ॥ ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषमिति नि
जयति ॥ ॐ प्राणा · ॐ व्याना · ॐ अपाना · ॐ उदान · ॐ समान · ॐ अश्माभव परशुर्भव हिरण्यमस्तृतं भव · ॥

॥ द॰वि॥
॥ ८५॥

आत्मावैपुत्रनामासिसत्वंजीवशरदःशतं॥इतिशिरोघ्राणकर्ममंत्राः॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्च
रत्पश्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतंप्रब्रवामशरदःशतमदीनाःस्यामशरदः
शतंभूयश्चशरदःशतात्॥इत्येकस्यवनिष्क्रमणमंत्रः॥ॐहन्नना इत्येकस्यवान्नप्राशनमंत्रः॥ॐयेनावप
त्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्मणोवजीवनायसुश्लोक्यायस्वस्तये॥ॐत्र्यायु
षंजमदग्नेःयेनभूयश्चरादिवज्योक्चपश्चाद्धिसूर्यं॥तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लो
क्यायस्वस्तये॰ॐयत्क्षुरेणमज्जयतासुपेशसावप्तावावपतिकेशांश्छिन्धिशिरोमास्यायुःप्रमोषीः॥इ
तिचत्वारश्छेदाकरणमंत्राः॥सावित्रीमंत्रमात्रपाठः॥इत्युपनयनमंत्रः॥प्रजापतयेस्वाहा॰इंद्रायस्वा
हा॰अग्नयेस्वाहा॰सोमायस्वाहा॰अंतरिक्षायस्वाहा॰वायवेस्वाहा॰ब्रह्मणेस्वाहा॰प्रजापतयेस्वाहा॰देवे
भ्यःस्वाहा॰ऋषिभ्यःस्वाहा॰श्रद्धायैस्वाहा॰मेधायैस्वाहा॰सदसस्पतयेस्वा॰अनुमतयेस्वाहा॥एतेयंच

॥ राम॥
॥ ८५॥

रशावेस्त्वनवत्नुस्पर्शमंत्राः॥ ॐ येअंतरस्नयःप्राविद्यागोह्वउपणोह्मेमयूषोमनोहास्ववत्नुरेकविरुजस्लन्नु
तुष्ठुरिंडियशनान्विजहामियोरोचनस्लमिहयूल्लोमिनेनरमाममभिषिंचामिश्रियेयशसेब्रह्मणोवर्च
साय॥ येनश्रियमकृणुतांयेनावमृशतांसुरां॥ येनाक्षावभ्यषिंचतांयद्वांतद्श्विनायशः॥ ॐ आपोहि
ष्ठामयोभुवनस्तानऊर्जेदधातन॥ महेरणायचक्षसे॥ योवःशिवतमोरसस्तस्यभाजयतेहनः उशती
रिवमातरः तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथाचनः॥ इतिपञ्चस्नानमंत्राः॥ गृ
भ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः भगोअर्यमासविपुरंधिर्मह्यंत्वादुर्गार्हपत्यायदे
वाः॥ अमोहमस्मिसात्वंसात्वंमस्यमोहं द्यौरहंपृथिवीत्वंनावेहिविवहावहैसहरेतोदधावहैप्रजांप्रज
नयावहैपुत्रान्विंदावहैबहून्तेसंतुजरदष्टयःसंप्रियौरोचिष्णुसुमनस्यमानौपश्येमशरदःशतंजी
वेमशरदःशतंश्रृणुयामशरदःशतम्॥ इतिविवाहमंत्राः॥ ॐ ब्रह्मणेस्वाहा॰ ॐ प्रजापतयेस्वाहा॰ गृ

॥ दा॰वि ॥
॥ ८६ ॥

घाभ्यः स्वाहा॰ कश्यपाय स्वाहा॰ अनुमनये स्वाहा॰ इति पञ्च देवयज्ञमंत्राः॥ ॐ पर्जन्याय नमः॥ ॐ अद्भ्यो नम
पृथिव्यै नमः धात्रे नमः वायव्यै नमः॥ इति मंत्रावारचतुष्टयं प्राच्यै नमः वायव्यै नमः प्रतीच्यै नमः उदीच्यै
नमः ब्रह्मणे नमः अंतरिक्षाय नमः सूर्याय नमः विश्वेभ्यो देवेभ्यो नमः विश्वेभ्यो भूतेभ्यो नमः उषसे न
मः॥ इति षोडशभूतयज्ञमंत्राः॥ ॐ पितृभ्यः स्वधा नमः॥ इति पितृयज्ञमंत्रः॥ अतिथिपूजानुध्यानमंत्रं॰
सनकादिमनुष्येभ्यो हन्तेति मंत्रावा पठनीयमिति मनुष्ययज्ञः॥ यथाशक्ति इषे त्वोर्जे त्वा इत्यादिमंत्रपा
ठो ब्रह्मयज्ञ इति॥ अथ सामगानां॥ ॐ इयमा मेदमन्नमिदमायुरिदममृतं॰ ॐ मेधां मे मित्रावरुणौ
मेधामग्निर्दधातु मे मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं॰
सनिं मेधामयासिषं स्वाहा॰ नेजानकर्म॥ ॐ कोसि कतमोस्येषोस्यमृतोसि॥ अस्य त्वमासं प्रविश
श्री विष्णुशर्मन्॥ ॐ सत्वाह्नेपरिददात्वहस्त्वा रात्र्यै यरिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरा

॥ राम ॥
॥ ८६ ॥

त्रैनर्द्धमासेभ्यः परिददन्नामर्द्धमासास्त्वामासेभ्यः परिददन्नृतुमासास्त्वर्त्तुभ्यः परिददन्नवस्त्वायुषेजजायेपरिद
दत्तुश्रीविष्णुशर्मन्॥ इतिनामकरणं॥ ॐ पत्नेसुश्रीमेहृदयेहितमन्त्रः प्रजापत्नौ॥ वेदाहंपत्नेनहृस्माहंपो
त्रमयन्निगाम्॥ यत्पृथिव्याअनामृतंदिविचंद्रमसिश्रितं॥ वेदामृतस्याहंपोत्रमरिषं॥ इंद्राग्नीशर्मयच्छत
प्रजायैमेप्रजापती॥ यथायन्त्रपृथमीयेनएतोज निध्याअधिनिष्क्रमणं॥ भायमगात्सविनाक्षुरेण॥ उष्णे
नवायुउदकेनैधि· आपउंदंतुजीवसेविष्णोर्हिष्ठोसि॥ ओषधेत्रायस्वैनंस्वधितेमैनंहिंसीः॥ ॐ येनपूषा
बृहस्पतेर्वायोरिंद्रस्यचावपत्॥ तेनतेवपामिब्रह्मणाजीवानवेजीवनायदीर्घायुष्वायवर्च्चसे॥ श्र्यपउदं
त्वित्यादिमन्त्रपंचकंपुनरपिवारद्वयंपठेत्॥ ॐ त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषमगस्त्यस्यत्र्यायुषं
यद्देवानांत्र्यायुषंतन्नोअस्तुत्र्यायुषं॥ इतिचूडाकरणं॥ सावित्रीहितमंत्रपाठः॥ इत्युपनयनं॥ ॐ अ
ग्नेव्रतपतेव्रतंचरिष्यामितत्तेप्रब्रवीमितच्छकेयंतेनर्ध्यासमिदमहमनृतात्सत्यमुपैमिस्वाहा॥ ॐ वायो

॥ दा॰वि ॥
॥ ८७ ॥

व्रतपते सूर्य व्रतपते चंद्र व्रतपते व्रतानां व्रतपते ॥ अग्ने व्रतपते व्रतमचारिषं तन्नेऽब्रवीमि तदशकं तेनारा
त्समिदमहमनृतात्सत्यमुपागं स्वाहा॰ ॥ वायो व्रतपते सूर्य व्रतपते॰ चंद्र व्रतपते॰ व्रतानां व्रतपते इति वेद
चतुष्टयं ॥ ॐ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूखो मनोहाः स्खलो विरुजस्तनूदूषिरिन्द्रियहा अतिता
न्सृजामि ॥ ॐ यदपां घोरं यदपां क्रूरं यदपामशान्तमतितत्सृजामि ॥ ॐ यो रोचनस्तमिह गृह्णामि तेनाहं मामभि
षिंचामि॰ ॐ यशसे तेजसे ब्रह्मवर्चसाय बलायेंद्रियाय वीर्यायान्नाद्याय रायस्पोषाय त्विष्याऽअपचि
त्यै ॥ ॐ येन स्त्रियमकृणुतं ॥ येनापामृशतं सुरां ॥ येनाक्षानभ्यषिंचतं येनेमां पृथिवीं महीं ॥ यद्वां तदश्विना
यशस्तेन मामभिषिंचतं ॥ एतेयं च समावर्तनं ॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा
सः भगोऽअर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सु
मनाः सुवर्चाः ॥ वीरसूर्देवकामा स्योना शन्नो भव द्विपदे सं चतुष्पदे॰ आ नः प्रजां जनयतु प्रजापतिराजरसा

॥ राम ॥
॥ ८६ ॥

यसमनक्त्वर्यमा॥ अउर्मंगलीः पतिलोकमाविशशान्नो भवद्विपदेशं चतुष्पदे॥ इमांत्वमिंद्रमीढ्वः सुपुत्रांसुभ
गांकृधि॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकृरु॥ संम्राज्ञीश्वशुरेभव संम्राज्ञीश्वश्र्वांभव॥ ननांदरिसंम्रा
ज्ञीभव संम्राज्ञी अधिदेवृषु॥ ॐ ममव्रते हृदयं दधातु· ममचित्तमनुचित्तंते अस्तु॥ ममवाचमेकव्रतोजुष
स्वबृहस्पतिष्ट्वानियुनक्तुमह्यं॥ इतिविवाहः॥ ॐ भूस्वाहाः भुवःस्वाहा· ॐ स्वःस्वाहा· ॐ भूर्भुवस्वः स्वाहा·॥ ॐ दे
वकृतस्यैनसोवयजनमसिस्वाहा॥ पितृकृतस्यैनसोवयजनमसिस्वाहा॥ ॐ मनुष्यकृतस्यैनसोवयजन
मसिस्वाहा॥ ॐ अस्मत्कृतस्यैनसोवयजनमसिस्वाहा॥ ॐ यद्दिवानक्तंचैनश्चकृमतस्यावयजनमसि
स्वाहा॥ ॐ यत्स्वपंतश्चजाग्रतश्चैनश्चकृमतस्यावयजनमसिस्वाहा· ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृ
मतस्यावयजनमसिस्वाहा॥ ॐ एनसएनमसिस्वाहा॥ ॐ अग्नयेस्विष्टकृतेस्वाहा॥ इतिदेवयज्ञः॥ ॐ स
र्वेभ्योदेवेभ्योनमः॥ ॐ सर्वेभ्योभूतेभ्योनमः॥ इतिभूतयज्ञः॥ पितृयज्ञस्वधेतिपितृयज्ञमंत्र॥ अतिथिपू

॥दा॰वि॥ ॥९८॥ जातुधानं स्नानकादिमनुष्येभ्यो हंतेति वा मनुष्ययज्ञः ॥ यथाशक्ति नुत्पायांत्यादिमंत्रपाठो ब्रह्मयज्ञः ॥ इति पंचम
हायज्ञाः ॥ अथाथर्ववेदिनां ॥ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वेदेवैः ॥ अहंमित्रावरुणोभाविभ
र्म्यहमिंद्राग्नी अहमश्विनोभा॰ अहंराष्ट्रीसंगमनीवसूनां चिकितुषी प्रथमायज्ञियानां ॥ तां मां देवाव्यदधुः पु
रुत्राभूरिस्थात्रां भूर्यावेशयंतः ॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषाणां ॥ यं कामये तं तं
उग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं
अमंतवो मां त उपक्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हं
तवा उ ॥ अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमु
त पूषणं भगं ॥ अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥ अहं सुवे पितरमस्य मूर्धन्मम ॥राम॥
योनिरप्स्वन्तः समुद्रे ततो वितिष्ठे भुवनानि विश्वतामूं द्यां वर्ष्मणोपस्पृशामि ॥ अहमेव वात इव प्रवा ॥९९॥

स्मारभमा यमुवना निविश्वा ॥ यद्रोदिवायद्रपृथिव्यैनावती माहेस्मां संबभूव । अयं वेदेनानकर्ममंत्रः ॥
शिवेनेत्त्वां द्यावापृथिवी असंताये अभिश्रियो ॥ यानेपूर्यं आननं यत्तु सखानो वा हृदो शिवा ३ अभिक्षान्तुवा
यो दिव्याः पयस्वतीः शिवास्ते संतोषमयः उत्वा सूर्यमध्यरस्याउन्नतां पृथिवीमभि ॥ उद्वयं तमसस्परि रोहं
निनाकन्तुममम् ॥ देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमं ॥ एतेन योनिक्षमणमंत्रः वोनेत्वांद्वीहियवाव
वत्वा साव येमधौ ॥ एतौ यक्ष्मं विवाधेते एतौ मुंचतो अंहसः ॥ यदश्नामि यत्पिवामि धान्यं कृत्स्नाः
पयः न्यगधायदन्नाद्यं सर्वं तन्मविषं करोमि ॥ अन्नप्राशनमंत्रः ॥ येनावपत्सविता क्षुरेण सोमस्य
राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्मणो वपतेदमस्य गोमानश्ववानयमस्तु प्रजावान् ॥ इति गोदानमंत्रः
प्रणवव्याहृति पूर्वकं सावित्र्यनुवचनमित्युपनयनमंत्रः ॥ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं त
न्मे राध्यतां तन्मे समृध्यतां मन्मे माध्यनवा न राध्यासं तन्ने प्रब्रवीमि नदुपावाशीमे ॥ वायो व्रतपते इत्यादि॥

॥ शा·वि ॥ सूर्यव्रतपतेइत्यादि ॥ चंद्रव्रतपतेइत्यादि ॥ आपोव्रतपतेइत्यादि ॥ नत्रइतिस्थानेनचइत्यूहोमिविशेषः
॥ ८९ ॥ देवाव्रतपतेइत्यादि· वेदाव्रतपतेइत्यादि· व्रतानांव्रतपतेइत्यादि· एतेअष्टौसावित्रीव्रतवेदमंत्राः ॥ इद्रा
वत्सरायपरिवत्सरायकृणुतावृहन्नमः· तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम· सानो
देवाअहिर्बुध्न्योनोकानसरपूरुषान् ॥ संयंतंनविष्परध्यान्वंनसंयमन्नमोदेवजनेभ्यः ॥ नमोस्तु(
सिनायनमस्सिरप्विनाजयेस्वजायचनवेनमोनमोदेवेभ्योजनेभ्यः· इत्रन्नेहस्मिदनादनःगाटनेहस्वाह
न्नद्रान्नेजिह्वयाजिह्वांशांवीसहः अस्वा· अग्नेव्रतपतेव्रतमचारिषंतदशकंतन्मेमाम्नंतन्मेराद्धंतन्मेसम
द्धंतन्मेमाव्यसनंतेनराद्धोस्मितद्वन्मव्रवीमिनदुपाकरोमि ॥ वायोव्रतपतेइत्यादि· सूर्याव्रतपतेइत्यादि·
चंद्रव्रतपतेइत्यादि ॥ आपोव्रतपतेइत्यादि· ॥ नत्रइतिपदस्थानेनचइतिपदप्रक्षेपोविशेषः ॥ देवाव्र ॥ राम ॥
तपतेइत्यादि· वेदाव्रतपतेइत्यादि· व्रतानांव्रतपतेइत्यादि ॥ एतेसावित्रीवेदव्रतानांविसर्जनमंत्राः ॥ आज्यं ॥ ८९ ॥

स्ना य मयजामहेय्याभ्यां कर्म्माणि कुर्व्वने · स्ते सदसि राजनो यज्ञं देवेषु यच्छनः ॥ ऋचं साम यदप्राक्षं हविरो
जो हविर्जुर्बलं · स्नमा नस्मामा हिंसी वेदः पृष्टः शचीपने · स्नावेव मंत्रौ मिलितौ पुनः पठनीयौ ॥ अनु मनये
स्वाहा ॥ स्तेत्रयः समावर्त्तनमंत्राः · येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणं · तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मा
व्यथिष्ठ मया सह प्रजया च धनेन च ॥ देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु ॥ अग्निः सुभ
गां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु · गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ॥ भगो अ
र्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः · भगस्ते हस्तमग्रहीत्सविता हस्तमग्रहीत् ॥ पत्नी त्वमसि
धर्म्मणाहं पतिस्तव · ममेयमस्तु पोष्या मह्यं त्वादाद्बृहस्पतिः ॥ मया पत्या प्रजावती संजीव शरदः शतं ॥ स्
ते यं चौ विवाहमंत्राः ॥ ॐ भूः स्वाहा · ॐ भुवः स्वाहा · ॐ स्वः स्वाहा · ॐ भूर्भुवः स्वः स्वाहा · ॥ देवकृतस्यैनसो वयजन
नमसि स्वाहा · ॥ पितृकृतस्यैनसो वयजनमसि स्वाहा ॥ मनुष्यकृतस्यैनसो वयजनमसि स्वाहा ॥ आत्मकृ

॥दा·वि॥
॥९०॥

नस्मैनसो वयजनमसिस्वाहा· अनाज्ञाताज्ञानस्यैनसोवयजनमसिस्वाहा·यद्वो देवांश्चकृमजिह्वया गुरु
मनसो वा प्रयुती देव हेडनं॥ आरावा यो नो॰ अभि दुच्छुनायते तस्मिन्तदेनो वसवो निधेतनः स्वाहा॥ यद्देवा
देव हेडनं देवासश्चकृमावयम्॥ आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुञ्चत· ऋतस्यर्त्तेनादित्यायजत्रा मुं
चतेहनः यज्ञं यज्ञवाहसः शिक्षन्तो नोपशेकिम· मद स्वनायजमाना सुवाज्या निजुहुना॥ आकामो विश्वे
वो देवा॥ शिक्षन्तो नोपशेकिम· यद्विद्वांसो यदविद्वांस एनांसि चकृमा वयम्॥ यूयं नस्तस्मान्मुञ्चत वि
श्वेदेवाः सजोषसः॥ यदि जाग्रद्यदि स्वप्न एन एनस्योकरं॥ भूतन्मा तस्माद्भव्यं च द्रुपदादिव मुञ्चतां॥ द्रुपद
दिवमुमुचानः स्विन्नः स्नातो मलादिव· पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥ अग्नये स्वाहा· प्रजापतये
स्वाहा· अग्नये स्विष्टकृते स्वाहा॥ एते तु नवविंशतियज्ञमन्त्राः॥ ब्रह्मणो बलिं हरामि वषट् वैश्रवणाबलिं ह
रामि वषट्· विश्वेभ्यो देवेभ्यो बलिं हरामि वषट्· सर्वेभ्यो देवेभ्यो बलिं हरामि वषट् एतेवषट् भूतयज्ञ

॥राम॥
॥९०॥

मंत्राः ॥ पितृभ्यः स्वधानमस्त्विति पितृयज्ञमंत्रः ॥ सनकादिमनुष्येभ्यो हंतेति मनुयज्ञमंत्रः ॥ शन्नो देवीरभि
ष्टय ऽआपो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ इत्यादि यथाशक्ति मंत्रपाठो ब्रह्मयज्ञमंत्राः अथ यज
मानः खड्गादिदशकं रत्नादिदशकं च संपूज्य तेनाघ्राव्येदं विष्णुदैवतं तुभ्यमहं संप्रददे इति गुरवे दत्वा
हस्तेन दानप्रतिष्ठासिध्यर्थमपि दैवनमस्तुवर्णं दक्षिणां संप्रददे इति तं दत्वा हिरण्यगर्भस्य पश्चि
मतोऽञ्जलिं बध्वानं प्रार्थयेत् ॥ ॐ नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः चराचरस्य जगतो गृहभूताय
वै नमः मात्राहं जनितः पूर्वं मर्त्यधर्मा नरोत्तमः ॥ त्वद्गर्भसंभवादेव दिव्यदेहो भवाम्यहमिति ॥ अथ
सर्वे शांतिकलशाचतुष्टयेनैकेन पुनर्यजमानं स्नापयेयुः ॥ तत्र मंत्रौ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्यां ॥ अघजातस्य तेऽङ्गानि अभिषेक्ष्यामहे वयं दिव्येनानेन वपुषा चिरंजीव सु
खी भव ॥ ततो यजमानस्तत्रणाभिमुखानत्र्वर्त्विग्जापकद्वारपालांश्च यथाक्रमेण संपूज्य सोपकरणां

॥ दा॰वि ॥ ॥ ९१ ॥

हिरण्यगर्भंवोदास्यामीत्युक्त्वाददस्वेत्युक्तेवरणक्रमेणैवसर्वहस्तोपरिगुरोर्हस्तकृत्वाहिरण्यगर्भोप
रिजलंदत्वाकुशादीन्यादायदेशकालौसंकीर्त्यकामानंसंकल्पवदुच्चार्यामुंनिजतेजोराशिंहेमपंकजग
र्भंनमुक्तावलीसमीपेनंपद्मरागान्वितपिधानसहितंसुवर्णनयंहिरण्यगर्भंविष्णुदेवतममुका
मुकामुकशर्मभ्योमुकामुकशर्मभ्योगुर्वर्त्विग्भ्योयुष्मभ्यमहंसंप्रददेइतिगुरुहस्तेजलंदद्यात्·स
र्वेभ्यस्तीनिवेदयुःकामस्त्वानंचयथेयुःपुनःकुशादीन्यादायकृतस्यहिरण्यगर्भदानस्यसाङ्गतासिद्ध्य
र्थंरत्नान्सुवर्णंनाग्निदेवतान्गुर्वर्त्विग्भ्योयुष्मभ्यमहंदक्षिणांसंप्रददेइतिहिरण्यगर्भतृतीयांशं
दशांशंवादद्यात्यदात्तुलापुरुषाद्येषामादीनांदक्षिणात्वेनदानंनदानस्यैवसंकल्पः॥दक्षिणात्वनि
पादनेवसर्वेपक्षास्मकलापुरुषवज्ज्ञेयाः॥दानोत्तरंयजमानःपुण्याहवाचनमावाहितदेवताना ॥ राम ॥
मुत्तरपूजांविसर्जनंकृत्वापादुकादिभिःक्रमेणस्योपकरणादिसर्वंगुरवेप्रतिपादयेद्यथाशक्तिब्राह्म ॥ ९१ ॥

णा भोजयेदिति ॥ ॥ मीमांसैकगुरुं वरं श्रुतिधरैर्न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजननाव(
क्षीरसालद्रुमः यं विद्वन्मणिश्चेश्वरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हिरण्यगर्भदहनौ सत्त्रीन(
येपद्धतिः ॥ ॥ अथ ब्रह्माण्डमहादानं ॥ मात्स्ये ॥ ॥ अथातः संप्रवक्ष्यामि ब्रह्माण्डं विधिपूर्वकं ॥ यच्छ्रेष्ठं
सर्वदानानां महापातकनाशनम् ॥ ॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ॥ ऋत्विङ्मण्डपसंभार(
भूषणाच्छादनादिकं ॥ लोकेशावाहनं तद्वदधिवासनकं तथा ॥ कुर्याद्विंशत्पलादूर्द्धमासहस्राच्च शक्तितः
शकलद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ॥ दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितं ॥ लोकपालाष्टकोपेतं
मध्यस्थितचतुर्मुखं ॥ शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितं ॥ वस्वादित्यमरुद्गर्भं महारत्नसम(
न्वितं ॥ वितस्तेरङ्गुलशतं यावदायामविस्तरं ॥ कौशेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत् ॥ तथाष्टाद
शधान्यानि समन्तात्परिकल्पयेत् ॥ पूर्वेणानन्तशयनं प्रद्युम्नं पूर्वदक्षिणे ॥ प्रकृतिं दक्षिणे पार्श्वे संक

॥ रा॰वि ॥
॥ ९२ ॥

षेण मनःपरं ॥ पश्चिमे च गुरोर्वेदान निरुद्धमयायपरं ॥ अग्निमुच्चरतो हैमं वासुदेवं मनःपरं ॥ समं नाशु
डयीठस्थानर्वयेत्कां चनावृत्तुधः ॥ स्थापयेद्धस्त्रसंवीनान्मूर्तीकुंभान्दशैव तु ॥ दशैव धेनवो देयाः सहेमांव
रदोहनाः पादुकोपानहच्छत्रचामरासनदर्पणैः भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः होमाधिवास
नांते च स्नापितो वेदपुंगवैः ॥ इममुच्चारयेन्मंत्रं त्रिःकृत्वाथ प्रदक्षिणं ॥ नमोस्तु विश्वेश्वर विश्वधामजगन्म
विधेभगवन्नमस्ते ॥ सप्ताधिलोकामरभूनलेश गर्भेण सार्द्धं विनुताभिरक्षां ॥ येदुःखिनास्ते सुखिनोभ
वंतु पापान्नुयापानिवराणवराणां ॥ त्वद्दानशास्त्राहतयानकानां ब्रह्मांडदोषाः प्रलयं व्रजंतु ॥ एवं प्रणम्या
मरविश्वगर्भदद्याद्द्विजेभ्यो दशधा विभज्य ॥ भागद्वयं न च गुरोः प्रकल्प्यं समं भजेच्छेषमनःक्रमेणः अ
ल्पे च देयेगुरवे कस्य वकुर्यादल्पेकाप्ति विधानयुक्त्या ॥ सरवं संपूज्य नमोत्प विघ्नैर्यथोक्तवस्त्राभरणादिके
न ॥ इत्थं य एतद्दखिलं पुरुषोनु कुर्यात् ब्रह्मांडदानमधिगम्य महद्विमानं ॥ निर्धूतकल्मषविशुद्धतनुर्मुरारेरा

॥ राम ॥
॥ ९२ ॥

नंदकन्यपुष्पैनिस्सरत्प्ररोभिः ॥ संतारयेत्मितृपितामहपुत्रपौत्रवंधुप्रियातिथिकलत्रघातनाद्युत्कंसः ब्रलांउग
तमकलीकृतयानकोपमानंदयेत्त्वजननीकुलमप्यशेषं ॥ इतिगृहरत्नानिवाप्यरत्नसुरभवनेषुगृहेषुधा
र्मिकाणां ॥ मयिमधिपवदर्णनिमोदनेसावमरपनेभंवनेसहाप्सरोभिः ॥ अथालंकृति ॥ यद्यप्यत्रमह
पातकस्यवफलमुक्तंतथाप्यंनेवक्ष्यमाणमपिफलंज्ञेयं ॥ पुराणेनादिसार्धश्लोकेनाविरुद्धगुणायुरु
षधर्मानिर्देशःक्रियते ॥ अविरोधप्रदर्शनार्थमेवचकेषांचिदुक्तिः कुर्यादिति पूर्वतःपश्चात्तुसंव
ध्यते ॥ पलंसुवर्णाश्चत्वारः इत्युक्तपलाविंशतेरधिकंसहस्रपलपर्यंतंसुवर्णस्यच ब्रलांडकुर्यात् ॥ दि
ग्गजाद्युपकरणसुवर्णमेतन्मध्यस्यवनाभिवंःशाकृतपतिमासुवर्णान्नभिन्नमितिकेचित् ॥ अन्येतु
दिग्गजाद्युपकरणसुवर्णमपिभिन्नं ॥ अग्र्येकांचनानितिपुनःकांचनश्रवणादित्याहुः ॥ आकलेति ॥ आ
कलवयंसंयुक्तंयस्मिन्नित्यर्थः ॥ यवाशाकलवयंचनत्संयुक्तंचेतिसमासः ॥ यथापुरुषस्पांडवयंसंयु

क्तंनयासकलद्वयंकृत्वासंयुक्तकार्यमितिकश्चित्तत्र॥ब्रह्माडमित्येकवचनवाधापत्ते:॥ॐभद्रयोभवे(
घाहकृप्रतीच्यांदिशिचन्द्रमाः॥उदेतिभक्तपक्षादौवरुणंडस्यनाहृदामितिब्रह्माडपुराणात्॥अतएवदा
मोदरेणवटकाघंञकारंवर्णलंब्रह्माडमित्युक्तं॥अतएवांडद्वयात्मकमितिदामोदरग्रंथान्नवमितन(
वं॥एकस्मैववर्णलाकारस्यसकलद्वयात्मकत्वेनांडद्वयात्मकत्वमपिसिध्यतीतिनदर्थान्·शकलद्वयंवो
पर्यधोभावेनस्थापनीयं॥अन्यथातन्मध्येब्रह्मस्थापनायोगात्॥दिग्गजेत्यादि·ऐरावतःपुण्डरीको(
वामनःकुमुदोंजनः॥पुष्पदंतःसार्वभौमःसुप्रतीकश्चदिग्गजाःसमुक्तं·दिग्गजाष्टकेनसंयुक्तंसंलग्नंस्थाप
नीयमित्यर्थः॥एतेषांलोकपालानांपंचशान्यादिक्रमेणब्रह्मांडवहिरेवस्थापनमितिदामोदरः॥शि
क्षाकल्पोव्याकरणंनिरुक्तंज्योतिषंतथा॥छंदश्चेतिषडंगानिवेदानांवैप्रक्षनदनिषडंगानि·तेषांचल
क्षणं॥मूर्त्तानिब्रह्मणोलोकेसाक्षसूत्राणिनानितु॥द्विभुजानिशुभास्यानिवामेदक्षिनेकुंडिकाक्षिन·कुं

॥एम॥
॥९३॥

ड्रिकाः कमंडलून् एतासांवामेधारणोक्ते ॥ रक्तसूत्राणां दक्षिणे धारणां· वेदानां पश्चिमे स्थापनस्य वक्ष्यमा
णात्वादंगानामपि नत्रैव स्थापनमिति रूपनारायणः ॥ लोकपालादीनां लक्षणानि तुलायामुक्तानि ॥ न
न्दिवेंद्रवाहनगजो गजाष्टकाच्छिन्नः ॥ अग्न्यादीनां वाहनानि नरेपदेशात् ॥ लक्ष्मीलक्षणं तु पाशाक्षमालिकां
भोजसृणिभिर्याम्यसौम्ययोः ॥ पद्मासनस्थां कुर्वीत श्रीयं त्रैलोक्यमातरं· गौरवर्णां सुरूपां च सर्वालंकार
भूषितां ॥ रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु ॥ इयं चाम्बुजसन्निधौ स्थापनीया· तन्मलीत्वात् ॥ वस्वादि
योनि· वस्वादिमरुतां एकोनसप्ततिमूर्तयो गर्भेमध्ये यस्येत्यर्थः वसवोष्टौ· आपो ध्रुवश्च सोमश्च धरश्च
श्चैवानलोनिलः ॥ प्रत्यूषश्च प्रभासश्चैति निगमात् ॥ एतच्च लक्षणप्रसन्नवदनाः सौम्या वरदाः शक्तिपाणय
यः पद्मासनस्था द्विभुजा वसवोष्टौ प्रकीर्तिताः ॥ आदित्या द्वादशः इन्द्रो विष्णुर्भगस्त्वष्टा वरुणोंऽशोऽर्यमा र
विः ॥ पूषा मित्रोथ पर्जन्यश्चैव पर्जन्या द्वादशाः स्मृत इति हरिवंशात् ॥ एतच्च लक्षणां ॥ पद्मासनस्था द्विभुजाः प

॥ पा.वि ॥ मगर्भगकांतयः॥ करादिस्कंधपर्यंतनीलपंकजधारिणः॥ अधःसंस्थितमेषादिराशयः प्राह्णन्नांघ्रिकाञ्च(
॥ ९४ ॥ निमेषादीनां मूर्त्तयस्तन्नदाकाराः धावत्कृष्णमृगारूढध्वजधारिणउनपंचाशन्मरुतः॥ महारत्नानि पंचवन
ववाहिरण्यगर्भदानेउक्तानि॥ स्नानानि पश्चिमनस्थाप्यानीति दामोदरः समन्विनामिति समुपसर्गान्तं न
मनोक्ता॥ विनस्से रिति सुवर्णानुसारेणांजलग्रानपर्यंतं तुल्यावायामविस्तरोयस्सेनिशकलवयस्सघ
त्येकं विशेषणमिति दामोदरः पित्तचरणास्कब्रह्मांडविशेषणमित्याहुः॥ ब्रह्मांडोत्तुनावायामविस्तार
समेव॥ वर्तुलत्वाभिधानादितिकेचित् अन्येतूत्तुनायानियमानभिधानात्कुक्कुटांडादीनां दैर्घ्यस्यापिद
र्शनादनियमइत्याहुः कैशेयकृमिकोशोद्भवां तसरपट्टकूलादिः नत्त्वनत्त्रसत्र्वेतिकर्मधारयः। यद्वाकौ
शेयवस्त्राभ्यां संवीतमित्यर्थः ज्ञोणलक्षणमुक्तं हिरण्यगर्भे॥ अथाद्यशाधान्यानि मान्यस्वोक्तानि॥ य ॥ राम ॥
वगोधूममषामानितिलाः कंगुः कुलत्थकाः माषमुद्राः मसूराश्चकोद्रवाः श्यामसर्षपेयोगवेधुकाश्चनीवारा ॥ ९४ ॥

आठकाम्बकलापकाः चराकाञ्चीनकाश्चैव धान्यन्यत्स्यादेशो वतुर्द्दनि ॥ पुराणां नरेषुषकाराणं नरेणो ज्ञान्य
पिनयाद्याराणीति गमोदरः ॥ स्नानिचपरिमाणानुपदेशा घपेस्कंनुलसपरिमाणानि श्राह्याणि ॥ पूर्वे स्थे
न्यादि पूर्वादयस्यदिक्षु गुडनिर्मितपीठेषु अष्टावनंतशयनादीन् स्थापयेदित्यर्थः ॥ अनंतः शयनं यस्येति
भुजनाशेषशायी विष्णुरुच्यते ॥ नष्टक्षणं पीनवासाश्चतुर्बाहुः शंखचक्रगदाधरः योगनिद्रापरावर
स्थः सुप्तोनं तं नत्रपरि ॥ फणासप्तान्वितो नंतः कार्यस्तस्यापरि प्रभुः पूर्वे दक्षिणे प्रद्युम्नं न लक्षणं तु
र्ध्वं शंखमधश्चक्रं दक्षिणे वामतस्तथा ॥ पद्ममूर्द्ध्वेगदां वाधः प्रद्युम्नो यं प्रकीर्तितः दक्षिणे प्रकृतिलक्ष्मीस
लक्षणं ॥ पाशाक्षमालिके नाधुक्रमधस्तात् ॥ नैर्ऋत्यां संकर्षणं न लक्षणं ॥ ऊर्द्ध्वं शंखमधश्चैव गदं दक्षि
णेऽस्य के ॥ वामे धश्चक्रमूर्द्ध्वस्थेपसंसंकर्षणो मतः ॥ पश्चिमे चतुरो वेदान् लक्षणं ऋग्वेदस्याक्षसूत्रं तु
यजुर्वेदस्य पंकजं सामवेदस्य वीणास्याद्वेणुं दक्षिणे तोन्यसेत् ॥ अथर्ववेदस्य पुनः स्रुक्स्रुवौ कमलं

॥ दा॰वि ॥
॥ ९५ ॥

करे॰ अत्र दक्षिणोर्ध्वस्तु कस्तु वै वामे कमलं॰ वायव्यामनिरुद्धं न लक्षणां॰ तुर्ये गदां तथाधश्चक्रं दक्षिणो वामके तथा धः प
द्ममूर्ध्वस्थितेशंखमनिरुद्धो भवेदयं ॥ उत्तरस्यामथिं नलक्षणा गुरुजुलादाने॰ ईशान्यां वासुदेवं न लक्षणां॰
तुर्ये शंखमधश्चक्रं गदां दक्षिणहस्तके ॥ वासुदेवस्य वामेधः पद्ममूर्ध्वे यथाक्रमं ॥ एवं चप्रतिमाः दिग्गजा
अष्टौ वेदांगानि षट्॰ ॥ सर्वा इन्द्रलोकपाला अष्टौ॰ ब्रह्माद्याः षट्॰ वसवोष्टौ॰ आदित्या द्वादश नदधिस्थानं मेषां
ग्रा द्वादश॰ मरुत एकोनपंचाशत्॰ अनंतशयनाद्या एकादश इति १२० हेमाद्रौ तु मरालसमन्वितमि
त्यस्य स्थाने अनंतमिथुनान्विनमिति पठितं॰ तत्र फणासप्तान्वितो नंतः पृथ्वी स्त्रीरूपधारिणी त्वनंतल
क्षणां ज्ञेयं ॥ स्थापयेदिति समंत्रादित्यानुषंगः ॥ ध्येया स्थापनीया इत्यर्थः एतासां स्थापनं मंडपाद्बहिरे
व ॥ सोकर्णान्॰ सहेमैरिति हेमसंगप इत्यर्थः पोडशनानितान्नमयानीनिदामोदरः॰ पादुकेत्यादि॰ एतैः सह
वः स्थापनीया इत्यर्थः ॥ इदं च न प्रतिगवं भिन्नं ॥ पादुकाष्टसमभक्ष्यभोज्यान्नीनदुनरुक्तिनीनाधकारा

॥ राम ॥
॥ ९५ ॥

र्थं शेषमिति॰ भागाष्टकं ब्रह्मर्त्विग्भ्यो देयमित्यर्थः ॥ एवं चब्रह्मण्यात्तादिभ्यो न्या दक्षिणेति ज्ञेयं ॥ अपंचब्र
ह्माण्डदानस्य संप्रदानविशेषविधिः ॥ तुलापुरुषोक्तगुर्वर्त्विग्भ्योत्र संप्रदानत्वविषयः ॥ नेन तुलापुरुषोक्त
दक्षिणाविभागपक्षोपि शान्तिनिनी रूपनारायणः ॥ उपदेशनानिर्देशावाध इति तु युक्तं पश्यामः ॥ स्वल्पे चेति॰
सहस्रस्य चतुर्थभागः स्वल्पमिति रूपनारायणः अनल्पमिति तु न्यूनया षोडशो भाग इति दामोदरः ॥ स
हस्रपलपक्ष एवैकर्त्विग्भागेनासत्त्वमित्यन्ये ॥ एकाग्निविधानेपि गुर्वनुज्ञानान्येभ्योपि दद्यादिति रूप
नारायणः ॥ अस्मिंश्च पक्षे यत्किंचिद्विस्तारवीयो गुरुरिति दामोदरः ॥ इत्थमित्यादेरर्थः स्पष्टः ॥ इति ब्रह्माण्ड
महादानविधिः ॥ ॥ अथ प्रयोगः ॥ यजमानो देशकालौ संकीर्त्य महापातकनाशमहाविमानाधिगमपू
र्वकवैकुण्ठपदसहितनिर्धूतकल्मषविशुद्धनत्वात्मीयमानंदकृत्पुराणियदीपगमपितृपितामहपुत्र
पौत्रवंधुप्रियातिथिकलत्रदशनाष्टकसंतारणाब्रह्मांडदानसकलीकृतकोपाशेषजननीकुलानंदका

मध्ये ब्रह्मांडमहादानं प्रतिपादयिष्ये· इति संकल्प्य मधुपर्केण तान्पूरुषवत्कृत्वा षोडशारोपरि पुष्पाणि
विकीर्य ॥ तदुपरि शोणपरिमितासितान्निधाय ब्रह्मांडशकलं तिलद्रोणोपरिस्थकौशेयोपरि स्थाप
यित्वा तन्मध्ये ब्रह्माणं वस्त्रस्थकमेषादिराशिस्थद्वादशादित्यान्मृगाधिरूढानूनपंचाशन्मरुतश्च
स्थापयित्वोपरि द्वितीयब्रह्मांडशकलेनापिदध्यात् ॥ ततो ब्रह्मांडबहिः पूर्वाद्यष्टदिक्षु ऐरावतादिदि
ग्गजान्लोकपालांश्च प्रतीच्यां षड्वेदांगानि महारत्नपंचकं च स्थापयित्वाधःस्थितकौशेयेनोक्तांगसहि
तमावेष्ट्य तस्य समंताद्दशधान्यानि स्थापयेत् ॥ अथ पूर्वाद्यष्टदिक्षु गरुडपीठेषु· अनंतशायिनं प्रद्यु
म्नं· प्रकृतिं· संकर्षणं· चतुरो वेदान्· अनिरुद्धं· अग्निं· वासुदेवं च संस्थाप्य ब्रह्मांडं दिग्गजाष्टकं· षड्वेदांगा
नि· लोकपालाष्टकं· चतुर्मुखं· उमासहितशिवं लक्ष्मीसहिताच्युतं· अर्कवसून्· आदित्यान्· मरुतः ॥ अ
नंतशायिनादींश्च नमोंतनाममंत्रैः संपूज्य समनाद्वाकुंभान्स्थापयेत्· ततः समंतात्पादुकोपानह

छत्रचामरएसनदर्पणभक्षभोज्यान्नदीपेस्तुफलमाल्यानुलेपनानिस्थापयेत् ॥ मंडपाद्बहिश्चसोयस्करादृ
शधेनवः स्थाप्याः पूर्णाश्चः ततो महावेदीग्रहवेद्योरुपरिविनानेवध्नीयात् ॥ अथसंध्योन्न दंएत्रिहृत्स्येशान
श्च यजमानाभिषेकानेह्क नेयजमानो गृहीतपुष्पांजलिर्ब्रह्मांडं त्रिः प्रदक्षिणीकार्यंयेत् ॐ नमस्ते रक्तविश्वे
श्वरविधामजगन्मवित्रे भगवन्नमस्ते ॥ सप्ताधिलोकसदभूतनदेशगर्भशासाइविनराभिरक्षां ॥ येदुःखि
नास्तेतुविनो भवतुप्रयान्तुमायाभिवरएचरणं ॥ त्वद्दानयास्त्राहनयानकानां ब्रह्मांडदोषाः प्रलयं व्रजन्तु ॥
पुष्पांजलिनाब्रह्मांडं गंधाद्यैर्गर्वेन्विजश्च संपूज्य नदनुज्ञानः कुम्भादीन्यादाय देशकालो संकीर्त्य पूर्ववत्स्वस्त
गुत्वार्थं मंत्रब्रह्मांडं निलऽरोणा परिस्थितं दिगाजाष्टकसंयुक्तं षड्वेदांगसमन्वितं लोकपालाष्टकोपेतं मध्य
स्थितचतुर्मुखं शिवाच्युतार्कशिखरम् मालक्ष्मीसमन्वितं वस्वादिन्यमरुत्गर्भं महारत्नसमन्वितं कोशेय
वस्त्रसंवीतं गुडपीठस्थानं तं शयनप्रगुप्तपहृतिसंकर्षणचतुर्वेदानिरूत्वाम्मिवास्तुदेवप्रतिमायुतमु

क्षोपकरणसहितं विष्णुदैवतं सर्वेषां नामगोत्रसमुच्चार्य गुर्वृत्विग्भ्यो हंसं प्रददे इति सर्वहंसोपरिस्थित
गुरुहस्ते संकल्पयेत् ॥ ततो भागद्वयं गुरवे ऽभागाष्टकं ब्रह्मर्त्विग्भ्यो विभज्य दद्यात्. यदानुयथेच्छ विभा
गं पश्चात् ग्रामादिना गुर्वृत्विजः परितोषितेभ्यो ऽन्येभ्यश्च ब्रह्मांडं विभज्य दद्यात् ॥ ततः कृतस्य सोपक
रणब्रह्मांडमहादानकर्मणः प्रतिष्ठार्थं इमां सुवर्णां नाग्निदैवतां दक्षिणां संप्रददे इति ब्रह्मांडतृतीयां
शं दद्यां शं वा दक्षिणां दद्यात् ॥ ग्रामादीनां वा दक्षिणात्वेन दानं ॥ ततो गुर्वृत्विजः स्वस्वशाखीयां कामसूक्तिं
पठेयुः ॥ ततो यजमानः पुराणोक्त वाचनमावाहितदेवतानां मंत्रैः पूजा विसर्जनं च कृत्वा मंडपोपकरणा
दि सर्वं गुरवे निपात्य यथाशक्ति ब्राह्मणान् भोजयेदिति ॥ ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायैपि.
वागीश्वरः साहित्यामृतसागरः सुजननावल्लीरसालद्रुमः यं विद्वन्मणिघोरवतो दिनकरः प्रासूत विश्वे
श्वरं तेनाकारि विचार्य पद्धतिरियं ब्रह्मांडदाने धिपः ॥ ॥ इति ब्रह्मांडमहादानप्रयोगः ॥ अथ कल्पपा

दसहपानं ॥ मात्स्ये कल्पपादपदानाख्यमतः परमुत्तमं ॥ महादानं प्रवक्ष्यामि महापातकनाशनं ॥ पुण्यं
दिनमथासाद्य तुलापुरुषदानवत् । पुण्याहवाचनं कुर्यात् लोकेशावाहनं तथा ॥ ऋत्विग्मंडपसंभारभूषणा
च्छादनादिकं ॥ कांचनं कारयेद्वृक्षं नानाफलसमन्वितं ॥ नानाविहगवस्त्राणि भूषणाच्छादनानि च ॥
शक्तितस्त्रिपलादूर्ध्वमासहस्रात्प्रकल्पयेत् ॥ अर्द्धेन्तु कृत्स्नसुवर्णस्य कारयेत्कल्पपादपं ॥ गुडप्रस्थोपरिस्थं
च सितवस्त्रयुगान्वितं ॥ ब्रह्मविष्णुशिवोपेतं पंचशाखं सभास्करं ॥ संतानं पूर्वतस्तद्वत्तुरीयांशेन कल्पये
त् ॥ कामदेवमधस्तात्तु सकलत्रं प्रकल्पयेत् ॥ मंदारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि पश्चिमे पारि
भद्रं च सावित्र्या सह जीरके । सुरभीसहितं तद्वत्तिलेषु हरिचंदनं । तुरीयांशेन कुर्वीत सोमेन फलसंयुतं ।
कौशेयवस्त्रसंवीतानिक्षुमालफलान्वितान् ॥ तथाष्टौ पूर्णकलशान्पादुकासनभाजनं ॥ दीपिकोपानह
छत्रचामरासनसंयुतं ॥ फलमाल्यायुतं तद्वदुपरिष्टाद्वितानकं ॥ तथाष्टादशधान्यानि समंतात्परिकल्

॥ दा·वि ॥ ल्पयेत् ॥ होमाधिवासनां ने वस्त्रापितो वेदपुंगवैः । त्रिःप्रदक्षिणमाहृत्य मंत्रमेनमुदीरयेत् ॥ नमस्ते कल्प
॥ ९८ ॥ वृक्षाय चिंतितार्थप्रदायिने ॥ विश्वंभराय देवाय नमस्ते विश्वमूर्त्तये ॥ यस्मात्त्वमेव विश्वात्मा ब्रह्मास्था
णुर्दिवाकरः ॥ मूर्त्तामूर्त्तं परं बीजमतः पाहि सनातन ॥ त्वमेवामृतसर्वस्वमनंतः पुरुषोऽव्ययः ॥ संतानाद्यै
रुपेतः सन्पाहि संसारसागरात् ॥ एवमामंत्र्य तं दद्यात्कुरवे कल्पपादपं ॥ चतुर्भ्यश्चापि चान्विग्भ्यः संताना
दीन्प्रकल्पयेत् ॥ स्वल्पे त्वेकाग्निवत्कुर्यात् गुरवे एवाभिपूजनं ॥ न वित्तशाठ्यं कुर्वीत न च विस्मयवान्भवेत् ॥
अनेन विधिना यस्तु मणानां निवेदयेत् ॥ सर्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ॥ अप्सरोभिः
परिवृतः सिद्धचारणकिन्नरैः ॥ भूतान्भव्यांश्च मनुजांस्तारयेद्गोत्रसंमितान् ॥ स्तूयमानो दिवः पृष्ठे पु
त्रपौत्रप्रपौत्रवान् ॥ विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ॥ दिविकल्पशतं तिष्ठेद्राजराजो भवेत्त ॥ राम ॥
तः ॥ नारायणबलोपेतो नारायणपरायणः ॥ नारायणकथासक्तो नारायणपुरं व्रजेत् ॥ यो वा पठेत् ॥ ९८ ॥

सकलकल्पनरूप्रदानं यो वाभ्रणोनिपुरुषोल्पधनः स्मरेत्सा· सो यींडलोकमधिगम्य सहाप्सरोभिर्मन्वंतरं व
सति या पवित्रकदेहः कांचनभिंनिः·पंचभुजान्यभिधापेणैकवचनं· कश्चित्तु कांचनानि न्यैव पाठः ॥ चकारान्
तादि पंचनामपि कांचनमयत्वं ॥ आच्छादनानि वृक्षस्य प्रकृतन्वा दाच्छायने वृक्षो यैस्तानि पत्राणि फल
शब्देन कामनाविषयतद्वचने ॥ नेन फलानि स्त्रीपुरुषगोगजवाजिमणिभस्याजाछागरत्नानि घटितनय
यैकबीजपूरफलाकाराणि यजमानाभिलषितानि कार्याणीति पृथ्वीचंद्रोदयादयः ॥ अर्घादिनिरूपणं
गृहीतं· प्रतिमादिकमनन्मध्ये· प्रस्थः षोडशपलो ग्राह्य इति दामोदरः ॥ तन्न ॥ परिभाषायां गुडप्रस्थ
स्य चात्रिंशत्पलिकत्वोक्तेः ॥ ब्रह्मेति ॥ एतान्यष्टनि मा अधस्तान्स्थापनीयाः स्थानाकांक्षायामथे नतनस्याध
स्तस्योपस्थितेः ॥ एतद्वृक्षाणामुक्तानि· पंचशाखनादिक्षु मध्येच· सन्तानमिति· पूर्वत· कल्पवृक्षस्ये
त्यर्थः ॥ अथवाशिष्टार्धेतुरीया शेनमंदाराणी नामपीदमेव परिमाणं· सर्वमस्मादश्रुतत्वादिति न्यायात्

तदवच्छेदेन पंचशारवत्त्व फलादिपंचकयुक्तत्वमिति वस्तुगत्या विनतलगुटप्रस्थाधारत्वानुच्यते॥ मंदारादिद्वयेतु
आधारोपदेशात्तगुडस्मानिदेशः॥ अथस्मादिति संतानस्ये मिशेषः॥ कामदेवप्रतिमयानेराकांक्षात्तदवच्छेद
नत्वसादिप्रतिमाचतुष्टयस्यनानिदेशः॥ हेमाद्रेस्तु कामदेवमित्यर्ईस्य पूर्वं पाठात्कल्पहसे मूले कामदेवोपि
स्थापनीयः संताने च तद्वदित्यतिदेशात्प्रतिमापंचकमप्यतिदिश्यते॥ मंदारादिषु तु देवतानां नरानात्वत्व
स्लादिषु प्रतिमातिदेशश्चमुक्तं॥ कामदेवलक्षणं विष्णुधर्मोत्तरे॥ कामदेवस्तु कर्तव्यो रूपेणाप्रतिमो भुवि॥ अ
ष्टबाहुश्च कर्तव्यः शंखपद्मविभूषणः॥ चापबाणकरश्चैव मदादंचितलोचनः॥ रतिः प्रीतिस्तथा शक्तिर्मदश
क्तिस्तथोज्वला॥ चतस्रस्तस्य कर्तव्या पत्न्यो रूपमनोहराः॥ चत्वारश्च करास्तस्य कार्या भार्यास्तनोपगाः॥ के
तुश्च मकरः कार्यः पंचबाणमुखो महान्॥ मंदारमिति इहापि तद्वदित्यनुषज्यते॥ श्रीलक्षणमुक्तं ब्रला
राडदाने॥ घृतोपरि मंदारधारणासंभवान्मात्रां नरेषु नंधार्यं॥ पारिभद्रः पारिजातः सावित्रीलक्षणमाह

नारदः ॥ पद्मासना च सावित्री साक्षसूत्रकमंडलुः सुरभी लक्षणां वृल्लांडपुराणे ॥ सवत्सा सुरभी धेनुरागता पर
स्कन्नस्तनी ॥ पंचापि वृक्षा अश्वत्थनिंबार्कपारिभद्रबिल्ववृक्षाकाराः शिष्टाचारादिति दामोदरः ॥ कौशेयं पट्टव
स्त्रं तत्त्वचतुष्टयं वा आद्यस्य वस्त्राम्नानादिति दामोदरः ॥ एतन्मतसाधारण्येनाम्नानामयं चानामपि वस्त्रकौशे
यं तत्त्ववस्त्राणि भिन्नानि कौशेयं त्वेकं भद्रकस्तनेप्रमाणाभावादिति गुरुक्तं ॥ अश्वनभाजनं पक्कान्नपूरितं
भोजनपात्रं ॥ अष्टादशधान्यानि वृल्लांडेभिहितानि एतानि जोणापरिमितानीति मदनरत्नः ॥ प्रस्थास्यो
पस्थितत्वान्नन्यपरिमितानीति गुरुक्तं मूर्त्तं महदादि अमूर्त्तं प्रकृतिः एवमिति पंचभ्यो दक्षिणाम्नानात्तो न
भ्य आचार्याय च दानमन्येभ्यः पारितोषिकीभिन्ना दक्षिणेति दामोदरः ॥ चतुर्भ्यश्चमस्य चतुःकुंडसंबंधिभ्य
इति व्याख्यानात् ऋक्षान्वतुष्टयस्याप्येभ्यो दानं धारपालादीनां च भिन्ना दक्षिणेति मदनरत्नः पंचभ्यो दक्षि
णाम्नानात्यं चानामेव वरणं न दानं ब्रह्मकार्यकर्तृत्वं होमकर्तृत्वं च चतुर्णामेवेति पितृचरणाः ॥ अयं

॥ दा·वि ॥ त्वदक्षिणाविभागः पूर्वविम्बात्तु संप्रदानत्वपक्षविषय इति रूपनारायणादयः ॥ उपदेशेनातिदेशबाध इ
॥ १०० ॥ ति नु युक्तं पश्यामः ॥ स्वल्पेत्यादि ब्रह्मांडे व्याख्यानं ॥ ॥ इति कल्पपादपमहादानविधिः ॥ ॥ अथ प्रयोगः ॥ य
जमानो देशकालौ संकीर्त्य· ॐ महापातकनाशसर्वपापविनिर्मुक्तात्मीयाश्वमेधफलाभवदूरपारः सिद्धचा
रणकिन्नरपरिवृतात्मकर्तृकस्वर्गेमसमितभूतभव्यसर्वस्वरूपमनुजनारायणप्रदृष्टस्वरूपमानपुत्रपौत्रव
दात्मकर्तृकार्कवर्णविमानकरणकविष्णुलोकगमनदिव्यधिकरणकल्पशतावस्थाननतदुत्तरराजराजत्व
भवननारायणवल्लोपेतनारायणपरायणनारायणकथासक्तात्मकर्तृकनारायणपुरव्रजनकामः
स्वः कल्पपादपमहादानं प्रतिपादयिष्ये इति संकल्प मधुपर्केनानुलापरूयवल्कला षोडशारे परिपु ॥ राम ॥
ष्पाणि विकीर्य· ॥ तत्र मध्ये गुडप्रस्थोपर्यश्वत्थाकारं सौवर्णं नानाफलविहगवस्त्रभूषणपत्रयुतं सि ॥ १०० ॥
तवस्त्रयुगान्वितं कल्पवृक्षं न्यदधः पश्चिमाभिमुखा ब्रह्मविष्णुशिवभास्करप्रतिमाश्च संस्थापनस्य पू

र्वतः गुडप्रस्थोपरि निंवाकारं कल्पवृक्षांगपुनं संताननं दधः कामदेवप्रतिमां च स्थापयेत् ॥ ततः कल्पपाद
प दक्षिणे घृतप्रस्थोपरि पर्यंकवृक्षाकारं कल्पवृक्षांगपुनं मंदारं तदधः श्रीप्रतिमां च स्थापयेत् ॥ कल्पवृक्षा
त्पश्चिमे जीरकप्रस्थोपरि भद्राकारं कल्पवृक्षांगपुनं पारिभद्रं तदधः सावित्रीप्रतिमां च स्थापयेत् ॥ कल्प
वृक्षोत्तरतस्तिलप्रस्थोपरि विल्ववृक्षाकारं कल्पवृक्षांगपुनं हरिचंदनं तदधः सुरभीप्रतिमां च स्थापयेत् ॥
अर्द्धसुवर्णेन सांग कल्पवृक्षः ॥ चत्वारश्च सांगा अर्द्धसुवर्णेन कार्याः ॥ ततो वृक्षान्प्रतिमांश्च नमोंतैस्तत्तन्नाम
मंत्रैः पूजयेत् ॥ ततः सर्वानेकेन पट्टकूलेन वेष्टयेत् ॥ एतेषां समांनानाफलमाल्यवारिपूर्णकलशाष्टपादुका
सभक्ष्यभोजनपात्रदीपिकोपानच्छत्रचामरासनाष्टादशधान्यानि स्थापयेत् ॥ ततो महावेदीग्रहवेद्योरु
परि विधानेन बध्नीयात् ॥ अथ संध्योत्तरं चिक्रनं शानश्च यजमानाभिषेकांते कृते यजमानो गृहीतपुष्पां
जलि वृक्षान् त्रिः प्रदक्षिणीकृत्य कल्पवृक्षं प्रार्थयेत् ॥ ॐ नमस्ते कल्पवृक्षाय चिंतितार्थप्रदायिने ॥ विश्वंभ

॥ दा॰वि ॥
॥ १०१ ॥

रायदेवाय नमस्ते विश्वमूर्त्तये ॥ यस्मात्त्वमेव विश्वात्मा ब्रह्मस्थाणुर्दिवाकरः ॥ मूर्त्तामूर्त्तं परं बीजमतः पाहि
सनातन । त्वमेवामृतसर्वस्वमनंतः पुरुषोव्ययः संनानाघेरूपेनः सन्नपाहि संसारसागरात् ॥ पुष्पांजलिं
ताहस्तानां धाग्येर्गर्वविर्विजश्च संपूज्य नदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य संगउपस्थोपरिस्थं ब्र
सविष्णुशिवभास्करप्रतिमासहितं सपरिकरकल्पवृक्षं कामदेवप्रतिमासहितगरुडप्रस्थोपरिस्थसप
रिकरसंतानसहितं श्रीप्रतिमासहितहंसप्रस्थोपरिस्थसहितं सावित्रीप्रतिमासहितजीरकप्रस्थोप
रिस्थसपरिकरपारिभद्रसहितं सुरभीप्रतिमासहितं तिलप्रस्थोपरिस्थसपरिकरहरिचंदनसहितं
समंतनोवस्त्रापिनेक्षुमाल्यफलवारिपूर्णकलशाष्टकपाडुकासभक्ष्यभोजनपात्रदीपिकोपानच्छ
त्रचामरमासनास्पादशधान्ययुतं विनानसहितं विष्णुदैवतं सर्वेषां नाम गोत्रे समुच्चार्य ऋग्वेदर्त्विग्भ्यो हं सं
प्रदेदानि सर्वहस्तोपरिस्थिनगरूहस्तोपरि संकल्पयेत् । ननः कृतस्य सोपकरणाकल्पपादपमहादान

॥ राम ॥
॥ १०१ ॥

कर्मणः प्रतिष्ठार्थमिमान्सुवर्णानग्निदैवतान् तुभ्यमहं दक्षिणां संप्रददे इति पंचब्रह्मसुवर्णान्तृतीयांशं दद्या
त् ॥ यद्यत्तुलोक्तयामादीनां दक्षिणात्वेन दाने न दानमेव संकल्पः ॥ ततः कल्पवृक्षं गुरवे सन्नारीश्चतुर्भिर्ब्रा
ह्मणेभ्यः प्रतिपादयेत् ॥ केचिदेतद्विभागं तुलापुरुषवदन्येभ्यो यीच्छंति ॥ ततो यजमानः पुण्याहवाचनमावा
हितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोज
येदिति ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजननावस्थीरसालद्रुमः
यं विद्वन्मणिदीक्षितो दिनकरः प्रास्तौद्विश्वेश्वरं तेनाकारि सुपर्ववृक्षददनौ सन्नीनयेपद्धतिः ॥ ॥ श्रीनक
लापादयमहादानप्रयोगः ॥ अथ गोसहस्रमहादानं मात्स्ये ॥ ॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं
गोसहस्रप्रदानाख्यं सर्वपापहरं शुभं ॥ पुण्यं दिनमथासाद्य युगमन्वंतरादिकं ॥ पयोव्रतस्त्रिरात्रं स्या
देकरात्रमथापि वा ॥ लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ॥ पुण्याहवाचनं कुर्याद्धोमः कार्यस्तथै

॥ दा·वि ॥
॥ १०२ ॥

वच ॥ ऋत्विग्भ्यः उपसंभारभूषणाच्छादनादिकं ॥ वृषं लक्षणसंयुक्तं वेदीमध्येधिवासयेत् ॥ गोसहस्राद्वि
निःक्रम्य गवां दशकमेव च ॥ गोसहस्रं वहिः कुर्याद्वस्त्रमाल्यविभूषितं ॥ सुवर्णशृंगाभरणां रूप्यपादसम
न्वितं ॥ अन्तःप्रवेश्य दशकं वस्त्रमाल्यैः प्रपूजयेत् ॥ सुवर्णघंटिकायुक्तं ताम्रदोहनकान्वितं ॥ सुवर्णतिलको
पेतं हेमपट्टैरलंकृतं ॥ कौशेयवस्त्रसंवीतं माल्यगन्धसमन्वितं ॥ हेमरत्नयुतैः शृंगैश्चामरैरुपशोभितं·
पादुकोपानहच्छत्रभाजनासनसंयुतं ॥ गवां दशकमध्ये स्यात्कांचनो नन्दिकेश्वरः ॥ कौशेयवस्त्रसंवीतो ना
नाभरणभूषितः ॥ लवणद्रोणशिखरे माल्येक्षुफलसंयुतः ॥ कुर्यान्मलयानाहूर्ध्वं सर्वमेनदशोयनःश्रा
क्तिनः पलसाहस्रचित्रपर्यावदेवतु· गोदानेपिदशांशेन सर्वमेनन्समाचरेत् ॥ पुण्यकालं समासाद्य
गीतमंगलनिःस्वनैः ॥ सर्वौषध्युदकस्नानस्नापितो वेदपुंगवैः ॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः
नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च ॥ लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥ गवांमंगेषु

॥ राम ॥
॥ १०२ ॥

त्रिष्ठं त्रिभुवनान्येकविंशतिः ॥ ब्रह्मादयस्तथा देवा रोहिण्या यास्कमानरः ॥ गावो ममाग्रतः सन्तु गावः पृष्ठ
तस्तथैव च ॥ गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहं ॥ यस्मात्त्वं वृषरूपेण धर्म्मस्त्वं सनातनः ॥ अष्टमूर्त्तेरधि
ष्ठानमतः पाहि सनातन ॥ इत्यामन्त्र्यानतो दद्यात् पुरवेनंदिकेश्वरं ॥ सर्वोपकरणोपेतं गोयुगं च विचक्षणः
आचिरभ्यो धेनुमेकैकां दशाकाधिनिवेदयेत् ॥ गवाशतमथैकं वा नदद्वा यथाविंशतिं ॥ दशपंचाथवा दद्या
द्दद्येभ्यस्तद्गजया ॥ नैकां बहुभ्यो दातव्या यतो दोषकरी भवेत् ॥ वह्यश्चैकस्य दातव्याः श्रीमदारोग्यवृद्धये
पयोव्रतः पुनःस्निग्धे देकाहं गोसहस्रदः ॥ श्रावयेच्छृणुयाद्वापि महादानानुकीर्त्तनं ॥ नहि नं ब्रह्मचारी स्या
यदि द्विदिवस्तां श्रियं ॥ अनेनाधिविधिना यस्तु गोसहस्रप्रदो भवेत् ॥ सर्वपापविनिर्मुक्तः सिद्धचारणा
सेवितः ॥ विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥ सर्वेषां लोकपालानां लोके संपूज्यते सुरैः ॥ प्रतिम
न्वंतरं तिष्ठेत् पुत्रपौत्रसमन्वितः ॥ सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत् ॥ शतमेकोत्तरं तत्पितृणां

॥ दा.वि ॥
॥१०३॥

नारयेद्बुधः॥ मातामहानां न च स्वपुत्रपौत्रसमन्वितं ॥ यावत्कल्पशतानं तिष्ठेद्ब्रह्मराजोत्तमः ॥ अश्वमेधश
तं कुर्याद्विधानपरायणाः ॥ वैश्नवं योगमासाद्य ततो मुच्येत बंधनात् ॥ पितरश्चाभिनंदंति गोसहस्रप्र
दं सुतं ॥ अपि स्यात्स कुलेस्माकं पुत्रो दौहित्र एव वा ॥ गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति ॥ नस्य कर्म
केरावास्मात्पिंडस्थानथैव च ॥ संसारसागराद्स्माद्घोरस्मात्स्तनारयिष्यति॥ ॥इतिपठितयरणनमोस
हस्रप्रदानं सुरभुवनमुपेयात्संसारे वाथ यत्नेपत्॥ अत्र भवतिभ दंवा वाच्यमानेनिकामं पहनकलु
षदेहः सोपि यातीद्रलोकं ॥ पयोव्रतनदानि ॥ पयोव्रतमधिवासनदिनापूर्वं नहिनेतु लापुरुषाणि देया
नोपवासः प्राप्नेः पयोव्रतोत्तरमधिवासनोक्तेश्चानंतु पयोव्रतमुपवासबाधकमिति चेन्न अविरोधा
त् ॥ हेमाद्रौतु अधिवासनमंतर्भाव्यैव पयोव्रतमुक्तं हृष्य मिति लक्षणं नरस्यातु क्रमेणास्यो क्रहृषोस्य
र्गस्थलक्षणांतुक्रमित्यर्थः ॥ तत्र उत्तनरस्कंधककुद्मृदुलागलकंबलं ॥ महाकोटिनरस्कंधेवैडूर्यमणि

॥ राम ॥
॥ १०३ ॥

लोचनं ॥ प्रवालशफश्रृंगं वसुदीर्घचलबालधिं ॥ नवाष्टदशसंख्यैर्वा नीक्षणाग्रे दशनैः शुभैः ॥ मल्लिकाक्षश्च
भोक्तव्यो गृहेपि धनधान्यदः ॥ प्रवाले प्रवालवत्कोशशफश्रृंगं यस्य समर्थः ॥ मल्लिकाक्षो रक्ताक्षः गोसहस्राद्विनि
अत्र यामो दरः ॥ गवां दशकमित्यस्याधिवासये दिमनेन संबंधान्नस्य च वेदिस्थापनरूपत्वाद् अर्थाद्वेदिमंडप
परिमाणवृद्धिरिति व्याख्येयो ॥ अन्ये तु नमं इत्यादि हे ह्रिः ॥ गवां दशकमित्यस्य पूजयेदित्यनेनान्वयादि
त्याहुः ॥ गोपदं धेनुपदं गोसहस्राद्विनिष्क्रयमिवं सदर्शकं गवामिति पुराणान्तरात् ॥ अथ धेनूनां विनि
योगात् च इदं च गोदशकं सहस्राद्विनिनं सहस्रस्यापे पुनः श्रवणात् ॥ सुवर्णमादिपरिमाणः श्रवणाद
परिमितमिति केचित् ॥ हेमश्रृंग तु प्रत्येकं दशसौवर्णिकं श्रृंगे खुराः पंच पलद्वयमुक्तं पादुके ति ॥ इदं च प्रत्ये
कमिति केचित् ॥ एकमित्यन्ये ॥ कांचनमिति हकमसुवर्णकदेशानतं दिकेश्वरद्वति ॥ अयं च वहवाकार
धर्मीयं हृषरूपेणानंदीनाम गणाधिप इति मात्स्योक्तेरिति केचित् ॥ अन्ये तु तु ऊर्ध्वं श्विनेत्रोधि भुजः सो

ध्यास्यो नंदिकेश्वरः॥ वामे त्रिशूलधृग्दक्षे त्वक्षमालासमन्वित इति हेमाद्रावुक्तेर्न्यायाकृतिः कार्य इत्याहुः॥
प्रसंगात् गोदानमप्याह गोदानेपीति · दशांशेन गोसहस्राद्येप्ययागवांस्तु वर्णस्य च दशांशेनेत्यर्थः॥ स
कोत्तरदानं गावत्सवैकामधेनुवर्णां दशायताधिकपलशतत्रयावधि दद्यादिति गोसहस्रमिति शे
षः॥ उपक्रमे गोसहस्रप्रदानाख्यमित्युक्तेः॥ नंदिकेश्वरमित्यस्य निवेदयेदित्यनेनान्वयः॥ दशकाम्र्वीसा
दितान्॥ तथाचामंत्रणानंतरं प्रत्यक्षहयाद्युपकरणसहितनंदिकेश्वरसहितगोसहस्रस्वकल्पः॥ न
तःसोपकरणनंदिकेश्वरस्य प्रत्यक्षहयस्य गोदशकस्य च प्रतिपत्तिरूपं यथोक्तसंप्रदानकं निवेदनं
कार्यमिति समुदायार्थः॥ एतद्दानादेव वहिःस्थितगोसहस्रेपि दानं भवति गुरवे एकैकं दानमृत्वि
ग्भ्यः॥ अथवा शतं गुरवे पंचाशत्पंचाशदृत्विग्भ्यः॥ अथवा चत्वारिंशद्गुरवे विंशतिं विंशतिमृत्वि
ग्भ्यः॥ अथवा दश गुरवे पंच पंचर्त्विग्भ्यः अवशिष्टा जापकतद्भिन्नब्राह्मणादीनामर्थिभ्य इति दामो

दरः ॥ तन्न सामान्यतो दृष्टस्य धर्मिमात्रत्वाभावात् ॥ पश्चेच्छविभागपक्षेपि न स्वेच्छया विभागः वहुप्रकारोपदे-
शेन न वाधादिति भूपालः ॥ अत्र च संकल्पभेदाभेदौ तुलापुरुष इव द्रष्टव्यौ ॥ पयोव्रतं दाननदिने पुनः श्राद्धः
पूर्वोक्तपयोव्रताभिप्राय इति दिक् ॥ ॥ इति गोसहस्रमहादानविधिः ॥ ॥ अथ प्रयोगः ॥ यजमानोधिवा-
सनदिनात्पूर्वमेकरात्रं त्रिरात्रं वा कृतपयोव्रतोधिवासनदिने देशकालौ संकीर्त्य ॐ सर्वपापहरणसर्व-
पापविनिर्मुक्तासिद्धचारणसेवितानन्यकर्मकसर्वलोकपाललोकाधिकरणकवहुसुरकर्त्तृकपूजनपु-
त्रपौत्रसमन्वितात्मीयसर्वलोकपाललोकाधिकरणकद्युतिमन्वन्तरावस्थानार्कवर्णकिंकिणीजालमा-
लिविमानकरणकसप्तलोकातिक्रमणपूर्वकनन्दपारानकशिवपुरव्रजनपुत्रपौत्रसमन्वितैकोत्त-
रशतंपुत्रपौत्रसमन्वितैकोत्तरमातामहशतैरेवंविधनारणशिवपुराधिकरणककल्पशतावस्थान-
नउत्तरराजराजत्वभवनशिवध्यानपरायणात्मकर्त्तृकाश्वमेधशतकरणकवैष्णवयोगप्राप्तिनउत्त

॥ दा वि ॥
॥१०५॥

रत्नेऽकुकवंधमोक्षकामः श्वोगोसहस्रमहादानमहंप्रतिपादयिष्ये इतिसंकल्प्यमधुपर्केणतंतुलापुरुषव(
त्कृत्वाषोडशारोपरिष्टाणिविकीर्यवेदीमध्येपूर्वोक्तलक्षणायुतंषन्मसहस्रयंपूजयित्वागोसहस्राधि
कंवधेनुंदद्यात्कंवस्त्रयुगमाल्यसुवर्णघंटिकानाम्रदोहनसुवर्णतिलकसुवर्णपादिकाकौशेयवस्त्र(
रत्नखचितहेमशृंगरत्नखचितदंडान्वितंचामरयुतंवेश्यानवहिर्मंडपमध्येमंडपाद्बहिर्वापूजयेत्
मंडपाद्बहिश्चचतुर्दिक्षुगोसहस्रंप्रत्येकंवस्त्रयुगमाल्यसुवर्णशृंगरूप्यखुरंसंस्थाप्यपूजयेत् ॥ त
तोवेश्यांपादुकोपानहच्छत्रभोजनभाजनपीठानिस्थापयेत् ॥ ततोवेश्यामध्येद्रोणपरिमितलवणो
परिवृषाकृतिर्वासौवर्णानंदिकेश्वरः कौशेयवस्त्रसुराघाभरणमाल्येक्षुफलसंयुतः पूज्यः ॥ ततोम
लवेदीग्रहवेद्योरुपरिविन्यानेवश्रीमान् ॥ अथसंध्यान्तरात्रिकृत्येपानश्चयजमानाभिषेकान्तेकृतेयज ॥ राम ॥
मानः प्रमक्षंहृष्यनंदिकेश्वरंधेनुंदद्यात्कंवचैः प्रदक्षिणीकृत्यमंत्रंपठेत् ॥ ॐनमोवोविश्वमूर्तिभ्योवि ॥१०५॥

श्च मातृभ्य एव च ॥ लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः ॥ गवामंगेषु तिष्ठंति भुवनानेकविंश
तिः ॥ ब्रह्मादयस्तथा देवा रोहिण्यो यास्तु मातरः ॥ गावो ममाग्रतः संतु गावः पृष्ठत एव च ॥ गावः शिर
सि मे नित्यं गवां मध्ये वसाम्यहं ॥ यस्मात्त्वं वृषरूपेण धर्म एव सनातनः ॥ अष्टमूर्तेरधिष्ठानमतः पाहि
सनातन ॥ अथ पुष्पांजलिना नान्दीपूजनं सोपस्करेण गोसहस्रायनमः इति गोसहस्रं गर्वनिर्विजश्च पूजयि
त्वा तदनुज्ञातः कुशादीनादाय पूर्ववत्कलशमुच्चार्य प्रत्यक्षवृषसौवर्णनंदिकेश्वरधेनुदशकसहितं गो
सहस्रं सपरिकरं विष्णुदैवतं सर्वेषां नाम गोत्रं समुच्चार्य संप्रददे इति सर्वहस्तोपरि स्थितस्तरुहस्ते सं
कल्पयेत् ॥ ततस्ते गोपुच्छं गृहीत्वा कामस्तुतिः पठनीयाः ॥ ततः कृतगोसहस्रदानप्रतिष्ठार्थमिदं सुव
र्णं गुर्वर्त्विग्भ्यो दक्षिणां संप्रददे इति गोसहस्रन्तनीयां ग्रासदशाग्रासवाम्लभृत्नं तु वर्णं रथान् ॥ ॥
ततो यजमानः ॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा

॥ दा·वि ॥
॥ १०६ ॥

कपिले सर्वदेवानां पूजनीयासि रोहिणि ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ इति गवां ॥ धर्मस्त्वं वृष
रूपेण जगदानन्दकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातन ॥ इति वृषस्य ॥ ततो यजमानः प्रत्यक्ष(
वृषसौवर्णनंदिकेश्वरधेनुदशकान्तर्गतधेनुद्वयसहितं गोसहस्रान्तर्गतशतद्वयं गुरवे प्रतिपादयामी
ति प्रतिपादयेत् ॥ ततो ऋत्विग्भ्यः प्रत्येकं धेनुदशकादेकैकां धेनुं गोसहस्राच्चैकैकं शतं प्रतिपादयेत् ॥
यथेष्टविभागपक्षे तु ग्रामादिना गुरवे त्विजः परित्नो ऋत्विग्भ्यः प्रत्येकं पंचाशांशं दशनिर्वा गुरवे च विंश
ग्राम वशिष्टं चान्येभ्यः प्रतिपादयेत् ॥ ततो यजमानः पुराणा एवावनमावाहितदेवतानामुत्तरपूजां वि
सर्जनं च कृत्वा मंडपोपकरणादि गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयित्वा गोसहस्रदानविधिं
शृणुयात् ॥ श्रीः कामेन दानदिने पि दुग्धमात्राहारः कार्यः ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वा(
गीश्वरः साहित्यमृतसागरः सुजननावल्लीरसालद्रुमः ॥ यं विद्वन्मणिशीव्रस्वर्णदिनकरः प्रासूत विश्वेश्व

॥ राम ॥
॥ १०६ ॥

रंतेनाकारिणवांसहस्रदत्तनौनुष्टेसनांयद्भतिः॥ ॥इतिगोसहस्रमहादानप्रयोगः॥ ॥अथहिरण्यक
मधेनुमहादानंमात्स्ये॥ ॥अथातःसंप्रवक्ष्यामिकामधेनुविधिंपरं। सर्वकामफलंनृणांमहापातकना
शनम्॥लोकेशावाहनंतद्वद्धोमःकार्योधिवासनं॥तुलापुरुषवत्कुर्यात्कुंडमंडपवेदिकाः॥स्वल्पेप्येका
ग्निवत्कुर्याद्गुरुरेवसमाहितः॥कांचनस्यातिशुद्धस्यधेनुंवत्संचकारयेत्। उत्तमापलसाहस्रैस्तदर्द्धे
नतुमध्यमा॥कनीयसीतदर्द्धेनकामधेनुःप्रकीर्तिता॥शक्तितस्त्रिपलादूर्द्ध्वमशक्तोपिहिकारयेत्॥वे
द्यांकृष्णाजिनंन्यस्यगुडप्रस्थसमन्वितं॥न्यसेदुपरितांधेनुंमहारत्नैरलंकृतां॥कुंभाष्टकसमोपेतां
नानाफलसमन्वितां॥तथाष्टादशधान्यानिसमंतात्परिकल्पयेत्॥इक्षुदंडाष्टकंतद्वन्नानाफलवि
भूषितं॥भाजनंचासनंतद्वत्ताम्रदोहनकंतथा॥कौशेयवस्त्रद्वयसंहतांगींदीपातपत्राभरणाभि
रामां॥सचामरांकुंडलिनींसघंटांगशृंगिकायाउकरोप्यपात्रां॥रसैश्चसर्वैःपरितोभिजुष्टांहरिद्र

यापुष्पफलैरनेकः॥अजाजिकुस्तुंबुरुमार्करामिर्विनानकंचोपरियंचवर्णं॥स्नानस्तनोमंगलतूर्यघोषैः
प्रदक्षिणीकृत्यसपुष्पहस्तः॥आवाहयेत्तांगुडधेनुमंत्रैर्द्विजायदद्यादथदर्भपाणिः॥त्वंसर्वदेवगणमं
दिरमंगभूतविश्वंभरात्रिपथगोदधिपर्वतानां॥त्वाद्दानशास्त्रशकलीकृतपातकौघःप्राप्तोस्मिनिर्वृ
तिमतीवपरांनमामि॥लोकेयथेप्सितफलत्वविधायिनीत्वमासाद्यकोहिभवदुःखमुपैतिमर्त्यः॥सं
सारदुःखशमनायपनस्वकामंत्वांकामधेनुमितिदेवगणावदंति॥श्रामंच्चरूपकुलशीलगुणान्वि
तायविप्राययःकृतकधेनुमिमांप्रदद्यात्॥प्राप्नोतिधामसपुरंदरदेवजुष्टंकन्यागणैःपरिवृतःप
दमिंदुमौलेः॥सर्वेनिश्रुतिस्मृतिकृतंसर्वफलकंनन्वमहादानांतरेष्वप्रहृत्यापत्तिः॥गंगास्नानज्योति
ष्टोमादिवन्हनेवैजाप्यकल्पनात्॥एकाग्निवदिति·नहन्·ब्रह्माण्डदानोक्तरीत्या·धेनुवत्त्वंवेति·व
त्सनिर्माणंचयावतासुवर्णेनधेनुःक्रियतेतेनतच्चतुर्थांशेनगुडधेनौतथादर्शनात्॥पलसाहस्रैवि

ति। भव्यंयौवनामेति वन्तहस्त समूहः सा हस्त्रमिति नार्थः ॥ उन्नमा फल साहस्त्रीति पाठं नरे रागविरोधापत्तेः ॥ किंतु
सहस्रमेव साहस्रं पलशब्दस्य च पूर्वनिपातआर्षः तथा च सहस्रपलैरित्यर्थ इति रूपनारायणादयः ॥ वेघा
मिति योउणारचक्को परिहका जिनं पाकश्रीवमस्तलोमक्रमा स्त्रीयेत्यर्थः ॥ चर्मीराणु परिरोमाणि पाकश्रीवाणि
चेति कात्यायनोक्तेः ॥ गुडप्रस्थो घाचिंशत्पलिकः ॥ धेनुमिति सवत्सामित्यर्थः ॥ वत्सस्य स्थाने नराश्ववराणां ॥ अ
त्र गौः शाम्बुवी गुडधेनौ तथा दर्शनादिति दामोदरः वयंतु सौमान्यतो द्रष्टस्याप्रमाणत्वान्मूजस्य संगुरत्वविधा
नान्मूजकस्य प्राशुरवत्वाच्च पत्याशुरवीति तु युक्तं पश्यामः ॥ वत्सस्कस्तनाभिमुखः प्रत्यक्षुखो वामहस्तलान्मुक्तानिहि
रण्यगर्भेन्समोपेनामिति। अष्टदिक्षुकुंभैः परिहृतं अष्टादशधान्यान्युक्तानि व्रह्माण्डे ॥ नानाफलेति। सूत्रादि
नाइक्षुशुफलानि वंधनीयानीति भावः ॥ कौशेयरूपवस्त्रद्वयेनेत्यर्थः ॥ आभरणानि वक्ष्यमाणा कुंडलादिभि
न्नानि ग्रैवेयकादीनि आभरणानि कुंडलादीनि हेमानि ॥ गणित्रिकापादकिंकिणी। अक्षमालावाकणी

भूषणां वेनिदामोदरः ॥ गणित्रिकादिभिर्युतयादामित्यर्थः ॥ रसैरिति मधुरादिषड्रसयुतैर्भक्ष्यपदार्थैः पुनः फ
लत्रयदृशां प्रकाराणेकत्वसूचनाय ॥ अजाजीजीरकं कुस्तुंबुरु धान्यकं ॥ हरिद्रादिभिः परितोभिजुष्टामित्यन्वयः
गुडधेनुमंत्राः प्रयोगे वक्ष्यंते ॥ द्विजाय दद्यादिति दानांगभूतमंत्रविशिष्टामंत्रणविधानार्थं वक्ष्यमाणदाना
नुवादः ॥ आमंत्रणं प्रार्थनं तथा च गुडधेनुमंत्रैरेवाह्वनं सर्वदेवादिभिश्च प्रार्थ्यमिति फलितं दामोदर
स्तु सर्वैरामंत्रणमेवेत्याह ॥ क्वचित्तु गुरुणोक्तमंत्रैरिति पाठः ॥ विप्रायेति गुरवइत्यर्थः ॥ इदं च गुर्वतिरिक्ता
त्र संप्रदानत्वविषयं ॥ तेन ऋत्विगादीनामधिवासनदक्षिणामात्रं ॥ यदा तु यथेष्टविभागपक्षस्तदा ग्रामा
दिना गुर्वादिर्विजः परितोष्य गुर्वादिभ्यो न्येभ्यश्च यथाशक्ति दद्यादिति केचित् ॥ अन्ये तु विप्रायेत्येकवचनमे
वास्मिन्पक्षे परमित्याहुः ॥ ॥ इति हिरण्यकामधेनुमहादानविधिः ॥ अथ प्रयोगः ॥ यजमानो देशकालौ सं
कीर्त्य ॐ सर्वकामफलमहायानकनाशपुरंदरदेवजुष्टकामधेनुप्राप्तिवहुकन्यापरिहृतानाम्नीयेंद्रमोलिपद

प्राप्तिकामः श्वो हिरण्यकामधेनुमहादानं धनिपादपि षष्ठे इति संकल्प्य मण्डपकीर्तनं तुलापुरुषवत्कृत्वा षोडशारो
परिपुष्पाणि विकीर्य नववर्णाकृत्रीवेदुर्न्नैलोमके कृष्णाजिने प्रस्थपरिमितं गुडं संस्थाप्य तदुपरि शक्त्यनुसारे
णात्रिपलाधिकसहस्रपलपर्यन्तसुवर्णेन नूपुरकपञ्चेवेयककुंडलघंटापादकिंकिणाभरणयुक्तां स
वत्सां सुवर्णधेनुं निर्माय वज्रमौक्तिकमाणिक्यनीलमरकतैरलंकृतां कौशेयपट्टसंहतां रौप्यपादखुरपुच्छां सं
स्थाप्य तत्समंतात्कांस्यपात्रकांताम्रदोहनचामरवारिपूर्णकुंभाष्टकाष्टदशधान्यफलान्वितेक्षुदंडाष्टकना
नाविधफलपुष्पभोजनपात्रपीठदीपिकाछत्रवस्त्रसर्वकुव्याणि हरिद्राजीरकधान्याकशर्कराश्च स्थापयेत्
वत्सश्च धेनुचतुर्थांशेन प्रमाणः स्वसुखनाभिमुखो वा स्यार्थ्यः॥ ततो महादेवी घोरूपरि विमाने वध्नीयात्॥ ततः
कामधेन्वे नम इति सवत्सां तां पूजयेत्॥ अथ संध्यान्तरं णत्रिकृत्वे प्रातश्च यजमानाभिषेकान्ते यजमानो
गृहीतपुष्पांजलिः कामधेनुं त्रिःप्रदक्षिणीकृत्य गुडधेनुमंत्रेणावाहयेत्॥ तेच यालक्ष्मीः सर्वभूतानां याव दे

॥ दा॰वि॰ ॥
॥ १०९ ॥

वेष्ववस्थिता ॥ धेनुरूपेण सा देवी मम शान्तिं प्रयछतु ॥ देहस्था या च रुद्राणी शंकरस्य सदा प्रिया ॥ धेनुरूपेण सा दे-
वी मम पापं व्यपोहतु ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रि-
ये ॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मी र्धनदस्य च ॥ या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे ॥ स्वधा या पितृमु-
ख्यानां स्वाहा यज्ञभुजां च या ॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयछतु ॥ ततः प्रार्थयेत् ॥ त्वं सर्वदेवगणमं-
दिरमंगभूता विश्वेश्वरि त्रिपथगादधिपर्वतानां ॥ त्वद्दानशस्त्रशकलीकृतपातकौघः प्राप्तोस्मि निर्वृतिम-
तीव परां नमामि ॥ लोके यथेप्सितफलानुविधायिनीं त्वां मासाद्य को हि भवदुःखमुपैति मर्त्यः ॥ संसारदुःख-
शमनाय यतस्व कामं त्वां कामधेनुमिति देवगणा वदन्ति ॥ सर्वैः प्रार्थनमिति केचित् ॥ ततः पुष्पाञ्ज-
लिना धेनुं गंधाद्यैर्गुर्वन्विजश्च संपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य मां कृष्णाजिनस्थगुड-
प्रस्थगतां उक्तोपकरणसहितां सवत्सां कामधेनुं विष्णुदैवतां गुरोर्नामगोत्रे समुच्चार्य गुरवे हं संप्रददे ।

॥ राम ॥
॥ १०९ ॥

निगमाद्वहस्ते सर्वान्कामधेनुं दद्यात् ॥ ऋत्विजांचाधिवासन दक्षिणामात्रं ॥ यदानु यथेच्छविभागस्तदाग्रामा
दिना गुर्वर्त्विजः परितोष्य तेभ्योन्येभ्यश्च विभज्य हिरण्यकामधेनुं दद्यात् ॥ ततः कृतस्य कामधेनुमहादानक
र्मणः सनिस्वार्थमिमां सुवर्णानग्निदेवतान्तुभ्यमहं दक्षिणां संप्रददे इति कामधेनुसुवर्णतृतीयांशं वा
दद्यात् ॥ ग्रामादीनां दक्षिणात्वेन वा दानं ॥ ततः कामधेनोः पुच्छं हस्ते गृहीत्वाचार्यः सर्वैर्वा कामसूक्तेन पठेयुः ॥
ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मण्डपोपकरणादि सर्वं गु
रवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहि
त्यामृतसागरः सुजननावल्लीरसालद्रुमः यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हि
रण्यधेनुपद्धतौ सन्नीतये पद्धतिः ॥ ॥ इति हिरण्यकामधेनुमहादानप्रयोगः ॥ ॥ अथ हिरण्याश्वम
हादानं मात्स्ये ॥ अथातः संप्रवक्ष्यामि हिरण्याश्वविधिं परं ॥ यस्य प्रसादाद्भुवनमनन्तं फलमश्नुते ॥ पु

रांपानिथिमथासाद्य कृत्वा ब्राह्मणवाचनं ॥ लोकेशावाहनं कुर्यात्तुलापुरुषदानवत् ॥ आग्निध्यंडपसंभारभूष
णाद्यदनादिकं ॥ स्थलेचैकाग्निवत्कुर्याद्धेमवाजिमखं बुधः ॥ स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि ॥ कौ
शेयवस्त्रसंवीतं कारयेद्धेमवाजिनं ॥ शक्तितस्त्रिपलादूर्द्ध्वमासहस्रपलाद्बुधः ॥ पादुकोपानहच्छत्रचामरास
नभाजनैः ॥ पूर्णकुंभाष्टकोपेतं माल्येक्षुफलसंयुतं ॥ शय्यां सोपस्करां नद्धेममार्त्तंडसंयुतां ॥ ततः सर्वौ
षधिस्नानस्नापितो वेदपुंगवैः ॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः ॥ नमस्ते सर्वदेवेशवेदाहरण
लंपटः ॥ वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ त्वमेव सप्तधा भूत्वा छंदोरूपेण भास्करं ॥ यस्मा
द्वाहयसे लोकानतः पाहि सनातन ॥ एवमुच्चार्य गुरवे नमश्वं विनिवेदयेत् ॥ सर्वं शय्यादिकं दत्वा भुंजी
तातैलमेव च ॥ पुराणश्रावणं तद्वत्कारयेद्भोजनादिकं ॥ इमं हिरण्याश्वविधिं करोति यः संपूज्यमानो
दिविदेवनंदैः ॥ विमुक्तपापः सपुरं मुरारेः प्राप्नोति सिद्धैरभिपूज्यमानः ॥ इति पठति य एतद्वाजिमेधप्र

दानंसकलक्रतुफलक्तःसोश्वयुक्तेनभूयः॥कनकमयविमानेनार्कलोकंप्रयातित्रिदशपतिसभूमिःपूज्यतेयो
धपद्मेन्॥योवाश्वरत्नेतिपुरुषोत्तमवनःस्मरेद्वाहेमाश्वदानमभिनंदयतीहलोके॥सोपिप्रयातिहतकिल्बिष
भूद्देहःस्थानंपुरंदरमहेश्वरदेवजुष्टं॥भुवनमितित्रिभुवनहृत्त्रिलोकलक्षणायाःकर्त्तृपदमित्येके॥पद
त्रयस्यसामानाधिकरण्येनान्वयंकृत्वायत्तोभुवनान्तच्यवनेनाद्दशभुवनरूपंफलंप्राप्नोतीत्यर्थइतिदामो
दरः॥कृष्णाजिनेति॥सग्रीवमुपरिष्ठोमकंकृष्णाजिनंतदुपरितिलान्नदुपरीत्यर्थः॥तिलपरिमाणंद्रो
णात्रिमदनरत्नदामोदरौ॥देशिकमितिरत्नाकरः॥पादुकेति॥पादुकाभिःसहपूर्णकंभाष्टकोपेनमित्य
न्वयः॥हेमंवाजिनंकारयेत्तत्रकौशेयवस्त्रसंवीतंपादुकादिभिःसहकृष्णाजिनतिलोपरिस्थापयेदित्यस
र्थः॥अष्टादशधान्यान्यप्यासादयेदग्रेनेषांविनियोगान्॥सोपस्करमिति॥उपसंधानोत्तरछत्रंतांवू
लदीपिकापानहछत्रचामरासनभाजनादीन्युपकरणानीतिदामोदरः॥केचित्तुपादुकोफलपुष्पकं

॥ हा॰वि ॥
॥ १११ ॥

क्रमकर्पूरं चंदनदर्पणाकेशप्रसाधनादीन्युपकरणानीत्याहुः ॥ इयं च शय्यादक्षिणारूपशय्याभिन्नाविशेषवि
धानान् ॥ हेमेति ॥ सौवर्णसूर्यप्रतिमायुक्तामित्यर्थः ॥ हेमाशेन हेममार्तण्डसंयुतमित्यश्वविशेषणं ॥ म
मेति ॥ त्रिः प्रदक्षिणीकृत्येति शेषः ॥ गुरवइति । गुरुग्रहणाद्गुर्वादिभ्यश्च संप्रदानत्वपक्ष एव शान्तिकं प्र
दानत्वबाधेन गुरुमात्रसंप्रदानत्वबोधकं ॥ न तावच्छान्तिगादीनामुक्तगोदक्षिणाधिवासनदक्षिणामा
त्रं ॥ यदानुपपथेद्धविभागपक्षस्तदायामादिनागुर्वर्त्विजः ॥ परितोषागुर्वर्त्विग्भ्योन्येभ्यश्च हिरण्यध्वं वि
भज्य दद्यादिति केचित् ॥ उपदेशेनातिदेशबाध इति युक्तं पश्यामः ॥ अन्ये तु गुरुग्रहणमेकाग्निपक्ष
परमित्याहुः ॥ सर्वमिति गुरव इति शेषः ॥ पुराणांरत्न द्वितीयं ॥ ॥ इति हिरण्याश्वमहादानविधिः ॥
अथ प्रयोगः ॥ यजमानो देशकालौ संकीर्त्य ॐ अनन्तफलभुवनप्राप्तिपापक्षयहेतुकशाश्वतभानुलो
काभिगमनदिवाधिकरणकबहुदेवनैंजसंपूज्यमानविमुक्तयापवहुसिद्धाभिपूजितनाम्नीयपुराणिपु

॥ राम ॥
॥ १११ ॥

रश्मिकामः । अथो हिरण्याश्वमहादानमहं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कान्तं तुलापुरुषवत्कृत्वा षोडशा
रोपरि पुष्पाणि विकीर्य तत्र पार्श्वे वेद्युर्ध्वलोमके कृष्णाजिने द्रोणपरिमितांस्तिलान्निधाय तदुपरि शास्त्रानु
सारेणात्रिपलाधिकसहस्रपलपर्यन्तसुवर्णघटितं हेमवाजिनं कौशेयवस्त्रसंवीतं पञ्चमुखं संस्थाप्य तत्
समन्तात्पूर्णकुंभाष्टकपादुकोपानहछत्रचामरासनभोजनपात्रमाल्येक्षुफलाष्टादशधान्यानि उपसंधा
नोत्तरच्छदतांबूलदीपिकापादुकोपानहछत्रचामरासनभाजनाद्युपकरणसहितानादित्यप्रतिमासहि
तांश्चापि स्थापयेत् ॥ ततो महावेदीग्रहदेवतारूपी रविनानेव ध्यायेत् ॥ अथ संध्योत्तरं रात्रिक्रमेण तत्र
यजमानाभिषेकान्ते कृते यजमानो गृहीतपुष्पाञ्जलिर्हेमवाजिनं त्रिः प्रदक्षिणीकृत्य तं प्रार्थयेत् ॥ ॐ न
मस्ते सर्वदेवेश वेदाहरणलंपट । वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ त्वमेव सप्तधा भूत्वा छं
दोरूपेण भास्कर । यस्माद्भासयसे लोकानतः पाहि सनातन ॥ ततः पुष्पाञ्जलिना हेमवाजिनं गंधाद्यै

॥ घ·वि ॥
॥११२॥

गर्वैर्न्निजश्चसंपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्येक्ष्माजिनस्थतिलद्रोणोपरिगतं कौशेयव
स्त्रसंवीतं सूर्यप्रतिमसोपस्करशय्यासनं मंडलोपकरणसहितं हेमवाजिनं विष्णुदैवतं गुरो नामगोत्रे समु
च्चार्य गुरवे हं संप्रददे इति गुरुमात्रहस्ते सर्वं हेमवाजिनं संकल्पयेत्॥ ऋत्विग्भ्यो यथाशक्ति गाः दद्यात्॰
यथेच्छविभागपक्षे तु याम्यादिना गर्वैर्न्निजः परितोष्य तेभ्योन्येभ्यश्च हेमवाजिनं विभज्य दद्यात्॥ ततः कृत
स्य हेमवाजिमहादानकर्मणः प्रतिष्ठार्थमिमां सुवर्णामग्निदैवतान्॥ तुभ्यमहं दक्षिणां संप्रददे इ॰
ति हेमवाजिसुवर्णतृतीयांशं दशांशं वा दद्यात् ग्रामादीनां वा दक्षिणात्वेन दानं॥ ततो ऋत्विजः काम॰
सूक्तानि पठेयुः॥ ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मंड
लोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ मीमांसैकधुरंधरः श्रुतिधरोस्मा
र्योपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः॥ यं विद्वन्मणिशेखरो दिनकरः प्रासूत

॥ राम ॥
॥ ११२॥

विश्वेश्वरंतेनाकारिहिरण्यवाजिददौसम्त्रीनयेयद्वनि॥ ॥इतिहिरण्याश्वमहादानप्रयोगः॥ ॥अथ
हिरण्याश्वरथमहादानमारभ्यते॥ अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥ पुण्यमश्वरथंनाममहापातकनाश
नं॥ पुण्यंदिनमथासाद्यकृत्वाब्राह्मणवाचनं॥ लोकेशावाहनंकुर्यात्तुलापुरुषदानवत्॥ ऋत्विग्मंडप
संभारभूषणाछादनादिकं॥ कृष्णाजिनेतिलान्कृत्वाकांचनंकारयेद्रथं॥ सप्ताश्वंचतुरश्वंवाचतुश्चक्रंस
कूवरं॥ ऐंद्रनीलेनकुंभेनध्वजरूपेणसंयुतं॥ लोकपालाष्टकोपेतंपद्मरागदलान्वितं॥ चत्वारःपूर्ण
कलशाधान्यान्यष्टादशैवतु॥ कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकं॥ माल्येक्षुफलसंयुक्तंपुरुषेण
समन्वितं॥ छत्रचामरकौशेयवस्त्रोपानहपादुकाः॥ गोभिर्विभवतःसार्द्धंदद्याच्छयनासनं॥ अ
भावात्रियलार्द्धंशक्तितःकारयेद्बुधः॥ अश्वाष्टकेनसंयुक्तंचतुर्भिरथवाजिभिः॥ द्वाभ्यामथयुतं
दद्याक्रमसिंहध्वजान्वितं॥ चक्ररक्षावुभौतस्यतुरगस्थावथाश्विनौ॥ पुण्यंकालंततःप्राप्यपूर्वव

॥दा·वि॥
॥११३॥

न्मापिनोद्विजैः। भुक्त्वा मा त्वां वरो दद्यादिमं मंत्रमुदीरयन्॥ नमो नमः पापविनाशनाय विश्वात्मने वेदतुरं
गमाय॥ धाम्नामधीशाय भवाभवाय पापौघदावानलदेहशांतिं॥ वस्वष्टकादित्यमरुद्गणानां त्वमेव
धाता परमं निधानं॥ यतस्ततो मे हृदयं प्रयातु धर्मैकतानं त्वमघौघनाशान्॥ इति तुरगरथप्रदानमे
वं भवभयसूदनमत्रयः करोति॥ सकलुषपटलैर्विमुक्तदेहः परममुपैति पदं पिनाकपाणेः॥ देदी
प्यमानवपुषा विजितप्रभावमाक्रम्यमण्डलमखंडमचंडभानोः॥ सिद्धांगनानयनवंदनीयमान
वक्त्रांबुजो भुजगभवेन चिरं सहास्ते॥ इति पठति श्रृणोति वा यस्तनस्कनकतुरंगरथप्रदानमेव॥ स्य
नरकपुरं व्रजेत्कदाचिन्नरकरिपोर्भवनं प्रयाति भूयः॥ तिलानितिः वक्रोयरिकृष्णाजिनेनडुपरीत्यर्थः॥
तिलानां गजरथदानादानादौ द्रोणापरिमाणाश्ववाणान्द्रोणापरिमिमारतिदामोदरः॥ अनियमश्चनिरत्ना
करः॥ मणाश्वचतुरश्वं वेनिकां वनाश्वाभिधायेरा अश्वाष्टकेनेति चप्रमक्षाश्वाभिधायेराकांचनपदस्मा

॥राम॥
॥११३॥

श्वचक्रकूवरविशिष्टेस्वरथेनयानम् ॥ कूवरोयुगाधारंकाष्ठंरंडेति ॥ इंद्रनीलमणिखचितसुवर्णकुंभः
ध्वजेतिकनकस्तंभोपरिस्थेंद्रनीलकुंभेनमूर्छितपुत्तमित्यर्थः ॥ लोकपालानांस्थानंब्रह्मांडइववहिरेव ॥ पत्तः
खंडःचत्वारइतिस्थाप्यइतिशेषःकोशेयेति ॥ इदंरथविशेषणमेतिकेचित् ॥ रत्नाकरस्कःसामान्यानिदे
शेषाण्नविनानकेगुणविधिरयंनकोशयवस्त्वप्राहनमध्यंविनानकंकुर्यादित्यर्थइत्याहुः पुरुषेणाहीर
णानुलापुरुषपदस्यहरोशक्तियहान् ॥ नक्षत्रक्षणांचोक्तंःगोभिरिनिविभवनाः विभवात्यथाशक्तिगावः
स्थापनीयाइत्यर्थः शयनंशय्या आसनंपीठंभारःपलसहस्रद्वयंशतद्वयंचेत्युक्तः घाम्नांवाजिभ्यांहेमे
तितथाचस्कन्दःस्तंभोपरिकुंभःसिंहोपिस्थापनीयइत्यर्थः ॥ चक्ररक्षौचक्रसमीपस्थावित्यर्थः ॥ न
योर्लक्षणं रूपोन्नमोभूलधरोयुवानोकांचनघृतीपमासनस्थौवरदौकार्यौविश्वकुमारकौ ॥ एनो
चसमवाहनौस्नानस्यदानीयस्तुवर्णघटितौ ॥ भन्नचदानेनुलापुरुषवत् ॥ अर्द्धगरवेउर्द्धसृत्वि

ग्म्योयथेष्टभागोवाब्राह्मेनि ॥ ॥ इतिहिरण्याश्वरथमहादानविधिः ॥ ॥ अथप्रयोगः यजमानोदे
शकालौसंकीर्त्य ॐमहापातकनाशभवभयसूदनबहुकलुषपटलविमुक्तदेहाम्मीयपिनाकपाणि
परमपदोपगमदेदीप्यमानवपुर्विजितप्रभावाखंडचंडभानुमंडलाक्रमाणंनरसिद्धांगनानयनष
ट्पदपीयमानवक्त्रांबुजाम्मीयांबुजभवविरमहावस्थानकामःश्वोहिरण्याश्वरथमहादानमहंप्र
निपादयिष्येइतिसंकल्प्यमधुपर्कानंतुलापुरुषवत्कृत्वाथोडशारोपरिष्ठष्याशिविकीर्णंनवशाग्री
वेऊर्ध्वलोमकेकृष्णाजिनेद्रोणपरिमितांस्तिलान्निधायतदुपरिशक्त्यनुसारेणपलाधिकसहस्र
दयपलपर्यंतसुवर्णनिर्मितंचतुरस्रंउपरिसर्वदिक्षप्राकारसंहितंचतुश्चक्रंअग्रेकृतवरयुतंम
ध्येहृरिण्यनिमायुनंईषाग्रेसौवर्णयुगकाष्ठाधोयोजितसमश्वचतुरम्पनराश्वइन्द्रनीलखचितकुंभहे
मसिंहयुतंध्वजंमध्येष्टदिक्षुहेमलोकपालाष्टकोपेतंपद्मरागान्वितंचक्रसमीपेतुरगारूढाश्विनीकु

मारप्रतिमाद्वययुतंस्थापयेत् ॥ ततस्समंतात्‌चतुरःपूर्वादिक्रमात्प्रदशधान्यानिमाल्येक्षुफलछत्रचा
मरकौशेयोपानहकाष्ठपादुकायथाशक्तिसोपस्करागाःशय्यापीठंचस्थापयेत् ॥ ततःप्रत्यक्षाश्वानष्टौ
चतुरोदिक्षुरथेवध्नीयात् ॥ ततोमहावेदीग्रहवेश्योरुपरिवितानेवध्नीयात् ॥ अथसंध्योन्तरंराज्ञिह्रत्येप्रा
तश्चयजमानाभिषेकान्तेयजमानोगृहीतपुष्पांजलिर्हेमाश्वरथंत्रिःप्रदक्षिणीकृत्यप्रार्थयेत् ॥ ॐ
नमोनमःपापविनाशनायविश्वात्मनेवेदतुरंगमाय ॥ धाम्नामधीशायभवाभावायययाघोघदावान
लदेहिनां ॥ वस्वष्टकादित्यमरुद्गणानांत्वमेवधातापरमंनिधानं ॥ यतस्ततोमेहृदयंप्रयातुधर्मै
कतानंत्वमघौघनाशात् ॥ पुष्पांजलिनाहिरण्याश्वरथंगंधाद्यैर्द्विजश्चसंपूज्यतदनुज्ञातःकृष्णादी
न्यादायपूर्ववत्फलमुच्चार्येमंतिलद्रोणोपरिस्थंसप्तचतुरन्यतमसुवर्णाश्वयुतंचतुरष्टद्व्यन्यतम
प्रत्यक्षाश्वयुतंइन्द्रनीलकुंभसिंहध्वजयुतंउक्तोपकरणसहितंचक्ररक्षानुरगवाहनाश्विनीकुमार

॥दा-वि॥ ॥११५॥

दद्यात्तं हिरण्याश्वरथं विष्णुदैवतं सर्वेषां नामगोत्रे समुच्चार्य गुर्वृत्विग्भ्यो हं संप्रददइति सर्वे हस्तोपरि
स्थितगुरुहस्ते संकल्पयेत् ॥ ततोर्द्धं गुरवे र्द्धमृत्विग्भ्यो दद्यात् ॥ ग्रामादिना वा तन्मूल्यविनोद्य यथेष्टं वि
भजेत् ॥ ततः कृतस्य हेमाश्वरथदानकर्मणः प्रतिष्ठार्थमिमं सुवर्णमग्निदैवतं तुभ्यमहं दक्षिणां
संप्रददइति हेमाश्वरथसुवर्णतृतीयांशं दशांशं वा दद्यात् ॥ ग्रामादीनां वा दक्षिणात्वेन दानं । ततः सर्वे
कामसूक्तं पठेयुः ॥ ततो यजमानः पुराणं हवाच नमावाहितदेवतानां मन्त्रपूजाविसर्जनं च कृत्वा मंड
पोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति ॥ ॥मीनेमेषेकधुरधरः श्रुतिनिध
रोन्यायेयिवागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ॥ यं विद्वन्मणिशेखरो दिनकरः
प्रासूत विश्वेश्वरं तेनाकारि हिरण्यवाजिरथके दाने विधिर्यापद्धतिः ॥ ॥इति हिरण्याश्वरथमहादा ॥राम॥
नप्रयोगः ॥ ॥अथ हिरण्यगजरथदानं मात्स्ये ॥ अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभं ॥ यस्य ॥११५॥

प्रसादाद्भुवनं वैष्णवं याति मानवः ॥ पुराणानि थि मथा सायन्तु लाप्रुरुदानवत् ॥ ज्ञात्विङ्मण्डपसंभारभूष
णाछादनादिकं ॥ अत्राप्युपोषितस्तस्य वृष्णासरोः सहभोजनं ॥ कुर्यान्मुख्यरथाकारं कांचनं मणिमण्डितं ॥ व
लभीभिर्विचित्राभिश्चयुग्मचक्रसमन्वितं ॥ लोकपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतं ॥ मध्ये नारायणोपेतं
लक्ष्मीपुष्टिसमन्वितं ॥ कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्रथं ॥ तथाष्टादशधान्यानि भाजनासनचंद
नैः ॥ दीपिकोपानहच्छत्रदर्पणपादुकान्वितं ॥ ध्वजे तु गरुडं कुर्यात्कूवराग्रे विनायकं ॥ नानाफलसमा
युक्तमुपविष्टाच्छादनकं ॥ कौशेयं पंचवर्णं च अम्लानकुसुमान्वितं ॥ चतुर्भिः कलशैः सार्द्धं गोभिरष्टा
भिरन्वितं ॥ चतुर्भिर्हेममानंगैर्मुक्तादामविभूषितैः ॥ सुरूपनःकरिभ्यां च युक्तं कृत्वा निवेदयेत् ॥ कु
र्यात्संचयतादूर्ध्वमभावादपि शक्तितः ॥ तथा मंगलशब्देन स्नापितो वेदपुंगवैः ॥ त्रिःप्रदक्षिणमावृत्य
गृहीतकुसुमांजलिः ॥ इममुच्चारयेन्मंत्रं ब्राह्मणेभ्यो निवेदयेत् ॥ नमो नमः शंकरपद्मजार्कलोकेशवि

ग्राधरवासुदेवैः ॥ त्वंसेव्यमेवेदपुराणयज्ञनेज्ञोमयस्यंदनयाहितस्मात् ॥ यत्ननत्वदंपरमगुह्यनमंपुराणेचानंद
हेतुगुरुणापविमुक्तमेनः ॥ योगैकमानसदृढो मुनयः समाधौ यद्यं तिनत्वमसिनाथरथेधिरूढः ॥ यस्मात्व
मेवभवसागरसंप्लुतानामानंदभांडमृतमध्वरयानयात्वं ॥ तस्मादघौघशमनेनकुरुषसादंचामीकरेण
रथमाधवं संप्रदानात् ॥ इत्थंप्रणम्यकनकेभरथप्रदानं यः कारयेत्सकलपापविमुक्तदेहः ॥ विद्याधराम
रमुनीन्द्रगणाभिजुष्टंप्राप्नोत्यसौपदमतीन्द्रियमिंदुमौलेः ॥ कृतदुरितविनाशोज्वलदवह्निजालवनिक
रहतदेहोहेगभाजोयवंधून् ॥ नयतिनृपिनृपोत्रारौरवादप्यशेषान्कृतगजरथदानः शाश्वतंपद्ममविष्णोः
नहतनृतुलाउरुषवत् ॥ ब्रास्रणैःसहपूर्वेद्युरुपोषितापरेद्युर्भोजनंकुर्यादित्यर्थः ॥ पुष्परथः क्रीडार
थः सचोपर्येवाछादितोभवतिनतसमंतात् ॥ मणिः पद्मरागादिः वलभीछाज्जेतिपसिद्ध·पुनमिनिशेषः
लोकपालानंब्रह्मांडद्वववहिस्थापनं· मध्यइति· ब्रह्मादिभिरपिसंवध्यते ॥ नक्षत्रक्षणामुक्तं·नारायणा

लक्षणंनारदप्रोक्तंचराचे ॥ नारायणोचतुर्बाहोशंखचक्रंसदेन्नरे ॥ दक्षिणेनुगदांपद्मंनीलजीमूतसन्निभं॥वा
मेश्रीर्वक्षकीहस्तापुष्टिःपमकरायवे ॥ अत्रउक्तदेवामेदक्षिणेएतयोर्हस्तद्वर्तिशेषः ॥ वामेश्रीरितिवामभा
गेनारायणस्यलक्ष्मीः ॥ दक्षिणभागेपुष्टिरित्यर्थः ॥ धान्यानिवसांडेउक्तानि ॥ चंदनेरितिसहार्थेतृतीया
गरुडलक्षणं ॥ उपेन्द्रस्याग्रतःपक्षीगृध्राकेचाःकृतांजलिः ॥ सव्यजानुगतोभूमौमूर्ध्नीदेफणिमंडिता ॥ प
क्षिणंघोनरांघ्रिश्वजंगनासोनरांगकः ॥ द्विबाहुःपक्षयुक्तश्चकर्तव्योविनतासुतः ॥ गजकेशवक्रकेशः
विनायकंकुर्वरायेकीर्तितंस्थापयेत् ॥ वर्तुलेस्थापनासंभवात् ॥ विनायकलक्षणमुक्तं ॥ नानेनि ॥ रथ
विशेषणंविनानविशेषणंवा ॥ अस्मानगृधंवाणाहृक्षपुष्पमितिकेचित् ॥ स्वरूपकरिणोदानकालस्य
वनियोजनंनाधिवासनकाले ॥ भारउक्तः निवेदयेदनुमंत्रणानंतरमितिविशेषः ॥ अत्रचार्वंगरवेश्र
मृत्विग्भ्योयथेछविभागोवाद्रष्टव्यः ॥ ॥ इतिसुवर्णगजरथदानविधिः ॥ ॥ अथप्रयोगः ॥ यजमानो

॥ म०वि ॥
॥११८॥

देशकालौ संकीर्त्य ॐ वै स्वर्भुवनगमनसकलपापविमुक्तदेहसमकर्नेकविद्याधरामरमुनीन्द्रगणाभिष्टु
ष्टानीन्द्रियेंदुमौलिपदप्राप्तिवकुंठधुमसमस्तपितृपृचकशाम्भवनविष्णुसम्मनयनकामः श्वोहेमहस्तिरथम
हादानमहं ष निपादयिष्ये इति संकल्प्य मधुपर्केनं तुलापुरुषवत्कृत्वा षोडशारोयपरितृ ख्याणि विकी
र्यतनत्रयाग्रीवहूर्ध्वलोमके हस्माजिने द्रोणायरिमिनं तिलान्निधाय तदुपरि शक्त्यनुसारेण पंचपलाधि
कपलसहस्रवयपर्यंतसुवर्णेन घटितं क्रीडारथाकारयमस्रगादिमंडितमनेकवलभीषु लोकपालाष्ट
कप्रतिमायुक्तं मध्ये ब्रह्मार्कशिवप्रतिमायुतं वा दक्षिणभागस्थलक्ष्मीपृष्ठप्रतिमानारायणप्रतिमायु
तमीषाग्रकीलितविनायकप्रतिमं गरुडप्रतिमायुतध्वजमीषाग्रयोजितमुक्तादामविभूषितसुवर्ण
मानवाचतुष्टयं रथं संस्थापनमम नादृशाद्दशाधान्यानि भोजनपात्रपीठचन्दनदीपिकोपानहछत्रदर्प
णपादुकापूर्णकलशचतुष्टयमष्टौगाश्च स्थापयेत् ॥ रथोपरि कौशेयवस्त्रनिर्मितं नानाफलयुक्तं

॥ राम ॥
॥ ११८ ॥

त्ववर्णं वारणपुष्पान्विनं विना नैव बध्नीयात् ॥ तत्रषन्यक्षहस्तिदर्पं दानकाले योजनीयं तदभावे तन्मूल्यद्रव्यं स्थापयेत्
तत्स्वर्णं वत्रांतं रूप्यपात्राणीति ईमजो ॥ अशीतिकार्षापणाद्यति मूल्याध्याये ॥ हस्तिभावे हयस्य दर्पमिति केचित् ॥
ततो महावेदीयहृद्वेयोरुपरि विना नैव बध्नीयात् ॥ अथ संधानरत्नं तद्रिहमध्ये स्नानश्च यजमानाभिषेकानंतरं य
जमानो गृहीतपुष्पांजलिर्हिरण्यगजरथं त्रिः प्रदक्षिणीकृत्य प्रार्थयेत् ॥ ॐ नमो नमः शंकरपद्मजार्कलोके
शविद्याधरवासुदेवैः ॥ त्वं सेव्यसे वेदपुराणयज्ञे तेजोमयस्यंदन पाहि तस्मात् ॥ यत्तत्पदं परमगुह्य तनं मुरा
रेरानंदहेतु गुणरूपविमुक्तमंनः ॥ योगैकमानसदृशो मुनयः समाधौ पश्यंति तत्त्वमसि नाथ रथाधिरूढः
तस्मात्त्वमेव भवसागरसंप्लुतानामानंदभांडभृतमध्वरपानपात्रम् ॥ तस्माद्घौघशमनेन कुरु प्रसादं
चामीकरेभरथमाधवसंश्रितानाम् ॥ पुष्पांजलिना सुवर्णगजरथं गंधाद्यैर्वीर्विजश्च संपूज्यं तदनुज्ञा
तः ॥ कुंभादीन्यादाय पूर्ववत्फलमुद्वार्येतं मणिमंडितकूवरायस्थित विनायकप्रतिमं गरुडध्वजं म

॥ दा·दि ॥
॥ ११८ ॥

ध्यस्थितनवसार्कशिवनारायणलक्ष्मीपुष्टिप्रतिमंसौवर्णंचतुर्भागेनतंडमक्षहिमानंगंकोडोपपंचवर्णाविना
नकसुक्तोपकरणसहितंविष्णुदेवतंसर्वेषांनामगोत्रेसमुच्चार्यगुर्वृत्विग्भ्योहंसंप्रददेइतिसर्वहस्तोपरि९
स्थितगुरुहस्तेसंकल्पयेत्॥ततोगुरवेऋत्विग्भ्योदद्यात्॥ग्रामादीनांवानाम्परितोष्ययथेच्छंविभजेत्
ततःकृतस्यहेमगजरथदानकर्मणःप्रतिष्ठार्थमिमान्सुवर्णान्तुभ्यमहंदक्षिणांसंप्रददेइतिहेमग
जरथसुवर्णानीयांशादशांशंवादद्यात्॥ग्रामादीनांवादक्षिणात्वेनदानं॥ततःसर्वेक्षमस्वेतिपठेत्
ततोयजमानःपुण्याहवाचनमावाहितदेवतानामुत्तरपूजाविसर्जनंचकृत्वामंडपोपकरणादिसर्वंगुर
वेप्रतिपाद्ययथाशक्तिब्राह्मणान्भोजयेदिति॥मीमांसैकधुरंधरःश्रुतिधरोन्यायेपिवागीश्वरःसाहि
त्यामृतसागरःसुजनतावश्रीरसालद्रुमः॥ ॥यंविद्वन्मणिमौलिरत्नरगोदिनकरःश्रीमन्नविश्वेश्वरस्तेनाका
रिहिरण्यहस्तिरथकेदानेविधानपद्धतिः॥ ॥इतिहिरण्यगजरथमहादानप्रयोगः॥ ॥अथपंचलांगल

॥ राम ॥
॥ ११८ ॥

तमहाघनेमात्मे ॥ अथातःसंप्रवक्ष्यामिमहादानमनुत्तमम् ॥ पंचलांगलकंनाममहापातकनाशनम् ॥ पुण्यां
तिथिमथासाद्ययुगादिग्रहणादिकम् ॥ भूमिदानंनरोदद्यात्पंचलांगलकान्वितं ॥ खर्वटंखेटकंवापिग्रामं
वासस्यशालिनं ॥ निवर्त्तनशतंवापितदर्द्धंवापिशक्तितः ॥ सारदारुमयान्कृत्वाहलान्पंचविचक्षणः ॥ सर्वोप
करणैर्युक्तानन्यान्पंचचकांचनान् ॥ वृषान्लक्षणसंयुक्तान्दशचैवधुरंधरान् ॥ सुवर्णशृंगाभरणान्मु
क्तालांगूलभूषितान् ॥ रौप्यपादाग्रतिलकान्रक्तकौशेयभूषणान् ॥ स्रग्गंधचंदनयुतान्शालायामधिवा-
सयेत् ॥ पर्जन्यादिमरुद्भ्यःपायसंनिर्वपेच्चरुं ॥ एकस्मिन्नेवकुंडेतुग्रहर्यस्मैनिवेदयेत् ॥ पलाशस
मिधस्तद्वदाज्यंकृष्णानितिलास्तथा ॥ तुलापुरुषवत्कुर्य्याल्लोकेशावाहनंततः ॥ ततोमंगलशब्देनशुक्लमाल्यां
बरोबुधः ॥ आहूयद्विजदांपत्यंहेमसूत्रांगुलीयकैः ॥ कौशेयवस्त्रकटकैर्मणिभिश्चापिपूजयेत् ॥ शय्यांसो
पस्करांतद्वद्धेनुमेकांपयस्विनी ॥ तथाष्टादशधान्यानिसमंतादधिवासयेत् ॥ ततःप्रदक्षिणांकुर्या-

॥ दा॰वि ॥
॥११९॥

कृशीनकुसुमांजलिः॥इममुच्चारयेन्मंत्रमर्घसर्वंनिवेदयेत्॥यस्माद्देवगणाःसर्वेस्थावराणिचराणिच॥ध्रुवं
ध्रुवांगेनिषंतितस्माद्भक्तिःशिवेस्तुमे॥यस्मात्त्वंभूमिदानस्यकलांनार्हंतिषोडशीं॥दानान्यानिमेभक्तिर्द्धर्मे
यंचदत्तंभवेत्॥सप्तहस्तेनदंडेनत्रिंशद्दंडानिवर्तनं॥त्रिभागहीनंगोचर्ममानमाहप्रजापतिः॥मानेना
नेनयादद्यान्निवर्तनशतंबुधः॥विधिनानेनतस्याशुक्षीयतेपापसंहतिः॥तदर्द्धमपियोदद्याद्दपिगोच
र्ममात्रकं॥भवनस्थानमात्रंवासोपिपापैःप्रमुच्यते॥यावंतिलांगलकमार्गमुखानिभूमेर्भासांपतेर्दु(
हितुरंगजरोमकानि॥तावंतिशंकरपुरेससमाःहितिष्ठेद्भूमिप्रदानमिहयःकुरुतेमनुष्यः॥गंधर्वकिं
नरसुरासुरसिद्धसंघैराधूतचामरमुपेत्यमहद्विमानं॥संपूज्यतेपितृपितामहबंधुयुक्तःशंभोःपुरंव्रज
तिचामरनायकःसन्॥नेंद्रत्वमप्यधिमतंक्षयमभ्युपैतिगोभूमिलांगलधुरंधरसंप्रदानात्॥तस्माद्
योघपटलक्षयकारिभूमिदानंविधेयमनिमूनिभवोद्भवाय॥पंचलांगलकमिति॥अथपंचलांगल

॥ राम ॥
॥ ११९ ॥

दानस्यप्रधानत्वावगतावपिभूमिदानंनरोदद्यात्संचलांगलकान्वितमितिन्यत्रभूमिदानस्यापिप्रधानभूत्वा
वगतेरत्नमन्नत्रणामंत्रेवहृषभूमिदानयोः॥प्राधान्यावगतेःमानेनानेनयोदद्यादित्यत्रभूमिदानस्यफ
लेसंबंधावगतेरुपसंहारेचभूहृषलांगलदानस्यप्राधान्यावगतेर्दानत्रयस्यप्राधान्येभूमिदानमा
त्रंप्रदानमितिसिद्धान्तोदयः॥भूमेःपरिमाणमाहखर्वटमिति॥स्तनत्वक्षणंमार्कंडेयपुराणेयोक्तेधन
वधाकारंसर्वतःखातकाहृतं॥योजनार्धार्धविष्कंभंअष्टभागायतंपुरं॥तदर्धेनतदाखेटंतन्मादेनं
खर्वटं॥तथाभृङ्गजनपायासुसमृद्धकृषीवलाः॥क्षेत्रोपभोगभूमध्येवसतिर्ग्राममंज्ञितेति·विष्कंभो
विस्तारः॥निवर्तनमानंस्वयमेववक्ष्यति॥सरेतिःसारदारवस्फलायाप्रज्ञाः॥उपकरणानीषादंडयु
गकाष्ठयोक्त्रकीलकपत्रोदफालादीनि॥काचनहलानांकांचनान्येवोपकरणानि॥हृषानूषन्यक्ष
श्वान्॥तहृणांगोसहस्रदानतुल्यं॥सुवर्णानिःसुवर्णाश्रृंगरूप्यमाभरणांयेषामित्यर्थः॥रोप्येति·रोप्यपा

दायेखुराःतिलकंचयेयामित्यर्थः॰शालायामितिमंडपइतिदानसागरः॥दामोदरस्तुप्रकृतिनिजरूपंमंडप
रूपशालायाःशाखत्वान्पुनःशालाविधानवैयर्थ्यापत्तेःमंडपभिन्नायांशालायामित्यर्थइत्याह॥पर्जन्ये
ति॰पर्जन्यादीनांचमिलितानांदेवतात्वमितिकेचित्॰प्रत्येकमितिदामोदरः॥यस्मादितियस्मैयस्मैकस्मै
चाग्निजेगुरुर्निवेदयतितेनस्वकुंडेहोमःकार्यइत्यर्थः॰होमश्चात्राविंशतिसंख्ययेतिदामोदरः॥अयंचहो
मोलोकेशावाहनानंतरंग्रहादिहोमसमयेकार्यइतिकेचित्॥ततःशब्दश्चवरणानंतरमित्यस्मै॥दाय
त्वंगुरुतन्यलीरूपंप्रधानत्वेनोपस्थितेः॥दानार्थंगुरुपूजनमुक्त्वानदेयोपस्थितेःपुनरधिवासनीया
न्याहआश्वामिति॥आचोपस्कृतउक्तोहेमवाजिदानेधेनुदानस्यचनप्राधान्यंसमंतान्यरिकल्पयेदित्यत्ने
तान्यदानत्वंदृगत्वावगतेः॥मंडपमिति॥श्लोकद्वयरूपमित्यर्थः॥निवर्तनलक्षणमाहसप्तेति॥इदंचप(
रिभाषायांव्याख्यातम्॥अत्रद्विजदंपत्यस्यदानार्थंपूजनीयत्वोक्तेस्तस्मात्ववसर्वदानेष्वग्न्यादीनामधि

वासनं दक्षिणामात्रमिति दामोदरः हेमवाजिदानवधपथे छविभागो यस्मीति श्रुक्तं पद्मपामः ॥ यावंतीनि मासां

पतेः सूर्यस्य दुहिता गौः भूर्वैष्णवी सूर्यसुताश्च गावः इति संवर्तवचनात् ॥ तस्या अंगजाः पुत्रा वृषभाः ॥ ॥ इति

पंचलांगलमहादानविधिः ॥ ॥ अथ प्रयोगः ॥ यजमानो देशकालौ संकीर्त्य ॐ महापातकनाशायश्रीप्रा

पसंहतिक्षयदानवभूमिलांगलमार्गेभुरवभास्सनिदुहितेगजरोमसंख्यवर्षावच्छिन्नशंकरभुवनस्थान

गंधर्वकिन्नरसुरासुरसिद्धसंहाधूतचामरमहाविमानोपगमपूर्वकसंपूज्यत्वपितृपितामहएवंभूत

कामरनायकाम्नीयशंभुभुवनगमनाक्षयेंद्रनानि भूमिभावोऽज्ञवकामः श्वः पंचलांगलमहादानमहं क

निपातयिष्ये इति संकल्प्य मधुपर्केन तुलापुरुषवत् कृत्वा योऽज्ञारोपरिपुष्पाणि विकीर्य तत्र शाके शुद्धचं

दनदेवदारुश्रीपर्णीबिल्वप्रियकांजनानां ॥ अन्यतमकाष्ठघटितानि ईषादंडयुगकाष्ठयोक्त्रफालप्र

तोदाद्युपकरणसहितानि तथा कांचनोपकरणसहितानि पंच कांचनानि हलानि स्थापयेत् ॥ तन्मम

नान्नांबूलव्यजनोपसंधानदीपिकापादुकोपानहासनभोजनपात्रकर्पूरादिसहितां शय्यां धेनुमष्टादशाधा
न्यानि च स्थापयेत् ॥ मण्डपाद्बहिर्गोसहस्रदानोक्तलक्षणान्यौ वर्णश्रृंगान्रौप्यपादान्मुक्तालांगूलान्
षिनानौप्यतिलकान्रक्तवस्त्रभूषितान्दश वृषान्शालान्तरे स्थापयेत् ॥ ततो मण्डपवेदीद्वये वेद्योरुपरि वि
तानेव बध्नीयात् ॥ ततो रात्रौ वनस्पतिहोमान्तरं यस्मै त्वा विजेगुरुराजांप्रयच्छति स स्वकं रावेपर्जन्यादित्य
रुद्रदेवतं पायसं श्रपयित्वा तेन यत्ता शासमिद्भिराज्येन तिलैश्च स्वशाखीय तत्तद्देवताकैर्मन्त्रैरष्टाविंशति
निसंख्यया जुहुयात् ॥ तद्देवत्यमंत्रा अभ्यजयेत् ॥ तेन पर्जन्याय प्रगायत इत्यस्याग्नेयः कुमारः पर्जन्यो गाय
त्र्यानुसामदोमनस्योद्दारदृ्यादित्यगायत्री ॥ कड्डर यथोरः करावारुद्रगायत्री समिद्वमंत्रैः समिन्निला
ज्यानि जुहुयात् ॥ यजुर्वेदेतु शन्नो वात इति पर्जन्यस्य · यज्ञो देवानामित्यादित्यस्य ॥ इमारुद्राय इति रुद्रस्य ·
सामवेदेतु ॥ त्वष्टानो दैव्य इति पर्जन्यस्य ॥ आदित्यैरिंद्र इत्यादित्यस्य · आवोराजानमिति रुद्रस्य ॥ अथर्व

वेदेत्। अभिक्रंदेति पर्जन्यस्य। आदित्येभ्यो मध्विदमित्यादित्यस्य। रुद्रानजलाय इति रुद्रस्य ॥ अथ यजमानो यज
मानाभिषेकानंतरं सपत्नीकं गुरुं हेमसूत्रांगुलीयककौशेयकटककेयूरागादिभूषणैः संपूज्य गृहीत
पुष्पांजलिर्लांगलादीनि त्रिः प्रदक्षिणीकृत्य प्रार्थयेत् ॥ यस्मादेवगणाः सर्वे स्थावराणि चराणि च। धुरंध
रांगे तिष्ठंति तस्माद्भक्तिः शिवेऽस्तु मे। यस्मात्तु भूमिदानस्य कलां नार्हंति षोडशीम् ॥ दानान्यन्यानि मे भक्ति
र्धर्मस्य वर्द्धतो भवेत् ॥ ततः पुष्पाञ्जलिना भूम्येन मध्ये निवेश्यां भूमिं पंचलांगलादीन च संपूज्य गुर्वन्विगत
ज्ञानः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य मां कांचनदारुमयपंचलांगलसोपस्करं दशधुरंधरदक्षयाधेनु
सहितां निवर्तनशतावधिकां भूमिं सोपस्करां विष्णुदैवतां गुरवे नाम गोत्रे समुच्चार्य सपत्नीकाय तुभ्यमहं
संप्रददे इति गुरुहस्ते संकल्पयेत् यदा तु यथेष्टविभागपक्षस्तदा ग्रामादि नागुर्वन्विजः परितोष्य भूमिलां
गलानि च तेभ्यो यथाशक्ति विभज्य दद्यात् ॥ दशधुरंधरधेनुशय्याः गुरवे दद्यात् ॥ ततः कृतस्य सोपस्करणाय

वलांगलसहितभूमिदानस्यप्रतिष्ठार्थमेतान्सुवर्णानग्निदैवतान्पुष्पमयंदक्षिणांसंप्रददेशनिदत्तभूमि
तृतीयांशद्व्यांशमूल्यभूतंसुवर्णंदद्यात्॥ग्रामादीनांवादक्षिणात्वेनदानं॥ततोगुरुःसर्वैर्वाकामस्तुतिं
पठेयुः॥ततोयजमानःउदगप्युद्धावनमावाहितदेवतानामुत्तरपूजांविसर्जनंचकृत्वामण्डपोपकरणा
दिसर्वंगुरवेप्रतिपादयद्यथाशक्तिब्राह्मणान्भोजयेदिति॥मीमांसैकधुरंधरःश्रुतिधरोन्यायेपिवागीश्व
रःसाहित्यामृतसागरःसुजनतावल्लीरसालद्रुमः॥यंविद्वन्मणिशेखरोदिनकरःप्रासूतविश्वेश्वरंते
नाकारिदशार्धलांगलयुतेदानेधियापद्धतिः॥ ॥इतिपंचलांगलमहादानप्रयोगः॥ ॥अथधरान
गदानमात्स्ये॥ ॥अथातःसंप्रवक्ष्यामिधरादानमनुत्तमं॥पापक्षयकरंनृणाममंगलविनाशनं॥का
रयेत्पृथिवींहैमींजम्बूद्वीपानुकारिणीं॥मर्यादापर्वतवतींमध्येमेरुसमन्वितं॥लोकपालाष्टकोपेतांन
ववर्षसमन्वितां॥नदीनदशतोपेतांसप्तसागरवेष्टितां॥महारत्नसमाकीर्णांवसुरुद्रार्कसंयुतां॥

हेम्नः पलसहस्रेण तदर्धेनाथ शक्तितः ॥ शतत्रयेण वा कुर्याद्द्विशतेन शतेन वा ॥ कुर्यान्मन्त्रपलादूर्ध्वमशक्तो पि
वित्तक्षणाः ॥ तुलापुरुषवत्कुर्यात्स्वो केशवाहनं ततः ॥ अविरुद्धमण्डपसंभारभूषणाच्छादनादिकम् ॥ वेयाह्र
आजिने कृत्वा तिलानामुपरिन्यसेत् ॥ तथाष्टादशधान्यानि रसांश्च लवणादिकान् ॥ तथाष्टौ पूर्णकलशान्स
मन्तात्परिकल्पयेत् ॥ वितानकञ्चकोशायं फलानि विविधानि च ॥ तथांशुकानि रम्याणि श्रीखण्डशकलानि
च ॥ इत्येवं रचयित्वा तामधिवासनपूर्वकम् ॥ शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः ॥ प्रदक्षिणां ततः कृ
त्वा गृहीतकुसुमाञ्जलिः ॥ पुण्यकालमथासाद्य मन्त्रानेतानुदीरयेत् ॥ नमस्ते सर्वभूतानां त्वमेव भवनं यतः
धात्री च सर्वभूतानामतः पाहि वसुन्धरे ॥ वसुन्धारयसे यस्माद्वसु चातीव निर्मलम् ॥ वसुन्धरा ततो जाता
तस्मात्पाहि भयादलम् ॥ चतुर्मुखोपि नो गच्छेद्यस्मादन्तं तवाचले ॥ अनन्तायनमस्तस्मात्पाहि संसार
कर्दमात् ॥ त्वमेव लक्ष्मीर्गोविन्दे शिवे गौरीति संस्थिता ॥ गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा ॥ बुद्धि

हृदस्थनोख्याना मेधासु निषु संस्थिना ॥ विश्वं व्याप्य स्थिना यस्मान्ततो विश्वंभरा मता ॥ धृतिः स्थितिः क्षमा क्षो
णी पृथ्वी वसुमती रसा ॥ एनाभिर्मूर्तिभिः पाहि देवि सन्नारसागरान् ॥ एवं सुञ्चार्थनां देवीं ब्राह्मणो भ्यो नि
वेदयेत् ॥ धरार्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ॥ शेषं चैव वाचनाविभ्यः प्रतिपाद्य विसर्जयेत् ॥ अनेन
विधिना यस्तु दद्याद्धेम धरां शुभाम् ॥ पुण्यकाले तु सम्प्राप्ते सम्प्रदंयानिवैष्णवम् ॥ विमानेनार्कवर्णेन किं
ङ्किणीजालमालिना ॥ नारायणपुरं गत्वा कल्पत्रयमसौ वसेत् ॥ पितृपौत्रप्रपौत्रांश्च नारयेदेकविंश
ति इति यत्ननिपठ्यं संश्रुणोति प्रसङ्गादपि कलुषविनाने र्मुक्त देहस्समन्तान् ॥ दिवममरवधूभिर्यानि
संप्रार्थमानः पदममरसहस्रैः सेविनश्चन्द्रमौले ॥ कार्य्यपदिनि ॥ पृथिवी त्रिकोणेति नामोदरः ॥ वर्णेले
ति रूपनारायणः ॥ वन्नुरत्नेनि हेमाद्रिः ॥ समस्तपृथिवीलक्षणस्य जम्बूद्वीपलक्षणस्य वा करणे महाकाल्वा
न्किंञ्चिद्वक्षणाकर्तव्यना प्राप्नोति यममाहमर्यादेति ॥ जम्बूद्वीपस्य मर्यादापर्वताद्रन्मर्थः ॥ तेन च विष्णुपु

रारो॰ जाठरो देवकूटश्च मर्यादापर्वतावुभौ ॥ नौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥ गन्धमादनकैलासौ
पूर्वपश्चायतावुभौ ॥ मेरोः पश्चिमदिग्भागे यथा पूर्वं तथा स्थितौ ॥ निषिधः पारियात्रश्च मर्यादापर्वतावुभौ॰ ॥
त्रिशृङ्गो जारुधिश्चैव उत्तरे पर्वतावुभौ ॥ पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थिताविति ॥ अतः शब्दस्य सन्निहि
तवचनत्वेन जाठरादीनां भजाश्चादिवर्षमध्य एव समुद्रसन्निधौ निर्माणमिति मदनरत्नः ॥ वयं त्वर्णवान्त
र्व्यवस्थिताविति सर्वत्र संबध्यते॰ अतः शब्दो मध्यवाचीनेन पर्वादिदिगंतस्थिन समुद्रमध्ये एव जाठरादीनां
यथाकथंचिन्निर्माणमिति वदामः ॥ मध्ये इति सोपस्कर मेरुगुणामित्यर्थः ॥ उपस्करो विष्णुपुराणे मेरो॰
श्चतुर्दिशं तत्र नवसाहस्रविस्तृतं ॥ इलावृतं महाभाग चत्वारश्चात्र पर्वताः ॥ विष्कंभा रचिता मेरोर्योजनायु
तमुच्छ्रिताः ॥ पूर्वेण मंदरो नाम दक्षिणे गंधमादनः॰ वैभ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः इति ॥ लोके
ति ॥ लोकपालत्वलक्षणगुणकं तत्रमारेउ॰ नवेति॰ वर्षैर्वर्षविच्छेदकपर्वतैश्च समन्वितामित्यर्थः॰ वर्षाणि वर्ष॰

॥ रा·वि ॥
॥ १२४ ॥

विष्कंभपर्वतास्त्रिविस्तृतास्तथा ॥ भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतं ॥ हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्वि
ज ॥ रम्यकं चोत्तरे वर्षं तथैवान्यद्धिरणमयं ॥ उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ मेरोश्चतुर्दिशं तत्र नवसा
हस्रविस्तृतम् ॥ इलावृतं महाभागवर्षमाहुर्मनीषिणः ॥ तथा हिमवान्हेमकूटश्च निषधश्चास्य दक्षिणे ॥
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ माल्यवान्पूर्वतो मेरोः पश्चिमे गंधमादन इति ॥ यत्नुपमो द्वयोर्ने मर्या
दापर्वता इत्युक्तं तत्तुच्छं ॥ वर्षवर्षेन मञ्जनावान ॥ नदीति नद्यो गङ्गाद्याः नदाः शोणादयः स्मृताः ॥ लवणेक्षुसु
रासर्पिर्दधिक्षीरजलमयैः सप्तसमुद्रैः सह द्वर्गत जम्बुप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करैः सप्तद्वीपैर्धृतामित्य
र्थः ॥ महारत्नान्युक्तानि हिरण्यगर्भैः वस्वादित्यानां लक्षणमुक्तं ब्रह्माण्डे ॥ रुद्रलक्षणं पञ्चरात्रे ॥ करेत्रिशू
लिनी लो वामे दक्षिणे चाक्षमालिनः ॥ एकादशा प्रकर्तव्या रुद्रास्त्र्यक्षेन्दुमौलिनः ॥ नेत्रनिर्द्रीनिश्चैव सर्पश्च
तृतीयोऽजएकपात् ॥ मृगव्याधः पिनाकी च दहनोऽथेश्वरश्च वै ॥ अहिर्बुध्न्यश्च भगवान्कपाली चापराजि

॥ राम ॥
॥ १२४ ॥

नः॥ सेनानीश्च महेन्द्रेजा रुद्राश्चैकादशाः स्मृताः॥ पृथिवीनिर्माणप्रकारश्च प्रयोगो वक्ष्यते॥ तिलानामिति
द्रोणपरिमितानामित्यर्थः॥ निवेदयेदिति। अत्र चार्द्धार्द्धविभागपक्षः प्रकृतिशास्त्रश्च विकल्पविधाना
र्थमनूद्यते॥ अन्यथोपदेशिके न चतुर्थांशविभागपक्षेणानिर्देशिकस्यार्द्धार्द्धविभागस्य वाधापत्तेः॥
तथा चतुर्वर्गनिरूढमात्रसंप्रदानत्वपक्षे न तस्य सम्भवः॥ प्रकृतितः प्राप्तत्वात्तथैव विभागपक्षो वा द्रष्टव्यः॥ ॥
इति धरामलदानविधिः॥ ॥ अथ प्रयोगः॥ तत्रादौ धरानिर्माणप्रकारः॥ पलपञ्चकादारभ्य सहस्रप
लपर्यन्तं यथाशक्ति सुवर्णेन वर्तुलं चतुरस्रं वा पत्रं कृत्वा तस्योपान्ते लवणादिसप्तसमुद्रप्लक्षादिसप्तद्वी
पानि हेम्नैश्च नरस्नैर्वा निर्माय तन्मध्ये जम्बूद्वीपं लक्षयोजनं परिकल्प्य तन्मध्यस्थं प्राक्पश्चिमायतं द
क्षिणोत्तरायतं च रेखाद्वयं दशधा विभज्य नाभितोऽष्टभिर्भागैः क्रमेण हेम्नेन तावदुच्चं उपरिभागे मूल
भागद्विगुणविस्तृतं मेरुं परिकल्प्य तत्पूर्वादिदिक्षु नवभिर्भागैरिलावृतं कल्पयित्वा तन्मध्ये मेरुन

॥ रा.वि ॥ श्चतुर्दिक्षु मन्दरगन्धमादनविपुलसुपार्श्वाख्यमेर्ववष्टंभभूतं पर्वतचतुष्टयमिलावृतात्पर्यन्तं कल्प
॥ १२५ ॥ यित्वेलावृतान्नाद्दक्षिणतो भागद्वयेन विस्तृतं पूर्वपश्चिमसमुद्रावधिलंबायमानं निषधं परिकल्पये
त् ॥ ततो निषधाद्दक्षिणतो हरिवर्षरूपम्भागनवकं परित्यज्य तद्दक्षिणतो भागद्वयेन विस्तृतं पूर्वप
श्चिमसमुद्रबद्धप्रान्तद्वयं हेमकूटपर्वतं परिकल्पयेत् ॥ एवं हेमकूटाद्दक्षिणतः किंपुरुषवर्षरूप
म्भागनवकं परित्यज्य तद्दक्षिणतो भागद्वयेन विस्तृतं पूर्वपश्चिमसमुद्रसन्नद्धप्रान्तद्वयं हिमवन्तं प
रिकल्पयेत् ॥ एवं तद्दक्षिणतो भागनवकेन लवणोदपर्यन्तं भारतवर्षं परिकल्प्य समुद्रसन्निधौ स
मुद्रमध्ये वा पूर्वपश्चिमसमुद्रावधिलंबायमानं कैलासपर्वतं तद्दक्षिणतः गन्धमादनञ्च परिकल्प
येत् ॥ एवं मेरोरिलावृतस्य पारेकभागनवकात्तदुत्तरतो भागद्वयेन विस्तृतं पूर्वपश्चिमसमुद्रावधिल ॥ राम ॥
म्बायमानं नीलपर्वतं परिकल्प्य ॥ तदुत्तरतो हिरण्मयवर्षरूपभागनवकं परित्यज्य तदुत्तरतो भागद्व ॥ १२५ ॥

येनविस्तृतं पूर्वपश्चिमसमुद्रावधिलंबायमानं शृंगिराय परिकल्पयेत् ॥ एवं नवउत्तरतो भागनवकेन स
मुद्रपर्यंतम् उत्तरकुरुसंज्ञं वर्षं परिकल्प्य· समुद्रसन्निधौ समुद्रमध्ये वा पूर्वपश्चिमसमुद्रावधिलंबायमा
नं त्रिशृंगं नाम उत्तरतः सथैव जारुधिं परिकल्पयेत् ॥ एवं मेरोरिलावृतसंपादकभागनवकाद्दक्षिणतो भाग
द्वयेन विस्तृतं नीलनिषधावधिलंबायमानं माल्यवंतं परिकल्पयेत् ॥ ततः पूर्वं एकविंशद्विभागे समुद्रप
र्यंतं भद्राश्वं वर्षं परिकल्प्य समुद्रसन्निधौ समुद्रमध्ये वा नीलनिषधावधिलंबायमानं जाठरं परिकल्प्य
तत पूर्वतः सथैव देवकूटं परिकल्पयेत् ॥ एवं मेरोरिलावृतसंपादकभागनवकात् पश्चिमतो भाग
द्वयेन विस्तृतं नीलनिषधावधिलंबायमानं गंधमादनं परिकल्पयेत् ॥ ततः पश्चिमतः एकविंशद्विभा
गेः समुद्रपर्यंतं केतुमालवर्षं परिकल्प्य समुद्रसन्निधौ समुद्रमध्ये वा नीलनिषधावधिलंबायमानं
निषधं परिकल्प्य ततः पश्चिमतः सथैव पारिभद्रं परिकल्पयेत् ॥ ततो यथावकाशं गंगायान घः ज्ञोरणा द

॥दा वि॥ योनदाश्चपरिकल्पनीया इति ॥ ॥यजमानो देशकालौ संकीर्त्य ॐ पापक्षया मंगलविनाशावैष्णवपदग
॥१२६॥ मनार्कवर्ण किङ्किणीजालमालिविमानकरणनारायणोरगमनानंनरकल्पत्रयावच्छिन्नतदधिकैक
विंशतिपितृपौत्रप्रपौत्रनारणकामः श्वोधरणदानमहं प्रतिपादयिष्य इति सङ्कल्प मधुपर्कानन्तुलापु
रुषवत्कृत्वाषोडशारपद्मिष्ठ्यानि विकीर्य तत्र शाग्रीवदूर्ध्वलोमके कृष्णाजिने द्रोणपरिमितांस्तिला॰
न्निधाय तत्रोक्तरूपां मेरोरुपरिधरार्थयद्विकृतनस्तुवर्णनिर्मितलोकपालाष्टकवत्स्वष्टकैकादशरुद्र
प्रतिमायुतां पद्मरागवज्रमौक्तिकमाणिक्यमरकतैरलंकृतां धरां संस्थाप्य तन्मन्त्रादष्टादशधान्यप
ञ्चरसवत्वपूर्णकलशाष्टकनानाविधवस्त्रफलचन्दनखण्डानि च स्थापयेत् ॥ मत्स्यवेदीयदेवेशोरुप ॥राम॥
रिविन्नानेवध्यायेत् ॥ ततोधरांनाममन्त्रेण पूजयेत् ॥ अथसंध्योत्तरेण त्रिकृत्वेपाशतश्च यजमानाभिषे ॥१२६॥
कान्तेकृतेयजमानोगृहीतपुष्पाञ्जलिर्धरां चः प्रदक्षिणीकृत्य प्रार्थयेत् ॥ ॐ नमस्ते सर्वभूतानां त्वमेव

भवनंपनः॥धात्रीचसर्वभूतानांमतःपाहिवसुंधरे॥वसुंधारयसेयस्माद्वसुधानीवनिर्मलं॥वसुधराततो
जातानातनस्मात्पाहिभयाद्दलं॥चतुर्मुखोपिनोगदेयस्माद्दंतंनवाचले॥अनन्तायनमस्तस्मात्पाहिसंसा
रकर्दमात्॥त्वमेवलक्ष्मीर्गोविंदेशिवेगौरीतिसंस्थिता॥गायत्रीब्रह्मणःपार्श्वेज्योत्स्नाचंद्रेरवौप्रभा॥बु
द्धिर्बृहस्पतौख्यातामेधामुनिषुसंस्थिता॥विश्वंव्याप्यस्थितायस्मात्ततोविश्वंभरामता॥धृतिःस्थितिःक्षमा
क्षोणीपृथ्वीवसुमतीरसा॥एताभिर्मूर्त्तिभिःपाहिदेविसंसारसागरात्॥ततःपुष्पांजलिनाधरांगंधधूपै
र्गंधर्वैर्विजभ्यसंपूज्य·नदत्तुज्ञानःकुशादीन्यादायपूर्ववत्फलमुत्सार्यमांसौवर्णींजम्बूद्वीपानुकारिणींमं
र्यादापर्वतवतींमध्येमेरुसमन्वितांलोकपालाष्टकोपेतांनववर्षसमन्वितांनदीनदशतोपेतांसप्तसा
गरवेष्टितांमहारत्नसमाकीर्णांवरुक्षरुशार्कसंयुतांसोपस्कराधरांविष्णुदेवतांसर्वेषांनामगोत्रेसमु
त्सार्यगर्वैर्विप्रेभ्योहंसंप्रददद्दीनसर्वैर्विगृहस्तोपरिस्थितमगुरुहस्तेसंकल्पयेत्॥ततोधरार्धंतत्त्वनु

र्धीशं वा गुरवेर्द्धमंत्रत्रयं वा त्रान्विग्भ्यो वा दद्यात्॥ यदा तु यथोक्तविभागयक्षस्तदाग्रामादिना गुर्वत्विजः यवि
तो यथा नेभ्यो न्यप्यस्व विभज्य यथोक्तं दद्यात्॥ ततः कृतस्य धरादानकर्मणः प्रतिष्ठार्थमेतान्सुवर्णानग्नि
दैवतान्गुर्वत्विग्भ्यो दंसंख्य दद्यात् निधरासुवर्णान्तृतीयांशं द्व्यंशं वा दद्यात्॥ ग्रामादीनां वा दक्षिणात्वेन दा
नम्॥ ततः सर्वकामसक्तनियतेन्तुः ततो यजमानः तु रणा हवा च नमावाहितदेवतानां तु नर पूजां विसर्जनं
च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ ॥मीमांसैकधुरं
धरः श्रुतिधरो नाथोपि वागीश्वरः साहित्यामृतसागरः सुजनमावल्लीरसालद्रुमः॥ ॥यं विवन्महिमाद्भो
रवोदिनकरः प्रासनविश्वेश्वरं तेनाकारि सुवर्णभूमिददनौ सम्प्रीनये पद्धतिः॥ ॥इति सुवर्णधरा
महादानप्रयोगः॥ ॥अथ विश्वचक्रमहादानं॥ ॥मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्त
मम्॥ विश्वचक्रमिति ख्यातं सर्वपापप्रणाशनम्॥ तपनीयस्य शुद्धस्य विभुवादिभु कारयेत्॥ श्रेष्ठं प

लसद्वेणेन दर्भेन तनुमध्यमम् ॥ तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ॥ अन्यद्विंशपला द्दर्द्धमध्य
क्रोपि निवेदयेत् ॥ षोडशारं ततश्चक्रं भ्रमन्नेप्यष्टकाहृतम् ॥ नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुज
म् ॥ शंखचक्रस्य पार्श्वे तु देव्यष्टकसमाहृत ॥ द्वितीयावरणेन दशमूर्त्तयो जलशायिनम् ॥ अत्रिर्भृगु
र्वसिष्ठश्च ब्रह्मा कश्यप एव च ॥ मत्स्यः कूर्मो वराहश्च नरसिंहोथ वामनः ॥ रामो रामश्च रामश्च बुद्धः क
ल्की त्रिविक्रमात् ॥ तृतीयावरणे गौरीमातृभिर्वसुभिर्युता ॥ चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ॥ लोकपालाष्टकं षष्ठे दिग्गजा नागास्तथैव च ॥ सप्तमेस्त्राणि सर्
वाणि मङ्गलानि च कारयेत् ॥ अन्तरान्तरतो देवान्विन्यसेदष्टमे पुनः ॥ तुलापुरुषवच्छेषं समन्तात्परि
कल्पयेत् ॥ ऋत्विग्भ्यगाउपसंभारं भूषणाच्छादनादिकम् ॥ विश्वचक्रं ततः कुर्यात्कृष्णाजिनतिलोपरि
तथाष्टादशधान्यानि रसांश्च लवणादिकान् ॥ पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च ॥ मल्येपुफ

॥शावि॥
॥१२८॥

लरत्नानि वितानं चापि कारयेत् ॥ ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो गृही ॥ सोमाधिवासनां नेतुं गृहीत
कुसुमाञ्जलिः ॥ इमं मन्त्रमुच्चारयेन्मन्त्रवित्त्रिः कृत्वा प्रदक्षिणं ॥ नमो विश्वमयायेति विश्वचक्रात्मने नमः ॥
परमानन्दरूपी त्वं पाहि नः पापकर्दमात् ॥ तेजोमयमिदं यस्मात्सदा पश्यन्ति योगिनः ॥ हृदि त्वां त्रिगु
णातीतं विश्वचक्रं नमाम्यहं ॥ वासुदेवे स्थितं चक्रं चक्रमध्ये तु माधवः ॥ अन्योन्याधाररूपेण प्रणमा
मि स्थिताविह ॥ विश्वचक्रमिदं यस्मात्सर्वपापहरं परं ॥ आयुधं चाधिवासश्च भवाद्य मम मनः ॥ इ
त्यामन्त्र्य नमो स्याद्विश्वचक्रं विमत्सरः ॥ विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥ वैकुण्ठलोकमासा
द्य चतुर्बाहुः सनातनः ॥ सेव्यते प्सरसां संघैस्तिष्ठेत्कल्पशतत्रयं ॥ प्रणम्य सर्वयं कृत्वा विश्वचक्रं दिने
दिने ॥ तस्याग्रे वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥ इति सकलजगत्तु राधिवासं दिनरजनि यस्तपनीय
षोडशारं ॥ हरिभवनमुपागतः स सिंहेष्विरमधिगम्य नमस्यतेऽङ्गिरोभिः ॥ अथ दर्शनमात्रपानिशत्रो

॥राम॥
॥१२८॥

र्मदनसुदर्शनतां च कामिनीनां ॥ स सुदर्शनकेशवानुरूपः कनकसुदर्शनदानदग्धपापः ॥ कनकरज्जुरि
नापि षोडशारं प्रविनरणान्मवराक्तनिर्मुरारेः ॥ अभिभवति भवोद्भवानि भित्वा भवमभितो भवनेभ
यानि भयः ॥ नयनीयस्येति विश्वचक्रमित्यनेनान्वेति ॥ षोडशारमिति चक्राकारे वर्तुलसुवर्णफलकं
समां नरालरेखाष्टकेन षोडशधा विभक्तेयामध्यात् षोडशरेखा भवंतिता आग इत्युच्यंते ॥ नग्धुक्तमित्यर्थः
श्रमदिति ॥ सुवर्णफलकार्धस्त्रमस्वधा विभज्य मध्यां देकैकांशहध्यापीहत्त्वातिकुर्यात् ॥ हृन्नरेखानेमि
सहशन्वान्वेमिशद्वेनोच्यन्ते ॥ तासां सूत्रभ्रमणेन क्रियमाणत्वान्भ्रमदिति विशेषणम् ॥ नाभीति ॥ मध्य
वृत्तमध्येष्टदलं लिखित्वा तत्र हृदेशगतसंपुटाकारपाणिद्वयवामहस्तधृतशंखं दक्षिणहस्तधृतचक्रं
विष्णुं स्थापयेदित्यर्थः ॥ अष्टदलेषु पूर्वादिक्रमेणाष्टव्यष्टकं स्थापयेदित्यर्थः ॥ तत्र यच्चरणौ विमलो
त्कर्षिणी ज्ञाना क्रिया योगा तथैव च ॥ प्रह्वी सत्या तथेशानी देव्योष्टौ परितो हरेः ॥ वरदादक्षहस्तेन वाम

षोभागेषुपूर्वादिशा ईशेधूम्रायुधाः॥ब्रह्माननरूपीरूपाभश्रोदेवःप्रकीर्तिताः॥आयुधंचक्रम्॥द्वितीये
नि॥षोडशभागेषुपूर्वादिशादक्षिणेनषोडशदेवताःस्थापना॥एवंतृतीयावरणादिषुद्रष्टव्यं॥जलशा
यीशेषशायीनरलक्षणयुक्तंवक्ष्यमाणे॥अन्यादीनांलक्षणंपञ्चरात्रे॥जटिलाःश्मश्रुलाःश्यामाःकृशाधा
मनिसंततनाः॥कुण्डिकाक्षकरःकार्याब्रह्मयोद्विभुजाःसदा॥वामनयःशिरःअक्षोक्षमालासाचदक्षि
णाहस्तेजपानुरोधात्॥दशावतारलक्षणानिपंचरात्रे॥वामेशंखंगदाचक्रेद्विभुजोमत्स्यरूपकः॥नरां
घ्रिर्मत्स्यरूपोवामत्स्यरूपीजनार्दनः॥गदाचक्रेअर्थादक्षिणेहस्ते॥उक्तास्त्रपाणिर्द्विभुजोमत्स्येरूप
धृक्॥नरांघ्रिरित्येकःपक्षःसर्वंमत्स्यरूपएवेतिविकल्पार्थः॥कूर्मस्तुकच्छपाकारोमत्स्यरूपोक्तरूप(
वान्॥द्विभुजस्तदस्त्रोनरांघ्रिरल्पस्तुकारणकच्छपाकारइत्यर्थः॥वराहलक्षणंनचैव॥मधुपिङ्गल
वर्णस्तुशंखचक्रगदाब्जधृक्॥नरांगःशूकरास्यश्चवामकूर्परकेधरां॥कटुभीषणमूर्तिश्चवराहो

हरिरुच्यते ॥ कूर्परं दंताग्रं ॥ नरसिंहलक्षणम् ॥ ज्वलदग्निसमाकारं सिंहवक्त्रनराङ्गकम् ॥ दंष्ट्राकरालवदनं ल
लज्जिह्वं सुभीषणम् ॥ हस्तौ सन्नटिलक्षणमाली ऽपीनवक्षसं ॥ अभेघनीक्ष्मान खरमान्मोरुहनघनवं ॥ नखक्षो
दारयन्तं च कराभ्यां नखरैर्भृशं ॥ गदाचक्रधरं हाभ्यां नरसिंहं चतुर्भुजम् ॥ कुर्यादिति शेषः ॥ कुण्डी छत्रधरो
द्विर्वीवामभः परिकीर्त्तितः ॥ कमण्डलुछत्रधर दक्षिणवामहस्तद्वयमित्यर्थः ॥ क्षत्रांतकरणो घोरस्तु वहं
परशुं क्रूरे ॥ जामदग्न्यः स्वकर्त्तव्यो रामो रोषारुणोक्षणः ॥ युवाप्रसन्नवदनः सिंहस्कन्धो महाबलः ॥ आजानु(
बाहुः कर्त्तव्यो रामो बाणधनुर्धरः ॥ मध्यपात्रं च सीरं च वामदक्षिणयोः क्रमात् ॥ गदामुशलवज्रं च हलीरामः
प्रकीर्त्तितः ॥ मुशलरूपं वज्रमित्यर्थः धारयन्निति शेषः ॥ एवं च चतुर्बाहुः वामहस्तयोरुपरि मध्यभागं ॥
श्वधश्च गदा ॥ दक्षिणयोरुपरि हलं अधो मुशलं धारयन् ॥ बलभद्रान्मकोरामः कार्य इत्यर्थः ॥ कषायव(
स्त्रसंवीतः स्कन्धसंसक्तचीवरः ॥ पद्मासनः स्याद्विभुजो ध्यायी बुद्धः प्रकीर्त्तितः ॥ चीवरं वल्कलं पद्मासनं

॥ दा·वि ॥
॥१३०॥

योगासनविशेषः॥ ध्यायी ध्यानशीलः खड्गघातकरः कुष्ठो हस्तारूढो महाबलः॥ खेटोछादकरः कल्की द्विभुजः
परिकीर्त्तितः॥ नृत्ती येनि·मातरो ब्रह्माणी रुद्राणी कौमारी वैष्णवी वाराही इंद्राणी कौशिकी रूपाः॥ अत्र
चामुण्डास्थाने नारायणो नोक्तं॥ नन्दिस्थानम्॥ षोडशसुकोष्ठेषु सप्तदशानां स्थापनासंभवात्॥ गौ
र्यादीनां लक्षणं पञ्चरात्रे॥ गौरीं शंखेन्दुवर्णाभां सर्ववीरनिषेविनां॥ हृष्यपद्मासनासीनां साक्षसूत्र
कमण्डलुं॥ वीणाः पाणिगुणद्वयः॥ हृष्यपरिपद्मासनासीनां गौरीं कारयेदित्यर्थः॥ ब्रह्माणीलक्षणं॥ गौ
रीचतुर्मुखी पीना अक्षमालास्रुवान्विता॥ कुण्डाज्यपाविनी वामे ब्रह्माणी हंससंस्थिता॥ अक्षमालास्रु
वान्वर्था दक्षिणे॥ कुण्डकमण्डलुः गौरी गौरवर्णा· रुद्राणीलक्षणं· त्रिनेत्राश्शूलहस्ता च जटाखण्डेन्दु
मण्डिता· कपालमालिनी शुक्ला रुद्राणी वृषभस्थिता॥ कपालमालारूपहारयुक्तेत्यर्थः कौमारीलक्ष
णम्॥ रक्ताशक्तिधरा देवी रक्तमालाम्बरान्विता॥ शिखिपृष्ठसमारूढा कौमारी स्कन्दरूपिणी॥ वैष्णवील

॥ राम ॥
॥१३०॥

क्षणम् ॥ शंखचक्रधरा वामे गदा हस्ता च तार्क्ष्यगा । रूपगा च चतुर्भुजा देवी वैष्णवी वनमालिनी ॥ गदया पद्मस्याप्यु
पलक्षणं नेत्रार्था दृष्टिगा हस्ते । वाराहीलक्षणम् । कृष्णपीनोदराङ्कुशाभ्रकरा स्यान्नकापिका ॥ सुवस्त्रा या वनो
द्भिन्ना नार्याभरणभूषिता ॥ वाराही महिषस्था च मदिरा दंडधारिणी ॥ खड्गखेटकसंयुक्ता अथवापि चतुर्भु
जा ॥ अथ चेन्द्रव्यपसमुदायः ॥ सम्बन्धयार्थः इन्द्राणीलक्षणम् ॥ सहस्राक्षी गजारूढा हेमाभा वज्रधारिणी ।
इन्द्राणी सर्वसिद्धार्था सर्वाभरणभूषिता ॥ गजऐरावतः सर्वास्त्रधर्था पूर्णमनोरथतया । समन्त्रवदनेत्यर्थः
कौशिकीलक्षणम् ॥ गर्ताक्षी क्षीणदेहा च क्षामकुक्षिभयंकरी ॥ विहृतं स्या च दंष्ट्रोग्रा शवोपरि हि संस्थिता ॥
चतुर्थे शक्तिहादशादिन्यवेदचतुष्टयं लक्षणमुक्तं ॥ ब्रह्माण्डे पञ्चम शक्ति भव्यदा मोदरः पञ्चभ्यनाधिष्ठान्त
देवताः स्थापनीयाः । तत्र प्रक्षणं मात्से । वराहेणोद्धृतं तच्चतुर्थ्यां तु पृथ्वीं सपङ्कजां । वरुणं वासनगतं काञ्च
नं मकरोपरि । हुताशनं मेषगतं वायुं कृष्णमृगासनं ॥ तथाकाशाधिपं कुर्यात्प्रथकस्थं विनायकमित्याह ।

मदनरत्ने स्कायज्ञभूतपदस्य न दधिस्थान् देवतालक्षणं यां मानाभावान्यच्च भूतान्येव स्थापनीयानि ॥ नक्ष
त्रां विघ्नधर्मौन्नरे ॥ शुभ्रवर्णा महीकार्या दिव्याभरणभूषिता ॥ चतुर्भुजा सौम्यवपुश्चं शंभुस ह्यांवरा
त्नपात्रं सस्यपात्रं यात्र मौषधं संयुतं ॥ पद्मं करेव कर्तव्यं भुवो यादवनंदन ॥ न स्पष्ट्यानवनः पूर्वमापः प्र
मक्षतांगनाः ॥ स्त्रीरूपाः शुभ्रवर्णाश्च द्विभुजाश्वेतवाससः ॥ दधानाः पाशकलशौ करयोर्मकरासनाः ॥ अ
सिवायोर्लक्षणं तु लायमुक्तं ॥ नीलोत्पलाभऋगनं नदर्शीव रथारिच ॥ चन्द्रार्कौ हस्तं कर्तव्यौ द्विजं सौम्यवि
ग्रहं ॥ द्विरष्टवर्षाकारं च स्त्रीपुंसव्यंजनान्विनमित्याह ॥ रुद्रलक्षणं धरा पानडक्तं ॥ यष्टधनिःलोकपाला
ष्टकदिङ्मानङ्गाष्टकलक्षणं ब्रह्मा रोउक्तं ॥ सप्तमे स्वारा गीति ॥ खड्गचक्रशक्तिदण्डपाशध्वजगदाभूलरु
पाणि ॥ मर्भवानि दक्षिणावर्तचतुर्भाखकौस्तुभवामरद्धत्र पर्यंकभस्वरूपवैजयंतीहृषगजान्मकानीनिध
मोदरः ॥ पृथ्वीचंद्रस्कखड्गश्लगदाशक्तिकुंतांकुशाधनंषिच ॥ स्वधिधिनश्चौ निद्रास्वाराणि नेभुचायंप्रशस्य

तेषु मनिगारुडोक्तानि शास्त्राणि ॥ दक्षिणावर्तशंखश्च रोचनाचंदनं तथा ॥ मुक्ताफलं हिरण्यञ्च छत्रचामरमेव च
आदर्शश्चेति विज्ञेयं मंगलं मंगलावहम् इति पराशरोक्तानि मङ्गलानीत्याहु॰ नानि चस्तु वर्णमयानीति दामोद
रः ॥ प्रत्यक्षाणीत्यन्ये॰ अनंतरं नरनर्दनीतिष्ठनीयायावरेणोपपि संबध्यते ॥ तथा वहिनीयायावरणागतरेखा षट्
कजनितषोडशांतराले षुपूर्वोक्ताः षोडश देवताः स्थापयेदित्यर्थः ॥ अष्टमइति॰ अष्टमहन्नस्य षोडशकोष्ठे
षु पूर्वोक्तानेव देवान्स्थापयेदित्यर्थः तेचाग्रपहन्नस्थाविस्वादयो नवहिनीयहन्नस्थाश्चाग्याः सप्ततेषांप्रथमो
पस्थितेरितिदामोदररत्नाकरौ हिनीयहन्नस्थाः षोडशेतिगनविवेकमदनरत्नौ ॥ विनायकनवग्रहस्कंदाभि
नीकुमाररत्नागरलक्ष्मी गङ्गाधरयमुनाश्चतिदानसागरः ॥ अनंतरत्नाम्नस्तमावरणास्थाइतिपितवरणाः ॥ द
शादिनिदानेचतुलापुरुषवदष्टश्रवेईमूर्तिविम्भोयथेष्टविभागो वाऽष्टब्धः ॥ ॥ इतिविश्वचक्रमहादा
नविधिः ॥ ॥ अथ प्रयोगः ॥ ॥ यजमानो देशकालौ संकीर्त्य ॐ सर्वपापापहरणाशासर्वयापविमुक्तान्तीय(

विष्णुलोकमहितन्त्ववैकुण्ठलोकप्राप्तनं नरत्वनुवीरुत्सनाननाम्नीयवहुप्सरसः संसेव्यन्त्वं तद्ग्रोकाधिकर
णाककल्पशतन्त्रयावत्स्थितिवत्तुसिद्धकर्तृकाधिगमोत्तरवत्तुशिरःकरणाकहरिभवनोपगमनान्मचिर
नमस्तत्वगाभुकर्तृकाशुदर्शनकर्मत्ववत्कामिनीकर्तृकमदनतुलसुदर्शनकर्मत्वसमुदर्शनकेशवा
नुरूपत्वदधिपापत्वषोडशारत्वविनरणाहेतुकसुरारिप्रवराकृतिस्वकर्तृकवहुगरुडारितो छेदोत्तरभू(
यो भवामितो भवनिमित्तकभवोद्भववत्तुभयानि भवकामः श्रीविश्वचक्रमहादानमहं प्रनिपादयिष्ये
इति सङ्कल्प्य मधुपर्कान्तं तुलापुरुषवत्कृत्वा षोडशारे परिस्थापिते वितीर्य तदुपरि हस्मा जिनं प्रसार्य(
तदुपरि द्रोणमितात्संडुलान्निधाय तदुपरि विंशतिपलाधिकसुवर्णेन कृतं वर्तुलपञ्चस्थापयित्वा न
दर्धमत्र मष्टधा विभज्याष्टौ हस्तानि लिखित्वा दिग्विदिक्षु नन्दनरालेष्वष्टौ सत्त्वाणि दत्वा मध्यहृत्ते व्हदलक
मलं कृत्वा नाभौ विष्णुपूर्वादिदले प्रविमलां उत्कर्षिणीं ज्ञानां क्रियां योगां प्रह्वीं सत्यां ईशानीं हितीयहृत्तस्य

षोडशभागेषु पूर्वादिक्रमेण जलशायिनं अत्रिं भृगुं वसिष्ठं सायां कश्यपं मत्स्यं कूर्मं वराहं नारसिंहं वा
मनं राममरामं बुद्धं कल्किनं ॥ तृतीयहस्तस्य षोडशभागेषु गौरीं ब्रह्माणीं रुद्राणीं कौमारीं वैष्णवीं वारा
हीमिन्द्राणीं कौशिकीं ॥ आपं ध्रुवं सोमं धरं अनिलं अनलं प्रत्यूषं प्रभासम् ॥ चतुर्थहस्तस्य षोडशभागेषु
इन्द्रं विष्णुं भगं त्वष्टारं वरुणं अंशं अर्यमणं रविं पूषणं मित्रं यमं पर्जन्यं ऋग्वेदं सामवेदं अथर्ववेदम्
पञ्चमहस्तस्य षोडशभागेषु पृथिवीं वरुणं हुताशनं वायुं विनायकं निर्ऋतिं सर्पं अजैकपादं मृगव्याधं
पिनाकिनं दहनं ईश्वरं अहिर्बुध्नं कपालिनं अपराजितं सेनान्यं ॥ षष्ठहस्तस्य षोडशभागेषु इन्द्रं अग्निं
यमं निर्ऋतिं वरुणं वायुं सोमं ईशानं ऐरावतं पुण्डरीकं वामनं कुमुदं अंजनं पुष्पदन्तं सार्वभौमं सुप्रती
कं ॥ सप्तमहस्तस्य षोडशभागेषु खड्गं शूलं चक्रं पाशं शक्तिं कुन्तं अंकुशं धनुः स्वधितिं दक्षिणावर्तशंखं रोच
नां चंदनं मुक्ताफलं हिरण्यं अन्नं चामरं आदर्शम् ॥ अष्टमहस्तस्य षोडशभागेषु आद्यहस्तस्यान्त्रवदेवा

न्दिनीयहत्तस्यांश्चसप्तदेवान्स्थापयेत् ॥ विश्वचक्रसमंतात्स्वादशधान्यषड्रसवज्रपसीकुंभाष्ट
कानेकवस्त्रमालेषुफलानिवज्रमौक्तिकमाणिक्यनीलमरकतारवमहारत्नानिस्थापयेत् ॥ ततोम
हावेदीग्रहवेद्योरुपरिविनानेवधीयान् ॥ अथसद्योत्तरंरात्रिक्रमेणानश्चयजमानाभिषेकान्तेक्रमेय
जमानोगृहीतपुष्पांजलिर्विश्वचक्रंत्रिःप्रदक्षिणीकृत्यप्रार्थयेत् ॥ ॐनमोविश्वमयायेनिविश्वचक्रा
त्मनेनमः ॥ परमानंदरूपीत्वंपाहिनःपापकर्दमात् ॥ तेजोमयमिदंयस्मात्सदापश्यन्तियोगिनः ॥ हृ
दित्वांविगुणातीतंविश्वचक्रंनमाम्यहं ॥ वासुदेवेस्थितंचक्रंचक्रमध्येतुमाधवः ॥ अन्योन्याधाररूपे
णाप्रणमामिस्थिताविह ॥ विश्वचक्रमिदंयस्मात्सर्वपापहरंशुभं ॥ आयुधंचाधिवासश्चभवाउद्धर
मामितः ॥ ततःपुष्पांजलिनाविश्वचक्रंगंधाद्यैर्गुर्वर्त्विजश्चसंपूज्यतदनुज्ञातःकुशाद्यैन्यायपद्वव
त्फलतउचार्यइदंविष्णुविमलोकर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानीजलयायान्त्रिभगवद्विष्व

स्यकश्यपमत्स्यकूर्म्मवराहनृसिंहवामनरामरामरामबुद्धकल्किगौरीब्रह्माणीरुद्राणीकौमारीवैष्णवीवा
राहींद्राणीकौशिकापध्रुवसोमधरानिलानलप्रत्यूषप्रभासेंद्रविष्णुभगत्वष्टवरुणांशार्य्यमरविपूषमि
त्रयमपर्जन्यर्ग्वेदयजुःसामवेदाथर्ववेदपृथिवीवरुणहुताशनवायुविनायकनिर्ऋतिसर्पाजैकपाद
मृगव्याधपिनाकिदहनेश्वराहिर्बुध्नकपालस्थराजितसेनानींद्राग्नियमनिर्ऋतिवरुणवायुसोमेशा
नैरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकखड्गध्वजगदाशक्तिकुन्ताङ्कुशधनुः
स्वधितिदक्षिणावर्त्तशंखवरोनाचन्दनमुक्ताफलहिरण्यछत्रचामरदर्शविश्वविमलोत्कर्षिणीज्ञाना
क्रियायोगप्रह्वीसत्येशानीजलशायचित्रिभृगुवशिष्ठब्रह्मकश्यपमत्स्यथनिमाधुनंसोयस्करंविश्वव
कंविष्णुदैवतंसर्वेषांनामगोत्रेसुउच्चार्य्यगुर्वर्न्निवेग्म्योहंसंप्रदद्दशनिगुर्वर्न्निगृहस्थोपरिस्थितगुरुहस्ते
संकल्पयेत्॥ ततोर्घ्यगुरवेर्घंमूर्त्तिगोभ्योदद्यात्॥ यथेष्टविनागपक्षेगुग्रामादिनागुर्वर्न्निजःपरितोष्यते

भ्योनेभ्यश्चविज्ञपस्यान्॥ ततस्तत्समस्तोपस्करविश्वचक्रमहादानस्य प्रतिष्ठार्थमिमान्कवर्णान्नग्निदेव
तानृत्विग्भ्योहं दक्षिणां संप्रददे॥ विश्वचक्रस्वर्णान्नीयांशं दशांशं वा दद्यात्॥ ग्रामादीनां वा दक्षिणा
त्वेन दानं ततः सर्वकामस्कानिं पठेयुः ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्
र्जनं च कृत्वा मण्डपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ मीमंसैकधुरं
धरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजननाथ क्षीरसालद्रुमः॥ यं विद्वन्मशिरोरत्न
रोदिनकरः प्रास्तूत विश्वेश्वरं तेनाकारि स विश्वचक्रददौसम्मीनयेपद्धतिः॥ ॥इति विश्वचक्रमहा
दानप्रयोगः॥ ॥अथ कल्पलतानाममहादानं मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमम्॥ महाक
ल्पलतानाम महापातकनाशनं॥ पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनं॥ आत्विङ्मण्डपसंभारभू
षणाच्छादनादिकं॥ तुलापुरुषवत्कुर्यात् लोकेशावाहनादिकं॥ चामीकरमयीः कुर्यात् दश कल्पलताः शुभा

नानापुष्पफलोपेतानानांभुकविभूषिताः॥ विद्याधरसुवर्णानांमिथुनैरुपशोभिताः॥ हारानादिनभूमिसि
क्तैःफलानिचविहङ्गमैः लोकयालानुसारिरापःकर्तव्यास्तासुदेवताः॥ ब्राह्मीमनंतशक्तिश्चलवर्णस्थापरिस्न
मेत्॥ अधस्ताह्नतयोर्मध्येयमशंखधरेउभे॥ ध्मासनस्थाग्रजगडेपूर्वतःकुलिशायुधा॥ रजन्यजस्थिताञ्चे
याश्ववपाणिरथानले॥ यामेचमहिषारूढागदिनंतंडुलोपरि॥ घृतेननैऋतिंस्थाप्यासखङ्गदक्षिणा
परे॥ वारुणोवारुणीक्षीरेपूपस्थानागशायिनी॥ पताकिनीचवायव्येमृगस्याशर्करोपरि॥ सौम्येनिले
पुसंस्थाप्यांशंखिनीनिधिसंस्थिता॥ माहेश्वरीवृषगतानवनीतेत्रिशूलिनी॥ सौलिन्योवरदासमधुकर्त
व्यावालकान्विताः॥ शङ्खापद्मपताहर्षमासहस्रान्नकल्पयेत्॥ सर्वासामुपरिष्टाच्चपञ्चवर्णवितानकम्
धेनवोदशकुंभाश्ववस्त्रयुग्मानिचैवहि॥ मध्यमेहेतुगुरवेआन्विग्भ्योन्यासत्थैववच॥ ततोमङ्गलशब्देनस्ना
नःभक्तांवरोतुधः॥ त्रिषदक्षिणामाहन्यमंत्रानेतानुदीरयेत्॥ नमोनमःपापविनाशिनीभ्योब्रह्माण्डलोके

॥ रा.वि ॥ ध्वरपालिनीभ्यः॥ आशांसिताधिकफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः॥ इति सकलदिगङ्गनाप्रदा
॥१२५॥ नं भवभयसूदनकारिणः करोति॥ अभिमतफलदेशनाग लोके वसति पितामहवत्सराणि त्रिंशत्॥
पितृशतमथ तारयेत्स वा स्वैर्भवडरितो च विनाशभग्नदेहः॥ सुरपतिवनितासहस्रसंघैः परिवृतमं
बुजसंभवाभिवंद्यः॥ इति विधानमिदं तु दिगङ्गनाकनककल्पलताविनिवेदने॥ पठति यः स्मरतीक्षत
ऽथेक्षते स पदमेति पुरंदरसेवितं॥ नानेति। यद्यप्यत्र लता विशेषाकारी नोक्तास्तथापि यज्ञानीयानि पु
ष्पाणि कर्तव्यानि तदाकाराः स्वलताः कार्या इत्यर्थोत्र सिद्धं॥ तथा च मालतीमाधवीचंपककेसरयूथीकु
न्दजपासेवंतीकतेरवंधूकादिरूपा स्वलता यथेच्छं कार्या इत्यर्थः॥ फलपदेनाभिलषमाणां स्त्रीपुरु
षगजवाजितडुकादिबीजपूरादिफलं वा वाचने॥ मालत्यादीनां फलाभावात्॥ अंशुकानि हेमान्येव तु ॥ राम ॥
पर्णानराकाराः पक्षिमुखाः किन्नरा इति नविहंगमयदेनपौनरुक्त्यं॥ लोकपालानुसारिणो लोकपाला ॥१२५॥

काराः नास्तु अवष्टब्धा इनिशेषा देवताः शक्तयः अष्टदिक्षु निशेषः ब्राह्मीमित्यादि· दिगष्टगनलनानां मध्ये
दक्षिणोगवस्थिनयोः पूर्वपश्चादवस्थिनयोर्वा लनयोर्मध्ये भूमिस्थापिनलनाद्वयसंलग्नलवणस्योप
रिब्राह्मी शक्तीभवनस्याधस्ताच्च ॥ नन्नशक्तिं स्थापयेत् ॥ नेच शक्तीर्यथाक्रमं यमशंखधरेकार्थे· लो
कपालाङ्कुमारिणप इत्युक्तेब्राह्मी हंसवाहना कार्या ॥ एवमग्रेपि· अननेस्यक्षपिवाहनाग्रवणात्तज
हिम्यमिनिरूपनारायणादयः ॥ इमे नि·गुडोपरिलनां स्थापयित्वा तन्मूलावष्टब्धामिन्द्रशक्तिं स्थाप
येत् ॥ गुडलनयोर्द्वयोरप्याधारत्वश्रवणात्· एवमग्रेपि ज्ञेयं· रजन्यां हरिद्रायां स्थितो योऽजभ्रागस्त
त्रस्थिनेत्यर्थः ॥ आनले आग्नेयकोणे दक्षिणपश्चिमेर्नैऋतिकोणे· इयं च नरस्था· तुषामकरः क्षीरे क्षीर
माण्डे सौम्ये उत्तरे सोमशक्तिरिति शेषः माहेश्वरी वायौ दिशायां· मौलिमत्यनिदशापि देया मुकुटभाजो
द्विभुजा वामहस्तेनोक्तशस्त्रधारिणी दक्षिणहस्तेन वरदाः ॥ कपालं कान्यानरस्थिनयालकाः कार्याः लवणा

दिपरिमाणंवशक्नोछयाकल्पादपवत्स्योवेनिडस्वं॥ मघाघनार्थंस्रुवर्णेनैवप्रतिमानिर्माणंनद
नरगतत्वात्॥ दशेति॥ धेत्वादिषुसर्वेषुसंवधानेचकारात्॥ मध्यमेइति॰ अमंवगुर्वन्विङ्॰मात्रसंप्रदा
नत्वपक्षस्यविशेषविधिः॥ तेनयथेष्ठविभागपक्षोभवति॥ ॥शीतकल्पलतामहादानविधिः॥ ॥
अथप्रयोगः॥ यजमानोदेशकालौसंकीर्त्य॰ ॐमहापातकनाशभवभयाभावाभिमतफलदनाकलो
काधिकरणकपितामहर्षिशतवत्सरावछिन्नवासभवाभिवंधत्वकामः श्वः कल्पलतामहादानमहंप्र
नियादयिष्येइतिसङ्कल्पमधुपर्कानंतुलापुरुषवत्कृत्वापोडशारेपरिधव्याप्तिविकीर्यतदुपरिल
वणप्रस्थंनिधायतत्रपञ्चकपूर्वयोदक्षिणोत्तरयोर्वालतात्रयंस्थापयित्वापश्चात्दक्षिणोल्लतान्यतर
मूलावष्टब्धांब्राह्मीशक्तिंलवणोपरिन्यसेत्॥ पूर्वोत्तरलतान्यतरमूलावष्टब्धामनंतशक्तिंलवल
स्याधस्तडङ्ख्याटिनाव्यसेत्॥ ततःपूर्वस्यांगुडप्रस्थोपरिलतांतन्मूलेचैन्द्रींशक्तिंस्थापयेत्॥ ततः

आग्नेयां हरिद्राप्रस्थोपरिलिनांनन्मूले चाग्नेयीं शक्तिं स्थापयेत् ॥ नमो दक्षिणेन तंडुलप्रस्थोपरिलिनान
न्मूले च याम्यां शक्तिं स्थापयेत् ॥ नमो नैर्ऋते घृतप्रस्थोपरिलिनांनन्मूले च नैर्ऋतिं शक्तिं स्थापयेत् ॥ नमः
पश्चिमे क्षीरप्रस्थोपरिलिनांनन्मूले च वारुणीं शक्तिं स्थापयेत् ॥ नमो वायव्ये शर्कराप्रस्थोपरिलिनान
न्मूले च वायवीं शक्तिं स्थापयेत् ॥ नम उत्तरेण तिलप्रस्थोपरिलिनांनन्मूले च सौमीं शक्तिं स्थापयेत् ॥ नम ई
शान्यां नवनीतप्रस्थोपरिलिनांनन्मूले चैशानीं शक्तिं स्थापयेत् ॥ नमः सर्वलतानां समन्तात् हृदयपूर्णाकुम्भा
न्स्थाधेनूर्दशावस्त्रयुगानि च स्थापयेत् ॥ नमो मण्डलदेवीयहवेद्योरुपरि विनानेवध्नीयात् ॥ अथ संध्यो
त्तरेण विक्रमेण प्रानश्च यजमानाभिषेकान्ते कृते यजमानो गृहीतपुष्पाञ्जलिलताः स्त्रियः प्रदक्षिणीक्रम्य
प्रार्थयेत् ॥ ॐ नमो नमः पापविनाशिनीभ्यो ब्रह्माण्डलोकेभ्य पालिनीभ्यः ॥ आशासितार्थफलदाभ्यो
दिग्भ्यस्तथा कल्पलताभ्यः ॥ नमः पुष्पाञ्जलिना कल्पलताः गंधाद्यैर्दैर्निजश्च संपूज्य तदनुज्ञातः कु

ग्रामादीन्यादाय पूर्ववत्फलमुद्दिश्यार्थैनाद्यादिकालशक्तिसौवर्णांश्च निमाषमाः सोपस्कराः सुवर्णनिर्मिताः दश
कल्पलताः सर्वेषां नामगोत्रे समुद्दिश्यार्यगुर्वन्विग्भ्यो हंसं प्रददद्यादिति · सर्वत्रिकहस्तो परिस्थितगुरुहस्ते सङ्कल
येत्॥ ततो मध्यमस्थितलतां द्यगुरवे अवशिष्टाश्चान्विग्भ्यो दद्यात्॥ यथेष्टविभागपक्षे तु ग्रामादिना
गुर्वन्विजः॥ परितोषतेभ्यो नेभ्यश्चविभज्य दद्यात्॥ ततः कृतस्यकल्पलतामहादानकर्मणः प्रतिष्ठार्थमि
मान्सुवर्णानग्निदैवतान्गुर्वन्विग्भ्यो हं दक्षिणां संप्रददे इति शक्तिषतिमासहितदशकल्पलतासुवर्ण
नर्णीयांशं दशांशं वा दद्यात्॥ ग्रामादीनां वा दक्षिणात्वेन दानं॥ ततः सर्वे कामसूक्तं पठेयुः॥ ततो यज
मानः पुराणाह्वानमावाहितदेवतानां तन्त्रस्यजाविसर्जनं च कृत्वा मण्डपोपकरणादि सर्वं गुरवे प्र
तिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपिवागीश्वरः साहित्या
मृतसागरः सुजनतावल्लीरसालद्रुमः॥ पाँवहम्भिराशेखरो दिनकरः श्रासूनविश्वेश्वरं तेनाकारिसु

वर्णकल्पलतिकादानेधियायछतिः॥ ॥इतिकल्पलतामहादानप्रयोगः॥ ॥अथसप्तसागरमहादानं॥ मा
त्स्ये ॥ अथातः संप्रवक्ष्यामिमहादानमनुत्तमम्॥ सप्तसागरकंनामसर्वपापप्रणाशनं॥ पुण्यंदिनम
थासाद्यकृत्वाब्राह्मणवाचनं॥ ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकं॥ तुलापुरुषवत्कुर्याल्लोकेशा
वाहनादिकं॥ कारयेत्सप्तकुण्डानिकाञ्चनानिविचक्षणः॥ प्रादेशमात्राणितथारत्निमात्राणिवापुनः
कुर्यात्सप्तपलादूर्ध्वमासहस्राच्चशक्तितः॥ संस्थाप्यानिचसर्वाणिकृष्णाजिनतिलोपरि॥ प्रथमंपू
रयेत्कुण्डंलवणेनविचक्षणः॥ द्वितीयंपयसातद्वत्तृतीयंसर्पिषातनः॥ चतुर्थंतुगुडेनैवदध्नापञ्चम
मेवच॥ षष्ठंशर्करयातद्वत्सप्तमंतीर्थवारिणा॥ स्थापयेल्लवणस्यान्तर्ब्रह्माणंकाञ्चनंशुभं॥ केशवं
क्षीरमध्येचघृतमध्येमहेश्वरं॥ भास्करंगुडमध्येचदधिमध्येसुराधिपं॥ शर्करायांन्यसेल्लक्ष्मींजलम
ध्येचपार्वतीं॥ सर्वेषुसर्वरत्नानिधान्यानिचसमंततः॥ तुलापुरुषवच्छेषमत्रापिपरिकल्पयेत्

ततोवारुणहोमांतेस्नापितोवेदपुंगवैः॥ त्रिःप्रदक्षिणमाहम्ममंत्रानेनानुदीरयेत्॥ नमोवःसर्वसिंधुनामा
धारेभ्यःसनातनाः॥ जंतूनांप्राणदेभ्यश्चसमुद्रेभ्योनमोनमः॥ क्षीरोदकाज्यदधिमाधवलावणेक्षुसारामृते
नभुवनत्रयजीवसंघान्॥ आनंदयतिवसुभिश्चयतोभवंतस्तस्मान्ममाप्यघविघातमलंविधध्वं॥ यस्मा
त्समस्तभुवनेषुभवंतएवतीर्थामराकरसुरद्रुमणिप्रतानं॥ पापक्षयाध्वरविलेपनभूषणायलोकस्य
विभ्रतितदस्तममापिलक्ष्मीः॥ इतिदत्तानिरसामृतसंयुतान्शुचिरविस्मयवानिहसागरान्॥ अमलकां
चनवर्णमयानसोपदस्कुपैतिहरेरमरान्विना॥ सकलपापविघातविराजितेपितृपितामहपूर्वशतत्रयं
नरकलोकसमाकुलमप्ययंद्रुतिनिसोपिनयेच्छिवमंदिरम्॥ कुण्डानि·याज्ञाणि·अरत्निमात्राणीनिके
वित्॥ रत्निमात्राण्यन्ये·रत्निरंगुष्टपर्वाणिसंख्यायाचैकाविंशतिः॥ दशात्वंगुष्टपर्वाणिप्रादेशःपरिकी
र्तितः॥ सार्धद्वाकुलानिप्रादेशोद्दनिकस्यनरुः॥ अरत्निःसार्धपाविंशमंगुलकः·इदस्त्वमानंवितस्तयो

गांभीर्येणाब्धेः सर्वाण्यपि तोलनेसमानि ॥ चक्रोपरि कृष्णाजिनं न उपरि तिलास्तदुपरि कुंडानीत्यर्थः स्थापनं
दक्षिणोत्तरेण क्रमेण ब्रह्मकेशवमहेश्वरभास्करसुराधिपलक्ष्मीपार्वतीनां लक्षणामुक्तं ब्रह्माण्डे ॥
सर्वरत्नानीति । हिरण्यगर्भोक्तानि विविधानि महारत्नानि । गोमेदं पद्मरागं च वैडूर्यं च प्रवालकं ॥ उपर
त्नानि चत्वारि कथितानि तु नीश्वरैरित्युक्तानुपरत्नानीत्यर्थः ॥ वारुणं होमश्च पूर्णाहुतिः ततः पूर्वं सच्चतुर्षु
कुंडेषु तिलाज्यद्रव्येण द्वाविंशतिसंख्ययेति दामोदरः ॥ दानेदक्षिणेति ॥ दानेचतुलापुरुषवद्दक्षिणा गुरवे
र्द्धमृत्विग्भ्यो यथेष्टविभागो वाऽष्टधा ॥ ॥ इति सप्तसागरमहादानविधिः ॥ ॥ अथ प्रयोगः ॥ यजमा
नो देशकालौ संकीर्त्य ॥ ॐ सर्वपापप्रणाशाय मयार्जितान्यहरिपदागमनसर्वपापविधानविराजितपितृ
पितामहपूर्वकलत्रकर्मकृटिनिशिवपुरनयनकामः श्वः सप्तसागरमहादानमहं प्रतिपादयिष्ये
इति संकल्प्य मधुपर्कान्तं तुलापुरुषवत्कृत्वा षोडशारे परिभ्याणि विकीर्य तत्रशाग्रीवऊर्ध्वलोमकृ

स्माजिनेजेणापरिमितांस्त्रिलान्निधायतत्रैकंकुंडउत्तमपरिमाणंत्रसप्तनिमास्महितंलवणापूरितंदक्षिण
दिशिसंस्थाप्यतउत्तरस्कमेणउग्धघृतयुउदधिशर्करातीर्थजलपूरितानिवसकेशवमहेश्वरभास्करे
उलक्ष्मीपार्वतीप्रतिमासहितानिषट्कुंडानिस्थापयेत्.तेषुवहीरकमौक्तिकपद्मरागनीलमरकतगो
मेदपुष्परागप्रवालाख्यनवमणिरत्नानिस्थाप्यानि॥ततस्समन्तात्दशदशधान्यानिस्थापयेत्॥महावे
दीग्रहवेद्योरुपरिविनानेवधीयात्॥अथसंध्योत्तरंत्रिकृत्यकृतेशानःपूर्णाहुतिनःपूर्वमृत्विग्भि
स्त्रिलाज्यद्रव्येणयथाविंशतिसंख्ययावारुणमंत्रेणहोमःकार्यः सचक्षग्वेदेतत्त्वायामीति. यजुर्वेदसा
मवेदयोः॥इमंमेवरुणेति. अथर्ववेदेयेपश्चाज्जुहूनीति॥ततोयजमानाभिषेकांतेयजमानोगृहीतपु
ष्पांजलिःसप्तसागरानुतिःप्रदक्षिणीकृत्यप्रार्पयेत्॥ॐनमोवःसर्वसिंधूनामाधारेभ्यःसनातनाः॥
जनानांप्राणदेभ्यश्चसमुद्रेभ्योनमोनमः॥ॐक्षीरोदकाज्यदधिमाधवलावरेण्युसारामृतेनतभुवनत्रय

जीवसंघात् ॥ आनंदयंति वसुभिश्च यतो भवन्नस्तस्मान्ममाप्यघविघातनमलं विधध्वं ॥ ॐ यस्मात्क्षमस्तभुव
नेषु भवन्न रत्नतीर्थामरासुरसुरद्रुमणिप्रतानं ॥ पापक्षयाध्वरविलेपनभूषणायलोकस्य विश्रीतेन दस्क
ममापि लक्ष्मीः ॥ ततः पुष्पाञ्जलिना कुण्डानि गंधाद्यैः गुर्वीं द्विजश्च संपूज्य तदनुज्ञातः कुशादीमादाय पूर्व
वत्स्थलमुच्चार्य रत्नान् लवणदुग्धघृतदधिशर्करातीर्थवारिपूरितान् ब्रह्मकेशवमहेश्वरभास्करेंद्रल
क्ष्मीपार्वतीप्रतिमामणिरत्नसहितान्सौवर्णसप्तसागरान् विष्णुदेवतान्सर्वेषां नामगोत्रे समुच्चार्य गुर्वीद्वि
ग्भ्यो हं संप्रददे इति सर्वं हस्तोपरि स्थितं गुरुहस्ते संकल्पयेत् ॥ ततोर्द्धं गुरवेर्द्धं मृत्विग्भ्यो दद्यात् ॥ ग्रामादी
नां वा तान्परितो यथायथं हं विभजेत् ॥ ततः कृतस्य सोपस्करणसप्तसागरमहादानकर्मणः प्रतिष्ठार्थं
मेतान्सुवर्णानग्निदैवतान्सुप्रमप्यं दक्षिणां संप्रददे इति सप्तसागरस्य सुवर्णात्तृतीयांशं दशांशं वा दद्यात् ॥
ग्रामादीनां वा दक्षिणात्वेन यानं ततः सर्वेकामस्तनिं पठेयुः ॥ ततो यजमानः पुण्याहवाचनमावाहितदे

वनानामुत्तरं पूजाविसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान् भोजये-
दिति ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजननावश्रीरसालद्रुमः
यं विद्वन्मणिशेखरो दिनकरः श्रीमान् विश्वेश्वरं तेनाकारि समुद्रसप्तकदसौ सन्नीतये पद्धतिः ॥ ॥ इति
सप्तसागरमहादानप्रयोगः ॥ ॥ अथ रत्नधेनुमहादानं मात्स्ये ॥ अथातः संप्रवक्ष्यामि महादानमनुत्त-
मम् ॥ रत्नधेनुरिति ख्यातं गोलोकफलदं नृणां ॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ॥ लोकेशावा-
हनं कृत्वा ततो धेनुं प्रकल्पयेत् ॥ भूमौ कृष्णाजिनं कृत्वा लवणद्रोणसंयुतं ॥ धेनुं रत्नमयीं कृत्वा संक-
ल्प्य विधिपूर्वकं ॥ स्थापयेत्पद्मरागाणामेकाशीतिं मुखे बुधः ॥ पद्मरागशतं तद्वद् घ्राणां च परिकल्पये-
त् ॥ ललाटे हेमतिलकं मुक्ताफलशतं दृशोः ॥ भ्रूयुगे विद्रुमशतं शुक्ती कर्णद्वयेस्मिन्ने ॥ काञ्चनानि च शृं-
गाणि शिरो वज्रशतात्मकं ॥ ग्रीवायां नेत्रपटकं गोमेदकशतान्वितं ॥ इन्द्रनीलशतं पृष्ठे वैडूर्यशतपा-

र्वकौ ॥ फाटिके रुद्रदंनं ह्यक्षौ गंधिकश्च नान्कटिं ॥ खुरा हेममया कार्याः पुच्छं मुक्तावलीमयं ॥ सूर्यकांतेतु
कांतौ चक्षुषोः कर्पूरचंदनं ॥ कौंकुमानि च रोमाणि नाभिरौप्यां च कारयेत् ॥ गारुत्मतस्थानं न ह्यदपाने परिक
ल्पयेत् ॥ तथान्यानि च रत्नानि स्थापयेत्सर्वसंधिषु ॥ कुर्याच्छर्करया जिह्वां गोमयं च न घन्मकं ॥ गोमूत्रमाज्येन
तथा दधि दुग्धं स्वरूपतः ॥ पुच्छाग्रे चामरं दद्यात्समीपे ताम्रदोहनं ॥ कुंडलानि च हैमानि भूषणानि च शक्ति
तः ॥ कारयेदेवमेवं तच्चतुर्थांशेन वत्सकं ॥ तथा धान्यानि सर्वाणि पादाश्चेक्षुमयास्मृताः ॥ नाना फलानि स
र्वाणि पंचवर्णं वितानकं ॥ एवं विरचनं कृत्वा तद्धोमाधिवासनं ॥ ऋत्विग्भ्यो दक्षिणां दत्वा धेनुमामंत्रये
त्ततः ॥ गुडधेनुवरामंत्र इदं तत्र दा हरेत्ततः ॥ त्वां सर्वदेवगणधामयतः पठंति रुद्रेन्द्रचंद्रकमलासनवा
सुदेवाः ॥ तस्मात्समस्तभुवनत्रयदेवयुक्ते मां पाहि भवसागरपीड्यमानं ॥ आमंत्र्य चेत्थमभितः परिव
त्य भक्त्या दद्याद्द्विजाय गुरवे जलपूर्विकां तां ॥ यः पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति

पदंकुएरेः ॥ इतिसकलविधिज्ञोरत्नधेनुप्रदानंविनरतिसविमानंप्राप्यदेदीप्यमानं ॥ सकलकलुषमुक्तो
बंधुभिःपुत्रपौत्रैः सहमदनसरूपः स्थानमभ्येति शंभो ॥ भूमाविति निवेश्यामित्यर्थः ॥ धेनुमिति संकल्प्य
तिरेखाभिर्धेन्वाकारं परिकल्प्य वक्ष्यमाणरत्नैर्न्यासान विधिना रत्नमयीं धेनुं कृत्वा दद्यादित्यर्थः ॥ वक्ष्य
माणप्रकारेण रत्नानि स्थापयित्वा तत्रैव धेनुरिति संकल्पयेदित्यर्थ इति पितृचरणाः ॥ घ्राणनासि
काग्रं पद्मरागइतिनरूपा घ्राणेत्यर्थः ॥ दृशोरिति द्वित्वसंख्याहि प्रगतत्वेनाविवक्षितत्वात्स्वप्रेकं मुक्ताफलं
भ्रूयुगस्य तु नत्वेनोद्देश्यत्वात्प्रत्येकं विन्तु मद्रानं विद्रुमशब्दो विद्रुमहक्षरवंगडपरः ॥ शुक्तीसमुद्भु
क्तीः शृंगाणीति वहुवचनाच्छ्रोपि सशृंगः कार्यः वज्रं हीरकं नेत्रपट्टेनाच्छादनवस्त्रं इति दामोदरः ॥ गो
मेदकेति वस्त्रविशेषणामिति दामोदरः ॥ इन्द्रनील विशेषणामिति मिश्राः ॥ नत्रोद्वित्वप्रगतत्वात् द्वित्व
मविवक्षितमिति वाच्यं ॥ अनुवादसंभवात् ॥ वैदूर्यइति नेत्रपार्श्वकाविन्यर्थः स्फाटिकैः शर्कलैरित्यर्थः

नवनवनसंख्याकेरित्यर्थः सौगंधिको माणिक्यविशेषः सूर्यकांतकर्पूरौ दक्षिणेपाणे· इंदुकांतेचंदनेवामे·
अन्यानियुक्तातिरिक्तानि मरकतादीनि वकारादुक्तान्यपि संधिषुस्थापनीयानी· संधयः कक्षाजान्वादयः ऊ
रुऊलानीनिवचनं वस्त्रायेक्षया· नूपुराणि ग्रैवेयललाटपट्टिकायंटादिरूपाणि· अग्निसूर्यकांतादेर्भागा
संभवान्न चतुर्थांशग्रहणं ॥ यत्तुएकाशीत्यादिकनुपदिष्टं तत्र किंचिन्न्यूनताकिंचिदधिकतावाज्ञे
या ॥ वस्त्रेदधिदुग्धादिकं नास्तिवाधान् ॥ दक्षिणामित्यर्थः ॥ गुडेति· गुडधेनुदानसममंत्रैरित्यर्थः ॥ नेव
प्रयोगेवक्ष्यते· आमंत्र्योतिएषदक्षिणानंतरमामंत्रणानुलापरूपानिदेशान् ॥ तरवस्तंति· इदंचगुर्वर्त्वि
ङ्मात्रसंप्रदानत्वपक्षस्वगुरुमात्रसंप्रदानत्वविषयं ॥ नेनत्वान्निगादीनामधिवासनदक्षिणामा
त्रं· यदानुपपैतृविभागसंदायामादिनागुर्वर्त्विजःपरिनोषगुर्वर्त्विग्भ्योनेभ्यश्च विभज्यदद्यादिति
॥ ॥ इति रत्नधेनुमहादानविधिः ॥ ॥ अथप्रयोगः ॥ यजमानोदेशकालौसंकीर्त्य ॐ गोलोकप्राप्ति

विमुक्तत्वान्मत्कर्तृकमुरारिपदगमनदेदीप्यमानप्राप्तिपूर्वकसकलकलुषमुक्तवड्वंशुजन्मपौत्रसहि
तमदनसरूपात्मकर्तृकशंभुस्थानाभिगमनकामः श्वेतरत्नधेनुमहादानमहं प्रतिपादयिष्ये इति
संकल्पमधुपर्कानंतरंतुलापुरुषवत्कृत्वाषोडशारेपरिगृह्यपाणिविकीर्यतत्रपात्रीवस्तुध्वेतोमकेकुम्भा
जिनेशेणापरिमितांलवणांनिधायतदुपरिरेखाभिःप्राङ्मुखीश्चांदक्षिणाभागस्थितेपूर्वाभिमुखंव
त्संरचयित्वातदंगेषुवक्ष्यमाणरत्नानिस्थापयेत्॥स्कात्रीतिपद्मरागामुखेपद्मरागधातंनासिकाग्रे
हेमतिलकंललाटे·मुक्ताशानद्वयंचक्षुषोःपंचाशत्पंचाशन्विद्रुमाञ्छृंगे॥समुद्रमुक्तीकर्णयोःकां
चनेशृंगे·हीरकशतंशिरसि·गोमेदशतान्वितनेत्रपदेग्रीवायां·इंद्रनीलशतंपृष्ठे·पंचाशत्संचाशत्
त्कर्णविपत्पार्श्वयोःस्फाटिकखंडशतंमुखे·सौगंधिकशतंनितंवे·पादेष्विक्षुदयडाःरक्तपाःसौवर्णाः
मुक्तावलीपुच्छे·चामरंपुच्छाग्रेसूर्यकान्तकर्पूरौदक्षिणघ्राणे·चन्दनचन्द्रकान्तौवामघ्राणे·रोमस्थाने

कुंकुमकेसरां॰ रजनं नाभ्यां॰ गरुडोद्गारशानं गुदे॰ अन्यान्यप्यनुक्तानि रत्नानि यथाशोभं कर्णादिदेशे स्थाप्यानि॰
जिह्वायां गोमये च शर्करा आज्ये गोमूत्रं॰ दधि दुग्धे शाक्रने एव॰ एवं धेनुं परिकल्प्य तत्सन्निधौ नाम्नदोहनं सौव
र्णानि च कुंडलद्वयं ग्रैवेयक ललाटपट्टिका घंटादीनि शक्त्या स्थाप्यानि॰ ॥ एवं धेनुचतुर्थांशेन वत्सः कार्यः
तथा हि॰ ॥ मुखे विंशति पद्मरागाः नासिकाग्रे पंचविंशति पद्मरागाः ॥ गोर्ललाटे प्यावनासु वर्णेन तिलकं
कृतं तच्चतुर्थांशे वत्सतिलकः ॥ एवमन्येष्वपि सुवर्णभूषणं ॥ पंचविंशति मुक्ताफलैश्च क्ष्णुधी पंचविंश
ति कुरुविन्दै र्भ्रुवौ ॥ समुद्रभुक्तिभ्यां कर्णौ॰ हेमाश्रृंगे॰ पंचविंशति हीरकैः शिरः पंचविंशति गोमेदमन्विने
नेत्रपटेन ग्रीवा॰ पंचविंशतीन्द्रनीलैः पृष्ठं॰ पंचविंशति कुरुविंदैः पार्श्वद्वयं॰ पंचविंशति स्फाटिकखंडै
रुदरं॰ पंचविंशति सौगंधिकैः कटिः कटिनदंसुवर्णेन खुरान् ॥ गोपुच्छमुक्तावली चतुर्थांशेन पुच्छं सूर्य
कान्त कर्पराभ्यां दक्षिणघ्राणं॰ चन्द्रकान्तचंदनाभ्यां वामघ्राणं॰ कुंकुमकेसरेणारोमाणि॰ रजेन नाभिं॰ पं

चविंशतिगारुडैःपायुःरत्नांनरैःकक्षाग्रंगानि॰जिह्वांगोमयेचशर्करया॰मूत्रमाज्येन॰पुच्छंचामरेणकुं
डलद्वयंभूषणानराणिचधेनुचतुर्थांशेन॰इक्षुदंडैःपादान्॥ततोमहावेदीग्रहवेद्योरुपरिविनाने
वधीयात्॥अथसंध्योत्तरंरात्रिकृत्येषानक्षयजमानाभिषेकांतेकृतेयजमानोगृहीतपुष्पाञ्जलिर
त्नधेनुंत्रिःप्रदक्षिणीकृत्यप्रार्थयेत्॥ॐयालक्ष्मीसर्वभूतानांयाचदेवेष्ववस्थिता॥धेनुरूपेणासा
देवीममशांतिंप्रयच्छतु॰देहस्थायाचरुद्राणीशंकरस्यसदाप्रिया॰॥धेनुरूपेणसादेवीममपापंव्य
पोहतु॰विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसोः॥चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाश्रिये॰॥
चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच॰लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे॰स्वधायापितृमुख्या
नांस्वाहायज्ञभुजांचया॰सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छतु॰त्वांसर्वदेवगणधामयतःपठंतिरु
द्रेन्द्रचंद्रकमलासनवासुदेवाः॥तस्मात्समस्तभुवनत्रयदेवयुक्तेमांपाहिदेविभवसागरपीड्यमा

नं ॥ ततः पुष्पांजलिना रत्नधेनुं गंधाद्यैर्गुर्वृत्विजश्च संपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चा
र्यैमामेकाशीतिपद्मरागकृतमुखीं पद्मरागशतकृतघोणां ललाटकृतहेमतिलकां मुक्ताफलशतच
क्षुकृतदृशां विद्रुमशतकृतभ्रूयुगां शुक्तिद्वयकृतकर्णां सुवर्णशृंगीं वज्रशतकृतशिरसं गोमेदशतनि
तनेत्रपटककृतग्रीवां इंद्रनीलशतकृतपृष्ठां वैडूर्यशतकृतपार्श्वां स्फाटिकशतकृतोदरां सौगंधिकश
तकृतकटिं हेमकृतखुरां मुक्तावलीकृतपुच्छां सकर्पूरसूर्यकांतसचन्दनेन्दुकांतकृतघ्राणां कुंकुमकृत
रोमां रूप्यकृतनाभिं गारुत्मतशतकृतपायुं बहुविधरत्नकृतसर्वसंधिं शर्कराकृतजिह्वां गोमयं आ
ज्याकृतगोमूत्रां दुग्धदधियुतां चामरकृतपुच्छाग्रामिक्षुकृतपादां उक्तगोरत्नादिचतुर्थांशकृतवत्स
युतां सोपस्करां रत्नधेनुं विष्णुदैवतां गोत्रो नाम गोत्रे समस्त्वाचार्याय गुरवे हं संप्रददे इति गुरुमाचह से
सर्वरत्नधेनुं दद्यात् ॥ यथेच्छविभागपक्षे तु ग्रामादिना गुर्वृत्विजः परितोष्य तेभ्योऽन्येभ्यश्च विभज्य दद्या

त्॥ ततः कृतस्य रत्नधेनुदानस्य प्रतिष्ठार्थमेतान्सुवर्णानष्टि देवतानां मुख्यं दक्षिणां संप्रददद्रत्न
धेनुर्नीयांश्च स्वदशांशं स्ववामस्य भूतस्य सुवर्णं दक्षिणां दद्यात्॥ ग्रामादीनां वा दक्षिणात्वेन दानं ततः
सर्वे कामस्कृतिं पठेयुः॥ ततो यजमानः पुण्याहवाचनमावाहितदेवतानां मन्त्रैः पूजां विसर्जनं च कृत्वा
मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ मीमांसैकधुरंधरः श्रीनिधे
रेस्यायेपि वागीश्वरः साहित्यामृतसागरः सुजननावद्धीरसालद्रुमः यं विद्वन्मणिशेखरो दिनकरः श्र
स्तेन विश्वेश्वरं तेनाकारि मणीज धेनुददनौ सम्यीनयेपद्धतिः॥ ॥ इति रत्नधेनुमहादानप्रयोगः॥ ॥
अथ महाभूतघटमहादानं मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमम्॥ महाभूतघटं नाम
महापातकनाशनं॥ पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनं॥ ऋत्विङ्मंडपसंभारभूषणाच्छा
दनादिकं॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनादिकं॥ कारयेत्काञ्चनं कुंडं महारत्नोविनं वुधः॥ प्रादेश

दंष्ट्रतृशानं यावत्कुर्यात्प्रमाणतः ॥ क्षीराज्यपूरितं तत्र कलशद्वयसमन्वितं ॥ पद्मासनगतां तत्र ब्रह्मविष्णु
महेश्वरान् ॥ लोकपालान्महेन्द्रांश्च स्ववाहनसमन्वितान् ॥ वराहेणोद्धृतां तत्र कुर्यात्पृथ्वीं सपंकजां ॥ व
रुणं चासनगतं कांचनमकरोपरि ॥ ईशानं मेषगतं वायुं कृत्वा मृगासनं ॥ तथाकाशाधिपं कुर्यान्मू
षकस्थं विनायकं ॥ विन्यसेद्घटमध्ये तान्वेदपंचकसंयुतान् ॥ ऋग्वेदस्याक्षसूत्रं स्यात् यजुर्वेदस्य पंकजम् ।
सामवेदस्य वीणा स्याद्वेणुं दक्षिणे तान्यसेत् ॥ अथर्ववेदस्य पुनः श्रुक्स्रुवौ कमलं करे ॥ पुराणवेदो वरदः
साक्षसूत्रकमंडलुः परितः सर्वधान्यानि चामरासनदर्पणं ॥ पादुकोपानहच्छत्रं भूषणाच्छादनादिकं ॥
दीपिकाभूषणानि वेति क्वचित्पाठः ॥ शय्यां च जलकुंभांश्च पंचवर्णं वितानकं ॥ स्नात्वाधिवासनां तेन मंत्र
मेतमुदीरयेत् ॥ नमो वः सर्वभूतानामाधारेभ्यश्चराचरे ॥ महाभूतादिदेवेभ्यः शांतिरस्त्वशिवं नमः ॥ य
स्मान्न किंचिदप्यस्ति महाभूतैर्विना कृतं ब्रह्मांडे सर्वभूतेषु तस्मात्श्रीरक्षयास्तु मे ॥ इत्युच्चार्य महाभूत

घटं यो विनिवेदयेत् ॥ सर्वपापविनिर्मुक्तः स याति परमां गतिं ॥ विमानेनार्कवर्णेन पितृबंधुसमन्वि
तः ॥ स्तूयमानोमरस्त्रीभिः पदमभ्येति वैष्णवं ॥ षोडशैतानि यः कुर्यान्महादानानि मानवः ॥ न तस्य पुन
रावृत्तिरिह लोकेभिजायते ॥ इति पठति य इत्थं वासुदेवस्य पार्श्वे स सुतपितृकलत्रः संश्रुणोती ह सम्य
क् ॥ पुरिपुभवने वा मंदिरे वा कैतल्लोक्ष्मोश्चिरममरवधूभिर्मोदते सोपि कल्प ॥ कुराडपात्रं नत्त्व वर्तुल
म् ॥ महाभूतघटमिति घटश्चावश्चवर्णात् ॥ महारत्नानुक्तानि हिरण्यगर्भे ॥ अत्र सुवर्णपरिमाणानु
क्तेस्तन्मानमार्थिकं ॥ पात्रस्थो लेफलाधिकामिति दामोदरः ॥ अंगुलमानमिति ॥ इदमानं गांभीर्यं तो
विस्तारतश्च ॥ क्षीरेणेति ॥ क्षीराज्ये समे न तन्तुकश्च कार्यार्थं ॥ यथानददिति आज्यक्षीरवदित्यर्थः ॥ न
थाच कल्पवृक्षोपि मध्ये स्थापनीयघनिकल्पवृक्षलक्षणां पूर्वमुक्तं ॥ पञ्चेति कृतनयन्यासनानिन्य
र्थः ॥ नवघटे ॥ महेन्द्रामिति लोकपालविशेषणां ॥ एतेषां लक्षणां ब्रह्माण्डे उक्तं ॥ वराहेणेत्यादि वराह

रंनाग्रस्थितां मन्त्रीकारांवा महत्स्वस्थितकमलांकर्यादित्यर्थः॥ आसनेति॥ कृतयभासनमित्यर्थः॥ आ
काशाधिपं॥ आकाशाधिष्ठातारं॥ अत्र लोकपालत्वेनशास्त्रानां वरुणाग्निवायुवाहनविधानार्थोयम
नुवादः॥ नेनेन्द्रदयोष्टौ पृथ्वीविनायकौ च घटमध्ये स्थापनीयाविति निरूपनारायणदासोदरादयः॥
वयंतूक्तविधानान्नभिन्नाः पंचपतिमा इति ब्रूमः॥ वेदचतुष्टयलक्षणान्यग्न स्वाहग्न्येदेत्यादिना॥ पु
राणेति॥ पुराणांवेदइतिभाक्तः पुराणेषु वेदत्वाव्दः कुर्मानिति॥ अष्टाविति शेषः॥ विनिवेदयेदिति॥
दानेचतुलापुरुषवदर्घ्यपुरवे अर्घमृत्विग्भ्यो यथेच्छविभागो वाच्यस्तव्यः॥ ॥इतिमणिमूलघटमहादा
नविधिः॥ ॥अथप्रयोगः॥ यजमानो देशकालौ संकीर्त्य ॐ महापातकनाशसर्वपापीवनिर्मुक्तात्मप
रमगतिप्राप्तिपितृवंधुसमन्वितामरवडुस्त्री स्तूयमानात्मकर्तृकार्कवर्णविमानकरणकवैष्णव
पदप्राप्तिकामःश्वोमहाभूतघटमहादानमहंप्रतिपादयिष्येइतिसंकल्प॥ मधुपर्कं तंतुलापुरुष

वन्हकृत्वा योडशारोपरिषुष्पाणि विकीर्य नत्रयपाशक्तिसुवर्णनिर्मित उक्तपरिमाणं वर्तुलं वज्रमौक्तिक
माणिक्यनीलमरकतघटितं समगव्यक्षीराज्यपूरितं पूर्वोक्तसौवर्णकल्पहक्षत्रलविद्रुमहेम्बरस
वाहनलोकपालाष्टकपृथ्वीवरुणवायुकुवानविनायकवेदपंचकप्रतिमायुतं संस्थाप्यतन्मंत्रा
दृशद्दशधान्यचामरपीठादर्शपादुकोपानच्छत्रभूषणाच्छादनदीपिकाशय्याजलपर्णाङ्कंभाष्ठकं च
स्थापयेत् ॥ ततो महावेदीरह्वेवाषोडशपरिवितान्नेव शोभायान् ॥ अथ संध्योत्तरं रात्रिकृत्ये प्रातश्च यज
मानाभिषेकानंतरं कृते यजमानः सोपकरणमहाभूतघटायनम इति सोपकरणमहाभूतघटं संपूज्य
पुष्पांजलिं गृहीत्वा महाभूतघटं त्रिः प्रदक्षिणीकृत्य मंत्रं पठेत् ॥ ॐ नमो वः सर्वभूतानामाधारेभ्यश्चरा
चरेभ्यः महाभूतादिदेवेभ्यः शांतिरस्तु शिवं मम · यस्मात्त्वकिंचिदप्यस्ति महाभूतैर्विनाकृतं ॥ ब्रह्माण्डे सर्व
भूतेषु तस्माच्छ्रीरक्षयास्तु मे ॥ ततः पुष्पाञ्जलिना महाभूतघटं गंधाद्यैः सर्वैर्द्विजश्च संपूज्य तदनुज्ञातः

कुशादीन्यादाय पूर्ववत्फलमुच्चार्य मंडपादेशाधिकपरिमाणमण्डलघटितं गव्यक्षीराज्यपरितं मध्ये स्थि
तकलब्रह्मक्षत्रविष्णुमहेश्वरसवाहनलोकपालाष्टकपृथ्वीवरुणवायुहुताशनविनायकवेदपंचक
प्रतिमायुक्तोपकरणसहितमहाभूतघटं विष्णुदैवतं तऋत्विजान्नामगोत्रे समुच्चार्य तऋत्विग्भ्योहं संप्र
ददइति सर्वहस्तोपरिस्थितऋहस्ते संकल्पयेत् ॥ ततो महाभूतघटमङ्गरवेदऋत्विग्भ्यः प्रतिपादये
त् ॥ यथेष्टविभागपक्षे तु ग्रामादिनां तऋत्विग्भ्यः परितोष्य तेभ्यो न्येभ्यश्च दीनादिभ्यो यथेष्टं विभज्य दद्या
त् ॥ ततः कृतस्य मोपकरणमहाभूतघटमहादानकर्मणः प्रतिष्ठार्थमिमान्सुवर्णानीग्नदेवतान्यु
ष्मभ्यं दक्षिणां संप्रददइति महाभूतघटसुवर्णान्तृतीयांशं दशांशं वा दद्यात् ॥ ग्रामादीनां वा दक्षिणा
त्वेन दानं ॥ ततो ऋत्विजः स्वस्वशाखायां कामसूक्तानि पठेयुः ॥ ततो यजमानः पुराणाद्युवाचमावाहि
तदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मण्डपोपकरणादिसर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मा

राणान्मोजयेदिति॥ मीमांसैकधुरंधरः श्रुतिधरोन्यायेपिवागीश्वरः साहित्यामृतसागरः सुजननावर
क्षीरसालद्रुमः॥ यंविद्वन्मणिशेखरोदिनकरःप्रासूतविश्वेश्वरंतेनाकारिमहादिभूतघटकेदानेक्रि
यापद्धतिः॥ ॥इतिश्रीमत्सकलविद्याविशारदधौरेयमीमांसकवंशावतंसमहनारायणात्मजभट्ट
रामकृष्णसुतभट्टदिनकरतनयगागाभट्टापरनामविश्वेश्वरपण्डितविरचितदानदिनकरोद्योते षोडशमहा
दाननिरूपणंसमाप्तं॥ ॥दिनकरपदयुग्मंमूर्ध्निविन्यस्यभक्त्यागुरुगिरमपिचित्तेविन्नवन्तंविधाय:
मृदुगिरमुपदानेपद्धतिंमूलपूर्वांसकलगुणिजनानां मोदसिद्ध्यैब्रवीमि॥ अथोपदानोपयोगितया
तत्तद्द्रव्याणांदानमंत्रा आदावुच्यंते॥ तेनतत्तन्मंत्रयोगेमंत्रविशेषाउक्तावन्नमोयाग्राह्यः॥ हिरण्यगर्भग
र्भस्थंहेमबीजंविभावसोः॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥ हिरण्यस्य॥ तद्भवोजगत्सु
वैधसोहेमपंकजे॥ जयावासहरेर्नाभिजातमांपाहिसर्वदा॥ सुवर्णकमलस्य॥ जन्मांतरसहस्रेषुय

न्कृतं दुरितं मया। स्वर्णपात्रप्रदानेन नशांनि रक्ष्मसदा मम। ॥ सुवर्णपात्रस्य ॥ हिरण्यगर्भसंभूतं सौवर्णं चांगुली
यकं ॥ धर्मप्रदं प्रयच्छामि श्रीशानुकमलापतिः ॥ अंगुलीयस्य ॥ काचनं हस्तवलयं रूपकांनि सुखप्रदम् ॥ विभूषणं
प्रदास्यामि विभूषयतु मां सदाः ॥ वलयस्य ॥ क्षीरोदमंथने पूर्वं समुत्पन्नं कुण्डलद्वयं ॥ श्रियासह समुद्भूतं ददे श्रीः श्री
पतां मम: ॥ कुण्डलस्य ॥ मालेयं सर्वदेवनां ब्रह्मविष्णुशिवादिभि: ॥ इंद्रादिलोकपालैश्च धृतास्सर्वा मयेरपि ॥ सततं
कंठसंलग्ना धारिता भक्तिपूर्वकम् ॥ ब्राह्मणाय प्रदत्तेयं मम पापं व्यपोहतु ॥ कण्ठमालायाः ॥ कान्तारवनदुर्गेषु
चौरव्यालाकुले पथि ॥ हिंसवनत्वन्तु हिंसंतु यान स्वास्यप्रभावनः ॥ सुवर्णसिंहस्य ॥ मणिकाञ्चनघ्याणि मणि
मुक्तामयानि च। तुलसीपत्रदानस्य कलां नार्हंति षोडशीं ॥ सुवर्णतुलस्याः ॥ नाग्रपर्णपर्णवो मन्नवर्णा ध्वा:क
लवर्णिनाः ॥ मुक्ताः शुक्तिभवाः संतु भक्तिमुक्तिप्रदा मम: ॥ मुक्तानां ॥ यथा सर्वेषु रत्नेषु सर्वे देवा व्यवस्थिताः
तथा शांनिं प्रयच्छंतु रत्नदानेन मे सुराः ॥ रत्नस्य ॥ रत्नयुक्तांगुलीयकदानेतु मंत्रद्वयं पठनीयं ॥ एवमग्रेपि। त्रि

वनेत्रसमुद्भूतंरजनंपितृवल्लभं॥तस्मादस्यप्रदानेनरुद्रःसंप्रीयतांमम।रजतस्य॥अगम्यागमनंचैवप
रदाराभिमर्शनं॥रौप्यपात्रप्रदानेनतानिनश्यंतुमेसदा॥रजतपात्रस्य॥ताम्रंतुष्टिकरंसर्वदोषघ्नंश्रीक
रंशिवं॥सर्वरक्षाकरंनित्यमतःशांतिंप्रयच्छमे॥ताम्रस्य।॥यस्मादायसकार्याणित्वदधीनानिसर्वदा॥
लांगलकुट्टिकादीनिअतःशांतिंप्रयच्छमे॥लोहस्य॥परापवादान्यैश्चान्यादभक्ष्यस्यचभक्षणात्॥तच्चोत्थं
यत्त्वमेपापंताम्रपात्रात्प्रणश्यतु।॥ताम्रपात्रस्य॥यानियानिकाम्यानिकामोत्थानिकृतानिच॥कांस्यपा
त्रप्रदानेनतानिनश्यंतुमेसदा।॥कांस्यपात्रस्य॥कांस्यपात्रंमयादत्तंमातुरानृण्यकांक्षया॥भगवन्वचनात्तुभ्यं
यथाशक्तिस्तथावरं॥दशमासांश्चउदरेजनन्याःसंस्थितस्यतैः।क्लेशितावालभावेनस्तनपानादिजोत्तम॥म
लमूत्रादिसंलेपलिप्तायत्त्वकृतामया॥भवतावचनादस्याममशक्तिर्भवेदृणात्॥कांस्यपात्रंसुवर्णाढ्यं
तिलवस्त्रादिदक्षिणा।सप्तधान्यंमयादत्तंमृणमुक्तिर्भवेन्मम॥सतिलकांस्यपात्रस्य॥यानियान्यने

कानिकामाकामकृतानि च ॥ लोहपात्रप्रदानेन नानि नश्यंतु मे सदा ॥ लोहपात्रस्य ॥ वंशो वंशाकरः श्रेष्ठो वंशो
वंशसमुद्भवः ॥ अनेन वंशदानेन तुष्टो ऋद्धिं करोतु मे ॥ वंशपात्रमिदं पुण्यं वंशजानसमुद्भवं ॥ दानानामुत्त
मं दानमतः शांतिं प्रयछ मे ॥ वंशपात्रस्य ॥ राजपुत्रि महाभागे पुण्यमूर्त्ते निरामये ॥ गृहाणेमानि भूर्पाणि
मया दत्तानि जानकि ॥ भूर्पस्य ॥ कंचुकी वस्त्रयुग्मैश्च तथा कर्णावतंसकैः ॥ कंठसूत्रैश्च भूषाभिः प्रीयतां गुरु
नंदिनी ॥ सौभाग्यद्रव्ययुतभूर्पस्य ॥ कमंडलुजलैः पूर्णाः स्वर्णगर्भैः सुलक्षणाः ॥ अर्पिता सेन महासेन प्रसन्न
स्तेन मे भव ॥ कमंडलोः ॥ वारिपूर्णघटोपेतं देवत्रयमयं यतः ॥ प्रीयतां धर्मराजस्तद्दानेनानेन पूरणदः ॥ उ
दकुंभस्य ॥ अथ प्रतिमानां ॥ त्वया सुराणाममृतं पिधाय हालाहलं संहृतमेव यस्मात् ॥ यथासुराणां त्रिपुरं
च दग्धमेके पुराणलोकाहितार्थमीश ॥ न द्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तः कृगणान्नपश्ये· तथा कुरु त्वं श
रणं प्रपन्ने मयि प्रभो देववरप्रसादं ॥ शिवस्य ॥ प्रसीदतु भवानित्यं कृत्तिवासा महेश्वरः ॥ पार्वत्या सहितो दे

॥ दा·वि ॥
॥ १४९ ॥

वोजगदुत्पत्तिकारकः ॥ उमामहेश्वरस्य ॥ शिवशक्त्यात्मकं यस्माज्जगदेतच्चराचरं ॥ तस्मादनेन सर्वं मे
करोतु भगवान् शिवः ॥ कैलासवासा गौरीशो भगवान् भगनेत्रभित् ॥ चराचरात्मको लिङ्गरूपी दिशतु वां(
छितं ॥ लिङ्गस्य ॥ महादोषनिवासस्त्वं महादेवो महेश्वरः ॥ प्रीयतां नवदानेन अतः शान्तिं प्रयच्छ मे ॥ शि
वनाभस्य ॥ शालग्रामशिला चक्रे भुवनानि चतुर्दश ॥ तस्मादस्य प्रदानेन प्रीयतां हरिरीश्वरः ॥ शालग्रा
मस्य ॥ नारायण जगन्नाथ शंखचक्रगदाधर ॥ सप्तजन्मनि यत्पापं देवि विप्रा कृतं मम ॥ चक्रहस्त गदापा
रोक्ष मयाभ्य जगत्पते ॥ विष्णुमूर्तेः ॥ त्वया जगद्व्याप्तमिदं समस्तं त्वां विष्णुरित्येव वदन्ति सन्तः ॥ त्वत्स्था(
नि सर्वाणि वदन्ति देव त्वया धृतं विश्वमनन्तमूर्ते ॥ तत्त्वत्प्रदानादनघो भवामि यथा जगत्कारणकार(
णेश ॥ तथा कुरु त्वं शरणं प्रपन्ने मयि प्रभो देववर प्रसादं ॥ अयं वामनः ॥ महाकोशनिवासेन चक्राद्यै
रूपशोभितः ॥ अस्य देवस्य दानात्तु मम सन्तु मनोरथाः ॥ चक्रदेवस्य ॥ पद्मासनः पद्मकरो दिवाकरः पद्मद्युतिः सप्त

॥ राम ॥
॥ १४९ ॥

तुरंगवाहः ॥ दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ सूर्यमूर्त्तैः श्वेताम्बरः श्वेतविभूषणा-
श्च श्वेतद्युतिर्द्दंडधरो द्विबाहुः ॥ चन्द्रोमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः ॥ चन्द्रस्य ॥ रक्तां-
बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ॥ धरासुतः शक्तिधरश्च शूली सदासमेस्याद्वरदः प्रशां-
तः ॥ भौमस्य ॥ पीताम्बरः पीनवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ॥ चर्मासिधृक्सोमसुतः सदा मे सिं-
हाधिरूढो वरदो बुधश्च ॥ बुधस्य ॥ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः ॥ दधाति दंडं च क-
मंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं ॥ वृहस्पते ॥ श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः ॥ द-
धाति दंडं च कमंडलुं च जयं च विभ्रद्वरदोस्तु मह्यं ॥ शुक्रस्य ॥ नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रा-
णकरो धनुष्मान् ॥ चतुर्भुजः सूर्यसुतः प्रशांतो वरप्रदो मेस्तु समंदगामी ॥ शनेः ॥ नीलांबरो नीलवपुः कि-
रीटी करालवक्त्रश्च कपालशूली ॥ चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यं ॥ राहोः ॥ धूम्रो द्वि-

वाहुर्वरदोगदाभृत्कृध्रासनस्थोविकृताननश्च॥ किरीटकेयूरविभूषितांगःसदास्तुमेकेतुगणाःप्रशान्तः॥
केतोः॥ देवरूपंमयाविघ्नकारिणंकांचनंप्रभं॥ नकृतागाधदानेनप्रीयतांविश्वरूपधृक्॥ दशावतारगणाश्
मेकंच॥ त्रैलोक्यनाथोजगतामधीशोदेवाधिपोदैत्यगणादिहन्ता॥ श्रेयांसिमह्यंप्रददातुदातुदेवाग्रजोव
ज्रधरःप्रशांतः॥ इन्द्रमूर्त्तेः॥ भृणोमिदेवंमरुतांनथेकंमयिप्रभोदेवकुरुप्रसान्॥ नवप्रसादद्घनाशा
नंमेसुवर्णरूपोस्तुसदामरेशः॥ वायुमूर्त्तेः॥ विनायकगणेशानसर्वलोकनमस्कृत॥ पार्वतीनन्दनम
मपापमाशुविनाशय॥ गणेशमूर्त्तेः॥ सौम्येदेविमहाभागेसर्वदेवनमस्कृते॥ पद्मासनगतेसर्वजगतां
मार्गनिवारिणि॥ स्वरोपघातानमरीयप्रज्ञासाश्रममानुद॥ सरस्वतिमूर्त्तेः॥ सर्वविद्याश्रयंज्ञानकारणंल
लिताक्षरं॥ पुस्तकंसंधदस्यामिश्रीनाभवतुभारती॥ पुस्तकस्य॥ गुरोरवलयापापंस्वाध्यायाध्ययनेकृतं
सरस्वतिजन्मानर्जगर्ज्ञाशापहारिणि॥ साक्षाद्ब्रह्मकलत्वंविदुरुद्रादिभिस्तुता॥ तन्मामाध्ययनोत्थ

त्रैजाग्रं हरवराननेः ॥ घण्टादानेनतुष्टात्वं ब्रह्मारी लोकपावनी ॥ घण्टायाः ॥ इदंनेकांचनंचक्रंरस्मिज्वालास
माकुलं ॥ अपमृत्युविनाशायसंगृहाणाद्विजोत्तम ॥ चक्रस्य ॥ अथधारिणानाम् ॥ कन्यांकनकसंपन्नांकनका
भरणैर्युतां ॥ दास्याविस्मवेतुभ्यंब्रह्मलोकजिगीषया ॥ कन्यायाः ॥ इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता·
सदाकर्मकरीभोग्यायथेष्टंभद्रमस्तुमे ॥ दास्याः ॥ यज्ञसाधनभूतायाविश्वस्याघप्रणाशिनी विश्वरूपध
रोदेवः प्रीयतामनयागवा·गोः ॥ कपिलेसर्वदेवानांपूजनीयासिरोहिणि·तीर्थदेवमयीयस्मादतःशान्तिं
प्रयच्छमे· कपिलायाः ॥ यस्मात्त्वंपृथिवीसर्वाधेनुःकेशवसंभवा। सर्वमृत्युहरानित्यमतःशांकुस्मधेनोः ॥ य
मद्वारेमहाघोरेयासावैतरणीनदी ॥ तांनर्तुंत्वांप्रयच्छामिउत्तारयसुखेनमां ॥ वैतरण्याः ॥ उत्क्रांतेतुप्रवृत्तस्य
सुखोत्क्रान्तिसमृद्धये· ॥ तुभ्यंसंप्रददेसाक्षाज्जान्तसुत्क्रान्तिसंज्ञितां ॥ उत्क्रान्तिधेनोः ॥ धर्मस्त्वंवृषरूपेणजग
दानंदकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतःपाहिसनातन ॥ वृषभस्य ॥ इन्द्रादिलोकपालानांयाराज्यमहिषीस

स·॥महिषीदानमहात्म्याद्दत्तमेसुखवृत्तमं॥महिष्याः॥महिषींवत्ससंयुक्तांसुशीलांचपयस्विनीं॥रक्तवस्त्रेण
पुष्पेणादत्वामृत्युंजयाम्यहं॥मृत्युमहिष्याः॥विष्णुरूलमश्वरूपेणयस्मादमृतसंभवः॥चन्द्रार्कवाहनोनित्यम
तःशां॥अश्वस्य·॥महाशक्तिर्महाकायःपीनांवरसमप्रभः॥सर्वग्रामजजेनाचगजोयच्छतुमेसुखं॥गजस्य·॥
रथायरथनाथायनमस्तेविश्वकर्मिणे॥विश्वनाथाधिवासायभास्करायनमोनमः॥रथस्य॥यस्मात्त्वंछा
गयज्ञानामात्मनत्वेव्यवस्थितः॥यानंविभावसोर्नित्यमतःशां०॥छागस्य॥देवानांयोसुखहव्यवाहनःसर्व
देवता॥तस्यत्वंवाहनंपूज्येदेवैःसेन्द्रैर्महर्षिभिः॥अग्निमाघंपूर्वकर्मविपाकोत्थंतुयन्मम॥तत्सर्वंनाशय
क्षिप्रंरोगानन्यान्विनाशय॥मेषस्य॥वाङ्मनःकायजनितंयत्किञ्चिन्ममदुष्कृतं॥तत्सर्वंविलयंयातुमे(
षित्वद्दानतोमम॥मेष्याः॥अजिनंसर्वदेवत्यंसर्वयज्ञांगमुत्तमं॥तस्मादस्यप्रदानेनममपापंव्यपोहतु·॥
अजिनस्य॥अथवस्त्राणां॥शरणांसर्वलोकानांलज्जायारक्षणंपरं॥सुवेषधारिवस्त्रत्वमतःशां०॥वस्त्रस्य·

रक्तवस्त्रयुगं यस्मा दादित्यस्य प्रियं सदा॥ प्रदानादस्य मे सूर्यः सर्वपापं व्यपोहतु॥ रक्तवस्त्रस्य॥ और्णीयपटमनर्घ्ये
यं स्वर्णवीतं नवप्रभो॥ दत्तं मृडाणी देवेश्या यं संहरस्व ज्वरं॥ दुर्णीयपटस्य॥ दुर्णीमेषसमुत्पन्ना शीतवातनभ
यापहा॥ यस्मात्तुषारहारीस्या दतःशान्तिं प्रयच्छ मे॥ दुर्णीयाः॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं॥ प्रदा
नात्तस्य मे विष्णुरतःशान्तिं प्रयच्छतु॥ पीतवस्त्रस्य॥ धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनं॥ सर्वक्लेशविनाशा
य कृष्णवस्त्रं ददाम्यहं॥ कृष्णवस्त्रस्य॥ ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितं॥ ब्राह्मजन्मास्तु मे देवब्रह्म
सूत्रं समर्पराणत्॥ यज्ञोपवीतस्य॥ सर्वाधिव्याधिविध्वंसः सननं सुखवर्त्तनं॥ दुर्णाशावरास्यास्य दानाद्भ
वतु मे हरे॥ कम्बलस्य॥ अथ गन्धादीनां॥ चन्दनावासमंदारसुखहं दारकार्च्चितं॥ चन्दनं त्वम्प्रदास्ये सांद्रानं
कुपदो भव॥ चन्दनस्य॥ श्रीखण्डागरुकर्पूरकस्तूरीकुंकुमान्वितं॥ विलेपनं षयच्छामि सोरव्यमस्तु सदा मम॥
गन्धस्य॥ समस्ताभ्योपि वस्तुभ्यः संस्कृतासि सुरासुरैः॥ विन्यसांगे सुखदास्तु रवदास्तु सदा मम॥ गन्धस्य॥

॥ दा.वि ॥
॥१५२॥

समस्ताभ्योपि वस्तुभ्यः संस्कृतासि सुरासुरैः ॥ विन्यस्तांगेषु सुखदास्त्वदास्तु सदा मम ॥ कस्तूर्याः ॥ कन्दर्पदर्प
दं यस्मात्कर्पूरं घ्राणतर्पणं ॥ अहर्पतिभवस्तापस्त्वद्ध्यानादपसर्पतु ॥ कर्पूरस्य ॥ कर्पूरः कदलीभूतो देवदे
वप्रियः सदा ॥ भोग्यो नमो नृपाणां च नद्यानात्सुखमस्तु मे ॥ कर्पूरस्य ॥ जटामांसुभवां देवीमेणनाभिसमुद्भ
वां ॥ भक्त्याहं संप्रदास्यामि मम संतु मनोरथाः ॥ यक्षकर्दमस्य ॥ यदंगभंगसंलग्नं कुंकुमादिविलेपनं ॥ ज
लक्रीडासु गोपीनां चारु वक्षोजलार्पितं ॥ गोपीचन्दनमित्युक्तं मुनीन्द्रैः किल्विषापहं ॥ तस्मादस्य प्रदानेन
विष्णुर्दिशतु वांछितं ॥ गोपीचन्दनस्य ॥ ल्हादयंति मनो यस्मात्तस्मात्सुमनसः स्मृताः ॥ दत्ता ददतु मे नित्यम
त्याल्हादं सतीश्रियं ॥ पुष्पाणां ॥ तुलसीपत्रदानाघघास्यनःकायसंभवं ॥ पापं प्रणाशमायातु मम संतु म
नोरथाः ॥ तुलसीपत्रस्य ॥ अयमेव मंत्रः सुवर्णतुलस्या इति क्षेमप्रकाशः ॥ यथा शाखाप्रशाखाभिर्विस्तृता ॥ राम ॥
सि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरा ॥ दूर्वायाः ॥ सुवर्णदूर्वाया अप्ययमेवेति क्षेमप्रकाशः ॥१५२॥

वनस्पतिरसो धूपो गन्धाढ्यः सुमनोहरः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ धूपस्य ॥ आज्यंच वर्त्तिसंयु
क्तं वह्निना योजितं च ननु ॥ दीपं गृहाण देवेश त्रैलोक्य तिमिरापहं ॥ दीपस्य ॥ अन्नमेव यतो लक्ष्मीरन्नमेव
जनार्द्दनः ॥ अन्नं ब्रह्माखिलं त्राणमस्तु मे जन्मजन्मनि ॥ अन्नस्य ॥ चंद्रमण्डलमध्यस्थं चन्द्रांशुदसम
प्रभं ॥ नित्यं दध्यन्नदानेन प्रीयतां वामनो मम ॥ दध्यन्नस्य ॥ दध्यन्नं सोपदंशं च ब्रह्मविष्णुशिवात्मकं
प्रीयतां धर्मराजो मे नद्धानात्मम सर्वदा ॥ सोपदंशदध्यन्नस्य ॥ सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः
नारायणः प्रसन्नस्यात्कृशरान्नप्रदानतः ॥ कृशरान्नस्य ॥ पायसं परमान्नंच सर्वदा तोन्नमोन्नमं ॥ सर्व
देवनयोगं च श्रेयः पुष्टिं प्रयच्छतु ॥ पायसान्नस्य ॥ केशवप्रीतिदा भक्ष्या शंभुब्रह्मार्कतुष्टिदा ॥ पृथ(
विधाधूपकाद्यापकं तु वलमो रसं ॥ भक्ष्याणां ॥ आदित्य तेजसा पक्वं ज्ञातिं श्रेष्ठकरं परं ॥ दत्तं मे मम
विश्वत्वं प्रयच्छ पूपमुत्तमं ॥ अपूपानां ॥ विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः अपूपान्नप्रदानेन म

॥ रा·वि ॥ मपायं च पोऽस्तु ॥ मलमासीयत्रयस्त्रिंशद्रूपाणां ॥ आदित्यतेजसोत्पन्नाः सर्वमङ्गलकारकाः ॥ मंडकाः
॥१५२॥ सर्वपापघ्ना अनःशांतिं प्रयच्छन्तु ॥ मण्डकानां ॥ प्रजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि ॥ तस्मात्सक्तून्प्र
यच्छामि प्रीयतां मे प्रजापतिः ॥ सक्तूनां ॥ धान्यं करोति दातारमिह लोके परत्र च ॥ तस्माद्दीयते धान्यम
नःशांतिं प्रयच्छ मे ॥ धान्यस्य ॥ अन्नं प्रजापतिः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः ॥ तथा चान्नप्रदानेन प्राणिनां
जीवनं सदा ॥ तस्माद्व्रीहिप्रदानेन शांतिरस्तु सदा मम ॥ व्रीहिधान्यस्य ॥ अन्नेन जायते विश्वं प्राणिनां प्रा
णरक्षणं ॥ तंडुला वैश्वदेवत्याः पाकेनान्नं भवंति ये ॥ पावनाः सर्वयज्ञेषु पवित्रास्ता यज्ञकर्मणि ॥ तस्मा
त्तंडुलदानेन प्रीयतां विश्वेदेवताः ॥ तंडुलानां ॥ धान्यराजाश्च मङ्गल्या द्विजप्रीतिकरा यवाः ॥ तस्माद्देषां
प्रदानेन ममास्त्वविकलं फलं ॥ यवानां ॥ यस्माद्दन्नमया जम्बूद्वीपे गोधूमसंभवाः ॥ गन्धर्वसौख्यधन ॥ राम ॥
दाः अनःशांतिं प्रयच्छन्तु ॥ गोधूमानां ॥ अन्नं प्रजापतिः साक्षादन्नमेव जनार्दनः ॥ अन्नाद्भवंति भूतानि ॥१५३॥

जगदन्नेन वर्द्धने ॥ प्रियंगुश्यामाकादिसन्नधान्यस्य ॥ एतेषां प्रजापतिर्देवता ॥ उद्भवीजानि वै यस्मात्प्रि
याणि परमेष्ठिनः ॥ तस्माद्देयां प्रदानेन शांतिसिध्यतु मे सदा ॥ मुद्गानां ॥ यस्मान्मधुवधे काले विष्णुदे
हसमुद्भवाः ॥ पितृप्रीतिकरा माषा अतः शांतिं प्रयच्छतु ॥ माषाणां ॥ पुरा गोवर्द्धनोद्धारसमये हरिभ
क्षिताः ॥ चणकाः सर्वपापघ्ना अतः शांतिं प्रयच्छतु ॥ चणकानां ॥ अग्निवर्णोद्भवा नाम वनलवर्न्की नि
वर्द्धिताः कुलत्थाः सर्वपापघ्ना अतः शां० ॥ कुलत्थानां ॥ तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ॥ ति
लदानेन सर्वं मे पापं नाशय केशव ॥ तिलानां ॥ सोमो देवता ॥ तिलाः स्वर्णसमायुक्ता उरनक्षयकारकाः
विष्णुप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे ॥ सहिरण्यतिलानां ॥ देवदेव जगन्नाथ वांछितार्थफलप्रद ॥
तिलपात्रं प्रदास्यामि तवांगे संस्थितेरिह ॥ तिलपात्रस्य ॥ तिलाश्च सोमदेवत्या गोसवे देवनिर्मिताः
स्वर्गप्रदा स्वनं त्राश्च ते मां रक्षंतु नित्यशः ॥ सहितिलपात्रस्य ॥ तिलाः पुण्याः पवित्राश्च सर्वकर्मकरा

स्मृताः शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तिलपात्रप्रदाने
न तानि नश्यंतु मे सदा॥ आपश्चिन्नार्थ तिलपात्रस्य॥ सगुडं तिलसंयुक्तं ग्रासं प्रीतिकरं नृणां॥ वर्द्धिनं च गृहाणे
मम नः शांतिं०॥ ग्रासस्य॥ प्रतिग्रासमहं दास्ये तुभ्यं संपत्करं शुभं॥ जन्मजन्मनि मे भूयात्संततिर्ग्रासवर्द्धि-
नी॥ प्रतिग्रासस्य॥ कामधेनोः॥ समुद्भूतं देवानाममृतं महद्धविः॥ आयुर्विवर्द्धनं पुंसामाज्यं पातु सदैव मां॥
आज्यस्य॥ अमृतस्य कुलोत्पन्न इक्षुरसद्रसशर्करा॥ सूर्यप्रीतिकरा नित्यम नः शां० शर्करायाः॥ मनोभ-
वस्य हे मध्या उद्भूता शर्करा इति॥ तस्मादस्य प्रदानेन मम संतु मनोरथाः॥ खण्डस्य॥ यथा वेदेषु विश्वात्मा
प्रणवश्च जनार्दनः॥ वासुदेवस्य देवानां महादेवस्य योगिनां॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती तथा॥ तथा
रसानां प्रवरः सदैवेक्षुरसो मतः॥ मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा॥ गुडस्य॥ कामधेनोः समुद्भूतं विष्णोः
प्रीतिकरं परं॥ नवनीतं प्रदास्यामि बलं पुष्टिं च देहि मे॥ नवनीतस्य॥ अलक्ष्मीहरणं नित्यं सुखसौभाग्यव-

र्मनं ॥ क्षीरं मङ्गलमायुष्यमनःशां० ॥ दुग्धस्य ॥ क्षीरजानास्तथा शंखाः क्षीरादमृतसंभवः ॥ क्षीरा क्षीरोदकीकी
र्तिः क्षीरेश्वराणां संभवः ॥ तस्मात्क्षीरप्रदानेन मम संतु मनोरथाः ॥ अथवा ॥ पवित्रं मंगलं चैव कुंदेन्दुधवलं द
धि ॥ सर्वमंगलदं यस्माद नःशां० दध्नस्य ॥ यस्मान्मितृणां श्राद्धेषु प्रियमस्य मनोज्ञवः तस्मान्नवप्रदानेन
रक्ष मां दुःखसागरात् ॥ मधुनः ॥ सौद्रारं सवने दिव्यं पितृणामपि दुर्लभं ॥ तस्मादस्य प्रदानेन मम संतुम
नोरथाः ॥ अथवा ॥ रसानामग्रगं श्रेष्ठं लवणं वलवर्द्धनं ॥ व्रह्मणा निर्मितं साक्षाद नःशां० ॥ लवणस्य ॥ सर्व
देवं प्रियं यस्मात्स्वाकं तृप्तिकरं परं ॥ ददामि सर्वमांगल्यमनःशां० शाकानां ॥ सोमोद्भवानि दारुराजा नवे
दप्रियाणि च· तस्मादेषां प्रदानेन श्रेयं देहि विभावसो ॥ काष्ठानां ॥ जरा न जायते यस्मान्मंडनं शुभकर्मसु·
तस्माज्जीरकदानेन श्रीयतां गिरिजा यतिः ॥ जीरकस्य ॥ कटुत्रयमिदं यस्माद्रोगघ्नं सर्वदेहिनां ॥ तस्मादस्य
प्रदानेन प्रीतो भवतु भास्करः ॥ शुंठमरीचिपिप्पलीनां ॥ लक्ष्मीप्रिया च लक्ष्मीदा लक्ष्मीवतनसनाश्रया ॥ सो

॥ दा॰वि ॥ भाग्यकृद्वरस्त्रीणां हरिद्राश्री प्रदास्तु मे ॥ हरिद्रायाः ॥ तैलं पुष्टिकरं नित्यं आयुष्यं पापनाशनं ॥ अमंगल्यहरं पाप
॥ १५५ ॥ मनःशां० ॥ तैलस्य ॥ या लक्ष्मीर्यन्मे दोरत्वं सर्वगात्रेष्ववस्थितं ॥ तत्सर्वं शमयत्वाज्यं लक्ष्मीपुष्टिविवर्द्धनं ॥ अ
रोग्यार्थं स्याज्यस्य ॥ अथोदकमंत्राः ॥ पानीयं परमं लोके प्राणिनां प्राणरक्षणं ॥ जलशायी जगद्योनिः प्रीयता
मस्य दानतः ॥ जलस्य ॥ ॐ नमः शंकरः शंभुर्भवो धाता शिवो हरः ॥ प्रीयतां मे महादेवो जलकुंभप्रदानतः ॥
जलकुंभस्य ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः ॥ धर्मघ
टस्य ॥ कमंडलुर्जलैः पूर्णः स्वर्णगर्भः सुलक्षणः ॥ अर्पितस्ते महासेन प्रसंन्नस्तेन मे भव ॥ जलकमंड
लोः ॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्याः प्रदानात्पितरस्तृप्यंतु च पितामहाः ॥ प्रपायाः ॥ आपः
पवित्रं लोकानां मम्तुशोने जनार्दनः ॥ मणिकाप्रदानेन प्रीयतां जलशायिकः ॥ मणिकस्य ॥ वापीकूप ॥ एम ॥
दानेन तु जलादानमंत्र एव ॥ उत्सर्गमंत्रः ॥ पूर्त्तीयोनेवक्षने ॥ तांबूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकं ॥ अ ॥ १५५ ॥

स्पप्रदानाच्च साधाः श्रियं प्रयच्छतु पुष्कलां ॥ तांबूलस्य ॥ यथा न छत्रशयनं भूषणं सागरजातया ॥ शय्यामनाथ्य
भूषणास्तु तथा जन्मनि जन्मनि ॥ शय्यायाः ॥ रत्नमुक्तानपात्राणां कुरु केशव मे प्रभो ॥ छत्रं त्वत्प्रीतये दत्तं
त्राणाय नवं शुभं ॥ छत्रस्य ॥ उपानत्सौ प्रयच्छामि कंटकादिनिवारणे ॥ परित्राणाय मे विप्र गृहाणानं तु
रवायच ॥ उपानहोः ॥ अनडुद्वयसंयुक्तं लांगलं कर्षणाक्षमं ॥ सजीवोपस्करं युक्तं ददामि शीयतां हरः ॥ लांग
लस्य ॥ दर्शनेनत्वमादर्शानां मङ्गलदायक ॥ सौख्यसौभाग्यसम्पत्तीर्निर्निर्मलज्ञानदो भव ॥ आदर्शस्य ॥
त्वं देवानां मनुष्याणां राक्षसानामथायुधं ॥ तस्मात्त्वत्प्रदानेन शांतिर्भवतु मे सदा ॥ आयुधानां ॥ भगवन्
शूलहस्तेश दक्षाध्वरविनाशन ॥ तवायुधप्रदानेन शूलं नश्यतु मे सदा ॥ शूलस्य ॥ सर्वग्रहर्क्षनाथेश स
र्वज्ञस्त्वं हि भास्कर ॥ संक्रान्तिशूलदानेन निवारय दिवाकर ॥ संक्रान्तिशूलस्य ॥ देवदेव जगन्नाथ व्यजनं शैत्य
कारकम् ॥ पितॄणां च स्वर्भांनित्यमतः शांतिं प्रयच्छ मे ॥ व्यजनस्य ॥ देवदेव जगन्नाथ विश्वरूपा व्ययान

घ॥ अनेन शिबिकया देव प्रीतो भव जनार्दन॥ शिबिकायाः॥ पुराणस्त्वं सर्वपुराणानां मंगलानां च मंगलम्॥ वि
घ्ननाविघ्नो नित्यमतः शां० शंखस्य॥ सिंदूरं गिरिसंभूतं गौरीसीमंतसंगतं॥ गजास्येन धृतं मूर्ध्नि दानान्मे
स्यादभीप्सितं॥ सिंदूरस्य॥ इदं फलं मया विप्र स्थापितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्म
नि॥ फलस्य॥ ब्रह्महत्यादिपापानां ब्रह्मणा निर्मितं पुरा॥ कूष्मांडं वरुबीजाढ्यमतः शांतिं प्रयच्छ मे॥ कूष्मां
डस्य॥ पूरितं पूगपूगेन नागवल्लीदलान्वितं॥ पूर्णं नवेणुपात्रेण कर्पूरपिष्टकेन च॥ सपूगखंडनं दिव्यं
गंधर्वाप्सरसां प्रियं॥ करंकं त्वं निराणं कं त्वत्प्रदानात्कुरुष्व मां॥ करंकस्य॥ शशांककरसंकाशं हिमडिं
डीन्दुपांडुरं॥ श्रोतसारख्याशुडरितं मनुष्यामरवल्लभ॥ चामरस्य॥ कंटकोच्छिष्टपाषाणवृश्चिकादि
निवारके॥ पादुके संप्रदास्यामि विप्रप्रीत्या प्रगृह्यतां॥ पादुकायाः॥ हिरण्यगर्भः शत्रुघ्नः परमात्माज
गन्मयः॥ रंभादानेन दत्तेन प्रीतो भवतु सर्वदा॥ कदल्याः॥ इक्षुदंडमहापुण्यं रसालं सर्वकामदं॥ तुभ्यं

दास्यामि तेन तुष्टो नो परमेश्वरः ॥ ईश्वरः ॥ इदं गृहं गृहाणत्वं सर्वोपस्करसंयुतं ॥ तव विप्र प्रसादेन ममास्त्व
भिमतं फलं ॥ गृहस्य ॥ पानीयान्नजमस्तेस्मसोमस्तु यस्तु न प्रभो ॥ यद्दानादिकृतं किंचिद्दिव्याक्षयमस्तु मे
॥ ॥ पानीयस्य ॥ ॥ इति श्रीमन्सकलविद्याविशारदधौरेयमीमांसककुलावतंसभट्टनारायणात्मज
महामहत्कुलसुतनभट्टदिनकरतनयगागाभट्टापरनामविश्वेश्वरपरिनिर्मितदानदिनकरोद्योते सकलवस्तुप्र
दानमंत्रनिरूपणं ॥ ॥ अथोपदानानि ॥ तत्र जंबूद्वीपदानं ब्रह्मांडे ॥ शृणु देवि महादानं जम्बूद्वीपाह्वयं तु
तत् ॥ यथाह भगवानव्ययो योनिर्जनार्दनं ॥ पुण्येष्वह्नि पुण्ये नक्षत्रे पुण्यकालेषु सर्वतः ॥ विषुवत्ययनादौ
च ग्रहरोपचन्द्रसूर्ययोः ॥ पानीयाग्नेयवा कुर्याज्जन्मर्क्षे वा विशेषतः ॥ अष्टम्यां पंचदश्यां वा नित्यं वा दानमा
चरेत् ॥ पुण्यदेशेषु सर्वेषु नदीदेवालयादिषु ॥ यत्नेन गृहे वा दानवंश्च श्रद्धावायत्तजायते ॥ विप्रं तु देवविद
यं गुरुं संपूज्य यत्नतः ॥ भूलेपनादि यत्कार्यं सर्वं विधेरा कारयेत् ॥ विलेपयेत्सर्वभूमिं गोमयेन सवा

रिणा॥ नवविंशतिहस्रंतु लेखयेत्परिमंडलं॥ लवणेनोदधिं तत्र परितः परिकल्पयेत्॥ षोडशमात्रं वि
स्तारं द्वष्टशोणेनपार्वति॥ नवाक्षनाभिर्विकिरेत्तन्वेनपुष्पैः समंततः॥ तन्मध्ये कारयेन्मेरुं धान्यभारत्र
येणवै॥ मेरुर्महाव्रीहिमयस्तमध्ये सुवर्णकल्पद्रुमसंयुतःस्यात्॥ पूर्वेणमुक्ताफलवज्रयुक्तो याम्येनगोमे
दजपुष्परागैः॥ पश्चाच्चगारुत्मननीलरत्नैः सौम्येन वैडूर्यसरोजरागैः॥ श्रीखंडखंडैरभितः प्रवालतानान्वि
तः शुक्तिशिलातलः स्यात्॥ शुक्लांवराणां तु धरावलीस्यात्पूर्वेणपीतानि च दक्षिणेन॥ वासांसि पश्चादथ
कर्बुराणि रक्तानि चैवोत्तरतो घनाली॥ तस्यातु मध्ये कमलासनस्थश्चतुर्मुखः कांचननिर्मितांगः॥ चतुर्भु
जाश्चात्र निवेशनीयो दधत्स्रुवं वात्र कमंडलुंच॥ तथाक्षसूत्रं जपसाधनंच कृष्णाजिनं चोपरितश्चविश्र
त्॥ गंगाचतुर्थोपनिनांनिधाय चतुर्दिशं वोदकपूर्णरूपां॥ रौप्यान्महेन्द्रप्रभृतीननपाषो संस्थाप्यलोका
धिपतीन्क्रमेण॥ नानाद्विजौघानिव राजतानि मृगांश्च सर्वत्र निवेशनीयाः॥ पूर्वेणमंदरगिरिर्यवतंडुला

भ्यांभृङ्गांबरेणपरितःपरिवेष्टितोनः॥ ध्वक्षेशकांचनमयेनहयेनगानद्धो येणाहृक्षमृगयक्षियुतोविधेयः
याम्येनगंधमदनोत्रगिरिस्कंकायोंमुजैश्वजम्बुनरुणाद्वहिरश्मयेन॥ हैमेनयक्षपतिनाचविराजमानः
पीतांबरेणपरितःपरिवेष्टितश्च॥ पश्चानिलाचलमथोयरिकर्बुराभंवासःसपिप्पलहिरण्मयहंसयुक्तं॥
आकारयेद्विपुलमत्रसुगंधपुष्पैर्येणाशक्तिघटितैश्चविराजमानं॥ संस्थापयेत्तंविलशैलमथोत्तरेणशैः
लंसुपार्श्वमपिमाषमयंसुवस्त्रं॥ न्यग्रोधवृक्षमपिहेममयंसुधेनुंरौप्यैश्चशक्तिघटितैश्चशुभंविधाय॥ मे
रौश्चपुष्पाभरणंचकार्यंघृतोदकंचश्वेतवर्णांचदिक्षु॥ क्षीराज्यदध्यामधुनासरांसिप्रागादितोयांचयथाक्रमे
ण॥ हिमहेमकूटनिषधाःक्रमश्चयाम्येसौम्येचनीलसितश्रृंगयुताःक्रमेण॥ पादेशमात्रंपरिविस्तृतास्तेप्राग
यताःसुसुपरिवस्त्रयुतास्चसर्वे॥ प्रत्येकमत्रवषट्ट्सर्वेनानांभारेणधान्यपरिमाणयुतांनिसंतः॥ शक्र्या
चरौप्यकृतपक्षियुगाश्चसर्वेसौगंधिपुष्पफलवस्त्रयुगाविधेयः॥ आनीलनिषधायामौमाल्यवज्जम्बुमा

दनौ ॥ तेषांमध्यगतोमेरुःस्तोवधात्रविनिर्म्मितो ॥ निषधःपारियात्रश्चमर्य्यादापर्वताविभो ॥ मेरोःपश्चि
मभागेनयथानीगन्धमादनौ ॥ गन्धमादनशैलोसौपूर्वपश्चाद्यथाविभो ॥ श्वेतनन्दुलनिर्माणोदक्षिणो॰
त्तरतःस्थितौ ॥ सितानःप्रमुखाःसर्वेदक्षिणेककुभादयः ॥ शंखकूटादयश्चैवउत्तरेपरिकीर्त्तिताः ॥ ताम्री
केयारशैलांश्चकृत्वाधात्रालयान्शुभान् ॥ वसेत्रएवेष्यशैलाईमेरुमन्तांश्चवेष्टयेत् ॥ दक्षिणांभारतंव
र्षंतन्किंपुरुषसंह्वनं ॥ हरिवर्षनतःप्रोक्तंमेरोर्दक्षिणतस्तनः ॥ इलाह्वतंह्वतंमेरोश्चतुर्थोह्वषभस्तथा ॥ र
म्यांहिरण्मयंतस्मात्कुरवश्चेतिचोत्तरा ॥ भद्राश्वकेतुमालश्चपूर्वपश्चिमतःस्थितौ ॥ प्रोक्तानितववर्षा
णिजंबूद्वीपेनुमानतः ॥ हिमाद्रिमध्येदेवेशंश्रियंत्वीविनिवेशयेत् ॥ प्रसादाभिमुखावेनौकांचनेनविनि
र्म्मितो ॥ शंखचक्रगदापाणिपीनावाससमच्युतं ॥ किरीटकेयूरधरंश्रीवत्सांकितवक्षसं ॥ पद्मासनेसमा
सीनांपद्महस्तांसुलोचनां ॥ प्रसन्नवदनांदेवीन्तस्यदक्षिणतोन्यसेत् ॥ कैलाशमध्यगतोमान्त्वंचैवविनिवे

शयेत्॥ मां च शंकरनामानं त्वं च गौरीश्वरानने॥ चतुर्भुजं वृषस्थं च जटिलं चंद्रमौलिनं॥ खट्वाङ्गशूलवर
दाभयहस्तं च मां न्यसेत्॥ चतुर्भुजं गजानना च वरदपरोन्दीवरान्वितं॥ भद्राश्वं च भगवंतं हयरूपमुखं हरिं
सौवर्णं स्थापयेत्तद्वद्भारते कूर्मरूपिणं॥ वाराहं केतुमाले च मत्स्यं कुरुषु चोत्तरे॥ सौवर्णानथ वा रौप्या
न्स्थापयेत्तु यथाक्रमं॥ सर्वेषां घाहुयं दीपं कृत्वा चैव यथाविधिः॥ अर्घ्यपाद्यासनं स्नानं अयंत्रस्थापनं
क्रमात्॥ ब्रह्मादयस्तथा देवाः शैलाः कलाकुमास्तथा॥ स्वनाममंत्रैः पूजार्हान् नमस्कारान् दीपितैः॥ गंधपुष्प
नमस्कारधूपदीपफलैस्तथा॥ नयोपहरणाद्यैश्च पूजयित्वा प्रयत्नतः॥ भद्राश्ववर्षे होमं तु सर्पिषा च
समाचरेत्॥ स्वनाममंत्रैर्होमं च स्वाहाकारसमायुतैः॥ दशोत्तरशतं हुत्वा ब्राह्मणो मेरवेन तथा॥ इतरे
षां च सर्वेषां मष्टोत्तरशताहुती॥ स्नानार्थं यजमानस्य पुरतः कलशं न्यसेत्॥ आपूर्णोदकपूर्णं च सुगंधं
वस्त्रवेष्टितं॥ गंधांसुमनसस्सत्रकुशायाद्वि निवेशयेत्॥ यामश्चैव विधास्यंति नाभ्याचावाहयेत्ततः॥

गङ्गाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ इत्यावाह्य ततस्त
स्य कलशं विमलोदकं ॥ अभ्यर्च्य गंधपुष्पाद्यैः स्नापयेन्नीतिपूर्वकं ॥ स्नापयेत्प्राङ्मुखं तत्र दातारं कलशो
दकैः ॥ ऋग्भिर्वरुणदेवीभिः पावमानीभिरेव च ॥ दानकाले च संप्राप्ते दाता नारी नरोऽथवा ॥ स्नापितो गुरु
णा तेन सार्द्धं दानं समाचरेत् ॥ त्रिः प्रदक्षिणमाहृत्य गृहीतकुसुमाञ्जलिः ॥ प्रत्येकं पर्वतान्सर्वान्प्रणि
पातपुरःसरं ॥ मध्यमं तु रवे इत्यादि मंत्रमुदीरयेत् ॥ अनन्तस्येवाप्रदानव्रतस्यात्तु ज्ञानभूरादिसम
स्तलोकास्त्वयि स्थिता भूधरनायनित्यं ॥ अमी सुरान्ये सुरलोकनाथ ब्रह्मादयो देवगणाश्च नित्यं ॥ त्व
त्संप्रदानादहमप्यशेषैः पापैर्विमुक्तस्तु यथा भवेयं ॥ श्रेयस्तथा पर्वतराजमस्यं कुरु प्रभो देववरैश्च
सार्द्धं ॥ इतीदमुच्चार्य ददेत्तु मेरुं सकाञ्चनं राजतवृक्षयुक्तं ॥ प्रत्येकमेव द्विजपुङ्गवानां प्रागादिदद्या
दितराण्क्रमेण ॥ सुरासुराणामभितार्थहेतोस्त्वया कृतं मंदरशैलसार्थं ॥ तथा च मां रक्ष नसर्वतस्त्वं

नवंप्रणनाद्विरजो यथाहं ॥ गंधाहिमालानद्द्गिरिन्भूधरेन्द्रवेदेनवापि गरुडायनमोस्तुतुभ्यम् ॥ त्व
त्संस्तवानहं न पापसमस्तदोषघ्नायाधिशैलवरं रक्षचमामजस्रं ॥ देवालयायविपुलायनमोवलायहंसाय
वेदहर्षायनमोच्युताय ॥ पुष्पस्रवाननिहिताखिलयायराशिं हंसेनसार्धममराचलयाहिमान्तं ॥ वंदेस्तु
पार्श्वममराचलमप्रमेयं श्वेतं नुवदेवसुरसिंधुगणानोस्मिनित्यं ॥ त्वद्दानभक्तिसुनसन्क्रियया कृमप्रन्वा
मेवयामिशरणार्थमवेहमान्तं ॥ श्रीवत्सवक्षसमनादिमजंसमस्तंलोकाधियं सकलकारणमच्युतं
च ॥ नारायणं शरणमेमि धराधरेन्द्रेः सार्धं श्रियाहिमवति स्थितमादिमीडे ॥ देवायदेवगणपूजि
तयाद्दपमप्रमेयाय भक्तजनदुःखविनाशनाय ॥ कैलाशशैलनिलयायभवाय नित्यं गौरीप्रियाय वर
दायनमः शिवाय ॥ त्वंकिं त्वमादिनिधनः शरणागतं मां भवाध्वनाम नियतो हरिरस्तु तोसौ ॥ आस्ते त्वया
ननपुनः सनकादियोगिवृन्दैरभिष्टुतगुणानन कीर्तियुक्तः ॥ मध्ये महार्णवहिमाचलयोनिषस्तकुर्माङ्क

निशारणमेमिभवाभवाय ॥ पारावरंमथितुमद्रिमिहादधानियस्तंनमामिसुरपूजितमप्रमेयं ॥ वारा
हरूपिणमनंतमनंतकेतुलोकस्वरूपिणमनेकधिरोर्द्दक्षिपादं ॥ वन्देमहीधरममेयमपारकीर्त्तियस्ते
शामेमिशरणंहरिमीशितारं ॥ देवस्तथोन्नरकस्त्वपिनित्यमासेमत्स्यःसुरेंद्रगणपूजितपादपद्मः ॥
रक्षत्वशेषजगतांपतिरच्युतोसोसंसारदुःखचलितंशरणागतंमां ॥ उक्त्वैवमन्नमघनाशनदानमंत्रं
प्येकमेकंद्विजपुंगवानां ॥ भुक्त्वाशुभानिमनसेप्सितानियानिवासोगच्छेद्यथान्ननिवर्तयनीयमर्त्यः ॥ गुर
वेदक्षिणांदद्यात्सुवर्णंनववाससी ॥ यागोपकरणंसर्वंगुरवेविनिवेदयत् ॥ इत्याहभगवान्श्रीनःपार्व
त्याःपरमेश्वरः ॥ अहमप्यब्रवंसर्वंयुष्माकंमुनिसत्तमाः ॥ अथसप्तद्वीपदानंब्रह्मांडे ॥ शृणुदेवमुने
दानंसप्तद्वीपाह्वयंजयन् ॥ यत्कृत्वापृथिवीदानेफलंसर्वमुपाश्नुते ॥ पुण्यकालेषुसर्वेषुचंद्रसूर्यग्रहा
दिषु ॥ देवागारादिदेशेषुपुण्येष्वायतनेषुच ॥ विधिंगुरुंवेदविदंचदक्षंविप्रापदंहृगुयान्नचपूर्वंसत्

कार्यंचैववनदंगकार्यं ॥ ज्ञानेदानंतुयज्ञानेनसर्वसमांभूमिंलेपयेद्गोमयेनवारिणाशुचिनत्त्रापिमध्येह
त्वाद्वीपंजंबुसंज्ञंयदन्यत्तत्रवाह्येप्लक्षनामानियत्नं ॥ जम्बुप्लक्षाह्वयौद्वीपौशाल्मलश्चतथापरः ॥ कुशःक्रौं
ञ्चस्तथाशाकःपुष्करश्चैवसप्तमः ॥ एतेद्वीपाःसमुद्रैस्तुसप्तसप्तभिरावृताः ॥ लवणेक्षुसुरासर्पिर्दधिदुग्ध
जलैःसमन्तानांएतेषांमध्यमस्मृतः ॥ तस्यापिमेरुर्देववर्षेमध्येकनकपर्वतः ॥ प्लक्षद्वीपस्यविस्तारःषोड
शागुलद्वयमते ॥ पादाधिकस्तथान्येषामुत्तरोत्तरमुच्यते ॥ षोडशाङ्गोणाधान्यैस्तत्रसद्वीपंप्रकल्पयेत्
ततःपादाधिकंप्रोक्तंमन्येषामुत्तरोत्तरं ॥ विस्तारएषद्वीपानामुदधीनांचसर्वशः ॥ प्लक्षाख्यपंचद्वी
पेषुवर्षंभ्रुधरनिम्नगाः ॥ प्रत्येकंसप्तसप्तस्युःश्वेतनंदुलनिर्मिताः ॥ पुष्करेभूधरस्त्वेकमध्यतोवल
याकृतिं ॥ वर्षद्वयंतथाचान्येषामुतःश्रूयतांमुने ॥ प्लक्षेशांतभवंवर्षंशिशिरंसुखदंतथा ॥ आनंद
वञ्चशिवंक्षेमंतध्रुवमेववा ॥ गोमदःपूर्वतश्चन्द्रोनारदोदुंदुभिस्तथा ॥ सोमनःसुमनश्चैववैभ्राजःसप्तप

॥दा॰वि॥
॥१६१॥

र्वताः॥ अत्र नमाशिवा वा यिअंविकाभि त्रिवीक्रमान्॥ अमृता सुकृता चैव सप्तैता स्तत्र निम्नगाः॥ प्लक्षं तु प्रथमे
वर्षमध्यतो विनिवेशयेत्॥ एतेन वा यथाशक्ति स्वर्द्धेन विनिर्मितं॥ नमार्च्ये देवदेवेशं सर्वलोकगुरुं हरिं
सामरूपधरं सौवर्णां विनिवेशयेत्॥ धौतेदरिनजीमूतौ रौहितो विद्युतस्तथा॥ नर्मनः सुप्रभः सप्तवर्षा॰
णेनेव पर्वताः॥ कुमुदश्चोन्नतश्चैव तृतीयश्च वलाहकः॥ कंकश्च महिषश्चैव ककुद्मान्सप्तमो गिरिः॥ यो॰
नि स्तोया नितृष्णा च वंशशुक्रा वमोचनी॥ निहन्त्रिः सप्तम ग्रश्च शाल्मलेय रिकीर्तिताः॥ उद्भिदो वेणुमां
श्चैव सुरथो लवणो धृतिः॥ प्रभाकरश्च कपिलः पर्वतानष्टशुनारद॥ मणिक्कुमो हेमशैलो द्युतिमान्पु
ष्पवांस्तथा॥ कुशेशयो मस्त्र हरितो मंदरः सप्तमस्तथा॥ भूतपापा शिवा वायि पवित्रा सम्मि – तथा॥ घु
दंभा मीहश्री चैव सर्वपापहरा तथा॥ कुशसंबं कुशद्वीपे क्रौंचे चैतानि बोधमे॥ वर्षाणि मध्यराश्चैव नि ॥राम॥
कुश्च परस्व च॥ अंधकारोमुनिश्चैव दुंदुभिः सप्तमस्तथा॥ क्रौंचश्च वामनश्चैव अंधकारोथ पंचमः ॥१६१॥

पुंडरीको दुंदुभिश्च सप्तैते स्फुरिताचलाः॥ गौरि कुमारी संध्या च रात्रिश्चैव मनोजवा॥ यक्षादि पुण्डरीकश्च
सप्त सप्त उदाहृताः॥ शाकमध्ये शाकवृक्षो वर्षे प्लक्षैव निम्नगाः॥ सप्त सप्त च देवर्षे शृणु तां गदतो मम॥
जलदश्च कुमारश्च सुकुमारो मरीचकः॥ कुसुमोत्तम मोदश्च सप्तमश्च महाद्रुमाः॥ द्रुद्रवयोजनधारश्चै
व तश्च्यामपर्वतः॥ पंचमो श्रांगरी शैलो अंविका केशी तथा॥ सुकुमारी कुमारी च नलिनी विरुणुका तथा॥ इं
दुकावेणाकाचैव गभस्तिः सप्तमी तथा॥ पुष्करे तु महायमो धातकी न प्रकीर्तितो॥ मध्यतो वलयाकारो
मानसोत्तरपर्वतः॥ न्यग्रोधवृक्ष पूर्वं तु वलयः स्थानमुच्यते॥ सप्तमः पुष्करद्वीपस्तद्वदेव समाहृतः॥ ए
वं द्वीपाः समुद्रैश्च सप्त सप्त निराहृताः॥ द्वीपैश्चैव समुद्रैश्च सप्तत्वाद्विगुणापरे॥ द्वीपमानान् इमान्सर्वान्
शतनात्विनिवेशयेत्॥ तथाक्षिमृगान्मत्स्यान्सर्वतो दधिपुक्षियेत्॥ जम्बुद्वीपाधिपं विष्णुं तत्रचैव नि
वेशयेत्॥ प्लक्षे सोमश्चाल्मलेवा सुरूपं कुशद्वीपे ब्रह्मरूपं पुण्डरीकं॥ क्रौञ्चे रुद्रं शाकं संज्ञेतु सर्पे ब्रह्मरूपं पु

ष्करे देवदेवं ॥ कृत्वा चैकं वसुधाचारुमूर्त्तिर्हिरण्मयं जगतामीशमाद्यं ॥ प्रक्षाल्य पूतनजलेन मंत्रैः संप्रो-
क्ष्य गर्भैश्च निधाय देवान् ॥ सर्वस्थाव सेभ्य धराधरेन्द्रान्समंततो विकरेत्पुष्पवृष्ट्या ॥ अर्थादिभिर्द्व्यमृते
स्वहस्तैः संपूज्य मेरुं प्रथमं च सर्वान् ॥ स्वनाममंत्रैश्च नमोन्तनैश्च स्वाहायुतैः पूर्वविधौ म मंत्री ॥ यथापु-
राणेत्तनथैव कुर्यात् ॥ देवादिशैलेन्द्रवनस्पतीनां पूर्वैः पुरैवं विधिना समाप्य ॥ गुरुश्च तत्राधिवसेन्निशा-
यां निशासु वेमनसथैव वस्त्रादिदानां वननः क्रमेण ॥ ततः प्रभाते विमले तु दानकाले नदास्नापितधौ-
तवस्त्रः ॥ यथा पूर्वं जन्तुसंज्ञस्य चोक्तं तथा दानं सा दरं कारयित्वा ॥ ततो विप्रान्पूजयेत्यांक्रमेणतांदाप-
येन्मंत्रपूर्वं तथैव ॥ सोमं वायुं ब्रह्मरूपं च चन्द्रं तथा सूर्यं ब्राह्मणोरूपमाद्यं ॥ वीरुधौषधिवृक्षाणां
मृगाणां जगतां प्रभो ॥ आह्लादजननो यस्मात्तस्मात्त्वं पाहि मां सदा ॥ अनर्वहिश्च तत्सर्वं व्याप्य यो जग-
तस्थितः ॥ सदागतिरमेयात्मा रक्षत्वव्याहतक्रमं ॥ यः कर्त्ता जगतां पाता ब्रह्मा लोकपितामहः ॥ त्वं सं-

॥राम॥
॥१६२॥

प्रधानादेवेशश्चेयश्चास्कन्सदामम ॥ रक्षार्थं देवदेवानां जगतामपि शंकरः ॥ त्रयान्तु त्रिपुरघ्नश्च सदा मे
संप्रसीदतु ॥ उद्देशस्त्रमनन्तानि नित्यं यानि जगत्त्रयं ॥ प्रत्यक्षं सर्वलोकानां योसौ मे संप्रसीदतु ॥ सृष्टिस्थि
तिविनाशानां कारणं जगतामसौ ॥ हिरण्यगर्भो भगवान्स दा मे संप्रसीदतु ॥ इत्येवमेभिर्द्विजपुंगवा
नां प्रत्येकमेकं च यथाक्रमेण ॥ दद्यान्नवग्रहे वे दक्षिणा च वासः सुवर्णादिकं हिरण्यं कृत्वा सप्तद्वीपप
र्यन्त भूमिं दत्वा देवाज्ञानरूपान् क्रमेण ॥ दद्यान्नैसैग्रहे वे दानशेषं भूगोपांगं धान्य वस्त्रादि सर्वं ॥ आ
दावन्ते पंचभिर्विप्रवर्यैः पुराणपाठं च स्वस्ति मुख्यं च वाच्यं ॥ दद्यान्नेभ्यो दक्षिणां जानरूपं वा सौधान्यं भो
जयेद्ब्राह्मणांश्च ॥ सप्तद्वीपा हुयं दानमेवं कृत्वा तु नारद ॥ नारी वा पुरुषो वाथ वैरंचं लोकमाप्नुयात् ॥
उवाच नारदायैवं भगवांल्लोकभावनः ॥ तथा मयापि नन्वसर्वं प्रोक्तं वै मुनिसत्तम ॥ ॥ अथ पाना
नि महादानानि ॥ ॥ कौर्मे ॥ कनकाश्वतिलानागा दासी रथमहीगृहाः ॥ कन्या च कपिला धेनुर्म

॥दा॰वि॥ दादानानिवैदश ॥ महीदानंचापिदानेष्वंतर्भवतीतिविश्रुते ॥ नचसुवर्णदानंचहस्तिभूमीहिरण्यदाअमृतत्वंभजं
॥१६३॥ तइति ॥ अमृतत्वंमरणाभवःदीर्घमायुर्हिरण्यदइतिमनूक्तैःवह्निपुराणे ॥ अग्निरूक्तदेवताःसर्वाःसुवर्णंचतत्
दात्मकं ॥ तस्मात्सुवर्णंददतांदत्ताःस्युःसर्वदेवताः ॥ दशपूर्वान्परांश्चैवनरकात्तारयंतिते ॥ सुवर्णंयेप्रयच्छ
तिसोवाचेदंबृहस्पतिः ॥ सर्वान्कामान्प्रयच्छंतियेप्रयच्छंतिकांचनं ॥ मरीचिर्भगवान्पूर्वंपितामहसुतोब्रवी
त् ॥ यःसुवर्णंनरोनित्यंब्राह्मणेभ्यःप्रयच्छति ॥ सोविरंचिरजोविंशोदेववद्दिविमोदते ॥ कृत्वापिसुमहत्पापं
जातरूपंददातियः ॥ ससद्यस्तेनपापेनमुच्यतेनात्रसंशयः ॥ ब्रह्माण्डे ॥ सुवर्णंपरमंदानंसुवर्णंदक्षिणाप
रा ॥ पवित्राणांपवित्रंचपावनानांचसंशयः ॥ बृहस्पतिः ॥ अग्नेरपत्यंप्रथमंसुवर्णंभूर्वैष्णवीसूर्यसुताश्च
गावः ॥ लोकास्त्रयस्तेनभवंतिदत्तायःकांचनंगाश्चमहींचदद्यात् ॥ विश्वामित्रः ॥ यच्चासौलिखितोगेहे ॥राम॥
स्वर्णदानस्यसंस्कृतिः ॥ रक्षोभूतपिशाचाद्यास्तंनपश्यंतिभार्गव ॥ वसिष्ठः ॥ तस्माद्योवैप्रयच्छेतहिरण्यं ॥१६३॥

सर्वदेवतं ॥ स्वर्लोके राजराजेन सोभिषिच्येन भार्गव ॥ दशपूर्वान्दशैवान्यांस्तथा नोस्तारयं तितो ॥ सुवर्णाये(
प्ययच्छंतीन्येवं मांपितरो ब्रुवन् ॥ नन्दिपुराणे ॥ कृष्णलाः पंचमाषस्तमाषैः षोडशभिः स्मृतं ॥ सुवर्णमेकं नष्टा
नाशनास्वर्गमवाप्नुयात् ॥ तस्मात्त्वया च्युतं रात्नं कांचनं मानवैर्धि ॥ नान्तःपरन्न मंत्रोके सन्तः पापविमो
चनं ॥ सुवर्णस्य गुरुस्यस्य सुवर्णायः प्रयच्छति ॥ बहून्यब्दसहस्राणि स्वर्गलोके महीयते ॥ सुवर्णाच्छिन
यंदत्वा अक्षयांगतिमाप्नुयात् ॥ दत्वा सुवर्णस्य शतं द्विजेभ्यः श्रद्धयान्वितः ॥ ब्रह्मलोकमनुप्राप्य ब्रह्मणा
सह मोदते ॥ आदित्यपुराणे ॥ आदित्योदयसंप्राप्तौ विधिमंत्रपुरस्कृतं ॥ ददाति कांचनं यो वै दुःस्वप्नं प्र
तिहंति सः ॥ कालिकापुराणे ॥ गंगां गंगा द्वमात्रं वा नियतः प्रतिवासरं ॥ कनकं यस्तु लिंगे तु ब्राह्मणे त्वन्यदर्पणं
सं ॥ ॥ अथ सुवर्णदानविधिः ॥ ॥ कर्त्ता देशकालौ संकीर्त्य दशपूर्वाः परस्ववंश्य सोहमात्मना रणा(
हंसवर्हिणाद्युक्ता प्सरोगणाकीर्णभास्वरार्कवर्णविमानकरणकगमनभास्वत्त्वतेजो विराजितदिव

गन्धर्वत्वकामो वा सुवर्णमहादानमहं करिष्ये इति संकल्प ॥ पात्रं हिरण्यं च संपूज्य ॥ हिरण्यगर्भगर्भस्थं
हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ इति पठित्वा ॥ आग्नेयं हिरण्यं तुभ्यं संप्रद
दामि दत्वा यथाशक्ति दक्षिणां दत्वैश्वर्यार्पणं कुर्यात् ॥ एकमाषदाने पंचवर्षाधिकरणाक स्वर्गनिवास
कामः कृष्णलपरिमितदाने एकवर्षाधिकरणास्वर्गनिवासकामः ॥ एकसुवर्णदाने सर्वपापक्षयपू
र्वकस्वर्गलोकमहितत्वकामः ॥ सुवर्णद्वये ऽक्षयगतिप्राप्तिकामः ॥ सुवर्णदाने ब्रह्मलोकप्राप्तिपू
र्वकमोदनकामः ॥ देयाधिक्ये फलस्याधिक्यं वोध्यं ॥ वित्ताधिक्यात्फलाधिक्यमिति न्यायनिदर्शनादि
तिकोस्मीत् ॥ ॥ इति हिरण्यदानप्रयोगः ॥ ॥ आयुरारोग्यवृद्धिकामो हेमदास्ये इति संकल्प ॥ आढक
तंडुलपूर्णपात्रे अर्द्धाढकतिलपूर्णपात्रं तत्र तत्र आढकचतुर्थांशमितघृतपूर्णपात्रं निधाय तत्र नि
ष्कं न दर्शद्वाहेन हर्षवा हेम निधाय चांजलिं विधं हेमनीसे पूज्य आत्मच्छायां घृते दृष्ट्वाग्नि वः प्रीयतामिति सर्वं

विधायदत्वायथाशक्तिहेमदक्षिणांदत्वेश्वरार्पणांकुर्यात् ॥ ॥इतिहेमदानप्रयोगः॥ ॥अथशानमानदानंब्र॰
ह्मांडे ॥ ॥गव्येनभूमिंशकृताजलेनआलिख्यमध्येसिततंडुलैश्च ॥सरोरुहंकेशरभूषणाढ्यंसकर्णिकंचाष्ट
दलंविलिख्य ॥तस्मिन्हिरण्यंशानमानमात्रंनिधायतस्योपरिनंदिविंन्य ॥ब्रह्माणामीशंकमलासनस्थमाराध्य॰
गंधादिभिरादरेण ॥विघ्नंतथावेदविदंवरिष्ठंविविंन्यवुध्यानुसमर्चयित्वा ॥दद्यात्सुवर्णंशानमानमस्मैसं
प्रीयतामात्मभूरितिसुधीर्य ॥योसौसदनंशानमानंहिरण्यंदद्याद्दाताःसर्वमेवेतिचोक्तं ॥अतःकुर्यात्तदेनत्सकृद्वा
नित्यंमासंहायनंशक्तितोवा ॥जांबूनदंज्ञानरूपंसुवर्णंकांचनंतथाहिरण्यंचेतिशास्त्राणिक्रमादेतानिनारद॰
सकलकलुषक्षयंसंपूर्णायुरारोग्यसंतानैश्वर्यसकलमंगलावाप्तिपूर्वकस्वर्गलोकप्राप्तिकामःशालमा
नदानंकरिष्येइतिसंकल्प्य ॥गोमयलिप्तदेशेसिततंडुलैरष्टदलंविधायतत्रयथाशक्तिकृतस्यालादिश
नमानमात्रंहिरण्यंनिधायतत्रब्रह्मरूपेसंपूज्यपात्रेपूजयित्वाआत्मभूःसंप्रीयतामितिमंत्रेणदत्वाय

॥दा·वि॥ थाशक्ति दक्षिणां दत्वा॥ जांबूनदं जातरूपं सुवर्णं कांचनं तथा॥ हिरण्यं चेति नामानि त्रिवारं जपित्वा कर्मेश्वरा
॥१६५॥ र्पणां कुर्यात्॥ ॥इति वातनमानदानप्रयोगः॥ ॥अथ प्रसंगात् रजतदानं॥ स्कान्दे॥ यः प्रयच्छति विप्राय र
जतं चापि निर्मलम्॥ स विधूय भ्रुपापानि स्वर्गलोके महीयते॥ रूपवान् सुभगः श्रीमानिह लोके च जायते॥
मात्स्ये॥ पितॄणां राजतं पात्रमथवा रजतान्वितं॥ शिवनेत्रोद्भवं यस्मात्तस्मात्तत्पितृवल्लभं॥ अमंगलं तद्य
ज्ञेषु देवकार्येषु वर्जितं॥ रजतं दक्षिणा मारुः पितृकार्येषु सर्वदा॥ एवमहेवनारुद्रः॥ अथाश्वदानं स्कान्दे॥
अश्वं यस्तु प्रयच्छेद्वै हेमचित्रं सुलक्षणं॥ स तेन कर्मणा देवगन्धर्वलोकमश्नुते॥ भारते॥ सर्वोपकरणो
पेतं युवानं दोषवर्जितं॥ योऽश्वं ददाति विप्राय स्वर्गलोके महीयते॥ कालिकापुराणे॥ अश्वं तन्मूल्यमथ
वा कनीयो मध्यमोत्तमम्॥ दद्याद्वित्तानुसारेण नारायणपरिच्छदं॥ नारायणा इति नाराणं कार्यलंकारः ॥रात॥
शफैः पंचपलैः रौप्यैः स्तामैर्वा स्वर्णभूषितं॥ स दक्षिणां सवस्त्रं च दत्वा सायुज्यमाप्नुयात्॥ हयेरिति निझेषः॥ ॥१६५॥

ब्रह्महत्यादिपापानि उपपापानि यानि तु॥ तानि सर्वाणि नश्यन्ति हयमेधेन निश्चितं॥ ॥अथ प्रयोगः॥ ॥
देशकालौ संकीर्त्याश्वलोमसमसंख्यवर्षभोगपूर्वकस्वर्गकामो गंधर्वलोकप्राप्तिकामो वा अश्वदानं करिष्ये इति
सङ्कल्प्य विप्रमश्वं च संपूज्य उच्चैःश्रवास्त्वमश्वानां राज्ञां विजयकारकः॥ सूर्यवाहनमस्माकं मनः शांतिं प्र
यच्छ मे॥ विष्णुस्त्वमश्वरूपेण यस्मात्क्षीरादमृतसंभवः॥ चन्द्रस्य वाहनं नित्यं मनः शांतिं प्रयच्छ मे॥ इति मंत्रं प
ठित्वा इममश्वं नानागणनामकालंकारसहितं वारुणायाश्वं वा तुभ्यं संप्रददे न मम इति दत्वा यथाशक्ति द
क्षिणां दत्वा कर्मेश्वरार्पणं कुर्यात्॥ प्रतिग्रहीता कर्णे पठित्वा गृह्णीयात्॥ ॥अथ श्वेताश्वदानं॥ ॥गा
रुडे॥ श्वेतमश्वं तु यो दद्यात्फलं दशगुणं लभेत्॥ अश्वदानाद्दशगुणाभिमतार्थः॥ वडवां च तथा दत्वा तुल्य
मेव फलं लभेत्॥ गारुडे॥ अश्वमेधमखं यस्तु कलौ कर्तुं समीहते॥ अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकं
विधिं तस्य प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा॥ अनेन चाश्वमेधफलकत्वं सूच्यते॥ श्वेतमश्वं शुभं स्नातं हेम

पर्याणाभूषणं ॥ रौप्यैस्ककटकैः शुभैः करिदंतोपशोभितं ॥ वज्रनेत्रं नागरखुरं क्षौमगुच्छं सुवाससं ॥ शुभेनप
ट्टकूलेन संछन्नं स्वायुधान्वितं ॥ धामरत्नोपरिस्यूतं वद्धकक्षं सूपट्टकं ॥ एवं सुनेजसं चाश्वं ब्राह्मणायनि
वेदयेत् ॥ मन्वादौ च युगादौ च अयने विषुवे तथा ॥ चंद्रसूर्यग्रहे चैव अश्वं दत्वा सुखी भवेत् ॥ ॥ अथ
प्रयोगः ॥ ॥ अश्वदानफलदशगुणफलप्राप्तिपूर्वकब्रह्महत्यादिसकलपापक्षयपित्रिंशत्पूर्वापरपितृ
उद्धरणपूर्वकाक्षयसूर्यादिलोकप्राप्तिकामः अश्वेनमश्वं दास्ये इति संकल्प्याश्वं संस्नाप्य यथाशक्तिवक्ष्यमाणा
लंकारभूषितं विधाय ॥ मार्तंडाय सप्तवेगाय कश्यपाय पवित्रमूर्तये ॥ जगद्दीपाय सूर्याय त्रिवेदाय नमो न
म इति मंत्रेणाश्वं संपूज्यानेनैव मंत्रेणानूक्षीं वाश्वकर्णयोस्तिलांजलीन्दत्वा फलमुच्चार्येमं श्वेनाश्वं हेमप
र्याणाभूषितं रौप्यकटकं करिदंतवज्रमयनेत्रं नागमयखुरं क्षौमगुच्छं स्वर्णतिलकोपशोभितं सूवद्र
कक्षं स्वायुधान्वितं सूर्यदैवतं पट्टपट्टकूलसंछन्नं धामंरत्नोपरिस्यूतं वरुणदैवतं यमदैवतं वा तुभ्यमहं संप्रद

देनममेतिकर्णं धृत्वा समर्प्य महार्णवे समुत्पन्नउच्चैःश्रवसः पुत्रक ॥ मयात्वं विप्रमुख्याय दत्तो हयस्करवी
भव ॥ इमं विप्र नमस्कम्यमश्वं नेत्रानियादिनं ॥ प्रतिगृह्णीष्व विप्रेमं मया दत्तं सुशोभनमिति पठित्वा न प्रति
ग्रहमंत्रे पठितेसु वर्णदक्षिणां दत्वा अश्वायजः सप्तनिपदानि गत्वा कर्मेश्वरार्पणं कुर्यात् ॥ वडवादानेपि अश्वे
नाश्वदानवत्प्रयोगः ॥ ॥ अथ तिलदानं ॥ ॥ व्यासः ॥ महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ॥ मात्स्ये ॥ वि
ष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा ॥ संवर्तः ॥ तिल्पेनेमिन्निकेकामेतिलान्दत्वा स्वशक्तितः ॥ प्रजावान्सु
त्रवान्नित्यं धनवान्जायते नरः ॥ कृष्णाजिने तिलान्कृत्वा सुवर्णं मधुसर्पिषा ॥ द्रोणैकं वा ससाहस्रं त्रिधा
न घन्स दक्षिणं ॥ आहिताग्नौ द्विजे दत्वा सर्वं तरति दुष्कृतं ॥ त्रिधेति द्रोणैकं द्रोणद्वयं द्रोणत्रयमिति निय
मत्रयपरिमिति हेमाद्रिः ॥ नवदिनिपक्षत्रये क्रमादेकद्वित्रिसुवर्णदक्षिणामित्यर्थः ॥ ॥ अथ प्रयो
गः ॥ ॥ देशकालौ संकीर्त्य सर्वदुरितक्षयपूर्वकप्रजाधनप्राप्तिकामः तिलान्दास्ये इति संकल्प्य कृष्णाजिने

॥ दा·वि ॥
॥ १६७ ॥

द्रोणत्रयं द्रोणौ द्रोणं वा तिलान्कृत्वा वाससाच्छाद्य च॥ यथाशक्ति सुवर्णमधुसर्पिश्च संस्थाप्य फलमुच्चार्य्येमां(
स्तिलांस्तुभ्यमहं संप्रददे न ममेति दत्त्वा॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदानेन मम
पापं व्यपोहत्विति पठित्वा यथाशक्ति सुवर्णं दक्षिणां दद्यात्॥ द्रोणे सुवर्णः तद्द्वये सुवर्णौ तत्त्रये सुवर्णत्र
यमिति हेमाद्रिः॥ ॥अथ तिलपर्वतदानं मत्स्यः॥ शुक्लैः कृष्णैर्यथालब्धैर्द्वा विंशत्यंगुलोच्छ्रितः॥ राशिस्तिलैः
समे देशे कर्त्तव्यः पुरुषायतः॥ यथाविभवविस्तारो यदि वा शक्तितो नरैः॥ प्रतिमायां गतास्थाप्या सौवर्णी
तत्र माधवी॥ सौवर्णी स्वर्णकृता अथवा शक्त्या वेति यक्षां नरैके॥ श्रोद्रोणं पयसा दध्ना घृतेनापूरयेद्घ
टान्॥ स्थापयेत्तत्र तत्सम्यक् पुष्पवस्त्रविभूषितं॥ घटचतुष्टयं श्रोत्रादिभिः प्रपूर्यित्वा दिक्षु समंतात्स्था
पयेदित्यर्थः॥ शक्त्या वाभ्यर्च्य तत्सर्वं ब्राह्मणाय श्रोत्रियेर्थिने॥ दद्यान्माघेथ वैशाखे विषुवे चोत्तरायणे
मंत्रो वक्ष्यते॥ एवमुच्चार्य तत्सर्वं ब्राह्मणाय निवेदयेत्॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यति॥ ॥

॥ राम ॥
॥ १६७ ॥

अथप्रयोगः॥ ॥यावज्जीवयापक्षयकामस्तिलराशिमहादानंकरिष्येइतिसंकल्प्यशुचौदेशेवात्रिंशद्गुलोर्द्ध
पुरुषायतनंयथाशक्त्यायतनंवातिलराशिंकृत्वातत्रस्वर्णपरिमाणस्वर्णनिर्मितांवामदक्षिणोर्द्धकरस्थि
तशंखचक्रांवामदक्षिणाधःकरस्थितपद्मगदांमाधवप्रतिमांसंस्थाप्यपूर्वादिचतुर्दिक्षुमधुदुग्धदधिघृ
तपूर्णांश्चतुरःकलशान्संस्थाप्यविष्णुमंत्रेणप्रतिमांविधिवत्संपूज्यफलदक्षिणायुतंतिलराशिंमाधवप्रति
मासहितंचतुर्दिग्व्यवस्थितमधुदुग्धदधिघृतपूर्णचतुःकुंभंविष्णुदैवतंतुभ्यमहंसंप्रददेनममेतिदत्वा॥
अज्ञानाद्यदिवामोहाद्धोमाद्यजन्मजन्मनि॥ अर्जितंयन्मयाकिंचित्दुष्कृतंमधुसूदन॥ तत्सर्वंविलयंयातुदा
नेनानेनमाधवेतिपठित्वायथाशक्तिदक्षिणांदद्यात्॥ ॥अथतिलपद्मदानं·भारते॥ तिलपद्ममिति
ख्यातंदानंतेकथयाम्यहं॥ माघमासेतुसंप्राप्तेशुक्लपक्षेद्विजोत्तम॥ गोमयेमंडलंकृत्वाचतुरस्रंमहामने॥
नववस्त्रसमास्तीर्णंकृष्णाजिनसमन्वितं॥ द्रोणावरांस्तिलांस्तत्रनिधायवसनोपरि॥ द्रोणावरःकनिष्ठः

॥ दा॰वि ॥
॥ १६८ ॥

द्रोणान्न्यूनान देयाद्यमर्थः ॥ पद्ममष्टदलं कृत्वा शुभं नन्दकलशोपरि । स्थापयेत्तत्र देवेशं सुवर्णेन च निर्मितं ॥ श्री
निवासं जगन्नाथं भुक्तिमुक्तिप्रदायकम् ॥ ध्यायेच्चतुर्भुजं देवं प्रणतार्तिहरं हरिं ॥ हिरण्यगर्भममृतं श्रीगर्भं प
रमं परं ॥ शंखचक्रगदापाणिं पीतवाससमच्युतं ॥ श्रीवत्सांकं जगद्बीजं सर्वकारणकारणं ॥ कविं पुराणं वि
श्वेशं पुण्डरीकनिभेक्षणं ॥ आसीनं कर्णिकामध्ये सर्वशक्तिसमन्वितं ॥ कृतांजलिपुटो भूत्वा नमस्कृत्य पुनः
पुनः ॥ पूजयेत्परमेशानं भक्त्या वित्तानुसारतः ॥ इन्द्रनीलमहानीलमणिमुक्ताफलादिभिः ॥ आराध्य च य
थाशक्त्या देवदेवं जनार्दनं ॥ गंधैः पुष्पैस्तथा दीपैर्नैवेद्यैश्च मनोहरैः ॥ क्षीरान्नैर्घृतयुक्तैश्च फलैर्दिव्यै
रनेकधा ॥ पुष्पाणां प्रकरैश्चैव गीतनृत्यादिभिस्तथा ॥ इत्थमाराध्य देवेशं तांबूलं विनिवेदयेत् ॥ तैलप
स्थं घृतप्रस्थं दत्वा कर्म ततः परं ॥ स्थापयेत्सार्ध्वनस्तस्य धान्यपात्राणि षोडश ॥ एवमाराध्य तत्सर्वं निवे
द्रोणमयं शुभं ॥ एकरात्रं द्विरात्रं वा त्रिरात्रमथवा द्विज ॥ निराहारो भवेत्सर्वमुपवासमथापि वा ॥ कुर्या

॥ राम ॥
॥ १६८ ॥

त्वकायमुद्धर्थं वासुदेवमनुस्मरन् ॥ ततो ध्यात्वा त्वनन्यमंभुर्विर्भक्त्या समाहितः ॥ विख्यातकुलशीलाय ब्रा
ह्मणाय कुटुम्बिने ॥ प्रीयतां माधवो देव इत्युक्त्वा तमनुस्मरन् ॥ हिरण्यगर्भदेवेशायमनाभजनार्दन ॥
हिरण्याक्षगुणाधारसर्वाधारधरेश्वर ॥ धनधान्यसमृद्धं च सर्वसंपत्समन्वितं ॥ पुत्रपौत्रादिसंयुक्तं दा
सीदाससमन्वितं ॥ आरोग्यं च सुमंत्रं च सर्वदुःखविवर्जितं ॥ कुरु मां परमोदारं भक्तोयमि निविंनय
न् ॥ इत्थं प्रसाद्य देवेशं वासुदेवं सनातनं ॥ दद्यात्तिलमयं पद्मं सर्वकामसमृद्धये ॥ ब्राह्मणाश्चापि तृ
ह्णीयाद्वाचयेत्तु जनिग्रहं ॥ कोदात्कस्मा अदादिति वैदिकं मंत्रमुच्चरेत् ॥ एवं तिलमयं पद्मं यो दद्या
ति विधानतः ॥ सर्वसत्वसमाकीर्णं नरकं स न पश्यति ॥ स्वयं भवति पत्नान्मापि न्तनथ पितामहान् ॥ प्र
पितामहं श्च धर्मात्मा तारयत्यखिलं कुलं ॥ धर्मार्थी धर्ममाप्नोति धनार्थी धनमाप्नुयात् ॥ मोक्षार्थी मोक्ष
माप्नोति नात्र कार्या विचारणा ॥ पानकी मुच्यते पापात्पितृघ्नो गुरुतल्पगः ॥ सर्वपापरतो वापि मुच्यते नात्र सं

श्रयः॥ यस्मात् राजा धनपतिः समृद्धोतीव धार्मिकः॥ आराध्य विधिवं विधिना वस्त्रालंकारभूषणैः॥ वाहनादिभि
रन्यैश्वर्यामक्षैत्रादिकैस्तथा॥ यस्मात्तं जायते नस्य द्विजदानपरस्य च॥ परिछिन्नं भवेन्नत्तु नात्र कार्या विचा
रणा॥ ॥अथ प्रयोगः॥ ॥माघशुक्लपक्षान्तर्गतपुण्यदिने॥ पूर्वमहं ह्यहमेकादशं निलाशरडपोषणाय
रोवादेशकालौ संकीर्त्य सकलपापक्षयपूर्वकनरकादर्शनपित्राद्याखिलकुलसंतारणपूर्वकधर्मार्थ
मोक्षप्राप्तिकामः॥ तिलपर्वं दास्ये इति संकल्प्य गोमयेन चतुरस्रं मंडलं कृत्वा तत्र कृष्णाजिनं तदुपरि च व
स्त्रमास्तीर्य पूर्ववत्॥ यथाशक्त्याधिकान् तिलान्यस्माकारान्निधाय तत्कर्णिकायां सुवर्णत्रयपरिमित
हेमनिर्मितां शंखचक्रगदापद्मपाणीं हरिप्रतिमां संस्थाप्य वैष्णवमंत्रेण षोडशोपचारैः संपूज्य पा
यसं घृतं पक्वान्नं नैवेद्यं समर्प्य तस्य परिमितेन तैलघृतेन च समर्प्य तत्पार्श्वे तो यथाशक्तिधान्यपरिपूर्णान्द्वाद
शघटान्संस्थाप्य। हिरण्यगर्भदेवेश पद्मनाभ जनार्दन॥ हिरण्याक्षगुणाधार सर्वाधारधरेश्वर॥ धनधा

नमस्कृत्वंचसर्वसंपन्नमन्वितं ॥ पुत्रपौत्रादिसंयुक्तं दासीदाससमन्वितं ॥ आरोग्यंचसमेत्रंचसर्वदुःखविव
र्जितं ॥ कुरुमांपरमोशरंभक्तोयमिनिनिर्विंनयन् ॥ इतिसंप्रार्थ्यफलमुत्सार्य्यदंतिलपत्रंहिरण्यनिमासहितं
धान्यपूर्णषोडशघटयुतंविष्णुदैवतंतंभूंसंप्रददे ॥ प्रीयतांमाधवोदेवइत्युच्चार्यनममेनि·तिलपत्रंदत्वा
कामस्तोतापठितायांयथाशक्तिसुवर्णदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात् ॥ ॥ अथरुद्रैकादशतिलदानं·
त्रुलारोड ॥ ॥ अतःपरंप्रवक्ष्यामितिलदानमनुत्तमम् ॥ यत्कृत्वापुरुषःस्त्रीवावैरिंचंलोकमाप्नुयात् ॥ आ
युरारोग्यदंपुण्यंसर्वपापप्रणाशनं ॥ शिवप्रीतिकरंनृणांपुत्रपौत्रिकरंपरं ॥ रुद्रैकादशमंत्रैस्तुविधाने(
कादशाघ्नी ॥ आसुखःप्रमगासीनान्गंधादिभिरथार्चयेत् ॥ तिलप्रस्थत्रयंपात्रेष्वेकैकंनिक्षिपेत्तथा·
प्रत्येकंमंडलंहैमंपात्रेषुविनिवेदयेत् ॥ पात्राणिचैवमायाध्यंशिवतुष्ट्यायथाक्रमं ॥ रुद्रैकादशमंत्रैश्च
दद्यादुदकपूर्वकं ॥ मंत्राःप्रणवादिचतुर्थ्यंतानमोंतनामरूपाज्ञेयाःनामानिस्मृत्यंतरे ॥ वीरभद्रश्चशं

॥ रा॰वि ॥
॥ १८० ॥

भुश्च गिरीशश्च महायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च वि(
शांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ ॥ इति रुद्रैकादशानिलदानं ॥ ॥ अथ प्रयोगः
शिवसंतोषपूर्वकायुरारोग्यपुत्राद्यैहिकामुष्मिकब्रह्मलोकमहितत्वकामो रुद्रैकादशानिलदानं करि
ष्ये इति संकल्प प्रत्यङ्मुखासीनानेकादशब्राह्मणान्नमोन्तनाममंत्रैः संपूज्यैकादशताम्रपात्राणि तिलैः
संपूर्य यथाशक्ति हिरण्यं निक्षिप्य नाममंत्रैरेवैकादशभ्यो दद्यात् ॥ नेचवीरभद्राय शंभवे गिरीशाय
महायशसे ॥ अजैकपदे अहिर्बुध्न्याय पिनाकिने ॥ अपराजिताय ॥ भुवनाधीश्वराय ॥ कपालिने ॥ भ
गायेति नतनकर्मेश्वरार्पणं कुर्यात् ॥ ॥ अथ तिलगर्भदानं ॥ ब्रह्माण्डे ॥ गोमयेनोपलिप्तायां क्षितौ वा
स्तीर्य वाससी ॥ शालीनामाढकं मध्ये न दर्भमंडुलं न्यसेत् ॥ तैरूपर्यं प्रविस्तीर्य मष्टपत्रं सकर्णिकं ॥ क(
र्णिकायां न्यसेन्मध्ये सौवर्णं शक्तितः कृतं ॥ नवरत्नानि तन्मध्ये विधानव्यानियत्नतः ॥ ततस्तु वाचयेतः श्रु

॥ राम ॥
॥ १८० ॥

प्राप्निता न्तु यी न्सिमंत्र तः॥ गर्भवासस माप्ययः समासी यं ततः स्थाने॥ गर्भस्येयोनिमंत्रेणास्त माधी यय थावि
धि॥ ततो यवे त्रपपुरुषमृ त्जूकृतमृत्पुष्टिकं॥ तस्यां गेषु मंत्रेण त्र्यंबकमृत्युंजयमंत्रक्रमात्॥ तत्र देवं विहृयाक्ष
मंडलं चंद्रविभूषणं॥ कल्पयित्वार्चयेन्मंत्रैः पंचब्रह्मभिरादरात्॥ तस्य मूर्द्धि पुनः पंचसौवर्णं पूर्ववत्कृतं
विन्यसेद्रस्त्रमावेष्ट्य तिलैरापूरयेत्ततः॥ तं गर्भं मर्चयेद्रुद्रं चिंतयित्वा मृतोद्भवं॥ अमृतस्त्वाविशत्वंड
स्येन मंत्रेणमंत्रवित्॥ ततः शतहुतं मंत्रं मृत्युंजयमंतत्र मं॥ ततस्तस्मान्नयेत्त्रस्यां गर्भस्थानास्तमाहितः
पुनः संयोज्य वारुणपायावमानीभिरेव च॥ पूर्वदेहविनिर्मुक्तः शंकरोस्मीति चिंतयेत्॥ ब्राह्मणं स्थाय नत्त्व
र्वं प्रदद्यात्तिलोदकं॥ प्रीयतां भगवान् शंभुः स्तंडसौ लिरिति ब्रुवन्॥ अनेन विधिना यस्तु तिलगर्भं स
माचरेत्॥ अकालमृत्युर्नभवेत्तस्य नास्त्यत्र संशयः॥ व्याधीनां विप्रमोक्षः स्यान्महतामपि निश्चयः॥ ग्रह
दोषाः प्रणश्यन्ति प्रसीदंति ग्रहाः पुनः॥ उत्पातानां च शान्तिः स्याद्विधानमपि शक्षराणां॥ नवरत्नानुकार

॥ दा॰वि ॥
॥ १८१ ॥

नि ॥ नवाक्यतो विप्रवाक्यत इत्यर्थः ॥ योनिमंत्रः प्रयोगे स्पष्टः मृत्युंजयमिति॰ सोपि प्रयोगे स्पष्टः ॥ पंचव
क्त्रमिति नित सद्योजातादियं च मंत्रैरित्यर्थः ॥ अत्र तिलगर्भोपवेशनं शंकरात्मनाभावनं तिलदानं च यज
मानमन्यदाचार्यकर्त्तृकं ॥ अथ प्रयोगः ॥ ॥ व्याध्युपगमदीर्घायुःप्राप्तिग्रहपीडाकालमृत्युनाशेनात्म
न्त्रविनारिष्टनिरासकामोहं तिलगर्भदानं करिष्ये इति संकल्प्याचार्यं वृणुयात् ॥ आचार्यो गोमयोप(
लिप्तस्थले वाससी आसीर्य तत्राष्टकमितान् शालीन्प्रसार्य तत्राष्टौ द्रोणके संइलैरष्टदलं कृत्वा कर्णिका
यां यथाशक्ति सुवर्णनिर्मितं सनवरत्नं पंचविंशत्स्य परि निउय विष्टयजमानपर्याप्तान्तिलान् ॥ इमे
तिलाः शुद्धा इति विप्रवाक्यतः पूर्णान्प्रसार्यान्ये नवाससाछाद्यतन्त गर्भस्थाने निनिधायात्वा यस्मै ते योनि
योगर्भो यस्मै योनि हिरण्मयी अंगान्यह्रुता यस्य तं मात्रा समजीगमं स्वाहेति योनिमंत्रेणाभिमंत्र्य त
त्र यजमानं मृजुकृत्वबद्धमुष्टिकमुपवेशयेत् दंगे मृत्युंजयमंत्रान्यासं कुर्यात् ॥ यथा ॥ त्र्यंबकं यजा(

॥ राम ॥
॥ १८१ ॥

महेश्वनिशिखायां सुगंधिं पुष्टिवर्द्धनं हृदये ॥ उर्वारुकमिव बंधनान्त्वाकोः ॥ मृत्योर्मुक्षीयमामृतान्
नाभौ ॥ त्र्यंपादयोः ॥ बंगुल्फयोः ॥ कंजंघयोः ॥ यंजानुर्वोः ॥ जांजघने ॥ मंकट्यां ॥ हेमेढ्रयोः ॥ सुनाभौ ॥ गंकुक्षिद्व
योः ॥ धिंपार्श्वयोः ॥ पुकक्षयोः ॥ ष्टिंकुचयोः ॥ वर्हृदि ॥ र्द्धंस्कंधयोः ॥ नंकृकाटिकायां ॥ उकूर्परे ॥ र्वांमणिबंधे
रुकनिष्ठिकयोः ॥ कअनामिकयोः ॥ मिमध्यमयोः ॥ वतर्जन्योः ॥ वंअंगुष्ठयोः ॥ धपाण्योः ॥ नाकंठे ॥ मृचि
बुके ॥ त्योःवक्त्रे ॥ मुनासिकायां ॥ क्षीकर्णयोः ॥ यचक्षुषोः ॥ माललाटे ॥ मृमूर्ध्नि ॥ तान्चूडायां ॥ एवंन्या
संकृत्वा ३ तैवविरूपाक्षं चंद्रमौलिं कल्पयित्वा सद्योजातं प्रपद्यामि सद्योजातायवैनमः ॥ भवेभवेना
तिभवेभवस्वमां भवोद्भवायनमः ॥ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमः २ अघोरेभ्योथघो
रेभ्यः ३ तत्पुरुषायविद्महे महादेवायधीमहि ४ ईशानः सर्वविद्यानामिति पंचब्रह्मभिर्यजमानमभ्य
र्च्य पुनरत्र्यम्बकवर्णायममधाम्नु खंन्मूर्ध्निसंस्थाप्यवाससावेष्ट्यलिलेरापर्यन्तमंत्रस्य पुरुषं तिलगर्भ

रूपं मृत्युंजयमंत्रेणाभ्यर्च्य केशांश्चिन्मनेनवोभवनिजायमानोन्हांकेतुरिन्येनेनाप्यभ्यर्च्य· मृत्युंजयमंत्रं आ
नवारं जपित्वा तस्माद्भर्गायजमानमुत्थाप्य वारुणीभिरभिषंचेत् ॥ ततो घनाशंकरो हमस्मीति भावयित्वा
फलमुच्चार्य मंगिनि लगर्भे विष्णुदेवनं तुभ्यं संप्रददे नेन भगवांश्चंद्रमौलिः· प्रीयतामिति निवद तु विप्रहस्ते ज
लं दद्यात् ॥ ततो यथाशक्ति स्वर्णं दक्षिणां दद्यात् ॥ आचार्याय च यथाशक्ति दक्षिणां दत्वा कर्मेश्वरार्पणं
कुर्यात् ॥ ॥ अथ तिलमृगदानविधिः· ॥ मृगं तिलमयं कृत्वा स्वर्णरत्नान्वितं ॥ दद्यात्कंबलसंवीनकृष्ण
मार्गाजिनेन वा ॥ सर्वकामसमृद्धेन विमानेन दिवं व्रजेत् ॥ कालक्ष्यादिस्तागम्य राजराजो भवेन्नरः ॥ कर
कसंयुक्तमिति कचिन्मानपाठः ॥ अथ प्रयोगः ॥ यथाशक्ति तिलैः कृष्णाजिने मृगाकारं कृत्वा कंबलेना
च्छाद्य यथाशक्ति स्वर्णरत्नैश्च संस्थाप्य देशकालौ संकीर्त्य सर्वकामसमृद्धिविमानकरणकस्वर्गगम
नोत्तरभूलोकशाश्वतराजत्वभवनकामः इमं कृष्णाजिनोपरिस्थितं तिलमयं मृगं यथाशक्ति स्वर्ण

रजतान्वितं केवलं वाप्यदिनं तु भ्यं संप्रददेद्यन्ति दत्त्वा यथाशक्ति दक्षिणां दद्यात्॥ अथ गजदानम्॥ विष्णुसंहि
तायां॥ कक्षारज्जुभिरायत्तं शुभासनसमन्वितं॥ मणिकांचनमालाभिर्भूषितं कर्णचामरैः॥ सूत्ररत्नघंडे
भ्रूणघैश्च भूषितं दोषवर्जितं॥ यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनं॥ ब्राह्मणाय दरिद्राय स्वर्गलोके
महीयते॥ कर्मक्षयादिहागत्य राजराजो गजाधिपः॥ सर्वपापविनिर्मुक्तो जायते नात्र संशयः॥ अश
क्तो मूल्यदानमप्युक्तं॥ कौर्मे॥ दद्याद्गजं गणोक्तं मूल्यं पंचशतान्विवा॥ विज्ञानसारादत्रापि कनिष्ठोत्त
ममध्यमं॥ रूप्यस्थगणालंकरणं तारागणविभूषणं॥ सदक्षिणं विप्रनशात्त्या दत्वा शिवपुरं व्रजेत्॥ इति
पुराणोक्तं मूल्यं हेममाषशतत्रयमिति हेमाद्रिर्मदनरत्नश्च॥ तथा च गजाभावे पंचशतं हेममाषाः
तदभावे शतत्रयमिति फलितं॥ मूल्याभावे त्वशीतिकार्षापणा गजमूल्यमुक्तं॥ रूप्येति रूप्यमयग
जवधनार्थं स्थगणासहितमित्यर्थः॥ इति मदनरत्नः॥ स्थगणरज्जुरिति हेमाद्रिः॥ तारागणो मौक्तिका

॥दा.वि॥
॥१७३॥

दिक्तो गजालंकारविशेषः॥ अथप्रयोगः॥ देशकालौ संकीर्त्य सकलकलुषक्षयपूर्वकस्वर्गलोकम
हितत्वोत्तरभूलोकाधिकरणकमहाराजत्वभवनकामो गजमहादानं करिष्ये इति संकल्प ब्राह्मणांह्
त्वा नवक्षमागणोपस्करगुणं गजं च संपूज्य फलमुच्चार्येमं गजं रूप्यशृंखलासहितं मुक्ताजालभूषितं गं
डुं कक्षास्थिरूप्यशृंखलाद्वयचामरभूषितकर्णं मणिकांचनमालाभूषितं भ्रूभासनसमन्वितं पृष्ठदे
शं प्रजापतिदैवतं तुभ्यमहं संप्रददे न मम इति समर्प्यारोहयेत्॥ दानस्तुतिः॥ महाशक्तिर्महाकायः पी
नो वरसमप्रभः सर्वे च यामजेनान्वगजो यच्छतु मे सुखम्॥ ॥अथ शिवगजदानं॥ लैंगे॥ गजेन्द्रलक्ष
णोपेतं हैमं वा राजतं तु वा॥ सहस्रनिष्कमात्रेण न दर्भेनापि कारयेत्॥ तदर्धार्धेन वा कुर्यात्सर्वलक्षण
लक्षितं॥ पूर्वोक्तदेशकाले च देवाय विनिवेदयेत्॥ अथमंवाप्रदानतः शिवाय परमेष्ठिने॥ ब्राह्म ॥राम॥
णाय रविजायश्रोत्रियायाहिताग्नये॥ शिवमुद्दिश्य दानतः शिवसंपूज्य पूर्ववत्॥ एवं यः कुरुते दानं ॥१७३॥

शिवभक्तिसमन्वितः ॥ स्थित्वा स्वर्गे चिरं कालं राजा गजपतिर्भवेत् ॥ चिरकालावछिन्नस्वर्गवासनतउत्तरगजप
तिराजत्वभवनकाम इति सङ्कल्पः ॥ ॥ अथ विष्णुगजदानं ॥ गारुडे ॥ योजगन्निधये नागं प्रयच्छति महाम
तिः ॥ भद्रजातिसमुद्भूतं पद्मनाभाय भक्तितः ॥ कण्ठकंबलशोभाढ्यं घंटाचामरभूषितं ॥ वरत्नांकुशसंयु
क्तमनेकस्वर्णभूषणं ॥ नानामंडनभूयिष्ठं चारुडिंडिमडंबरं कृत्वा विष्णोर्महापूजां कार्तिकैकादशीदिने
द्वादश्यामर्पयेत्तत्तु देवदेवाय चक्रिणे ॥ त्रिलोकीनाथ देवेश सर्वभूत कृपानिधे ॥ गजदानेन तुष्टस्त्वं प्रय
च्छ मम वांछितं ॥ इत्युच्चार्य यथानंदत्वा प्रणिपत्य जगत्प्रभुं ॥ सुरेन्द्रलोकमासाद्य क्रीडते कालमक्षयं ॥ त
तो भूलोकमासाद्य सार्वभौमो नृपो भवेत् ॥ सुरेन्द्रलोकाधिकरणभोगोत्तरैहिकसार्वभौमत्वकाम इति
संकल्पः ॥ ॥ अथ सूर्यगजदानं ॥ सौरपुराणे ॥ निवेदयति यो भक्त्या नागं स्वर्णघलंकृतं ॥ सूर्याय प
र्वदिवसे तस्य पुण्यफलं शृणु ॥ समंतैरावणाप्रख्यैर्गजयुक्तैः सुशोभनैः ॥ प्रक्रीडति महायानैः शान्तसंख्ये

रनेकशः ॥ सप्तद्वीपसमुद्रायां क्षितौ नौ नरपतिर्भवेत् ॥ भुक्त्वा स विपुलान्भोगान्प्रलये समुपस्थिते ॥ सूर्ययो
गसमास्थाय सततं चैव प्रतीयते ॥ सूर्याय सूर्यभक्तद्विजब्राह्मणायेत्यर्थः ॥ अन्येतु सूर्यदेवालयादावुक्तंग
मिच्छंति ॥ ॥ अथ दासीदानम् ॥ आग्नेये ॥ अलंकृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ॥ ब्राह्मणाय प्रदात
व्या मंत्रेणानेन भक्तितः ॥ इयं दासी मया तुभ्यं श्रीवत्सपतिया दिना ॥ सदा कर्मरी भोग्याय यथेष्टं भज मश्नुते
पंचवर्षाधिका सा तु चत्वारिंशत्समावधि ॥ दासीविषय दानव्या दासदानेप्ययं विधिः ॥ एवं दत्वा महारा
जकृतकृत्यो भवेन्नुमान् ॥ दासीं समीक्ष्य वरशोभां गृहकार्यदक्षां यो ब्राह्मणाय कृतशीलवते ददाति ॥ वि
द्याधराधिपतिभिः प्रतिपूजितोसौ मर्त्यः प्रयाति स्वजनैः सह विष्णुलोकं ॥ कौर्मेतु ॥ दासीं दद्याद्यथाशक्ति
मत्सेनालंकृतां शुभां ॥ सुवर्णरत्नैः सार्द्धं च विधिवद्दक्षिणायुतं ॥ वित्तानुसाराद्रत्नं दत्वा विप्राय गृहमेधि
ने ॥ मेदनेक्षरसालोके यावत्कल्पशतत्रयमित्युक्तम् ॥ अत्र च कालविशेषमाग्नेये ॥ स्थिरनक्षत्रसंयु

क्रे सोमे सौम्यग्रहान्विते ॥ दानकालं प्रशंसन्ति नः पर्वणि वा पुनरिति ॥ अथ प्रयोगः ॥ स्थिरलग्ने सोमे सौम्य-
ग्रहयुक्ते पर्वणि वाद्यानन्तयकल्पावच्छिन्नाप्सरोलोकाधिकरणकमोदविद्याधिराजिप्रपूजितत्वाउत्तुङ्ग
देहिकसुखभोगोत्तरस्वजनसहितविष्णुलोकगमनकामो दासीदानं करिष्ये इति संकल्प्य ब्राह्मणं हूत्वा तं
दासीवस्त्राभूषणैर्वासोभिश्चालंकृत्य संपूज्य फलहस्त्वार्थेमां दासीं प्रजापतिदेवत्यां यथाशक्त्यलंकृतां तु
भ्यं संप्रददे न ममेति दासीं दक्षिणाकरणपात्रहस्ते दत्वा इयं दासी मया तुभ्यं श्रीवत्सप्रतिपादिता ॥ सदाकर्म
करी भोग्या यथेष्टं भद्र मम सुते इत्युक्त्वा यथाशक्ति सुवर्णं दक्षिणां दत्वा क्षमाप्य विसर्ज्य सीमान्तमनुव्रज्य क
र्मेश्वरार्पणं कुर्यात् ॥ अथ रथदानं ॥ कौर्मे ॥ रथं चतुर्वर्तीवर्दयुतं धान्याढ्यं तथा ॥ वित्तानुसारात्सर्वैश्चर
थोपकरणैर्युतं ॥ सदक्षिणं च विप्राय दत्वा शिवपुरं व्रजेत् ॥ धान्यानीति अष्टादशेति मदनरत्नः ॥ एक
वचनांत धान्यपदेन समाससंभवाद्दुवचनेन समासे निर्णायकप्रमाणाभावाद्यत्किंचिदेकं धान्य

मितिनुडक्रम् ॥ रथोपकरणानिमंत्रश्चप्रयोगेस्मृतः ॥ ॥ अथप्रयोगः ॥ शिवपुरगमनकामोरथदानंकरिष्ये
इतिसंकल्प्यदेयंरथंविप्रंचसंपूज्येमंरथंवर्द्दचतुष्टययुतंयथाशक्त्यास्वादशाधान्यान्वितंयुगयोक्त्रतोत्रवरत्रा
द्युपकरणयुक्तंउन्नानांगिरोदेवत्वंनुभ्यंसंप्रददेनममेतिउक्त्वा ॥ रथायरथनाथायनमस्तेविश्वकर्मणे·विश्व
रूपायनाथायअरुणायनमोनमः ॥ इत्युक्त्वायथाशक्तिसुवर्णंदक्षिणांदत्वाईश्वरार्पणंकुर्यात् ॥ अथगंत्रीरा
नम् ॥ साचगजाश्वबलीवर्दयुतनत्वभेदेनत्रिधा ॥ गारुडे ॥ गंत्रींतुरगसंयुक्तांयोददातिद्विजातये ॥ सर्वकामस
मृद्धात्मासराजाजायतेभुवि ॥ आस्तीर्णांमृदुवस्त्ररणांयोक्त्रयुक्तांसकूवरां ॥ युक्तांचतुर्भिस्तुरगैर्दाभ्यांवाशक्ति
तोयुतां ॥ पुण्येह्निविप्रमाहूयकृत्वावस्त्रादिभूषितं ॥ सदक्षिणांयथाशक्त्यांदद्यान्स्वयनमानमः ॥ तथा
सत्वक्त्राक्षयुगेयेनांमन्त्रवारणभूषितां ॥ एवंप्रदद्याद्विधिवद्गंत्रींमंत्रेणमानवः ॥ विमानेनार्कवर्णे
नदेववद्दिविमोदते ॥ बलीवर्दयुतांवापिविप्रायषनिपादयेत् ॥ इहलोकेभवेद्राजाबलवान्धर्मव

त्मलः॥ नन्नन्फलोद्वेरखोमेत्रश्रवणयोगेस्मृतः॥ ॥अथप्रयोगः॥ ॥सर्वकामसमृद्धिपूर्वकराजत्वभवनका
मइतितुरगगंत्र्यांस्वर्गाधिकरणकार्कवर्णविमानकरणकदेवसहितानंदप्राप्तिकामइतिहस्तिगंत्र्यां॰वल
वशमिकराजत्वभवनकामइतिहषगंत्र्यांसंकल्प्यक्षामारोपस्कृतांगंत्रींविपंचसंपूज्यफलमुच्चार्यमांगंत्री
चक्राक्षयुतांयोक्त्रावरूढकूवरांमन्नेभद्रपयुक्तांचतुर्भिर्वाभ्यांवानुरगैरेतत्संख्याकैर्वलीवर्दैर्वायुक्तांमध्यास्तृ
नविचोर्णायटांपट्टकूलकौशेयाद्यादिनांकौशेयविनानसहितामुच्चानांगिरोदेवत्वांनुभ्यंसंप्रददेनममे
निदत्वा॥ गंत्रीमिमांप्रयच्छामिविश्वकर्माधिदैवतां॥ दानेनानेनभगवान्प्रीयतांमेयदःप्रमान्॥ इतिपठि
त्वायथाशक्तिसुवर्णदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात्॥ ॥अथशिविकादानम्॥ ॥आग्नेये॥ मार्ग
शीर्षेशुभेयक्षेसमुपोष्यहरेर्दिने॥ माघफाल्गुनयोर्वापिवैशाखस्यशरत्सुच॥ द्वादश्यांहरिमभ्यर्च्यक
लशोपरिसंस्थितं॥ शंखचक्रगदाशार्ङ्गधरंभक्त्याहिरण्मयं॥ शिविकांवक्रवंशांथामृत्सुदारुमयींविभो

॥ दा.वि ॥ आनीयसन्निधिंविप्रोःशुभछत्रसमन्वितां ॥ संपूज्यचसगंधाद्यैःकांजागरंतत्रकारयेत् ॥ प्रातःसभार्यमभ्यर्च्य
॥१७६॥ वासोभिःकर्णभूषणैः ॥ उपानच्छुरिकाखड्गयष्टिकंचुकवेष्टकाः ॥ आदर्शःस्थगिकापानीयपात्रंकांस्यभाज
नं ॥ चत्वारोहयषभादेयाधेनवश्चसुलक्षणाः ॥ शिबिकावाहकानांतुनथैवछत्रधारिणः ॥ हन्निर्देयानथा
न्नंचवर्षाहंब्राह्मणस्यच ॥ वर्षेवर्षेपुनर्देयंब्राह्मणायनदेवतु ॥ इहामुत्रकरुत्राणंकुरुकेशवमेविभो
गछत्रंत्वन्नीनयेदत्तंब्राह्मणायमयाशुभं ॥ देवदेवजगन्नाथविरूपाक्षावयानघ ॥ प्रभोशिबिकयादेव
प्रीतोभवजनार्दन ॥ दत्वानुज्ञांतुविप्रेषुसपत्नीकायपुत्रिणे ॥ सुरायस्मैयक्रन्सगीत्रसशागरुनलगः
शिबिकादानमाहात्म्याद्दसंतेयानकान्कुटं ॥ पितृपक्षंमातृपक्षंपत्नीपक्षंनथैवच ॥ आत्मानंबंधुपक्षं
चनारयेन्नरकार्णवात् ॥ भुक्त्वासविपुलान्भोगानिहामुत्रसुखप्रदान् ॥ सपत्नीकःसपितृकोविष्णुसायु ॥ राम ॥
ज्यमश्नुते ॥ शुभेशुक्ले ॥ अत्रशिबिकादानसैवप्राधान्यं ॥ छत्रादिदानस्यांगत्वं ॥ वृषाधेनवश्ववाहकानां(॥१७६॥

हन्ति रिनिकेचिन् ॥ भद्दष्यार्थं दानमंगभूनमिसन्ने ॥ खङ्गपद्द्दमेकंयदमिनिकेचिन् ॥ पद्दंकठिवंधनार्थं
वस्त्रमिनमे ॥ स्थगिकाजलपात्रावलंवनयोग्यकाष्टत्रयनिर्मितालोकेन्निकथीनिप्रसिद्धा ॥ ॥ अथस्वयोगः ॥ मा१
र्गशीर्षशुक्लेकादश्यामन्यस्मिन्वापर्वणि॰संभाविनब्रह्महत्यादिमहापातकनाशपितृमातृपत्नीपक्षापत्यवंधु
पुरुषनरकार्णवनारणपूर्वकैहिकामुष्मिकविपुलभोगान्तरपितृमातृसहितात्मविष्णुसायुज्यकामः श्रीवि
काशनंकरिष्येइतिसंकल्पशुचौदेशेकलशंसंस्थाप्यनत्रयथाशक्तिसुवर्णनिर्मितशनिमायांहरिमावाह्या
भ्यर्च्यहरिसन्निधौवक्ष्यमाणोपस्करयुतांशिविकांसंस्थाप्यनिशांजागरेणनीत्वाप्रातर्हरिंविप्रंचाभ्यर्च्यविश
यवस्त्रयुग्मकर्णाभूषणपादुकोपानच्छुरिकाखड्गकंचुकचर्मधनुःशराः ३ दर्शपानीयपात्रकांस्यपात्रहयभ
वत्सरंवर्षपर्याप्तंभक्ष्यंचसमर्प्यशक्तौवर्षपर्याप्तमन्नाच्छादनादिकंयावज्जीवंचप्रतिवर्षंदेयं ॥ हस्तछ
त्रापिचचाराकुरुकेशावमेविभो ॥ छत्रंत्वन्तीनयेदन्तंवासराणापमयाशुभमिनिछत्रंसमर्प्यछत्रधारिणे

॥दा·वि॥ वर्षपर्याप्तं वेन नंदत्वाशिविकावाहकेभ्यो हेन्नमेभ्यः परमधर्मेभ्यश्च नरवरेभ्योपि वर्षपर्याप्तं वेन नंदत्वा०
॥१७८॥ फलमुच्चार्यैमां शिविकां वक्रवंशोथां काष्ठदारुमयीं गजदंतमयीं भुक्तिमयीं वा चित्रोराणि पट्टछादिनां शिरोपधा
नगंडोपधानद्वयसुतां उन्नानां गिरौ देवमां तुभ्यं संप्रददेन ममेनिसमर्पया ॥ देवदेव जगन्नाथ विरूपाक्षा व
यानघ ॥ प्रभोशिविकया देवशीत्रो भव जनार्दने निपठित्वा यथाशक्ति सुवर्णदक्षिणां दत्वा कर्मेश्वरार्पणं कु
र्यात् ॥ अथ भूदानं ॥ हेमाद्रौ भारते ॥ न भूमिदानाद्दस्तीह परं किंचि युधिष्ठिर ॥ भूमिं देवाददुः पूर्वं ये भूमिं
भुंजते धुना ॥ भूमिदेवा राजानः ॥ तथा संग्रामे वा तनुं जह्या द्द्याद्वा पृथिवीमिमां ॥ अल्पां न रश्मिं दद्याश्च नु०
राराणामेनि रेजनाः ॥ यो यजेताश्वमेधेन दद्याद्वा साधवे महीं ॥ तथा ॥ अत्र गाथां भूमिकृतां कीर्तयंति पु
राविदः ॥ निवर्तनसहस्त्रांशा सर्वे स्पर्शरोहिणीं ॥ दद्याद्भूमिफलो पेतां भूमिदानं न उच्यते ॥ अशक्तो कोमें ॥राम॥
गोचर्ममात्रं भूखंडमधिकं वा स्वशक्तितः ॥ त्रिधा सदक्षिणां कृत्वा दत्वाशिवपुरं व्रजेत् ॥ त्रिधे नित्रिधे कसु ॥१७८॥

वर्णा दक्षिणायुक्तमित्यर्थः॥ गोचर्ममानं परिभाषायामनेकप्रकारमुक्तं न त्र फलतारतम्यं कल्प्यं॥ भूम्यशक्तौ वि
ष्णुधर्मे॥ हस्तमात्रं तु यो दद्याद्भूमिदानफलं नरः॥ मात्स्ये॥ भवनस्थानमात्रां गां सोपि पापैः प्रमुच्यते॥ गृहकरण
पर्याप्तामित्यर्थः॥ काम्यकल्पा विष्णुधर्मे॥ यस्य देवस्य यद्भवनस्य देवस्य सोश्नुते॥ वेश्मार्थमित्यस्य भुवं ददाती
ति शेषः॥ देवस्य तस्य लोकानि निश्चयः॥ उद्यानभूमिं दत्वा च गंधर्वैः सह मोदते॥ लवणाकरभूमिं च अब्धितो
के महीयते॥ इंधनाकरभूमिं तु वह्निलोके महीयते॥ सर्वधान्यभुवं दत्वा रुद्रलोके महीयते॥ केदारभूमिं धर्म
ज्ञो यः प्रयच्छति धर्मतः॥ महापुण्यमवाप्नोति ब्रह्मलोकं च गच्छति॥ इक्षुभूमिं नरो दत्वा शालिभूमिं तथापि वा
सोमलोकमवाप्नोति सर्वकामांश्च विंदति॥ गुल्मप्रवलताकीर्णां यो भुवं संप्रयच्छति॥ विमानेन नंदने सोथ क्री
डत्यप्सरसां गणैः॥ पुष्पवत्फलवान्वृक्षान्दधंतीं पृथिवीं ददत्॥ स्वर्गलोकपरिभ्रष्टो नगराधिपतिर्भ
वेत्॥ आरामभूमिदो विप्रो नंदने क्रीडते दिवि॥ ग्रामप्रदः स्यान्नृपतिः सम्राड्नगरदो भवेत्॥ समयवसुधे

॥दा॰वि॥ ज्ञः स्यात्सक्रवर्ती च राज्यदः ॥ पक्कसस्यांवसुमतींयोलंकृत्यप्रयच्छति ॥ कामगेन विमानेन ब्रह्मलोकं स गच्छति-
॥१६८॥ नस्मात्क्रीत्वा महीं दद्यात्स्वल्पामपि विचक्षणः इति ॥ दत्तभूम्यपहारेन नैव ॥ स्वदत्तां परदत्तां वा यो हरेत्तु वसुं-
धरां ॥ अर्थिनो गलितमात्रां तु प्रमाणत्रज्ञानमोहितः ॥ वहुन्यब्दसहस्राणि धर्मो पितुरूपोत्तमः ॥ विष्टायां कृमि-
तामेति पितृभिः सहितस्तथा ॥ स्वराष्ट्रे परराष्ट्रे वा देवब्राह्मणसंस्कृतां ॥ चिरं नरकमाप्नोति हृत्वा भूमिपतिर्भु-
वं ॥ अनेन ब्राह्मणाय दत्ता भूर्नापहर्या ॥ क्षत्रियादिभ्यो दत्ताय रणे दोषो नास्ति ॥ तथा ॥ राजा स्वसेवकेभ्यो वे-
तनार्थं भूर्दीयते नैश्वब्राह्मणेभ्यो याचीयते भूस्तदपहारेन दोषः ॥ तेषां स्वत्वाभावेन दानानधिकारात् ॥ पर-
दत्ताभिमेनेन सांगदानस्य विवक्षणात् ॥ यात्तु राज्ञा स्वस्वसेवकेभ्य एव वृत्त्यादिना वा दत्ता नत्मध्यस्था ॥राम॥
व भूर्ब्राह्मणाय दत्तानदपहारे दोषः ॥ यातु शत्रुजयेन गृहीता शत्रुणा पूर्वं यस्मै ब्राह्मणाय दत्ता स्थिता तद ॥१६८॥
धीनकरणपुरणं अपहारेन दोषः ॥ भूमिं हत्वा तु यः कुर्यात् देवब्राह्मणसात्ततः ॥ स्वर्गलोकमवाप्नोति पुरुषो

पिसुदारुणा इति हेमाद्रौ विष्णुधर्मे ॥ नदधीनकरणे फलश्रवणात् ॥ स्वदत्तामितिवाक्यस्य शास्त्रजिनभूम्यति
रिक्तपरत्वादिति ॥ नाभूमिपतिनाभूमिरधिषेया कथं चनेति भारतमपि शास्त्रजिनभूमेः स्वीकरणाभाव
परं ॥ नत्वसत्स्वकरदीनस्थापनीयः ॥ इत्यसुपसंगागतं· अत्र चसुवर्णं दक्षिणा ॥ अभोगविभुविप्राज्ञैः सु
वर्णं दक्षिणामनेनेति मांडव्योक्तेः ॥ प्रतिग्रहश्चसाक्षान्मनसावाप्रदक्षिणां कुर्वेति ॥ अथप्रयोगः ॥ शिवपुर
व्रजनकामः स्वर्गलोकमहितत्वकामो वा जन्मप्रभृतिसंभावितपापनकनाशकामो वा एकविंशतिकुलतारण
कामो वा कृष्णक्षेत्रदानेसंततानवछिन्नश्रीप्राप्तिकामो· रत्नादिमद्भूदानेसकलवंशसमुद्धारणकामो भूमि
दानं करिष्ये इति संकल्प्य भुवं ब्राह्मणांश्च संपूज्य फलमुद्दार्येमांगं गोचर्मव्यामं विष्णुदेवत्यां भुवं तुभ्यं संप्रद
दे इति संकल्प· यथाभूमिप्रदानस्य कलां नार्हंति षोडशीं ॥ दानान्यन्यानि मेशांतिर्भूमिदानाद्भवंत्विहेतिमं
त्रं ॥ सर्वसस्याश्रयाभूमिर्वराहेणासमुद्धृता ॥ अनंतसस्यफलदा अनः शांतिं प्रयच्छ मे इति वा मंत्रं पठित्वा ९

॥ स्कं·वि ॥
॥१८९॥

कृष्टभूमौ तु सप्तरोहं निर्वीजानि फालकृष्टे महीतले ॥ तव प्रसादात्सकला मम संतु मनोरथाः ॥ इति सुवर्णं तत्
यंत्रयं वा दक्षिणां दद्यात् ॥ प्रतिग्रहीता दक्षिणां कुर्वन्प्रतिगृह्णीयात् ॥ ग्रामदाने तु सर्वे यायक्षक्षयपूर्वकदेय
ग्रामादायभरणायोग्यगुरुरूपसंख्यदशकला वच्छिन्नस्वर्गावासप्राप्त्यैहिकधनधान्यप्राप्तिकामो ग्रामदानं क
रिष्ये इति संकल्प्य ग्रामं विप्रं च संपूज्य फलमुच्चार्य ममशुकनामकग्रामं सस्योत्पत्तिजलाद्याय स्थानानेकवृ
क्षलतागुल्मादिमनोहरं विष्णुदेवतं तुभ्यं संप्रददे न ममेति संकल्प्य सुवर्णां दक्षिणां दद्यात् ॥ शिवधर्मे ॥
यः शिवाय फलोपेतां सर्वसस्यप्ररोहिणीं ॥ महीं महीपतिर्दद्यात्तस्य पुण्यफलं शृणु ॥ यावद्दंडा भवेद्भूमिर्दी
यमानाः समंततः ॥ स तावत्कल्पसंख्यानं रुद्रलोके महीयते ॥ [illegible] ॥ विश्वे विषयं ग्रामं ग्रामार्द्धमपि वा र
क्षितः ॥ दत्वा क्रीडति वैकुंठ — — कुंठेषु निरंतरं ॥ यः सूर्याय फलोपेतां सर्वसस्यप्ररोहिणीं ॥ महीं महीप
तिर्दद्यात्तस्य पुण्यफलं शृणु ॥ भूभागाश्चैव यावंतो भूतले भांति सन्नम ॥ तावद्युगसहस्राणि सूर्यलोके म

॥ राम ॥
॥१८९॥

दीयते ॥ शिवविष्णुसूर्येशब्रह्मणायेनित्यपार्थः ॥ अथ गृहमण्डपदानं मात्स्ये ॥ पक्वेष्टकामयं वापि
शैलेयं वापि दारुजं ॥ मृण्मयं वापि भवनं शुभलक्षणसंयुतं ॥ मंचावरणशोभाढ्यं धेन्वा चैव समन्वितं
अर्जुनैः सरलै रम्यैः शालैश्चैव मनोरमं ॥ शुभस्थाने समुत्पन्ने वास्तुलक्षणसंयुतं ॥ देवतायतनकं तत्र चत्वा
रिंशत्समन्वितं ॥ पूजयित्वा यथान्यायं ततो दद्यात् गृहं गृही ॥ प्राप्ते दानदिने कार्यं मंडपान्यां हस्तसंमितं ॥ चतु
रस्रं समं कुंडं मेखलायोनिभूषितं ॥ पूर्वोत्तरे हस्तमितां च वेदीं गृहादिदेवेश्वरपूजनाय ॥ अर्चार्थं नं ब्रह्म
शिवाच्युतानां सूर्यस्य कार्यं फलमाल्यगंधैः ॥ द्वारे तु कार्याणि च तोरणानि पंचैव पिक्षीरवनस्पतीनां ॥ म०
ध्ये च संस्थाप्य स रत्नकुंभं रत्नं गोधधूपांवा रत्नयुक्तां ॥ गृह्योक्तेन विधानेन कृत्वा चाग्निमुखं ततः ॥ ततः शुभं
चैव च रुद्रहोमं मध्यास्थितानां गृहदेवतानां ॥ वलिं च सम्यग्विधिवत्प्रयुंज्य क्षीरेण धारां परितस्तु दद्यात् ॥
ब्राह्मणं दक्षिणां पूर्वं परितुष्टं क्षमापयेत् ॥ ततो गां दक्षिणाभागे तु सोपधानां सदीपकां ॥ सितवस्त्रैः सुसंछ

न्तं लक्ष्मीनारायणान्वितां ॥ सितांबरं कुंडलहेमभूषितं केयूरकंठाभरणाभिरामं ॥ पत्नीसमेतं च करे गृही-
त्वा दानपटे मंत्रमिमं गृहस्थः ॥ मंत्रः प्रयोगे स्पष्टः ॥ एवमुक्त्वाथ देवेशं सपत्नीकं द्विजोत्तमं ॥ निलयस्थो-
परिस्थाप्यांशय्यायामुपवेशयेच्च ॥ वदेदिदं ततो वाक्यं सर्वधान्ययुतं त्विदं ॥ सर्वोपस्करसंयुक्तं गृहं गृहाण द्वि-
जोत्तम ॥ तथोपकरणं सर्वं हेमपात्रो विनिवेदयेत् ॥ यच्च वस्त्रं सर्वसंपन्नं यत्केष्टं विनिवेदयेत् ॥ कल्पको द्विजा-
तं यावद् इसलोके महीयते ॥ शैलजं दारुजं वापि यो दद्याद् विधिपूर्वकं ॥ वसेत्क्षीरार्णवे रम्ये नारायणसमीप-
तः ॥ मृण्मयं चैव यो दद्याद् गृहं चोपस्करान्वितं ॥ पुरे च लोकपालानां प्रतिमन्वन्तरं वसेत् ॥ धेन्वाचेति ॥ इदं च
गृहं दीपश्रीभोगो नद्धायनासनभाजनैः ॥ उपस्करैश्च संपूर्णं सर्वधान्यप्रपूरितमिति निवासान्तोपस्करोप-
लक्षणं ॥ देवनायत्वकमिति यंत्र चत्वारिंशद्देवनापूजनं वास्तुशांतिः ॥ सांचात्रदानां गत्वेन विहितान द्विधि-
गृहकरणप्रकारनक्षत्रादिकं चापि नक्षत्राणि सारे स्पष्टमत्रापि प्रयोगे ॥ दक्षिणां पूर्वमिति दक्षमानितं

चेत्यर्थः लक्ष्मीनारायणे नि ॥ तल्लक्षणं कामिके ॥ दक्षिणाधःकरे पद्मं शंखमूर्ध्वकरे न्यसेत् ॥ वामोर्ध्वे च
भवेच्चक्रं लक्ष्मीपृष्ठे परः करः ॥ वामोत्संगगता लक्ष्मी रत्नपात्रकरा भवेत् ॥ दक्षिणास्तु भुजो देव्याः पृष्ठे दे
वस्य चक्रिणा इति ॥ यत्र वसिमिति · इदमपि गृहदानान्तु स्वीप्राप्तो वितन्नः सर्ववस्तुभ ॥ इति संवर्तोक्तफल
स्य क्रीडित्वा सचिरं स्वर्गे मानुष्यं लोकमास्थितः ॥ भवत्यनाहतैश्वर्यः सर्वकामसमन्वितः इति गारुडोक्तफ
लस्याप्युपलक्षणं ॥ ॥ अथ प्रयोगः ॥ दानावास्तु शास्त्रोक्तं वास्तुमंडलयज्ञं विधाय नवं गृहं कृत्वा धान्या
दिभिरापूर्य गृहांगणे ईशाने वस्त्रादिना चतुर्धारं मंडपं कृत्वा द्वारेषु क्षीरद्रुमयत्रैस्तोरणानि निबध्वा तन्मध्ये
हस्तमितं कुंडं तदीशाने हस्तमितां वेदिं च कृत्वा करिष्यमाणगृहदाननिर्विघ्नतासिद्ध्यर्थं गणेशपूजनादिक
रिष्ये इति संकल्प्य गणेशपूजनं स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धानि कृत्वा वास्तुशांतिं क्षीरदानांतां कृ
त्वा गृहदक्षिणभागे अच्छत्रस्य परिमितानि तेषु शय्यायां लक्ष्मीनारायणप्रतिमां संपूज्य प्रतिग्रहीतारं संय

त्नीकं यथाविभवं वस्त्रालंकारादिभिरलंकृत्य मंगलघोषपूर्वकं करे गृहीत्वा शुभे मुहूर्ते गृहं प्रवेशयेद्देशैर्म
न्त्रैः ॥ एषोहि नारायण दिव्यरूप सर्वामरैरर्चितपादपद्म ॥ शुभाशुभानंदभुवामधीश लक्ष्मीयुतस्त्वं हि गृ
हं गृहाण ॥ नमः कौस्तुभनाभाय हिरण्यकवचाय च ॥ क्षीरोदार्णवसुप्ताय जगत्स्रष्ट्रे नमो नमः ॥ नमो हिर
ण्यगर्भाय विश्वगर्भाय वै नमः ॥ भूर्लोकपञ्चखालोकास्त्रवगर्भे व्यवस्थिताः ॥ नन्दन्ति यावत्कल्पान्तं तथास्मि
न्भवने गृहे ॥ त्वत्प्रसादेन देवेश पुत्रपौत्रयुतो गृहे ॥ पंचयज्ञक्रियायुक्तो वसेदावंदनारकं ॥ ततः पात्रं श
य्यायामुदक्सुखमुपवेशयेत्प्राङ्मुखो देशकालौ संकीर्त्य सकलकलुषक्षयसिद्धसंग्रहपूजितत्वाक्षरोगणाक
रकलिनामरत्वामरवीज्यमानत्वसंभाविनन्नरकमज्जनपित्रादिपुत्रपौत्रवरुवं धुनारणरुल्पकोटिश
तावधिककालब्रह्मलोकमहित्वकामश्चनियतक्षेत्रिकाविरचितेनैनेनारुजेनकलिकलुषविमुक्तवरुसिद्ध
पूजितत्वाक्षरोगणाकरकलिनामरत्वामरवीज्यमानत्वसंभाविननरकमज्जनपित्रादिपुरुषदानव — पु

उपोषणाद्दिव्यभोगोत्तरैहिकराजराजत्वषाण्मिषीरार्थावाधिकरणकनारायणसमीपगमननारायण
वलोयेनत्वनारायणपरायणात्वनारायणकथासंस्त्रवशरीरावछिन्नसुखित्वशनवर्षजीवित्वकामः॥ केव
तनृत्यमयेनुस्कैकमन्वंतरावछिन्नशतिलोकपालपुरनिवासकामः॥ इदं गृहं नानाविधधाम्यदासीदासगो
महिषीशय्यापीठपादुकाकांस्यपात्रताम्रकुंभपित्तलदीपोपानच्छत्रसोपस्करतांबूलकरंडनानाविधभूषण
युसलोलूखलशूर्पमार्जनीकुद्दालदात्रकुठारखनित्रसूचीकर्तरीशर्कराणिलखंडगुडघृततैललवणाई
हिंगुमरीचधान्यकजीरकसर्षपहरिद्राशुंठीपिप्पलीशिलापुत्रकादियथामिलितोपस्करसामग्रीलोहक
नकानेकविधवस्तुयुतंपक्केष्टकारचितंदारुशैलरचितंवासर्वदैवतमंडकगोत्रप्रवरायतुभ्यंसंप्रददेनम
मेतिदत्वा॥ इदं गृहं गृहदानं सर्वोपस्करसंयुतं॥ नवविधप्रसादेन ममास्त्वभिमतं फलं॥ गृहं ममविभ्रमस्य
र्थं गृहाणत्वं द्विजोत्तम॥ प्रीयतां मे जगद्योनिर्वास्तुरूपीजनार्दन इति पठित्वा॥ सहस्रसुवर्णांस्कसुवर्णानां

शक्त्या दक्षिणां दत्वा ॥ संपन्नं वाप्यसंपन्नं गृहोपस्करभूषणं ॥ सर्वं संपूर्णमेवास्तु त्वत्प्रसादाद्द्विजोत्तमेति ।
प्रार्थयित्वा संपूर्णतां वाचयित्वेश्वरार्पणं कुर्यात् ॥ अथ गृहमठदायदानं ॥ हेमाद्रौ ब्रह्मवैवर्त्ते ॥ कारयित्वा गृ
हान् रम्यान् ऋतुवत्सरकैः संख्यया ॥ भुवनाद्यादशार्द्धं वा तन्नक्षत्रसंख्यया ॥ शक्त्या वा द्विगुणानेव शतानं यावत्स
हस्रकं ॥ एवं संभृतसंभारान् गृहान् कृत्वा द्विजोत्तमान् ॥ कुलशीलसमायुक्तः सर्वभोगसमन्वितः ॥ ब्रह्मवर्षश
तान्येव स्वर्गात्तिष्ठत्यनामयः ॥ तस्मादिह समागत्य सप्तद्वीपाधिपो भवेत् ॥ बहुपुत्रो बहुधनो द्विजो वेदपार
गः ॥ ॥ अथ मठदानं ॥ स्कान्दे ॥ कृत्वा मठं प्रयत्नेन शयनासनसंयुतं ॥ पुण्यकाले द्विजेभ्योथ यतिभ्यो वा नि
वेदयेत् ॥ सर्वान्कामानवाप्नोति निष्कामो मोक्षमाप्नुयात् ॥ अत्र यतीनां प्रतिग्रहाभावात् गोदानमिति के
चित् ॥ मुख्यमेव दानं यतीनां तु पञ्चसप्त वा यदि नियतचरणाः ॥ ॥ अथ धर्मशालाकरणं ॥ भविष्यमार्कंडेययोः
प्रतिश्रये तु विस्तीर्णे कारिते सजलेयने ॥ दीनानाथजनार्थाय यद्दत्तं न क्षतं भवेत् ॥ कुर्यात्प्रतिश्रयं गृहं प ।

थिकानां हित्वावहं ॥ निजगेहैकदेशं वासाधनं योनिवेदयेत् ॥ सर्वकामसमृद्धोसौ देववद्दिवि मोदते । प्रति
श्रेयो धर्मशाला ॥ इदंवनं तु स्वदानं किं न स्वर्गमात्रं ॥ ॥ अथकन्यामलदानम् ॥ आग्नेये ॥ स्वं यच्छन्ति ये कन्यां
यथाशक्त्या स्वलंकृतां ॥ विवाहकाले संप्राप्ते यथोक्तसदृशे वरे ॥ क्रमोक्तमन्त्रदानमन्त्रपूर्वं लभन्ति ते ॥ नावन्म
गेलभे यावत्सर्वलोकांतु संचकः ॥ महीदानं च गोदानं कन्यादानं श्रियेरथाः ॥ कन्यादानानुगाः पश्चात्समायानित्र
योरथाः ॥ कन्या ह्यश्वमेधी च सारादानादिजेषु च ॥ सम्मं यानि रथाह्येने त्रयो वैनात्र संशयः ॥ पूर्वधर्ममवाप्नो
नि यथावद्विधिकल्पितं ॥ यस्मात्कन्याप्रदानेन दानवाश्रेयमिच्छता ॥ दानवे नत्स्वन स्मादित्यादिः ॥ ब्राह्मेण
तु विवाहेन यस्तु कन्यां प्रयच्छति ॥ ब्रह्मलोकं ब्रजत्येव ब्रह्माद्यैः पूजितः सुरैः ॥ यावन्ति संनिरोमाणि कन्यायाश्च
तनौ पुनः ॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ आश्वलायनः ॥ अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो
विवाहस्तस्यां जातो द्वादशावरान् द्वादशपरान् पुनात्युभयत इति ॥ भविष्ये ॥ कन्यामलंकृतां दद्यात्समाहूय न

राधिप ॥ विद्यार्थिने ब्राह्मणाय कन्यादानं न उच्यते ॥ इति भविष्यत्पुराणैकवाक्यत्वात् ॥ विवाहविधिनानेषा
मपि कन्यादानाक्षेपाच्च ॥ शूद्रस्यापि द्विजसंप्रदानकमेव कन्यादानं मुख्यं ॥ शूद्रसंप्रदानकन्यादाने तु भाक्तं
दानपदमिति मदनरत्नः ॥ ब्राह्मणसंप्रदानकमेव कन्यादानं मुख्यं ॥ अत एव नारायणवृत्तिकृता ब्राह्मदै
वार्षप्राजापत्यगांधर्वासुरपैशाचराक्षसान् विवाहानुपक्रम्य पूर्वो ब्राह्मणस्य प्रतिग्रहान्निर्दिष्टं संयोगेनादृष्टरू
पभार्यात्वोपपत्तेः ॥ क्षत्रियस्य गांधर्वराक्षसौ परापरोपर्युपदिष्टत्वात् युद्धसंयोगाच्च ॥ आसुरो वैश्यस्य धनयोगा
च्छूद्रस्येत्युक्तं ॥ अतः प्रतिग्रहपर्यंतदानस्य मुख्यत्वात् ॥ ब्राह्मणसंप्रदानकमेव कन्यादानं मुख्यमित्येके ॥
क्षत्रियादीनां प्रतिग्रहे प्रत्यवायाज्ञदंगीकारेण ग्रहणात् क्षत्रियादिसंप्रदानकदानस्य मुख्यत्वे न क्षतिरिति नि
कनिष्ठपिन्व्यवस्थाः ॥ न च शूद्रस्य विवाहविधिर्न कन्यादानाक्षेपकः ॥ गांधर्वादिविवाहसंभवादिति वा
च्यं ॥ न चापुत्रकाले दानस्यासत्वात् ॥ भविष्ये ॥ विलोक्य गोत्रनक्षत्रराशिं कूटादिकं तथा ॥ सुलग्ने सुमुहूर्ते च

स्याच्चैव यथाविधिः॥ गोत्रमित्युपलक्षणं सापिंड्यमपि स्थितं॥ नन्निरूप्य गोत्रप्रवरं निरूप्य यणं वा स्मृतं न सं
स्कारकोऽत्र वसेयं॥ अत्रैव कन्यानां वरु दाह्य येत्कन्या यावदृतुमती भवेदिति अप्राप्तरजोदर्शनाविवक्षिता॥
कुमार्यास्त्वदृश्ववर्णायाः शमनेयाणि पीडनं मिनिग्नशाशस्यपरं॥ पराशरमाधवीये तु जन्मतो गर्भाधाना
द्वा पंचमे वत्सरे शुभं॥ कुमारीवरणं दानं मेखलाबंधनं तथेत्युक्तं॥ आपस्तम्बः॥ वरगोत्रं समुच्चार्य प्रपि
तामह पूर्वकं॥ नाम संकीर्त्तयेद्विद्वान्कन्यायाश्चैवमेव हि॥ निषेषु सर्वेषु सूवोदात्तावरः प्रत्युत्सुवोभवेत्॥ म
धुपर्कोर्च्चितायैनां तस्माद्द्यान्न दक्षिणां॥ उदपात्रं ततो गृह्य मंत्रेणानेन दापयेत्॥ गौरीं कन्यामिमां विप्र
यथाशक्ति विभूषितां॥ गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रय॥ भूमिं गावश्च दासीश्च वासांसि विविधा
नि च॥ महिषीर्वाजिनश्चैव दद्यात्स्वर्णमणीनपि॥ ततः स्वगृह्यविधिना होमाद्यं कर्म्म कारयेत्॥ यथाचा
रं विधेयानि मांगल्यकृत्यकानि चेति॥ अथ प्रयोगः॥ दाता देशकालौ संकीर्त्य मम ममसमस पितृणां निरतिशा

यसानंदं ब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलाप्तये ऽस्यामुत्पादयिष्यमाणासंतत्या द्वादशावरान् द्वाद
शपरान् पुरुषान् पवित्रीकर्तुं आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये ऽमुकप्रवरायामुकगोत्रोत्पन्नायामुका
मुकशर्मणः प्रपौत्राय पौत्रायामुकनाम्ने वराय श्रीधररूपिणे कन्यार्थिने ऽमुकप्रवरान्विताममुकगोत्रोत्पन्ना
ममुकामुकशर्मणः प्रपौत्रीं पौत्रीं पुत्रीममुकनाम्नीं कन्यां श्रीरूपिणीं प्रजापतिदैवतां प्रजोत्पादनार्थं तुभ्यमहं सं
प्रददे इमुक्तां गौरीं कन्यामिति पठित्वा दक्षिणां सुवर्णं भस्मादिकं दद्यादिति जगद्गुरुनारायणभट्टाः ॥ प्र
नवाक्यमपि विरे ॥ अथारुः ॥ कन्यादानकल्पोक्तफलत्वेन नोद्देश्यतायोगसिध्द्यधिकरणविरोधापत्तेः ॥ तथा
पि सर्वेभ्यो दर्शपूर्णमासाविन्येनत्वोध्यफलत्वेनोद्देशासंभवात् ॥ लक्ष्मीनारायणप्रीतिश्च हेमाद्रिमदन
रत्नादिलिखितवचोनिचयेन तु नानफलमन्तव्यमर्हति ॥ प्रजोत्पादनार्थमिति चांतिमतानीवस्य प्रयोज
नतामावहति ॥ आत्मनश्चेति यदि समस्तपितृणामित्यनेन संबुद्धिं तुफलाप्तये भ्यनेन संबध्यते तदा

पवित्रीकर्त्तुमिच्छतेनेन न संवध्येत॥ यदिचद्वितीयार्थतांकल्पयित्वातत्रसंवंधस्तदाफलावाप्तेरास्तांसंधिता
नस्यात्॥ तस्मात्तेहद्यांदानवाक्यं॥ किंतुकमक्तनक्रतुस्थानफललाभकन्यालोमसमसंख्यवर्षसहस्रावच्छि
न्नस्वर्गवासभूदानगोदानाद्यचिन्तनित्यदानसमस्तवदनव्रमाश्वमेधत्रासरणाश्राणात्रारणसकलत्रजन्मफल
व्रमसलोकप्राप्तिकामोऽस्यामुष्यादयिष्यमाणायाःसंततयाद्वादशावरान्पूर्वकविंशत्तवरान्त्वानावदपरान्पुरु
षान्पवित्रीकर्त्तुमात्मानंचतनोगोत्रोश्रारादिपञ्जायनिदेवत्यांकन्यांतुभ्यंसंप्रददेइतिवाक्यं॥ ततःपूर्ववदि
ति॥ स्कान्दे॥ वैवाहिकप्रदानंचयोददातिदयापरः॥ महेन्द्रभवनेयातिसेव्यमानोप्सरोगणैः॥ तथा॥ आत्मी
कन्यस्तुवर्णोनयरकीयांतुकन्यकां॥ धर्मेणविधिनादानुमसमगोत्रोपियुज्यते॥ श्रुत्वाकन्याप्रदानंचापि न
रश्वपिनामहाः॥ विमुक्ताःसर्वपापेभ्योब्रह्मलोकंव्रजंतिते॥ कन्यागृहेभोजननिषेधआग्नेये॥ अप्रजायांतु
कन्यायांनभुंजीतकदाचनेति॥ दक्षः॥ मातापितृविहीनंतुसंस्कारोद्वाहनादिभिः॥ यस्तायपतिनस्नेहपुराण

संख्यानविद्यते ॥ विष्णुधर्मे ॥ भूपालं यः श्रुतं राज्ञा स्वराज्ये स्थापयेत् नः ॥ सयाति शक्रसालोक्यं यावच्छ
क्राश्चतुर्दश ॥ न तो मातृव्यमासाद्य राज्ञा भवति धार्मिकः ॥ स्थानभ्रष्टस्य यः कुर्यात् भूपस्यारोपणं नरः ॥ नाक
लोकमवाप्नोति चिरं तेनेह कर्मणा ॥ अथ कपिलाधेनुमहादानं ॥ कपिला दशधा ॥ सुवर्णकपिला पूर्वा द्वि
तीया गौरपिंगला ॥ तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥ पंचमी बहुवर्णा स्यात् षष्ठी च श्वेतपिंगला ॥ स
प्तमी श्वेतपिंगाक्षी अष्टमी कृष्णपिंगला ॥ नवमी पाटला ज्ञेया दशमी पुच्छपिंगलेति ॥ व्यासः ॥ सवत्सां कपिलां
दत्वा वंशान् सप्त समुद्धरेत् ॥ यावंति चास्या रोमाणि सवत्सायां नवं निहि ॥ सुरभीलोकमासाद्य रमते तावतीः
समाः ॥ विधिमाह यमः ॥ रुक्मशृंगीं रूप्यखुरां मुक्तालांगूलभूषितां ॥ कांस्योपदोहनां धेनुं वस्त्रछन्नामलंकृ
तां ॥ दत्वा द्विजेंद्राय नरः स्वर्गलोके महीयते ॥ दशधेनुप्रदानेन तुल्यैका कपिला मता ॥ सहस्रं योगवां द
त्वा कपिलां वापि सुव्रतः सममेव पण्डिताः प्राहुर्ब्रह्मा ब्रह्मविदांवरः ॥ विष्णुधर्मे ॥ त्रिरात्रं स्थंडिले सुप्त्वा त्रिरात्रं

गोरसाशनः॥ नस्नानंनर्पिनेदद्याद्यससामंहनेद्विजे॥ अहनांवरसंवीमांत्रिरात्रंगोरसेस्तनः॥ प्राणसंधार
णंकृत्वागवांलोकेमहीयते॥ दत्वैवंकपिलांविप्रःअग्नोत्यधिकंफलं॥ रुक्मरूप्यकांस्याग्रतुक्तपरिमाण,
त्वायथाशक्त्यैतिकेचिन्॥ अन्येतु॥ दशमोवर्णिकेश्रृंगेखुराःपंचपलान्विताः॥ पंचाशत्पलिकंकांश्यंनाश्रंवै
नावदेवतु॥ वस्त्रंतुत्रिगुणंधेन्वादक्षिणाचचतुर्गुणं॥ गोदानदक्षिणायेक्षायाचतुर्गुणेत्यर्थः॥ एतेनैर्दलंकृ
तांधेनुंघंटांवरविभूषितां॥ कपिलांविप्रमुख्यायदत्वामोक्षमवाप्नुयात्॥ एतेनरूपस्कंरैर्युक्तामहनीकपि
लासृता॥ दत्वासाविप्रमुख्यायस्वर्गलोकफलप्रदा॥ सप्तजन्मकृतान्यायान्मुच्यतेदशसंयुतः॥ दशाभिःपु
रुषैःसहितः॥ यान्यान्यार्थयतेकामांस्तांस्तान्प्राप्नोतिमानवः॥ अनेनस्वर्गापवर्गौचफलमाप्नोत्यसंज्ञायमि
तिकौमेर्मांक्तंपरिमाणमित्याहुः॥ पितृचरणास्तुकौर्मेमहत्स्वद्मवणान्॥ एतैर्विनादिनागुणाफलानिश्च
यसोक्तैर्गुणाफलासंबंधइत्याहुः॥ अत्रसामान्यगोदानेनिकर्तव्यताउक्ता॥ त्रिरात्रंगोमयआहरोस्क

॥ दा·वि ॥ ॥१८६॥

ण्त्रं पंचगवां ह्रदेवापरेद्युर्देशकालौ संकीर्त्य स्वर्गलोकमहितत्वगोसहस्रदशधेनुदानजन्यफलप्राप्ति
कामः पितृपुत्रादिदशपुरुषकर्त्तृकसप्तजन्मकृतपापनाशपूर्वकसकलेहिककामप्राप्त्युत्तरस्वर्गभोगो
त्तरमोक्षकामः कपिलाधेनुमहादानं करिष्ये इति संकल्प गोक्षीरघृताभ्यां विष्णोः शिवस्य वा पुरुषसूक्तेन
रुद्रेण वाभिषेकं कृत्वा ॥ गोदानविधिना गां पूजयित्वा ब्राह्मणाय दत्वा ॥ कपिले सर्वभूतानां पूजनीयासि
रोहिणि ॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे इति मंत्रं पठित्वा दक्षिणां दत्वा भूयसीं संकल्प कर्मेश्व
रार्पणं कुर्यात् ॥ ॥ अथ समानवत्साकपिलादानं ॥ ॥ भारते· समानवत्सां कपिलां धेनुं दद्यात्पयस्वि(
नीं ॥ सुव्रतां वस्त्रसंवीतां ब्रह्मलोके महीयते ॥ ब्रह्मलोकमहितत्वकामः समानवत्साकपिलाधेनुदानमहं
करिष्ये इति विधिः सर्वोपि स एव ॥ ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसा(
गरः सुजनतावल्लीरसालद्रुमः ॥ यं विघन्माणि सोरवेरा दिनकरः प्रासूत नाविश्वेश्वरं तेनाग्नेयपुराणबोधिनम ॥ यम ॥ ॥ १८६ ॥

दानेक्षतापघ्रग्निः ॥ ॥सूनोर्दिनकरस्यैवागागाभट्टमनीषिणः ॥ इदानीमतिदानानां विधौलीला विजृंभते॰
हेमाजवादिमयूराणे ॥ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ॥ त्रीणितुल्यफलानि
त्र ॥ अत्र गावइतिपत्नक्षगोसाधनकोभयतोमुखीकपिलासमानवत्सासमानवर्णादिदानमुच्यते ॥ नगुडधे
न्वादिदानानि॰ ॥ नत्रगोशब्दस्यगौणत्वात् ॥ वृषभदानमप्यतिदानंगोत्वाद्व्यजातिमात्रवाचकत्वादितिकेचि
त्॰ पृथ्वीसरस्वतीतिस्त्रीलिंगश्रवणाद्धात्वस्त्रीगोदानमेवातिदानं ॥ अतएवसर्वकामदुघाधेनुर्गावः पृथ्वी
सरस्वतीतिलिंगसंगच्छतइत्यन्ये ॥ यद्यपिकपिलादानंमहादानेष्वप्यस्ति तथापितत्रोभयरूपत्वेपिनक्षतिः
महादानेनांदीश्राद्धसत्वात् ॥ अतिदानत्वेनदम्भावइतिलक्ष्मणापितृव्यचरणाः ॥ हरिवंशे ॥ शालग्रामशिला
दानमतिदानंप्रकीर्तितं ॥ तत्रादौगोदानविधिः ॥ हेमाद्रौभारते ॥ दानानामिहसर्वेषांगवांदानंविशिष्यते ॥
गावःश्रेष्ठाःपवित्राश्चपावनाजगदुत्तमाः ॥ पयसाहविषादध्नासर्पिषाचाधिचर्मणा ॥ अस्थिभिश्चैववालै

॥ धा.वि ॥
॥ १८७ ॥

श्वशृंगैश्चैवतु भारत ॥ गोभिस्तुल्यं न पश्यामि धनं किंचिदिहाच्युत ॥ कीर्तनं श्रवणं दानं दर्शनं वापि पार्थिवः
नगोदानात्परं दानं किंचिदस्तीति मे मतिः ॥ सा गौर्या मार्जिता दत्ता कृत्स्नं तारयते कुलं ॥ लैंगे ॥ अग्न्यगाराणि
विप्राणां देवतायतनानि च ॥ पूज्यंते शकृता यासां किं देयमधिकं ततः ॥ देवलः ॥ विमानवरमारूढो दिव्याभ
रणभूषितः ॥ यो गंतुमिच्छति स्वर्गं स गोदानं प्रयच्छतु ॥ भविष्ये ॥ आदित्यदुहिता गोभिः पृथ्वीयं परिकीर्तिता
श्रेयार्थं सर्वलोकानां तु मंत्राक्रांतु सिद्धये ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं ॥ एकत्र मंत्रास्तिष्ठंति ह
विरेकत्र तिष्ठति ॥ गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः ॥ गोभ्यो वेदाः समुत्कीर्णाः सषडंगपदक्रमाः
शृंगमूले गवां नित्यं ब्रह्मविष्णुसमाश्रितौ ॥ शृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ शिरोमध्ये महादे
वः सर्वभूतमयः स्मृतः ॥ ललाटाग्रे स्मृता देवी नासावंशे च षण्मुखः ॥ कंबलाश्वतरौ नागौ नासापुटनिवासि ॥ राम ॥
नौ ॥ कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ ॥ दंतेषु वायवः सर्वे जिह्वायां वरुणः स्थितः ॥ सरस्वती तु हुं ॥ १८७ ॥

कारेपक्ष मासौव गंडयोः ॥ संध्याद्वयं नथौष्टाभ्यां ग्रीवामिंद्रः समाश्रितः ॥ रक्षांसि कक्षदेशे तु साध्याश्चोरसि
संस्थिताः ॥ चतुष्पात्सकलो धर्मः स्वयं जंघासु संस्थितः ॥ खुरमध्येतु गंधर्वाः खुराग्रेषु च पन्नगाः ॥ खुराणां
पश्चिमाग्रेषु गणाप्सरसः संस्थिताः ॥ रुद्रा स्वेकादश पृष्ठे वसवः संधिषु स्थिताः ॥ श्रोणीनटस्थाः पितरः सो
मो लांगूलमाश्रितः ॥ आदित्यरश्मयो वाला पिंडीभूता स्ववस्थिताः ॥ साक्षाद्गंगा च गोमूत्रे गोमये यमुना स्थि
ता ॥ श्रीरे सरस्वती देवी नर्मदा दध्नि संस्थिता ॥ घृते हुताशनं रोमस्य रोपशु विंशति देवताः ॥ उदरे पृथिवी ज्ञेया
सशैलवनकानना ॥ चत्वारः सागराः पूर्णा गवां येतु पयोधराः ॥ एतद्धि कथितं सर्वं यथा गोषु प्रतिष्ठितं ॥
तं दिपुराणे ॥ विधिनानु य दद्याद्या वै धेनुः सदक्षिणा ॥ न दातारस्य तेजं तु कुलानामयुतं द्वाने ॥ भरने ॥ गां
दद्या द्वेदपूर्णाय वेदविहुह मेधिने ॥ स्वर्णालंकृत भृंगी च वस्त्रघंटा समन्विता ॥ ताम्रपात्रे समं संमृत् जलला
टनट दर्पणा ॥ राजतच्छत्र चरणां मुक्तालांगूल भूषिता ॥ कांस्योपदोहनां ता प्रालवणादि तृणोदकैः ॥ गवां

पुछं गृहीत्वा च समस्तुवर्णो न पाणिना ॥ गृहस्थो वेदविद्विप्रो दापयेत्तन्न्यनिग्रहं ॥ त्रिभिः श्रीलक्ष्मीरमेशानैः समृ
द्धमित्यर्थः ॥ विधिमाह विश्वामित्रः ॥ प्राङ्मुखीं गामवस्थाप्य सवत्सां तां सुपूजितां ॥ पुच्छदेशे तु दातावै स्नातो
वद्धशिखो भवेत् ॥ उदङ्मुखस्तु विप्रः स्यात् स्नात्वा च लक्षणलक्षितः ॥ आज्यपात्रं करे कृत्वा कनकेन समन्वितं ॥ नि
क्षिप्य तस्मिन् पुच्छाग्रे घृत दुग्धं प्रसज्य च ॥ सतिलं विप्रपाणिं तु प्राग्यं तु निधापयेत् ॥ सतिलं सकुशं चापि
गृहीत्वा दानमाचरेत् ॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥
गोमतीवचनतो विद्यां जपेत प्रयतः शुचिः ॥ गोमती विद्या महाभारतोक्ता यमोक्ता वेति हेमाद्रिः ॥ सा च प्रयोगे
स्पष्टा ॥ आगावो अग्मन्निति निम्नपूर्वं सूक्तमिति पितृचरणाः ॥ अत्र तृग्रासं तु तर्पिते दद्याद् दहनां वत्सं ह्नामि
निविस्तु धर्मान् ॥ गोग्रासं तर्पणायोरंगत्वेन विधिः ॥ तर्पितेन तर्पणे कृते इत्यर्थः ॥ तेन तर्पणोत्तरं दानं ॥ दा
नोत्तरं तर्पणमिति निम्नरवेः स्कांदे ॥ प्रासादा यत्र सौवर्णाः शय्या रत्नोज्वलास्तथा ॥ वराश्चाप्सरसो यत्र तत्र ग

छंनि गोप्रदाः॥ गोप्रदो नरकं नैति यथाभिन्नां बुजं जलं॥ विमानेनार्कवर्णेन दिवि राजन् विराजते॥ अत्र
सुवर्णशृङ्गादीनि कर्तव्यानि कपिलादाने कापि ज्ञेया॥ याज्ञवल्क्यः॥ यथाकथंचिद् दत्वा गां धेनुं वाऽधेनुमे
व वा॥ कपिलादानोक्तेनि कर्तव्यानां विनापीत्यर्थः॥ वसिष्ठः॥ सुवर्णं दक्षिणामाहुर्गोप्रदाने विशेषतः॥ अ
त्र सुवर्णशब्दो यथाशक्ति हिरण्यपरः॥ परिमाणवाचकसुवर्णशब्दस्य पुंल्लिङ्गत्वनियमादत्र तदभावादि
ति केचित्॥ अत्र सुवर्णपदस्याहुरित्यनेन संबंधाद्द्वितीयान्तत्वेन निर्दिष्टत्वेन नियतानुष्ठानबोध
कत्वेन परिमाणपरत्वस्योचितत्वात्॥ कपिलामहादाने दक्षिणा च चतुर्थ्योनि विधेोगोदान दक्षिणानथ्या
नुर्ण्येण विधानान्नियत परिमाणत्वेन उययन्ते॥ सुवर्णं दक्षिणां दत्वा नावह्ति त्यान्मधुमनमिति नेनैवोक्तेः
परिमाणपरत्वमितिनुपिनन्चरणाः॥ स्कांदे॥ यो नरो गां प्रयच्छेत् सवत्सां कांस्यदोहनां॥ हेमशृंगीं रौप्यखुरां
दुकूलक्षौमवासिनां॥ शय्यास्तरणसंयुक्तां वरुणपुष्पैः फलैर्युतां॥ ब्राह्मणांश्च पूजयित्वा तु गंधमाल्यैरलंकृतां·

॥दा॰वि॥
॥१८९॥

देवैरध्यासितांतांनु सर्वैर्ह्रस्वयेनतु ॥ मृदुबंधेनवध्नीयाद्गजः श्लक्ष्णेनरज्जुना ॥ कुशाः सुवर्णवीजानि नि
लाः सिद्धार्थकास्तथा ॥ प्रदद्यात्तां ततो विप्र अ मंत्रेणानेन सुव्रत ॥ सर्वदेवमयी दोग्ध्रीं सर्वलोकमयीं तथा ॥ स
र्वलोकनिमित्तांतां सर्वदेवनमस्कृतां ॥ प्रयच्छामि महाभाग अक्षयाय शुभाय गां ॥ एवमामंत्र्य तां दत्वा यत्र
यत्र प्रजायते ॥ तत्र तत्र गता सा तु जंतुं तारयते भयात् ॥ इति विधिरुक्तः ॥ तरिश्रुवाणोनु ॥ विचित्रवस्त्रसं
हृतां सलोहपात्रां कृतपोनिविष्टचरणां तथेति विशेषउक्तः ॥ लोहं कांस्यं कुतपः कंहलः ॥ आग्नेयेनु ॥ अत्र
व्रते तु गच्छंतं यदान्मषो नराधिप ॥ अनेन विधिना धेनुं यो विप्राय प्रयच्छति ॥ सर्वकामसमृद्धात्मा विष्णु
लोके स गच्छति ॥ सप्तावरान् सप्त परान् आत्मानं चैव सान्वयं ॥ सप्तजन्मकृतात्पापान्मोचयेत्यवनीयते ॥ इति धे
नुदाने विशेष उक्तः ॥ अत्र शृंगादेसुवर्णमैच्छिकपरिमाणं कपिलादानोक्तं वा ॥ येनतु मदनरत्नादिभिः स्कां
दोक्तप्रकारेण हेमशृंगीदानमिति संज्ञा न रमुक्तं तच्च मूलेन कलयामः ॥ रूप्यखुरादानत्वापन्नेश्चेति ॥ ॥

॥राम॥
॥१८९॥

अथप्रयोगः॥ ॥देशकालौ संकीर्त्य सवत्सगोरोमसमसंख्यवर्षब्रह्मलोकनिवासकामः॥ अक्षयस्वर्गकामोवा
वत्सधेनुगोदाने धेनुगोदानेन·अनकुलस्थितानापुनण्डरूपसंसारणाकामः सौवर्णप्रासादरत्नोज्ज्वलवराप्सरो(
धिष्ठितविमानकरणकस्वर्गलोकप्राप्तिकाम आत्मसहितपूर्वापरसप्तपुरुषकर्तृकसप्तजन्मावछिन्न(
पापमोचनपूर्वकविष्णुलोकप्राप्तिकामः विष्णुप्रीतिकामोवा गोदानं धेनुदानंवा करिष्ये इति संकल्प ब्राह्मणं
कृत्वा संपूज्य गां पूजयेत्॥ सर्वपापहरा धेनुः सर्वमंगलदायिनी॥ संसारोत्तारिणी यस्मा द्दानपुण्यं ददातु मे इ
तिमंत्रेणवा॥ ततोगोरंगेषु देवानावाहयेत्॥ शृंगमूले ब्रह्मविष्णू आवाहयामि॥ शृंगाग्रे सर्वतीर्थानि शृंग
मध्ये महादेवम् ललाटे भवानीं॥ नासावंशे षण्मुखं·नासापुटयोः कंवलाश्वतरौ·कर्णयोरश्विनौ·चक्षुषोः श
शिभास्करौ·दंतेषु वायुं जिह्वायां वरुणं·हुंकारे सरस्वतीं॥ गंडयोः पक्षमासौ·ओष्ठयोः संध्ये·ग्रीवायामिंद्रं·
कुक्षौ रक्षांसि·उरसि साध्यान्·जंघासु धर्मम्·खुरमध्ये गंधर्वान्॥ खुराग्रे पन्नगान्·खुरराणां पार्श्वे मायेषु अ

॥ दा·वि ॥
॥ १९० ॥

ष्मरसः पृष्टे एकादशरुद्रान् सर्वसंधिषु वसून् श्रोणोः पितॄन् ॥ लांगूले सोमं अधोगात्रे पुत्रादश्वादित्यान्
गोमूत्रे गंगां गोमये यमुनां क्षीरे सरस्वतीं नदीं दध्नि नर्मदां सर्पिषि हुताशनं रोमसु अष्टाविंशति देवकोटीः
उदरे पृथिवीं ॥ स्तनेषु सागरान् ॥ संपूज्य ॥ गां प्रदक्षिणीकुर्यात् ॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ देहस्था या च रुद्राणी शंकरस्य च या प्रिया विष्णोर्वक्षसि या लक्ष्मीः
स्वाहा या च विभावसोः ॥ चन्द्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये ॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनद
स्य च ॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदा मम ॥ स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा ॥ सर्वपाप
हरा धेनुस्तस्माच्छ्रीरक्षयास्तु मे ॥ ततो गोपुच्छेन तर्पयेत् ॥ मातृपक्षाश्च ये केचिद्ये केचित्पितृपक्षकाः ॥ गुरु
श्वशुरबंधूनां ये कुलेषु समुद्भवाः ॥ ये चान्ये तु प्रपिंडा वै पुत्रदारविवर्जिताः ॥ ते सर्वे तृप्तिमायान्तु गोपुच्छोद
कतर्पणैः ॥ क्रियालोपगता ये च जात्यन्धाः पंगवस्तथा ॥ विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम ॥ ते सर्वे तृ

॥ एम ॥
॥ १९० ॥

न्निमायांतुगोपुच्छोदकतर्पणे॥ननःपुच्छोदकंपीत्वागवेग्रासंदद्यात्॥सौरभेयिजगत्पूज्येविश्वमातर्यामहे॥म
यादत्तमिमंग्रासंयसत्वंविस्मृवंदिने॥इत्यनेनदक्षुरवींप्राङ्मुखींवाग्गंकृत्वानस्याःपुच्छदेशोदानाग्राग्रुखःताम्र
पात्रमाज्यकनकयुतंकरेगृहीत्वानचगोपुच्छंनिक्षिप्यपृष्ठेनदिग्धंकरेकृत्वोदङ्मुखायइमांगांसवत्सांदिव्यवस्त्रेण
उत्कृष्टक्षौमेणविचित्रवस्त्रेणावासंवीतांयज्ञोपवीतिनींस्वर्णतिलकांरौप्यखुरांताम्रपृष्ठींकांस्योपदोहांसुवर्ण
परिष्कृतघोपरिवासंस्थितांसितचामरभूषितांपुष्पशोभितांमुक्तालांगूलभूषितांघंटाभरणायहृष्टपुष्टहस्तु
तांकिंकिणीजालमंडितांदर्पणपुत्रांपयस्विनीम्॥सुशीलांशक्त्वोश्चसलक्षणोपेतांशाप्यायुक्तांनरूपीरुद्रदेव
तांकपिलांवानुभ्यमहंसंप्रददेनममेतिसतिलकुशवारिविप्रपाणौदद्यात्॥यज्ञसाधनभूतायाविश्वस्या
घप्रणाशिनी॥विश्वरूपधरोदेवःप्रीयतामनयागवा॥गावोममाग्रतःसन्तुगावोमेसन्तुपृष्ठतः॥गावोमेहृ
दयेसंतुगवांमध्येवसाम्यहं॥गवांमंगेषुतिष्ठंतिभुवनानिचतुर्दश॥यस्मात्तस्माच्छिवंमेस्यादिहलोकेप

रत्नेव॥ इत्यधेनुगोदाने· धेनुगोदानेतु जलेजलप्रक्षेपमंत्रः जलशायीब्रह्मपितामहपद्मनाभःसनातनःअनंत
भोगशायनःश्रीपतांपरमःपिता॥ इमांनःप्रतिगृह्णीष्वधेनुंदत्तांमयाभवंसमेपापापनोदायगोविंदप्रीयता
मिति॥ धेनोत्वंपृथिवीसर्वायस्मात्केशवसन्निभा॥ सर्वपापहराणिनित्यमतःशांतिंप्रयच्छमे॥ याधेनुःरुद्ररूप
स्वामीदत्तेवींगोनमस्यच॥ स्वामेकामफलादेवींइहलोकेपरत्रचदेनिमंत्राम्पूर्वोक्तानपिजपेत्॥ गोत्वस्यानया
यात्॥ नमःगावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः॥ सुरभ्याःसौरभेयाश्चसरितःसागरंयथा॥ गावःपश्य
म्यहंनित्यंगावःपश्यंतुमांसदा॥ गावोस्माकंयथानासांयतोगावस्ततोवयं॥ इतिभारतोक्तागोमती॥ गावःसु
रभयोनित्यंगावोगुग्गुलुसन्निभाः॥ गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्॥ अन्नमेवपरंगावोदेवा
नांहविरुत्तमं॥ जीवनंसर्वभूतानांरक्षांनिवहंरंनिच॥ हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि॥ ऋषयाणाम
पिहोतॄणांगावोहोमेप्रतिष्ठिताः॥ सर्वेषामपिभूतानांगावःशरणमुत्तमं॥ गावःपवित्रंपरमंगावोमंगल

उत्तमं ॥ गावः सर्वस्य लोकस्य गावो धन्याः सनातनाः ॥ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥ नमो ब्रह्मसुता
भ्यश्च पवित्राभ्यो नमो नमः ॥ घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ॥ घृतनद्यो घृतावर्तास्ता मे संतु सदा गृहे
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितं ॥ घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितं ॥ गावो ममाग्रतः संतु गावः
पृष्ठत एव च ॥ गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहमिति नियमोक्तगोमती मा गाव इति सूक्तं च जपेत् ॥ वि
कल्प इति हेमाद्रिः ॥ ततो दत्वा प्रयसीं च दत्वा कर्मेश्वरार्पणं कुर्यात् ॥ ॥ इति दिनकरभट्टसूनुगागाभट्ट
कृतिदिनकरोद्योते दानकाण्डे गोदानप्रयोगः ॥ ॥ वर्णविशेषेण फलविशेषो भारते ॥ भोगसौख्यप्रदा श्वे
ता धूम्रा भायापनाशिनी ॥ कृष्णा स्वर्गप्रदा ज्ञेया गौरी च कुलवर्द्धिनी ॥ रक्ता रूपप्रदा ज्ञेया पीता दारिद्र्यनाशि
नी ॥ पुत्रप्रदा कृष्णसारा नीला धर्मविवर्द्धिनी ॥ कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ॥ इति दशवर्णधे
नुदानम् ॥ अथ समानवत्सागोदानं भारते ॥ तत्र कपिलोक्ता ॥ रोहिणीं तुल्यवत्सां तु धेनुं दत्वा पयस्विनीं ॥ सु

त्रनां वस्त्रवस्त्रसंपन्नां सूर्यलोके महीयते ॥ समानवत्सां शबलां धेनुं दत्वा पयस्विनीं ॥ सुत्रनां वस्त्रसंपन्ना
सोमलोके महीयते ॥ समानवत्सां कृष्णांतु धेनुं दत्वा पयस्विनीं ॥ सुवस्त्रां वस्त्रसंवीतामग्निलोके महीयते॰
वानरेणुसवर्णांतु सवत्सां कांस्यदोहिनीं ॥ प्रदाय वस्त्रसंयुक्तां वायुलोके महीयते ॥ धूसरवर्णमित्यर्थः
समानवत्सां धूम्रांतु धेनुं दत्वा पयस्विनीं ॥ सुत्रनां वस्त्रसंवीतां यमलोके महीयते ॥ अघ्राहेमसवर्णांतु स
वत्सां कांस्यदोहनां ॥ प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते ॥ अभ्राभेः ॥ हिरण्यवर्णां पिंगाक्षीं सवत्सां
कांस्यदोहनां ॥ प्रदाय वस्त्रसंवीतां पितृलोके महीयते ॥ सवत्सां पीवरां दत्वा शितिकंठीमलंकृतां ॥ वैश्वदे
वमसंबाधं स्थानं श्रेष्ठं प्रपद्यते ॥ शितिकंठीकृष्णपिंगा ॥ समानवत्सां गौरींतु धेनुं दत्वा पयस्विनीं ॥ सुत्र
नां वस्त्रसंवीतां वसूनां लोकमाप्नुयात् ॥ पांडुकंबलवर्णांतु सवत्सां कांस्यदोहनां ॥ प्रदाय वस्त्रसंवीतां सा
ध्यानां लोकमाप्नुयात् ॥ वत्सोपपन्नां नीलांगीं नवरत्नसमन्वितां ॥ गंधर्वाप्सरसां लोकान्दत्वा प्राप्नोति मान

वः ॥ गोप्रदानरतोयाति भित्त्वाजलदसंचयान् ॥ विमानेनार्कवर्णेन दिवि राजन्विराजते ॥ अत्रापि गोदाने
निकर्तव्यनाडयस्तव ॥ अथो भयतोमुखीदानं ॥ च्यवनस्मृतौ ॥ उभयशिरसंद्यात्तस्याः कालः प्रसवकालो ना
न्यकालप्रतीक्षेन सर्वस्वपुण्यकालास्तदैवयत्तस्मार्द्धिषस्नातानन्तस्नातो ब्राह्मणंश्रुतशीलसमन्यंवज्ञानि
क्रियायैर्गुणैरुपेतं प्रणिपत्याह मनीवानैर्भिपद्मसामस्मादगाधादपारात्संसारार्णवान्मामुद्धर्तुं दशाव
रान्दशापरान् ॥ आत्मानंचैकामिस्वामिन्भवंतं पात्रपासाद्येति सचेतत्कृत्वा निदानानमनुमंत्रयेत् ॥ त्वं
महीमवनिं विश्वधेनामिति ॥ कइदंकस्मा इति गृहीत्वा यां दक्षिणेन पाणिना वत्समाकर्षयेत् ॥ गर्भेतु स
न्नेषामवेदमितिनिष्क्रान्तेषु छनलमुपसमाधाय देवान्पितृन्नदीः पर्वतान्वनस्पतीनुदधीन्सपर्ययेत्तैस्तै
र्मंत्रैस्तेषां मंत्रपदानि भवंति ॥ ये देवासो दिव्येकादशस्थ ॥ उशंतस्त्वा ॥ इमं मे गंगे॰ अद्भिःस्तु नामीन
भिश्वतोऽग्निः ॥ वनस्पते शतवल्शो विरोह ॥ समुद्रज्येष्ठाः अहिरिव भोगैः पर्येति बाहुं ॥ मधुवाता ऋतद

॥ दा·वि ॥
॥ १९३ ॥

त्तु पार्थिवीभिः पृथिवीं ईले द्यावा॥ मही द्यौः उर्वी पृथ्वी वरुले इरे॥ अंनेउपब्रुवे नमसा॥ गौरीर्मिमायेत्यादि(
भिश्चत्रुरश्रीन्मारुजीर्ज्जा हे तित्त्रा सरणान्भोजयेन्नस्वस्य पनं वा वयी त्वा धास्य कर्मणो कृष्टिसुदाहरंति॥ अग(
मागामिनमभक्ष्य भक्ष्यकमपेयपायिनं॥ ब्रह्मघ्नं पितृघ्नं सद्यः उनानि उपाध्यायीं स्वसुतां॥ स्वामिभार्यां
मातरं मृतस्वसारं मातुलानीं भगिनीं भागिनेयीं शिष्यजायां धात्रीं मन्यामप्यगम्यां गत्वा भयाच्छिरसं सयरि
करं ब्रसरणाय दद्यात्॥ परिकरोस्याः सुवर्णरत्नरूप्यक्षेत्राणि ग्रामा धान्यानि वस्त्राणि रसालवणाद्यंश्व
दना द्यागंधाः द्रानं गवांत दद्व्वा सर्वस्ववास हतनयाद्वा स्मरणाय दद्यान्मरणपातकमुक्तये· अत्र सुवर्णसंख्या·
अलंकृमोक्तविधिना सुवर्णत्रिपलाल्वितादानव्या॥ द्विपलामथैकपलां कन्यसीमनेनिदेवलोक्ता॥ य
श्चोभयमुखीं दद्यान्स भूतकनकान्विता॥ तहितं पायसाहारः पयसा वानि वा हयेत्॥ सुवर्णस्य सहस्रे(
णान दद्देनापि वा पुनः॥ तस्याप्यर्द्धदानं वाथ पंचाशाद्ध्वनतो द्रकं·॥ यथशक्त्यापि दानव्यं वित्तशाठ्यविवर्जितमितिवा

॥ राम ॥
॥ १९३ ॥

राहोक्ता वा बोधा ॥ अगम्यागमादिनो कामरूपानकनिहन्न रूपलक्षणं ॥ स्नूयमानां तु यो दद्याद्धेनुं द्रविणसंयुतां
ससमुद्रगृहा भूमिः सशैलवनकानना ॥ चतुरंता भवेद्दत्ता पृथिवी नात्र संशयः ॥ यावंति धेनुरोमाणि वत्स
स्य च नराधिप ॥ तावत्संख्यान्युगगणान्देवलोके महीयते ॥ पितॄन्पितामहांश्चैव तथैव प्रपितामहान् ॥ उद्धरि
ष्यत्यसंदेहो नरकाद्भूरिदक्षिणां ॥ गोलोकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव ॥ स्त्रियश्च तं चंद्रसमानवक्त्राः प्र
तप्तजांबूनदतुल्यवर्णाः ॥ महानितंबस्तनमध्यहत्ता भजंत्यजस्रं नलिनीभनेत्रा इति मात्स्योक्तमपि बोध्यं ॥ वा॰
राहे विशेषः प्रयोगे स्पष्टः ॥ अथ प्रयोगः ॥ कर्त्ता प्रसवांत्रीं गां दृष्ट्वा स्नात्वा याचं ब्रूयात् अद्यमनीवान्नैभीनोऽस्मा
दगाधादपारात्संसारार्णवात्समुत्तारयामि दशावरान्दशा॰परानात्मानं च स्वामिन्भवं न यानमासाद्येति नेनन
यान्वितं तुरंगैनं महीं गोनमो वामदेव ऋद्धिस्त्रिष्टुप् पृथ्वीदानमंत्रणे विनियोगः ॥ त्वं महीमवनीं विश्वधेनामिति
पात्रमनुमंत्र्य देशकालौ संकीर्त्य एवं महापातकतत्समोपपातकादिनाशनसमस्तगृहवनशैलसहितपृथ्वी

॥रा·वि॥
॥१९४॥

दानजफलप्राप्त्येतत्सवत्सधेनुरोमसमसंख्ययुगावछिन्नदेवलोकप्राप्त्यपितृपुत्रादिदशपरावरनरकोद्धर
णगोलोकप्राप्तुत्तरषष्ठ्लोकाधिकरणात्वकामउभयशिरसंगांदास्ये उभयमुखींदास्ये·सूयमानोगांदास्येइ
तिवासंकल्प्य पात्रेहत्वा संपूजयेत्॥ गवामंगेषु·श्रृंगावृषनिसमत्रैर्वेनवस्त्रकेन·गोदानोक्तरीत्याश्रृंगामूलादिदे
वतावाहनंतदुक्तरीत्या वस्तुवर्णश्रृंगादीनां यथास्थापनंचकुर्यात्॥ ततः क्षौमंकौसुंभंवासः॥ आछादनंमयाद
त्तं भद्रंविचित्रंसुनिर्मलं॥ सुरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरीतिसमर्प्य॥ पुराणेत्वंजगन्मातर्देवैविष्णुपदेस्थि
ता॥ ग्रासंगृहाणमद्दत्तंगोमातस्त्वात्तुमर्हसीतिग्रासंदत्वाप्रतीक्षेत॥ वत्समुखेनिर्गतेगोदानोक्तरीत्यासघृ
तसुवर्णकांस्येगोपुछंघृताक्तंकुर्यात्॥ ततस्तांदायपूर्वोक्तफलं विप्रगोत्रनामनीच समुच्चार्यमांगामुभय
शिरसंउभयमुखींवासुवर्णश्रृंगीमित्यादिगोदानवदुक्तानुध्यंसंप्रददेनममेत्युक्तापात्रहस्तेपुछंदत्वा॥ इ
मांगृहाणोभयमुखींभवाख्यातानमास्तुवै॥ नमस्तेशविष्णुरुद्रंचसदास्वस्तिकरोभव॥ इत्यावनीकाचंजयेत्

॥राम॥
॥१९४॥

प्रतिग्रहीतावं· प्रतिगृह्णामि धेनोत्वां कुटुंबार्थे विशेषतः ॥ स्वस्तिर्भवतु मे नित्यं रुद्रमानर्दमेतेनमः ॥ ततः देवस्य(
त्वा इत्यग्रगां कामस्तुतिं च पठित्वा ॥ स्योना पृथिवि इत्यावतीमंत्रं कंध्यं पठेत् ॥ यो स्त्वाप्रतिदत्तामिपृथिवीते प्रति
गृह्णामीति दानं प्रतिगृहीतारो वदेन्नामिति केचित् ॥ ततः पल कंध्यं त्र्यंवा गोदान प्रतिष्ठार्थं सुवर्णं दत्वा रत्नादि
वदत्वा गोमतीं जयेत् ॥ ततो दाता प्रतिगृहीता वा गर्भे तु गौ तमो वामदेव त्रिष्टुप् वत्साकर्षणे विनियोगः ॥ वत्स
माकर्षयेत् ॥ ततः स्वगृहोक्तमार्गेणाग्निं संस्थाप्य तिलोदकेन गोपुच्छं गृहीत्वा सव्येनैव ये देवासो दिव्येकाद
शस्थ देवास्तृप्यंतु· उशंतस्त्वा ॥ पितरस्तृप्यंतु· इमं मे गंगे· नद्यस्तृप्यंतु· अद्भिः सु नो मति मिश्रतोहिनः पर्वता
स्तृप्यंतु ॥ वनस्पते शतवल्शो विरोह· वनस्पतयस्तृप्यंतु· समुद्रज्येष्ठाः उदधयस्तृप्यंतु· अहिरिव भोगैः पर्येति बा
हुं नागास्तृप्यंतु ॥ मधुवाता ऋ ओषधयस्तृप्यंतु ॥ ईले द्यावापृथिवी· पृथ्वीतृप्यंतु· मही द्यौः· पृथिवी च नः पृथ्वीतृ
प्यंतु· उर्वीव पृथ्वी वज्रुले इरे अंते पृथ्वीतृप्यंतु· गौरीर्मिमाय सलिलानि तक्षती ति· पृथ्वीतृप्य· एवं तर्पणांते ३

त्वाधानं कुर्यात् ॥ चक्षुषी आज्येनेत्यंते· अन्वाधानं गौरिर्मिमायेत्यादिमंत्रैश्चतुरष्टीमाज्याहुतिभिः शेषेणास्वि
ष्टकृतमित्यादि ॥ क्षेमप्रकाशमनेन गौरीर्मिमायेति मंत्रस्यर्षेरणवतथावानिर्दिष्टदेवतत्वाद्याहृतिभि
र्होमः प्रजापतिर्देवता· न च प्रजापतिं व्याहृतिभिश्चतुरष्टौनिसंख्याकाभिराज्याहुतिभिः शेषेणेत्यादि· इदं
च न युक्तं ॥ गौरीर्मिमायेत्यादिपदस्यासंगतत्वायत्तेः ॥ गौरीर्मिमायेत्यादिभिराद्यन्नेगौ प्रकाशकैर्हविराव
तीति सक्तस्थैर्गौरवीमेदनुवन्तमिपंतं ॥ अयंस शिङ्क्ते येन गौरभीवृता ॥ सूयवसान्नगवतीहि भूयाद्यतिमं
त्रयेणाहमाहोम इति केचित् ॥ ततो होमं नेनूयसीं ब्राह्मणभोजनं च संकल्पन दिने पयो भक्षः पायसभ
क्षो वा निषेद्दिति ॥ अथ वैतरणीदानं प्रलवेवच्मि ॥ पाटलामथवा कृष्णां कुर्याद्धेनरणीं शुभां· स्वर्णशृंगीं (
रौप्यखुरां ताम्रपात्रस्तुदोहनां ॥ कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमन्वितां ॥ कार्पासद्रोणशिखरआसीनां
ताम्रभाजने ॥ यमं हैमं प्रकुर्याद्वै लोहदंडसमन्वितं ॥ महामहिषमारुढं रुढं पाशांकरे परे ॥ इक्षुवंशमयं व

धाउडुपंपद्दवंधनैः॥उडुपोयमरिनांधेनुंस्वर्यदेहसमुद्भवां॥कृत्वाधिवासयेद्विद्वान्ध्वजोपानहसंयुतां॥उडु
पंसृक्ष्मानौः॥इममुच्चारयेन्मंत्रंसंगृह्योदकमंडलं॥यमद्वारेमहाघोरेहस्त्वावैतरणीनदीं॥नर्तुकामोददा
म्येनांतुभ्यंवैतरणीवगां॥ विष्णुरूपद्विजश्रेष्ठभूदेवपंक्तिपावन॥सदक्षिणामयातुभ्यंदत्तावैतरणींनदीं॥
तांतर्तुंगांददाम्येनांतुभ्यंवैतरणीमहं॥धर्मराजंवविषंवधेनुंवैतरणींनदा॥सर्वंषदक्षिणींकृत्यब्राह्मणाय
निवेदयेत्॥पुछंसंगृह्यनद्येनोरग्रेकृत्वाचब्राह्मणं॥धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहापथे॥उत्तितीर्षुरहं
देविवैतरण्यैनमोनमः॥अनुव्रजेच्चगच्छंतंसर्वंतस्यगृहंनयेत्॥अत्रवैतरणापाःसुखोत्तरणकामोवैतरणीधे
नुदानंकरिष्ये इति संकल्पकार्यामद्रोणोपरिताम्रपात्रेधेनुंउडुयेचोक्तरूपंयमंसंस्थाप्यगोदानोक्तमार्गेण
गांयमायसोमामिनियमंवसंपूज्ययमद्वारइतिमंत्रेणधेनुमंत्र्यकुशाग्राग्रपर्ववन्फलमुच्चार्येमांउडु
पस्थितयमप्रतिमासहितांकार्यासद्रोणोपरिस्थितताम्रपात्रसंस्थितांसवर्णशृंगांरौप्यखुरयुतांवैतरणीं

॥ दा·वि ॥
॥१९६॥

तुभ्यं संप्रददे इति दत्वा सुवर्णं दक्षिणां दत्वा विष्णुरूपेति मंत्रं पठित्वा धेनुके इति मंत्रेणानुगच्छेत् ॥ मरणकाले
वैतरणीदानासंभवे पुत्रादिरन्यो वा दद्यात् ॥ नदायदिशक्नोति यत्तुं वैतरणींनुगां शक्तो नो हृष्ट्वा दत्वाश्रेयोद
द्यात्सनसन्तु इति वासोक्ते ॥ अहृकशान्त इत्यर्थः ॥ अथ मोक्षऋणपापोत्क्रान्तिधेनवः ॥ तन्मंत्रादिवोदासीये·
विधिस्तु गोदानीय एव ॥ मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ॥ मोक्षधेनुप्रदानेन मुकुंद प्रीयतां मम ॥ यन्म
याजन्मभिः पूर्वं ऋणरूपेण संचितं ॥ ज्ञानाज्ञानविनाशाय ऋणधेनुं ददाम्यहं ॥ ऐहिकामुष्मिकं यच्च सप्त
जन्मार्जितं ऋणं ॥ तत्सर्वं शुद्धिमायातु प्रगेनां ददतो मम ॥ आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ॥ तत्
त्सर्वं नाशमायातु गोप्रदानेन केशव ॥ अनुत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रान्ति विहत्तये ॥ तुभ्यं संप्रददे नाम्ना गां सत्क्र
क्रांतिसंज्ञिकां ॥ एतासां धेनूनामसक्तो व्यासः ॥ आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् ॥ तदभावे तु गौ
रेव नरकोद्धारणाय वै ॥ पूर्ववत् गोदानेतिकर्तव्यताकमित्यर्थः ॥ अथ गृष्टिदानं ॥ सद्यःप्रसूता गृष्टिर्गौः

॥ राम ॥
॥१९६॥

नघिघिर्विष्णुधर्मे ॥ पुराणं दिनमथास्य घस्त्रान्वा नर्ष्यपि नं तथा ॥ कृत्नोपवासः संश्रप्यं च गव्यं नरेश्वर ॥ घृत
क्षीराभिषेकं च कृत्वा विश्वास्य विदध्यच ॥ समभ्यर्च्य यथान्यायं पुष्पादिभिरनुक्रमात् ॥ उदङ्मुखीं प्राङ्मुखीं वा गृहि
त्वा पयस्विनीं ॥ सपुत्रां वस्त्रसंवीतां सितयज्ञोपवीतिनीं ॥ स्वर्णशृंगीं रौप्यखुरां सुवर्णोपरि संस्थितां ॥ शक्ति
तो दक्षिणां युक्तां ब्राह्मणाय निवेदयेत् ॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये
वसाम्यहं ॥ प्रदक्षिणां ततः कृत्वा धेनुं द्विजवरं ततः ॥ इमान्नः प्रतिगृह्णीष्व धेनुं दत्तां मया नव ॥ समेयापापयनोस
यगोविंदः प्रीयतामिति ॥ स्वयमुच्चार्य तं विप्रं गोविंदमुपकल्पयेत् ॥ अनुव्रजेत्तु गच्छंतं पदान्यष्टौ नराधिप ॥
अनेन विधिना धेनुं यो विप्राय प्रयच्छति ॥ सर्वकामसमृद्धात्मा विष्णुलोकं स गच्छति ॥ ॥ अथ त्रिरात्रगोदानं
॥ ॥ नत्वैव त्रिरात्रस्थंडिलेषु भा त्रिरात्रं गोरसाशनः ॥ तृप्तां तु तर्पिते दत्वा वाससा संहते द्विजे ॥ सदक्षिणां
महाभाग त्रिरात्रं गोरसैस्तु नः ॥ प्राणान्संधारयन् कृत्वा गवां लोके महीयते ॥ यावंति धेनोरोमाणि तावंत्य वर्षा

रोमानवः॥ दत्वैवकपिलांविप्रःप्राप्नोत्यभ्यधिकंफलं॥ अत्रापिसमस्तगोदानेनिकर्तव्यताइत्युक्तः एवंप्रकारेण
कपिलादानेतुब्राह्मणस्यैवाधिकारः विप्रग्रहणात्॥ अन्यगोदानेतुभक्ष्यस्यापिब्राह्मणैः क्षत्रियैर्वैश्यैःशूद्रैश्चा
मैश्च्यमानवैः॥ लोकाःकामदुघाःप्राप्नाद्दत्वैतद्विधिनानृपेतिविष्णुधर्मोत्तरात्॥ ॥अथदेवनाम्नागोदानं
स्कंदे॥ शिवायविष्णवेवापियोवैदद्यात्पयस्विनीं॥ धेनुंस्नानोपहारार्थंसपरंब्रह्मगच्छति॥ भविष्ये॥ सौरींस्व
र्गीयपयोदद्यान्नरस्तींचपयस्विनीं॥ कुलीनांकपिलांदत्वादत्तंभवतिगोशतं॥ शिवधर्मेषु॥ दशगावःसहृष
भाहृषभैकादशीस्मृता॥ शिवायविनिवेद्यैवंविश्वेदेवांनरात्मना॥ रुद्रैकादशतुल्यात्मा बलभोगादिभिर्गु
णैः॥ शिवादिभिःसलोकेषुयथेष्टंमोदतेवशी॥ भविष्येतु॥ दशगावःसहृषभाहृषभैकादशीस्मृता॥ सूर्या
यविनिवेद्यैवंलभतेनन्फलंशृणु॥ द्वादशादित्यतुल्यात्मा अणिमादिगुणोर्जितः॥ सौरादिसर्वलोकेषुसूर्य
वन्मोदतेदिवि॥ शिवधर्मे॥ सहृषंगोशतंदद्याच्छिवायानीवशोभनं॥ शतरुद्रवलोयेनोवीरभद्रइवापरः

गत्वाशिवपुरंदिव्यंमहेशाधिपतिर्भवेत् ॥ भविष्ये ॥ सहस्रंगोप्रदानंदत्वाभास्करायनराधिपः ॥ विमानैःसूर्य
संकाशैर्दिवाकरइवापरः ॥ गत्वादित्यपुरंरम्यंक्रीडतेसूर्यवन्नृप ॥ ॥ इतिगोदानानि ॥ ॥ अथवृषदानं
भविष्ये ॥ दशधेनुसमोनड्वानेकश्चैवधुरंधरः ॥ दशधेनुप्रदानाद्धिवृषएकोविशिष्यते ॥ वृषभश्चापिशुक्लां
गोधूरोगःपांडुनंदन ॥ युवाभद्रःसुशीलश्चसर्वदोषविवर्जितः ॥ अलंकृत्यसहस्रांशोर्नंपुरतोह्विसमुपस्थिते
स्वर्णशृंगादिभिर्गोदानैरलंकृतमितिमदनरत्नः ॥ विशेषमाह ॥ रुप्यलांगूलसंयुक्तंब्राह्मणायनिवेदये
त् ॥ धर्मस्त्वंवृषरूपेणजगदानंदकारकः ॥ अष्टमूर्तेरधिष्ठानमतःपाहिसनातन ॥ दत्वैवंदक्षिणायुक्तं
प्रणिपत्यविसर्जयेत् ॥ सप्तजन्मकृतंपापंवाङ्मनःकायकर्मजं ॥ तत्सर्वंविलयंयातिगोदानसुकृतेनवै
यानंवृषभसंयुक्तंदीप्यमानंसुशोभनं ॥ आरुह्यकामगंदिव्यंस्वर्लोकमधिरोहति ॥ यावंतिचैवरोमाणि
गोवृषस्यमहीपते ॥ तावद्वर्षसहस्राणिगवांलोकेमहीयते ॥ गोलोकादवनींप्राप्तःइहलोकेयशोभवेत् ॥

सत्रयाजी महातेजाः सर्वब्राह्मणपूजितः ॥ स प्रजन्मावच्छिन्नकापिकवाचिकमानसिकसर्वपापनाशहृषभ
पुच्छदेदीप्यमानयानकरणस्वकर्मकरणस्वर्लोकाधिरोहणहृषभरोमससंख्यवर्षावच्छिन्नगोलोकवासो
त्तरैहिकसत्रयाजिसर्वब्राह्मणपूजितद्विजत्वकामस्यति संकल्पः ॥ गोदाने निकर्तव्यता समस्ता ज्ञेया ॥ स्नाने
षुसागरपूजां विना देवतावाहनमपीति केचित् ॥ रुद्रायगामिनिषनिग्रहः ॥ ॥ मीमांसैकधुरंधरः श्रु
तिधरो न्याये पि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ॥ यं विद्वन्मणिशेखरो दिनकरः
प्रासूत विश्वेश्वरं तेनाकारि समस्तगोनिदस्तो सम्मूलिकापद्धतिः ॥ सूनुर्दिनकरस्यैष भट्टविश्वेश्वराभि
भिधः ॥ विद्यानिदाननिर्णीतो वक्तुमारभतेधुना ॥ नंदिपुराणे ॥ यस्तु पुराणे परो मर्त्यो जिगीषुः कीर्तिसाध
कः ॥ सविधानेन वै दद्याद्विद्यां विविधकामदां ॥ विद्या च चतुर्दशभेदाः ॥ षडंगाश्चतुरो वेदा धर्मशास्त्रं
पुराणनं ॥ मीमांसानर्कमपि च एता विद्याश्चतुर्दशेति नंदिपुराणात् ॥ धर्मशास्त्रस्मृतयः पुराणनं पुरा

णां वेदपरस्तु यवेदानामणुपलक्षणं॥ सर्वेषामेव वेदानामुपवेदान्भृगुः सवनान्॥ आयुर्वेदोथ ऋग्वेदस्य यजु
र्वेदस्य धनुस्तथा॥ सामवेदस्य गांधर्वमथर्वशास्त्रमथर्वणः इति गारुडं॥ तेषां नंदं गत्वोक्तेः॥ अत्र च वेदवत्सकर्म
कारणमेव स्मृतीनां धर्मशास्त्रत्वान्नदीकानां नर्थविचारणमकेत्वा धर्मशास्त्रत्वाक्षतेस्ते दानस्यानिदानन्त्वम
व्याहृत॥ हेमाद्रिमाधवनिर्बंधदानेतुनेनिकेविन्॥ पुराणपदं च पुराणानां तरनिरूप्य विद्याने दपरं पुरा
णानां नरादत्वा परां विद्यां सहस्रशः आयुर्वेदः स संवद्देः शिल्पविद्यास्तथा पराइति गारुडान्॥ वेददानं नंदि
पुराणे· वेदविद्यां नरादत्वा स्वर्गे कल्पत्रयं वसेत्॥ दानं च त्रिविधं॥ अध्यापनं प्रतिमादानं पुस्तकदानं भेदा
त्॥ तत्राध्येयाज्ञवल्क्यः॥ सर्वकर्ममयं पुत्र लप्रदानेभ्योधिकं ततः॥ तदुदत्समवाप्नोति ब्रह्मलोकमविच्युतः॥ ब्र
ह्मवेदः विष्णुधर्मे· वेदपानादत्वाप्नोति सर्वयज्ञफलं नृप॥ उपवेदप्रदानेन गंधर्वैः सह मोदते॥ वेदांगानां च दा
नेन शक्रलोकमवाप्नुयात्॥ अध्यापनविधिर्गारुडे॥ स्वयं भूत्वा शुचिर्विप्रान्स्नातः स्नातो जितेंद्रियः॥ दर्भाना

शयपारोत्तु पाठयेन्नांस्तथा विधान् ॥ अनध्यायान्परिहरन्नीधानंश्रावयन्नपि ॥ एवं विधानतोयस्तुज्ञवमेकांश
यति ॥ त्रिर्विन्नपूर्णा संपूर्णा नेन दत्ता मही भवेत् ॥ नैतत्कल्पसहस्रेण गदितुं शकाने फलं ॥ यद्वेददानेनाप्नोति
स्वल्पादपि महीयते ॥ यावंति वेदगीनानि पुस्तके दत्तानि च ॥ तावंति वेददानेन शाध्रुयाज्जक्षिभाविनः ॥ उ
पाध्यायस्य यो वृत्तिं दत्वाध्यापयते जनं ॥ किन्न दत्तं भवेत्तेन धर्मकामार्थदर्शितं ॥ छात्राणां भोजनाभ्यंगं वस्त्रं
भिक्षामथापि वा ॥ दत्वाप्नोति पुरुषः सर्वकामान्नसंशयः ॥ आग्नेये ॥ शानरुध्यापयो वेदं वेदांगमपि पा
ठयेत् ॥ पृथिवीदानतुल्यं स्यात्फलं नस्य नपोन्नम ॥ यो वृत्तिं पठमानानां करोत्यनुदिनं नृप ॥ स यज्ञफल
मादत्ते यनाछादनभोजनैः ॥ अपुत्रो लभते पुत्रानधनो धनमाप्नुयात् ॥ अविद्यान्विद्यामाप्नोति दुःखी दुःखा
न्प्रमुच्यते ॥ उपवेशाध्यायने वेदांगाध्यापने चायमेव विधिः ॥ अनध्यायवर्जनं तु नास्ति अंगान्यनध्यायश्नि
स्मरणात् ॥ ॥ अथ वेदपानिमासानं गारुडे ॥ अथ दानविधिं वक्ष्ये रहस्यं परमं मतं ॥ यं विधाय नरो घोरा

त्रिरथ्याद्येपसर्पनि ॥ आम्नायरूपाणि विधाय सम्यक् हेमानि पूर्वोदितलक्षणानि ॥ विभूषणानामणिभूषिता
निक्षगादिवेदक्रमतोनिवेश्य मलूभूतघनदानोक्तलक्षणानीन्यथः ॥ वासांसि देयानि यथाक्रमेण पीतानि शु
क्लान्यथलोहितानि ॥ नीलानि चैवं कुसुमानि दद्यात् सुपुष्पगंधाक्षतधूपदीपैः ॥ आमोदिकं पुनं घृतपायसं च स
क्षौद्रमन्नमथ – – घृतं क्रमेण ॥ नेभ्योनिवेद्य विधिवत्स्वयतः प्रणम्य सम्यक् प्रदक्षिणविधिर्विदधीत विद्वान्
तेषां पूजाविधिः कार्यो गायत्रीमनोवरं ॥ व्याहृत्यव्याहृती कुर्याद्वाहनविसर्जने ॥ मंत्रैरेतैस्तनः कुर्यादमी
षामनुमंत्रणं ॥ ऋग्वेदपद्मपत्राक्षरक्षरक्षक्षियाशुभं ॥ शरणं त्वां प्रपन्नोस्मि धेहि मे हितमद्भुतं ॥ यजुर्वे
दनमस्तेस्तु लोकत्राणपरायण ॥ त्वत्प्रसादेन कामा मे निखिलाः संतु संततं ॥ सामवेद महाबाहो त्वं हि साक्षा
दधोक्षजः ॥ प्रसादस्तु सुखी भूत्वा कृपयानुगृहाण मां ॥ अथर्वन्सर्वभूतानां त्वदायत्ते हितैने ॥ शांतिं कुरुष्व दे
वेश पुष्टामिष्टिं प्रयच्छ नः ॥ इति संप्रार्थ्य वेदेशान्विप्रेभ्यः प्रतिपादयेत् ॥ प्रदद्यादेकमेकस्मै सुवर्णत्रिपला

॥ दा॰वि ॥
॥ २०० ॥

वितं ॥ दद्यादेकं पलोपेतं मे कैकमिह दुर्बलः ॥ अथ स्वशक्तितो वापि दानमेषां विधीयते ॥ स्वतं देवप्रमाणं स्या
देतेषां मूर्तिनिर्मितौ ॥ अनधीनवतो वेदान्वेदाने विधिस्त्वयं ॥ सदाध्ययनयुक्तस्य शिष्याध्यापनमेव हि नि
॥ ॥ अथ शास्त्रदानं ॥ ॥ नंदिपुराणे ॥ तर्कविद्यां नरो दत्वा वारुणं लोकमाप्नुयात् ॥ मीमांसां तु नरो दत्वा॰
शास्त्रमिंद्रपुरं वसेत् ॥ आत्मविद्यां तु यो दद्यात्कल्पायुतमतंद्रितः ॥ न स लोके वसेन्मर्त्यो यत्र ब्रह्मा वसेत्प्रभुः
शिल्पविद्यां नरो दत्वा यानि वै ब्रह्मणो निकं ॥ कलाविद्यां नरो दत्वा वैश्वदेवं लोकमाप्नुयात् ॥ आयुर्वेदं नरो द
त्वा वारुणं लोकमाप्नुयात् ॥ पाणिनीयं निरुक्तादि वेदांगानि स्मृतिस्तथा ॥ दत्वा ज्ञानमवाप्नोति वेदानाश्च
विशेषतः ॥ धर्मशास्त्रं नरो दत्वा स्वर्गलोके महीयते ॥ पुराणविद्यादाता तु स्वत्वं नंनफलभागिनः ॥ धर्म॰
शास्त्रं स्मृतयः ॥ नंदिकेश्वरकारिकाः श्लोकाः ॥ मनुर्वसिष्ठो त्रिपराशरौ च दक्षोशनो व्यासबुधाः प्रचेताः ॥ का
त्यायनो गोतमशंखविष्णुसंवर्तशातातपयाज्ञवल्क्याः ॥ १ ॥ हारीतपैठीनसिऋष्यशृंगबौधायनो व्याघ्र

॥ राम ॥
॥ २०० ॥

ह्रहस्पतीच॥ सनत्सुजातेयपञ्चलस्यवत्समरीचयोरस्करगार्ग्यसोमाः॥२॥ काश्मीजिनिःकाश्यपनानिकेतजाव
लिलौगाक्षिसनत्कुमाराः॥ यमोगिराःकश्यपवभ्रुहस्तशातातपानारददेवलौच॥३॥ पितामहःशौनकश्च
गलेयभृगुक्रतुस्कंदस्तमेनवश्च॥ तथाभरद्वाजकपिंजलौचप्रजापतिश्चापथशाकपूणिः॥४॥ आपस्तंब
श्चवनोजातुकर्णोविश्वामित्रोजमदग्निःकणादः॥ एतेचान्येलहंचाश्वलायनीयंचाथोलेखितंजानकं
च॥५॥ मानस्तुहस्तवासिष्ठहस्तपाराशरीयकं॥ नैताःप्रमाणंस्मृतयोहेमाद्याद्यावनुक्तिनः॥६॥ एतेषामध्या
पनविधिःपूर्ववदेव॥ विशेषस्तुनंदिपुराणे॥ अनेनैवविधानेनशास्त्राणिशीलशालिनि॥ प्रबोधवनिधी
युक्तेयुक्तिज्ञेवेदवादिनि॥ विन्यसेत्तुशुभेशास्त्रंमहापुण्यजिगीषया॥ विधिःपूर्वोक्तःकुशधारणपानःस्ना
नपूर्वकत्वादिनिकर्तव्यताविधिः॥ गुरुश्चाधीनशास्त्रःस्यात्स्वदशास्त्रविशारदः॥ अनक्षरंहस्तुवयादि
व्यपार्थबोधकः॥ आलापमात्रैर्वाख्यानैर्यश्चशिष्यान्प्रबोधयेत्॥ तस्माद्याख्यांशुभांस्तुत्वागुरुवक्त्रान्नरो

न्नमः॥ मृडुवसंशयेज्ञानेप्छेद्याकामुदीरयेत्॥ गुरुणाचोक्तमेकांतेप्रश्नावसाकमाश्रयेत्॥ यश्चश्रुत्वान्यतः
शास्त्रंसंस्कारंवाथवाशुभं॥ अनभ्यसनयेत्कीर्तिंसगुरोर्द्रोहभवेत्॥ नानाहत्वानुरूपेणालिंगेनचवाच
येत्॥ समाप्तेवाचनेभीष्टंब्रूयादेवंविचक्षणः॥ सुश्रुतंसुश्रुतंब्रूयादस्तुव्याख्यानमित्यतः॥ लोकःप्रवर्तनां
धर्मेराजावास्तुसदाजयी॥ धर्मवाश्वनसंपन्नोगुरुश्चास्तुनिरामयः॥ इतिशोच्चयथाजानंगंतव्यंचविभा(
विनैः॥ शिष्यैःपरस्परंशास्त्रंचिंतनीयेविचक्षणैरिति॥ तथा॥ श्लोकंप्रहेलिकांगाथामन्यद्यपिसुभाषि
तं॥ दत्वार्थीनिकरंयानिलोकमक्षरसांशुभं॥ तथा॥ यपैकोजीवतिप्राणीकयापिकिलकुत्रचित्॥ अत्र
दानापिसाविद्याकुलानांज्ञानमुद्धरेत्॥ अप्रदानाअविहितदानकेप्यर्थः॥ वाराहे॥ रामायणंभारतंच
दत्वास्वर्गेमहीयते॥ पुराणंनकेघ्नाख्यंचछन्दोलंकारलक्षणं॥ वेदमीमांसकंदत्वाशिवधर्मंचवैनृप
सप्तद्वीपपृथिव्यांतुराजराजोभवेन्नुसप्तति॥ अथैनपुस्तकदानं॥ वाराहे॥ विद्यादानविधिंवक्ष्येयथानवे

ननेपुनः॥ शुभमेभूप्रदेशेवगोमयेनोपलेपिते॥ पुष्पप्रकारसंपन्नेगीतवाद्यसमाकुले॥ चतुरस्रंवितानंच
कृत्वातत्रोपलेपयेत्॥ वेदिकांचतुरस्रांच चंदनेनैवकारयेत्॥ संस्थाप्यपुस्तकंतत्र धर्मशास्त्रस्यधीमता॥ ब्रा
ह्मणान्वेदसंपन्नान्छंदोलक्षणपारगान्॥ लिखापयित्वायत्नेनतत्समयंशुभाक्षरैः॥ सौवर्णीलेखनीका
र्यामषीभांडंचरूप्यकं॥ जयशब्दंसमुद्घोष्यआरभ्येतेखकःशुधीः॥ चंद्रसूर्योपरागेचसंक्रांत्ययनवासरे
पुण्येह्निमस्तुसंपूज्यवस्त्रालंकारभूषणैः॥ घृतधेन्वायुतंरत्नैर्द्दयाकृणावजेननः॥ रत्नानांदक्षिणान्वेनदा
नं॥ तच्छास्त्रश्रावणानिमंत्रणानांनाशयम्यघमितिउपक्रमोपसंहाराभ्यांसर्वपुस्तकदानमेतदितिके
चित्॥ प्रकरणाद्धर्मशास्त्रदानमितिमदनरत्नः॥ प्रतिमादानेपुस्तकदानेचस्त्रियोप्यधिकारः॥ स्त्रीचानेने
वविधिनाविद्यादानफलंलभेदितिहेमाद्रौनंदिपुराणात्॥ अथपुराणदानं॥ नंदिपुराणे॥ पुराणविद्याद
तारस्तवंफलभागिनः॥ पुराणभेदमामकाःश्लोकाः॥ ब्राह्मंपाद्मंवैष्णवंवायवीयंमार्कंडेयंनारदीयंभवि

॥ दा·वि ॥
॥ २०२ ॥

ष्यं ॥ लैंगं स्कांदं गारुडं मात्स्यकौर्मं ब्रह्मांडं च ब्रह्मवैवर्तमेव १ वाराहमाग्नेयमथोपि पुराणं श्रीवामनं भागवतं त
थैव ॥ इत्येवमष्टादशवायवीयस्थाने च केचित्तु थ शैवमाहुः २ खेन्दु १० पाद्मशरो ५५ दधिद्वये २४ ।२४ नंद ८
वाणयुग २५ सागरेंदवः १४ ॥ रुद्र ११ वेदवसु ८४ नंदवेदकं १९ शैलवेद ७४ मनु १४ सूर्य १२ दंतिकः १८ ॥ इत्नव
२४ षोडशा १६ खवेद १० दंतिगो १८ रेभिरेव गणिताः सहस्रकाः ॥ कालिकाह्वयमथो पराशरं नारसिंहमथ
नारदीयकं ॥ ४ ॥ सनत्कुमारीयमथोपि सौरं दौर्वासमं मानव कापिले ये ॥ श्रीविष्णुधर्मोत्तर शैवधर्मौ माहे
श्वरं नंदिपुराणमेव ५ कौमारौशनसे देवीपुराणं वारुणं तथा ॥ एतान्युपपुराणानि संख्ययाष्टादशानि तु
द ॥ अथैतेषां दानविधिः ॥ ब्राह्मं तु दशसाहस्रं पुराणं परिकीर्त्तितं ॥ लिखित्वा तच्च यो दद्यात्तिलधेनुसम
न्वितं ॥ वैशाख्यां पौर्णमास्यां तु ब्रह्मलोके महीयते ॥ एतदेव यदा पद्ममभूद्धैरण्मयं जगत् ॥ तद्वृत्तांताश्रयं
तद्वत्पाद्ममित्युच्यते बुधैः ॥ पाद्मं तत्पंचपंचाशत्सहस्राणीह पठ्यते ॥ तत्पुराणं च यो दद्यात्सुवर्णकमलान्वि

॥ सम ॥
॥ २०२ ॥

नं॥ज्येष्ठेमासितिलैर्युक्तंसोश्वमेधफलंलभेत्॥वाराहकल्पवृत्तांनमधिकृत्यपराशरः॥यत्राहधर्मानखि
लांस्तद्युक्तंवैष्णवंविदुः॥तदाषाढेचयोदद्यात्घृतधेनुसमन्वितं॥पौर्णमास्यांविपूतात्मासपदंयातिवारु
णं॥चतुर्विंशतिसाहस्रंतत्पुराणंविदुर्बुधाः॥श्वेतकल्पप्रसंगेनधर्मान्वायुरिहाब्रवीत्॥यत्रतद्वायवी
यंस्याद्रुद्रमाहात्म्यसंयुतं॥चतुर्विंशतिसाहस्रंपुराणंतदिहोच्यते॥श्रावण्यांश्रावणेमासेगुडधेनुसमन्वि
तं॥योदद्यात्दधिसंयुक्तंब्राह्मणायकुटुम्बिने॥शिवलोकेसपूतात्माकल्पमेकंवसेन्नरः॥यत्राधिकृत्यगा
यत्रींवर्ण्यतेधर्मविस्तरः॥वृत्रासुरवधोपेतंतद्भागवतमुच्यते॥सारस्वतस्यकल्पस्यमध्येयेस्युर्नरामराः
तद्वृत्तांतोद्भवंलोकेतद्भागवतमुच्यते॥लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं॥पौर्णमास्यांप्रोष्ठपद्यांस
यातिपरमंपदं॥अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितं॥यत्राहनारदोधर्मान्बृहत्कल्पाश्रितांस्त्विह॥पं
चविंशतिसाहस्रंनारदीयंतदुच्यते॥तदिदंपंचदश्यांतुयोदद्याद्धेमसंयुतं॥उन्मासिसिद्धिमाप्नोतिपुनरा

कृत्तिर्दुर्लभां ॥ यत्राधिकृत्यशकुनीन्धर्माधर्मविचारणं ॥ पुराणं नवसाहस्रं मार्कंडेयमिहोच्यते ॥ परिलि-
ख्य च यो दद्यात्सौवर्णकरिसंयुतं ॥ कार्त्तिक्यां पुंडरीकस्य यज्ञस्य फलभाग्भवेत् ॥ यत्र दीशानकल्पस्य हृ-
त्तांतमधिकृत्य च ॥ वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते ॥ लिखापयित्वा यो दद्याद्धेमपद्मसमन्वितं
मार्गशीर्षे विधानेन तिलधेन्वान्वितं तथा ॥ तत्तु षोडशसाहस्रं सर्वक्रतुफलप्रदं ॥ यत्राधिकृत्य माहात्म्य-
मादित्यस्य चतुर्मुखः ॥ अघोरकल्पवित्तांतप्रसंगेन जगत्स्थितिः ॥ मनवे कथयामास भूतग्रामस्य लक्षणं ॥ च-
तुर्दशसहस्राणि तथा पंचशतानि च ॥ भविष्यचरितं प्रायं भविष्यं तदिहोच्यते ॥ तत्पौषमासि यो दद्यात्पौर्ण-
मास्यां विमत्सरः ॥ गुडकुंभसमायुक्तमग्निष्टोमफलं लभेत् ॥ रथंतरस्य कल्पस्य हृत्तांतमधिकृत्य च ॥ साव-
र्णिना नारदाय कृष्णमाहात्म्यसंयुतं ॥ यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ॥ तदष्टादशसाहस्रं ब्रह्मवैव-
र्त्तमुच्यते ॥ पुराणं ब्रह्मवैवर्त्तं यो दद्यान्माघमासि च ॥ पौर्णमास्यं स भवनं ब्रह्मलोके महीयते १० यत्राग्नि-

लिंगमध्यस्थः प्राह देवो महेश्वरः ॥ धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च ॥ कल्पांते लैंगमित्युक्तं पुराणं ब्रह्मणा
स्वयं ॥ तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ॥ तिलधेनुसमायुक्तं स याति शिवसाम्यतां ॥११ महावराहस्य पुन
र्माहात्म्यमधिकृत्य च ॥ विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते ॥ मानवस्य प्रसंगेन कल्पस्य मुनिसत्तम ॥ च
तुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ॥ कांचनं गरुडं कृत्वा तिलधेनुसमन्वितं ॥ पौर्णमास्यां मधौ दत्वा ब्राह्म
णाय कुटुंबिने ॥ वराहस्य प्रसादेन पदमाप्नोति वैष्णवं ॥१२॥ यत्र माहेश्वरान्धर्मानधिकृत्य च षण्मुखः ॥
कल्पे तत्पुरुषे वृत्ते चरितैरुपबृंहितं ॥ स्कांदं नाम पुराणं तदेकाशीति निगद्यते ॥ सहस्राणि शतं चैकमिति
मर्त्येषु पठ्यते ॥ परिलिख्य च यो दद्यात् हेमशूलसमन्वितं ॥ शैवं च पदमाप्नोति मकरोपगमे रवौ ॥१३॥ त्रिवि
क्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ॥ त्रिवर्गमभ्यधात्तच्च वामनं परिकीर्त्यते ॥ पुराणं दशसाहस्रं कूर्मक
ल्पानुगं शिवं ॥ यः शरद्विषुवे दद्याद्वैष्णवं यात्यसौ पदं ॥१४॥ यत्र धर्मार्थकामानां मोक्षस्य च रसातले ॥ माहा

त्म्यं कथयामास कूर्मरूपी जनार्दनः ॥ इंद्रद्युम्नप्रसंगेन ऋषीणां शक्रसन्निधौ ॥ सप्तादशसहस्राणि लक्ष्मीकल्या
नुषंगिकं ॥ यो दद्यादयने कूर्मे हेमकूर्मसमन्वितं ॥ गोसहस्रप्रदानस्य स फलं प्राप्नुयान्नरः ॥ १५ ॥ श्रुतीनां य
त्रकल्पादौ पहृत्यर्थं जनार्दनः ॥ मत्स्यरूपी च मनवे नरसिंहोपवर्णनं ॥ अधिकृत्याब्रवीत्सप्तकल्पवृत्तं मुनि
बुनाः ॥ तन्मात्स्यमनुजानीध्वं सहस्राणि चतुर्दश ॥ विषुवे हेममत्स्येन धेन्वा चैव समन्वितं ॥ यो दद्यात्पृथिवी
तेन दत्ता भवन्ति चाखिला ॥ १६ ॥ यदा च गारुडे कल्पे विश्वाण्डाद्गरुडोद्भवं ॥ अधिकृत्याब्रवीत्कृष्णो गारुडं तत्
दिहोच्यते ॥ तदष्टादश चैकं च सहस्राणीह पठ्यते ॥ सौवर्णं हंससंयुक्तं गारुडं विषुवे नरः ॥ यो ददाति परां सि
द्धिमाप्नोति शिवसंमितं ॥ १७ ॥ ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत्पुनः ॥ तच्च द्वादशसाहस्रं ब्रह्माण्डं द्वि
शताधिकं ॥ भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः ॥ तद्ब्रह्माण्डपुराणं तु ब्रह्मणा समुदाहृतं ॥ यो दद्या
त्तद्व्यतीपाते पटोर्णयुगसंयुतं ॥ राजसूयसहस्रस्य फलमाप्नोति मानवः ॥ हेमधेन्वायुतं तच्च ब्रह्मलोकफल

प्रदं ॥ १८ ॥ भारतहरिवंशश्रवणविधिरनेटम्कन्व हरसरस्वतीदानविधिश्चपितत्कृतकर्मविपाकसारेज्ञे
यः ॥ उपपुराणदानविधिरपिपूर्वोक्तप्रस्तकदानविधिनास्पष्टः ॥ नंदिपुराणे ॥ येपिपञ्चमशीयाञ्चलेख
नीसंपुटादिकं ॥ दद्युःशास्त्राभियुक्तायनेपिविद्याप्रदायिनां ॥ यांतिलोकान्शुभान्मर्त्याःपुण्यभाजोनराधि
प १ ॥ ॥ मीमांसैकधुरंधरःश्रुतिधरोमायेपिवागीश्वरःसाहित्यामृतसागरःसुजननावल्लीरसालद्रुमः ॥ यं
विद्वन्मणिशेखरोदिनकरःप्रासूतविश्वेश्वरंतेनेत्थंसमकारिपद्धतिरियंविद्यानिदानेशुभा ॥ ॥ इतिमी
मांसकभट्टविश्वेश्वरकृतौदानदिनकरोद्योतेनिदाननिरूपणं ॥ ॥ आधायराधाधवपादपद्मेबुद्धिंसमा
धायमनश्चसम्यक् ॥ प्रेक्षावतांप्रेक्षणतोनिबंधान्विश्वेश्वरःशैलददानतनोति ॥ ॥ अथपर्वतदानंहे
माद्रौपाद्मे ॥ मेरोःप्रदानंवक्ष्यामिदशधामुनिसत्तम ॥ यत्प्रदानान्नरोलोकानाप्नोतिसुरपूजितान् ॥ प्रथ
मोधान्यशैलःस्याद्द्वितीयोलवणाचलः ॥ गुडाचलस्तृतीयस्तुचतुर्थोहेमपर्वतः ॥ पंचमस्तिलशैलःस्यात्षष्ठः

कार्पासपर्वतः॥ सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः॥ राजतो नवमस्तद्वद्दशमः शर्कराचलः॥ वक्ष्ये विधान
मेतेषां यथावदनुपूर्वशः॥ मंडपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखं॥ प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधानतः॥
गोमयेनोपलिप्तायां भूमावास्तीर्य वै कुशान्॥ तन्मध्ये पर्वतं कुर्याद्विष्कंभपर्वतान्वितं॥ धान्यद्रोणसहस्रेण
भवेद्गिरिरिहोत्तमः॥ मध्यमः पंचशतिकः कनिष्ठः स्यात्त्रिभिः शतैः॥ मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णवृक्ष
त्रयसंयुतः स्यात्॥ पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः॥ पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन
वैदूर्यसरोजरागैः॥ श्रीखंडखंडैरभितः प्रवालतानान्वितः शुक्तिशिलातलः स्यात्॥ ब्रह्माथ विष्णुर्भगवान्पुरा
रिर्दिवाकरोप्यत्र हिरण्मयः स्यात्॥ मूर्धन्यवस्थानममत्सरेण कार्यास्तु वर्णेन तथा द्विजौघाः॥ चत्वारि शृंगा
णि च राजतानि नितंबभागेपि च राजतः स्यात्॥ आर्द्रेक्षुवंशावृतकंदरस्तु घृतोदकप्रस्रवणाश्च दिक्षु॥ शु
क्लांबराण्यंबुधरावली स्यात्पूर्वेण पीतानि च दक्षिणानि॥ वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घ

नानी ॥ सौम्यान्महेंद्रप्रमुखांस्तथाष्टौ संस्थाप्य लोकाधिपतीं क्रमेण ॥ नानाफलाढीवसमेनन नःस्थान्मनोरमं मा
ल्यविलेपनं च ॥ वितानकं चोपरि पंचवर्णमन्नानभूष्याभरणं सितं च ॥ इत्थं निवेश्यामरशैलमध्यं मेरोः सु(
विष्कंभगिरीन्क्रमेण ॥ तुरीयभागेन चतुर्दिशं तु संस्थापयेत्पुष्पविलेपनाढ्यान् ॥ पूर्वेण मंदरमनेकफले
श्च युक्तं युक्तं गणैः कनकभद्रकदंबचिन्हं ॥ कामेन कांचनमयेन विराजमानमाकारयेत्कुसुमवस्त्रविलेपना
ढ्यं ॥ क्षीरारुणोदसरसा च वनेन चैव वैभ्राजकेन सुघटितेन विराजमानः ॥ याम्येन गंधमदनश्च निवेशनीयो
गोधूमसंचयमयः कलधौतजंघा ॥ हेमेन यक्षपतिना घृतमानसेन वस्त्रैश्च राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगंधपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तं ॥ आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वि
तं दधिसितोदसरस्तथाग्रे ॥ संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि माषमयं सुवस्त्रं ॥ पुष्पैश्च
हेमवटपादपशेखरं तमाकारयेत्कनकधेनुविराजमानं ॥ माक्षीकभद्रसरसा च वनेन तद्वद्भौमेन भास्कररू

च्चावयुजनं विधाय ॥ होमश्चतुर्भिरयावेदश्चराणावह्निर्दैवतैरनिंघवरिनाहुतिभिर्द्विजेन्द्रैः ॥ पूर्वेणादस्रमिनमन्त्र
विधायकुंडंकार्यस्तिलैर्यवघृतेनसमिन्कलैश्च ॥ राजौवजागरमत्र ग्रनगीनरूपैरावाहनंचकथयामिशिलो
च्चयानां ॥ आवाहनमंत्राःश्रयोगेस्मृताः ॥ एवमामंत्र्यनान्सर्वान्प्रभाने विमलेप्सनः ॥ स्नातायगुरवेदद्यान्मध्यमं
पर्वतोत्तमम् ॥ विष्कंभपर्वतान्दद्यादृत्विग्भ्यःक्रमशोनृप ॥ गावोदद्याच्चतुर्विंशदथषोडशपार्थिवः ॥ शक्तितः
सप्तवाष्टौवापंचदद्याद्दशाक्रवान् ॥ एकांवांगुरवेदद्यात्कपिलांगांपयस्विनीं ॥ अन्नाद्भवंनिष्पन्नानिजगद
न्नेनवर्तते ॥ अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः ॥ धान्यपर्वतरूपेणपाहितस्मान्नमोनमः ॥ अनेनवि
धिनायस्तुदद्याद्धान्यमयंगिरिं ॥ मन्वंतरशतंसाग्रंदेवलोकेमहीयते ॥ अप्सरोगणगंधर्वैराकीर्णेनवि
राजिता ॥ विमानेनदिवःपृष्ठमायांतिसुरसेवितः ॥ कर्मक्षयाद्राजराज्यंप्राप्नोतीहनसंशयः ॥ विधानमि
ति ॥ अथकालः ॥ कार्तिक्यामयनेचैवग्रहणेवापिसर्वदा ॥ अन्येष्वपिचकालेषुयदाश्रद्धाभिजायते ॥ इति

ब्रह्मांडान्ज्ञेयः॥ प्रथमइत्यादिपाठश्चाप्रमाणवादः॥ नतुक्रमविधिः॥ मंडपइतित्राग्निस्थापनाधिवासनादीनां
मुपलक्षणानामुपलक्षणं॥ कुंडंत्वेकमेव॥ ऋत्विजोष्टौचतुरोवा॥ पूर्वतःकारयेत्कुंडंहस्तमात्रंसुशोभनं॥ ब्राह्मण
स्तत्रहोतारोष्टौचत्वारएववेतिब्रह्मांडादितिहेमाद्रिः॥ तुलापुरुषषोडशानां मध्येऽष्टानामेव होमकर्तृत्वा
त्तत्परवादः॥ तेनषोडशास्वत्रऋत्विजइत्यन्ये॥ भूमाविन्नकैर्वेदिर्नेतिकेचित्॥ किंतु मंडपपूर्वभागेएकंकुंडं
विधायमंडपपूर्वोत्तरेचदेवनावेदिंकृत्वातत्रग्रहादिपूजेतिहेमाद्रिः॥ द्रोणसहस्रेणेत्यादिशक्तविषयं॥
अलाभेवायथाशक्त्याकारयेत्कुरुपान्विनइतिब्रह्मांडात्॥ कुर्याद्विभवसारतइतिभविष्योत्तराच्च॥ महा
व्रीहयइतिइहउपलक्षणं॥ व्रीहिभिःकारयेत्तंतुगोधूमैरथवायवैरितिभविष्योत्तरात्॥ महाव्रीहयोराज
शालयः॥ वृक्षत्रयेति॥ दक्षिणोत्तरयोर्मंदारपारिजातौमध्येकल्पतरुरितिवृक्षत्रयम्॥ अत्रचपूर्वपश्चि
मयोःहरिचंदनसंतानवृक्षावपिकार्यौ॥ मंदारःपारिजातश्चसंतानीयःकल्पपादपः॥ एतद्वृक्षत्रयंमूर्ध्निसर्वे

स्वपिनिवेशयोर्नः॥ हरिचंदनसंज्ञानौ पूर्वपश्चिमभागयोः॥ निवेश्यौ पूर्वशैलेषु विज्ञेयास्फर्कराचलद्वन्द्वकेः
विशेषादित्यनेन शर्कराचलरूवनयो रावणकल्पादन्यत्राज्ञो वृक्षसञ्चयमेवेनिमदनरत्नः॥ वृक्षचयानं नग
न हरिचंदनसंज्ञानयोः शार्कराचलआवश्यकत्वोज्ञ्या अन्यत्रानावश्यकत्वादशक्तो रूकरूवह्वक्ष इत्यपि
केचित्॥ वज्रंशीस्वकं॥ गारुत्मतं॰मरकतं॰सरोजरागः पद्मरागः॥ मुक्तादीनां राजतश्रेष्ठेषु स्वचितत्वेन
पूर्वादिसंलग्नत्वेमानानाभावान्स्थायतनमित्यन्ये॥ भुक्तिशिलेतिः भुक्तयस्रवशिलाः स्नानिमिस्तलं अधो
देशशोयसेत्यर्थः॥ वृक्षादीनि॥ वृक्षविहंगरुजादिप्रतिमामूर्द्धनिस्थाप्यात्यर्थः॥ द्विजौघा इति॰ब्रा
ह्मणाः पक्षिगणश्चेत्यर्थः॥ चत्वारींनिभृङ्गाकाराणिकार्याणीत्यर्थः॥ निर्मवेति॥ धान्यराशोर्मध्यभागे प
रिकल्परजतसूत्रेणावेष्ट्येदित्यर्थः॥ आर्द्रइति॥ आर्द्रक्षवरूववंशासेराह्वना आच्छिन्नाः कंदरायस्य
सः॥ नचैवकंदराः परिकल्पोक्षुभिश्चादयेन॥ घृतेनेति चतुर्दिक्षु घृतपूर्णानि पात्राणि स्थापयेदित्यर्थः

भुक्लैरिति दिक्षु पूर्वादिक्रमेणाष्टकूपीन कर्बुरं रक्तवस्त्राणि स्थाप्यानित्यर्थः ॥ एतेषां च स्थापनं मध्ये रोप्या
नि निलीकयालाष्टकभूमौ स्थापनं समंतादिति केचित् ॥ नितंबभाग इत्यन्ये ॥ मूर्द्धीम्य परे ॥ नानेति ॥ फलानां
मात्यानां विलेपनस्य च भूमौ स्थापनं ॥ तुरीयेति ॥ चतुर्थभागेनैकोनत्र सर्वे चतुर्थांशेन विष्कंभात् पर्वताका
रयेत्स्यथगिति पामान् ॥ पूर्वेणेति मंदारो ब्रीहिमय इति हेमाद्रिः ॥ विष्कंभपर्वतं चैव यवैः कुर्यात्तु पूर्वतश्
निद्रसांडाप्रवमय इत्यन्ये ॥ गगौरिति त्रिभिः पुरुषैरित्यर्थः ॥ भद्रकदंबः कदंबाकारो वृक्षः ॥ सौवर्णनछ
क्षयुक्तमित्यर्थः ॥ कामेनेति ॥ मूर्द्धनि स्थितनस्य कदंबस्य मूले स्थापनं ॥ कामतक्षणयुक्तं कल्पनरूपाने ॥ क्षी
रेति· अरुणोदसरस्थानीयक्षीरपूरितरौप्यपात्रयुक्तः रौप्यघटितवनयुक्तं चेत्यर्थः ॥ यामेनेति ॥ सौव
र्णजंबुवृक्षनत्मूलस्थसौवर्णकुबेरयुक्तमित्यर्थः ॥ पूर्ववद्देवमानसेनभरसावनेनचयुक्तमि
त्यर्थः ॥ पश्चादिति सौवर्णपिप्पलं मूलस्थितसौवर्णहंसयुक्तं निलेविपुलं शैलं कुर्यादित्यर्थः ॥ दधियुक्त

रजतपात्रेण कल्पितं यत्नतः ॥ नत्वशीनोदस्थाने कल्पनीयमित्यर्थः ॥ सुपार्श्वमिति ॥ सौवर्णवटवृक्षमूलस्थि
तं सौवर्णं धेनुयुक्तमित्यर्थः ॥ माक्षीकं मधुकामाक्षीनां स्थापने विशेषः शर्कराचले मंदरे कामदेवश्च प्रसन्नव
क्त्रः सदा भवेत् ॥ गंधमादनशृंगे च धनदः स्यादुदङ्मुखः ॥ प्राङ्मुखो वेदमूर्तिश्च हंसः स्याद्विपुलाचले ॥ हैमी
सुपार्श्वे सुरभिर्दक्षिणाभिमुखी भवेदिति यामेभिहितः ॥ होमश्चेति ॥ होमस्तिलाज्येन सहस्रसंख्याकः करा
त्मककुण्डेकेरिति हेमाद्रि ॥ अन्ये तु एवंविधास्तथा विधा होमं कुर्युरतंद्रिताः ॥ इंद्राद्या लोकपाला येनेयां हो
मो विधीयते ॥ तच्चिन्हैश्चैवमंत्रैश्च समिद्भिरथवा तिलैः ॥ पौरुषेणानुसूक्तेन ब्रह्मादीनां विधीयते ॥ तथा
व्याहृतिभिर्होमं तिलैराज्येन चैव हि ॥ अष्टशतं तु होतव्यं सर्वकामसमृद्धय इति ब्रह्मांडात् ॥ अष्टशतं हो
मः ॥ समित्तिलयोर्विकल्पमित्याहुः ॥ देवतास्तन्मंत्राश्च प्रयोगे स्पष्टाः ॥ स्वर्णमिति ॥ विमलशीलप्रमाणविशे
षणाम् ॥ स्नात्वेनिगुर्वैर्विज्ञैरभिषिक्तः ॥ गाश्चेति ॥ गवां दक्षिणात्वेन दानमिति केचित् ॥ सहस्रदक्षि

तां कृत्वा शक्त्या भुवि भवस्य वै निवसाराज्ञन्मह्स्वं दक्षिणा ॥ गवादीनां त्वं गत्वेनाह्यार्थं दानमिति हेमाद्रिः ॥ ह
स्यार्थत्वसंभवे ह्स्यार्थत्वमान्यायत्वात्तुलावदिदमनुज्ञार्थं गोदानं ॥ नेन यथे छविभागयक्षोयस्तीति वपंश्रती
मः ॥ भोजनं शक्तितः कुर्यात्सर्वशैलेषु मत्सरः ॥ सर्वत्राक्षारलवणमश्नीयान्नदजन्नया ॥ अन्नोभोजने विकल्पः
क्षान्निजामपीति हेमाद्रिः ॥ अनेन पर्वतोपस्करास्सर्वान्यापये तु लवणायान्वितिनि विशेषः ॥ शेषं स्पष्टम् ॥ ॥ इ
ति धान्यपर्वतविधिः ॥ वक्ष्यमाणलवणादिपर्वतेषु धान्यपर्वतधर्मातिदेशो हेमाद्रौ मात्स्ये ॥ पर्वतानाम
शेषाणामेष एव विधिः स्मृतः ॥ ग्रहाणां लोकपालानां ब्रह्मादीनां च सर्वशः ॥ स्वमंत्रैरेव सर्वेषु होमः शैलेषु
पठ्यते ॥ उपवासी भवेन्नित्यमशक्तो नक्तमिष्यते ॥ विधानं सर्वशैलानां क्रमशः शृणु पार्थिव ॥ दानकालेषु
ये मंत्राः पर्वतेषु च यत्फलमिति ॥ अथ लवणाचलः ॥ हेमाद्रौ पाद्मे ॥ अथातः संप्रवक्ष्यामि लवणाचल
मुत्तमं ॥ यत्प्रदानान्नरो लोकमाप्नोति शिवपूजितं ॥ उत्तमः षोडशद्रोणैः कर्तव्यो लवणाचलः ॥ मध्यमः स्या

न्नदर्द्धेन चतुर्भिरधमः स्मृतः ॥ वित्तहीनो यथाशक्त्या तोरणार्द्धं तु कारयेत् ॥ चतुर्थांशेन विष्कंभ पर्वतान्का(
रयेत्पृथक् ॥ विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा ॥ न दद्भेमनरुक्मवीक्षोकयालनिवेशनं ॥ सरांसि काम
देवादींस्तद्वच्चात्र निवेशयेत् ॥ कुर्याज्जागरणं चापि गानमंत्रान्निबोधतः ॥ सौभाग्यरससंभूतो यतो यं लव
णो रसः ॥ तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ॥ यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ प्रियं त्वं
शिवयोर्नित्यं तस्मात्त्वां निवपछमे ॥ विमुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनं ॥ तस्मात्पर्वतरूपेण पाहि सं
सारसागरात् ॥ अनेन विधिना यस्तु दद्याल्लवणपर्वतं ॥ उमालोके वसेन्नित्यं ततो याति परां गतिं ॥ विधा
नमिति पूजनमित्यर्थः ॥ पूर्ववद्दितिधान्यशैलोदितसर्वधर्मातिदेशः ॥ जागरग्रहणमनुवादः ॥ पूर्ववद्
देवाच्चनविकल्पो द्रष्टव्यः ॥ अथ गुडपर्वतः पाद्मे ॥ अथातः संप्रवक्ष्यामि गुडपर्वतमुत्तमं ॥ यत्प्रसादान्न
रः स्वर्गमाप्नोति सुरपूजितं ॥ उत्तमो दशभिर्भारैर्मध्यमः पंचभिर्मतः ॥ त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेना

त्पविन्नवान् ॥ नदगमंत्रणांपूजाहेमहृक्षस्तुरार्चनं ॥ विष्कंभपर्वनास्तघस्तरांसिवनदेवताः ॥ होमंजागरणं
नदक्लोकपालाधिवासनं ॥ धान्यपर्नवन्कुर्यादिनिमंत्रमुदीरयेत् ॥ यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः
सामवेदस्तुवेदानांमहादेवस्तुयोगिनां ॥ प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा ॥ तथारसानांप्रवरःसदै
वेक्षुरसोमतः ॥ ममतस्मात्परांलक्ष्मीं ददस्वगुडसर्वदा ॥ यस्मात्सौभाग्यदायिन्याभ्रातात्वंगुडपर्वतः ॥ विवा
सश्चापिपार्वत्यास्तस्मान्मांपाहिसर्वदा ॥ अनेनविधिनायस्तुदद्याद्गुडमयंगिरिम् ॥ पूज्यमानःसगंधर्वै
र्गौरीलोकेमहीयते ॥ पुनःकल्पशतानंतेसप्तद्वीपाधिपोभवेत् ॥ आयुरारोग्यसंपन्नःशत्रुभिश्चापराजितः
भत्रवपानमेनन्मघासंस्पान्स्त्रीणांराजन्विशेषतः इनिब्रह्मांडान्स्त्रीणामेवाधिकारइनिकश्चित् ॥ अथ
मर्थवादइत्यन्ये ॥ अत्रमइनिइदस्तुपलक्षणं ॥ विंशत्यारस्तुकर्तव्यंशेषंपूर्ववदाचरेदितिब्रह्मांडात् ॥ नव
दिनि ॥ अत्रहेमवृक्षादीनांपुनःसंकीर्तनात् ॥ शृंगादीनप्यपकाराणि ॥ अतस्यवब्रह्मांडे ॥ लोकपालसमीपे

॥ दा॰वि ॥
॥ २१० ॥

तंनथाकांचनशृंगिणां ॥ मुक्ताफलविचित्रांगंवस्त्रालंकृतविग्रहं ॥ प्रवालपुच्छवोयेननिक्षुदंडोयवेणु॰
कं ॥ कुर्यात्कांस्यमयस्कंधंनानाभानुविभूषितं ॥ सर्वौषधिसमोयेतंसभृंगसमसहाडुमभिमुक्तं ॥ अत्र
मात्विजश्चत्वारस्त्व ॥ पंचमोगुरुरुच्यतेसान्सर्वान्पूजयेन्नन इतिब्रह्मांडात् ॥ होमश्चात्रअनिर्देशाश्ग्रा
ग्रहादिहोमोवाहनिहोमश्चात्रइष्यते ॥ महाव्याहृतिभिश्चैवअयुतंनत्रहोमयेन् ॥ इतिब्रह्मांडात् ॥ शे
षंसर्वं ॥ अथसुवर्णाचलदानं ॥ अथपापहरंवक्ष्ये सुवर्णाचलमुत्तमम् ॥ यस्यप्रसादाद्भवनंवैरिंचंया
निमानवः ॥ उत्तमः पलसाहस्रोमध्यमःपंचभिःशतैः ॥ तदर्द्धेनाधमःसर्वंविदध्याद्राजसत्तम ॥ विष्कंभ
शैलांस्तद्वदन्त्विंश्याःशुन्निपादयेत् ॥ नमस्तेब्रह्मबीजायब्रह्मगर्भायवैनमः ॥ यस्मादनंतफलदस्तस्मा॰
त्पाहिशिलोच्चय ॥ यस्मादग्नेरपत्यंत्वंयस्मात्तेजोजगत्पतेः ॥ हेमपर्वतरूपेणतामात्पाहिनगोत्तमः ॥ अ
नेनविधिनायस्तुदद्यात्कनकपर्वतं ॥ सयातिपरमंब्रह्मलोकमानंदकारकं ॥ तत्रकल्पशतंतिष्ठेत्ततोया

॥ राम ॥
॥ २१० ॥

निपर्यांगतिं ॥ अत्रमध्यमशैलस्यादृश्यत्वेनरवेदानंवरुद्दृश्यत्वेनगर्वतुत्तयातुलापुरुषवदनमिति
हेमाद्रिः ॥ युक्तंत्वाचार्यायैवदानमिति ॥ अथतिलाचलःपाद्मे ॥ अथातःसंप्रवक्ष्यामितिलशैलविधानकं
यत्प्रदानान्नरोयातिविष्णुलोकमनुत्तमम् ॥ उत्तमोदशभिर्द्रोणैःपंचभिर्मध्यमस्तथा ॥ त्रिभिःकनिष्ठो
विप्रेन्द्रतिलशैलःप्रकीर्तितः ॥ पूर्ववच्चापरेसर्वेविष्कंभकादिकं ॥ दानमंत्रान्प्रवक्ष्यामियथावद्द्विजस
त्तमः ॥ यस्मान्मधुवनेविष्णोर्देहस्वेदसमुद्भवाः ॥ तिलाःकुशाश्चमाषाश्चतस्माच्छन्नोभवत्विह ॥ हव्यकव्ये
षुयस्माच्चतिलैरेवाभिरक्षणं ॥ भवादुद्धरशैलेंद्रतिलाचलनमोस्तुते ॥ इत्यामंत्र्यततोदद्यात्तिलाचलमनु
त्तमं ॥ सर्वैश्वर्ययदद्यानिपुनराहृत्यदुर्लभं ॥ दीर्घायुष्यमवाप्नोतिइहचामुत्रमानवः ॥ पितृभिर्देवगंधर्वैः
पूज्यमानोदिवंव्रजेत् ॥ उत्तमादिनिर्दृष्टपलक्षणं ॥ आनत्वयेरात्रेणानांद्वात्र्यावापिप्रकलयेदिवसांडान
पूर्ववदिति ॥ अत्रकेचित्नदिशावलान्मंदरादीन्तिलैरेवप्रकल्पयेदितिव्रसांडेतिलाचलेनिदेशपान्न

॥ धवि ॥
॥ २११ ॥

विष्कंभपर्वतेनद्रव्यबाधात् ॥ अन्यपर्वतेः तत्र ग्रामैरेव विष्कंभपर्वता इत्याहुः ॥ अन्ये तु चतुर्थ्याद्यादिपदसम
भिव्याहारात् मुख्यपर्वतेनद्रव्येणैव विष्कंभपर्वतकल्पनमित्याहुः ॥ अत्र लोकपालाः सौवर्णाः ॥ ब्रह्मादिलो
कपालाश्च सौवर्णान्कारयेत्तन्येनित्रसांडात् ॥ अथ सहस्रं दक्षिणा ॥ ॥ सहस्रं दक्षिणां दद्यात् कृत्वा वा
पिप्रदापयेत् ॥ अत्रापि गावो दातव्या अर्थो वक्ता ए एव वे नित्रसांडात् ॥ यथ्यादिनि ॥ एतेषां दानमन्त्रा(
न्प्रवक्ष्यामीति उपक्रमे दानमंत्रत्वश्रवणात् उपसंहारे इत्यामंत्रणस्य चाद्धार्थत्वेनाप्युपपन्नेरेतेषां
दानमंत्रत्वमेवेति केचित् ॥ सर्वा च लेखामंत्रणामंत्रा एव दानमंत्रा इति मदनरत्नः ॥ तेषु तु दशतालं
प्रमाणेन दंडं संस्थापयेत् मुने ॥ दंडाग्रदेशात् स्नेधेअन्नमःपरिकीर्तितः ॥ चतुरंगुलहीनश्च मध्यमः परि
कीर्तितः ॥ इडंगुलः कनिष्ठः स्यान्तवेदैः स्तैक्ष्ववेष्टयेदित्युक्तं ॥ निष्कपरिमितसुवर्णेन सद्योजातवामदे
वादिपंचब्रह्मरूपं पंचकेकादशरुद्ररूपाणि निष्कत्रयसौवर्णाः प्रतिमाः ॥ रजतमयाश्च लोकपालादिप्रतिमाः का(

॥ दान ॥
॥ २११ ॥

र्या इत्युक्तं ॥ एतन्नोत्तरनं चैतु तुलाव छिनाय कोमायनिपूजनमस्तकुंडी चोक्ता ॥ षड्भागेन ततः कार्याः समंताद्ध
र्षपर्वताः ॥ माल्यवान्निषधश्चैव हेमवान् हेमकूटकः ॥ गंधमादनशैलश्च शृंगवान्श्वेतशैलकाः ॥ इत्यने(
न माल्यवन्निषेध हिमवद्धेमकूटगंधमादनश्वेताख्याष्टविष्कंभा इत्युक्तं ॥ तथा· अथ स्नात्वा कल्पद्रुमाणां सौ
वर्णांकमलेहरं ॥ सुरवासीनं चतुर्बाहुं जटामुकुटमंडितं ॥ त्रिनेत्रं सौम्यवदनं सौवर्णं यस्य पूजयेत् ॥ पूजनं
चैकादश रुद्रनामभिः ॥ पूजयित्वा द्विजानग्रे दीनांधकृपणांस्ततः इति ॥ अथ कार्पासाचलः ॥ कार्पास
पर्वतस्तद्वद्विंशद्भारैरिहोत्तमः ॥ दशभिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः ॥ भारेणाल्पधनो दद्याद्वित्त
शाठ्य विवर्जितः ॥ धान्यपर्वतवत्सर्वमासाद्य राजसत्तम ॥ प्रभातायां तु शर्वर्यां दद्यादिदमुदीरयन् ॥ त्वमे
वावरणाय स्माल्लोकानामिह सर्वदा ॥ कार्पासाचल तस्मात्त्वमघौघध्वंसनो भव ॥ एवं कार्पासशैलेंद्रं
यो दद्यात्सर्वसन्निधौ ॥ रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह ॥ धान्यपर्वतवदिति· ब्रह्मांडपुराणोक्तवि

॥दा.वि॥ शेषधर्मानिरिक्तसकलधर्मानिदेशसंग्रहः॥ तेनवसौवर्णंशिखराक्षवान्सर्वरत्नोपशोभितान्॥नानाधातुवि
॥२१२॥ चित्रांगानिनि विष्कंभपर्वतेषु धर्मविशेषः॥कुंडेवा स्थंडिलेवापितत्र होमो विधीयते॥ऋत्विजश्च तथा(ऽ)
चार्यौ कारयेद्वेदवित्तमान्॥ होमो व्याहृतिभिश्चैव अग्नौ तद्देवतैरपि॥गंधेन सर्पिषा तत्र तथा भक्ष्यनि
लैरपि॥ अयुतं होमसंख्या च पलाशसमिधस्तथेति होमधर्मा इति॥ ॥अथ घृताचलः पापे॥अथातः॥
संप्रवक्ष्यामि घृतशैलमनुत्तमम्॥ तेजोमृतमयं दिव्यं महापातकनाशनं॥ विंशत्या घृतकुंभानामुत्तमः
स्यात् घृताचलः॥ दशभिर्मध्यमः प्रोक्तः पंचभिस्त्वधमः स्मृतः॥ अल्पवित्तः प्रकुर्वीत द्वाभ्यामिह विधानतः
विष्कंभपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत्॥ शालितंडुलपात्राणि कुंभोपरि निवेशयेत्॥ कारयेत्संहता(ऽ)
न्सर्वान् यथाशोभं विधानतः॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः॥ धान्यपर्वतवत्सर्वं विधानमिह ॥राम॥
पठ्यते॥ अधिवासनं च कुर्वीत तद्धोममसुरार्चनम्॥ प्रभातायां तु शर्वर्यां गुरवे विनिवेदयेत्॥ विष्कंभप ॥२१२॥

र्वतां स्व वहन्निगम्यः शांतमानसः ॥ संयोगाद् घृतमुत्पन्नं यस्मादमृततेजसोः ॥ तस्मात् घृतार्चिर्विश्वात्मा प्रीय
तामत्र शंकरः ॥ यस्कतेजोमयं ब्रह्म घृते तत्त्व्यवस्थितं ॥ घृतं पर्वतरूपेण तस्मात्त्वः पाहि भूधर ॥ अनेन
विधिना दद्यात् घृताचलमनुत्तमम् ॥ महापातककर्तापि लोकमायाति शांकरं ॥ हंससारससंयुक्तेन किंकि
णीजालमालिना ॥ विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः ॥ विहरेत्पितृभिः सार्द्धं यावदाभूतसंप्लवं
कुंभद्वति सहस्रपलं कुंभः ॥ शालितंदुलेति ॥ पर्वतपंचकाज्यस्य लोकप्रसिद्धकुंभपंचकेति धानान्नद
पेक्षया बहुवचनं इति हेमाद्रिः ॥ वयं तु विष्कंभपर्वतानामाज्यद्रव्यकत्वाभावान्मुख्यपर्वताज्यस्य बहुत्वे
नैककलशे निवेशासंभवाद्बहुकलशाधारकत्वेन तदभिप्रायं बहुवचनं ॥ नचैवमव्यवस्थित शास्त्रा
र्थापत्तिः ॥ एकस्मिन्द्वयोर्वा कलशयोस्तावदाज्यं निवेशयेदिति नियमाभावात् दशकुंभकरणानुप्रमाणाभावा
दिवायुक्तं ॥ अतो मुख्यपर्वतकलशापेक्षयैव बहुत्वमिति निवदामः ॥ अथ रत्नाचलः पाद्मे ॥ अतः परं प्र

वक्ष्यामि रत्नाचलमनुत्तमम्॥ मुक्ताफलसहस्रेण पर्वतः स्यादिहोत्तमः॥ मध्यमः पंचशतिकस्त्रिशतेन
नाधमः स्मृतः॥ चतुर्थांशेन विष्कंभपर्वताः स्युः समंततः॥ पूर्वेण वज्रगोमेदैर्दक्षिणेनेंद्रनीलकैः॥ पुष्प
रागयुतैः कार्यो विद्वद्भिर्गंधमादनः॥ वैडूर्यविद्रुमैः पश्चात्संमिश्रो विपुलाचलः॥ पद्मरागैः ससौवर्णै
रुत्तरेणानुविन्यसेत्॥ धान्यपर्वतवत्सर्वं तदावाहनंकुर्याद्वृक्षान्देवांश्च कांचनान्॥ पूजयेत्पुष्पपानी
यैः प्रभाते च विसर्जनं॥ पूर्ववद्गुरुऋत्विग्भ्य इमान्मंत्रानुदीरयेत् वमंत्रापियरिकल्पयेत्॥ यथा दे
वगणाः सर्वे सर्वरत्नेष्वपि स्थिताः॥ त्वं रत्नमयो नित्यमतः पाहि महाचल॥ यस्माद्रत्नप्रसादेन तुष्टिं
प्रकुरुते हरिः॥ महारत्नप्रसादेन स्मान्नः पाहि सर्वतः॥ अनेन विधिना यस्तु दद्याद्रत्नमयं गिरिं॥
स याति वैष्णवं लोकममरेश्वरपूजितः॥ यावत्कल्पशतं साग्रं वसेदिह नराधिप॥ रूपारोग्यगुणोपे
तः सप्तद्वीपाधिपो भवेत्॥ ब्रह्महत्यादिकं यत्स्यादिह वामुत्र वा कृतं॥ तत्सर्वं नाशमायाति गिरिर्व

ग्रहन्तोयथा ॥ चतुर्थांशेनेतिसंख्ययेत्यर्थः ॥ अत्रविष्कंभपर्वतान्धान्यमयइत्याह ॥ वज्रगोमेदैरितिस
मसंख्यैरितिहेमाद्रिः ॥ सोपरागैरितिगारुत्मतैरित्यर्थः ॥ देवांश्चेतिलोकपालानपिसौवर्णानित्यर्थः ॥ अत्रा
पिगुर्वर्त्विकसंप्रदानत्वपक्षोयथेच्छविभागपक्षोवाद्रष्टव्यः ॥ अथधान्याचलः ॥ पाद्मे ॥ अथातःसंप्रवक्ष्या
मिधान्याचलमनुत्तमम् ॥ यत्प्रदानान्नरोयातिसोमलोकंद्विजोत्तमः ॥ दशभिःपलसाहस्रैरुत्तमोरजनाचलः
पंचभिर्मध्यमःप्रोक्तस्तदर्द्धेनाधमःस्मृताः ॥ अशक्तोविंशतेरूर्ध्वंकारयेच्छक्तितःसदा ॥ विष्कंभपर्वतांस्त
च्चतुरीयांशेनकल्पयेन् ॥ पूर्ववद्राजनान्कुर्यान्मंदराधीन्विधानतः ॥ कलधौतमयांस्तत्रलोकेशान्विन्यसेद्बु
धः ॥ ब्रह्मविष्ण्वर्कवान्कार्योनितंबोत्रहिरण्मयः ॥ राजतंस्याद्यदन्येषांसर्वंतदिहकांचनं ॥ शेषंचपूर्ववत्कु
र्याद्धोमजागरणादिकं ॥ दद्यात्तद्वत्प्रभातेतुगुरवेरौप्यपर्वतं ॥ विष्कंभशैलान्त्विग्भ्यःपूज्यवस्त्रविभूषणैः
इमंमंत्रंपठन्दद्याद्दर्भपाणिर्विमत्सरः ॥ पितॄणांवल्लभंयस्माद्धरेरिन्द्रोःशंकरस्यच ॥ रजतंपाहितस्मान्नः

॥ दा.वि ॥
॥ २१४ ॥

शोकं संसारसागरात् ॥ इत्थं निवेश्य यो दद्याज्जनाचलमनुत्तमं ॥ गवायुतसहस्रस्य फलं प्राप्नोति मानवः ॥ सो
मलोके स गंधर्वैः किन्नराप्सरसां गणैः ॥ पूज्यमानो वसेद्दिव्यमाव्याहूतसंप्लवं ॥ राजनानिम्यनेनापि देश
णान्नयवादिमयन्ववाधः ॥ गुरव इति अत्रापि गुर्वर्त्विकल्पं प्रदानन्वयक्षो यथेच्छविभागयक्षोवा द्रष्टव्यः ॥
अथ शर्कराचलः ॥ यामे ॥ अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमं ॥ यस्य प्रदानाद्विष्णुर्करुद्रास्तुष्यंति स
र्वदा ॥ अष्टाभिः शर्कराभारैरुत्तमः स्यान्महागिरिः ॥ चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधरः स्मृतः ॥ भारे
णार्द्धभारेण कुर्याद्यः स्वल्पवित्तवान् ॥ विष्कंभपर्वतान्कुर्यात्तुरीयांशेन मानवः ॥ धान्यपर्वतवत्सर्व
मासाद्यामरसंयुतं ॥ मेरोरुपरि तद्वच्च स्थाप्यं हेममतरुत्रयं ॥ मंदारः पारिजातश्च तृतीयः कल्पपादपः
एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत् ॥ हरिचंदनसंतानौ पूर्वपश्चिमभागयोः ॥ निवेश्यौ सर्वशैलेषु
विशेषाच्छर्कराचले ॥ धान्यपर्वतवत्सर्वमावाहनमखादिकम् ॥ कृत्वाथ गुरवे दद्यान्मध्यमं पर्वतोत्तमं

॥ राम ॥
॥ २१४ ॥

चाविच्छ्यश्च नरः शैलानिमन्मंत्रानुदीरयेत्॥ सौभाग्यामृतसारोयं परमं शर्करायतः॥ तस्मादानंदकारीत्वं
भव शैलेंद्र सर्वदा॥ अमृतं पिवतां ये तु निपेतुर्भुवि शीकराः॥ देवानां तत्समुत्थोयं पाहिनः शर्कराचलः॥ म
नोभवधनुर्मध्याउद्भूताशार्करायतः॥ तन्मयोसि महाशैल पाहि संसारसागरात्॥ योदद्याच्छर्कराशैलमनो
नविधिनानरः॥ सर्वपापविनिर्मुक्तः प्रयाति ति शिवमंदिरं॥ चंद्रादित्यप्रतीकाशमधिरुह्यानुजीविभिः स
हैमयानमानिष्टेन्नतो रुद्रपुरं व्रजेत्॥ ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत्॥ आयुरारोग्यसंपन्नो या
वज्जन्मायुतत्रयं॥ विष्कंभपर्वतानिति॥ अत्र विष्कंभाख्यान्पर्वतनवध्यवादिमयाएव॥ अतिदेशिकद्र
व्यवाधेमानाभावात्॥ गुरवस्तु॥ अत्रापि तुर्वत्विक्त्वं प्रदानपक्षोयथेष्टविभागपक्षोवाद्रष्टव्यः॥ ॥
इति सर्वशैलदानविधिः॥ ॥ अथ धान्यशैलदानप्रयोगः॥ तत्रादौ तन्निर्माणप्रकारः॥ राजमालिजो
णासहस्रेणानदर्द्धेनतदर्द्धेनवा॥ शक्त्यावामंडपमध्ये राशिं कृत्वा पलनन्दर्द्धेन दर्द्धसुवर्णमितं पारिजा

तं मूर्द्ध्नि संस्थाप्य पारिजातं सुवर्णचतुर्थांशनिर्मितं ॥ कल्पतरुं दक्षिणे मंदारं चोत्तरे च स्थापयेत् ॥
यान्तौ पूर्वोक्तपरिमाणौ हरिचंदनसंतानौ पूर्वपश्चिमयोः स्थापयेत् ॥ शर्कराचलस्य च नयोरावश्यकत्वात्
ततः पूर्वे मुक्तात्रयं हीरकत्रयं च दक्षिणे गोमेदत्रयं पुष्परागत्रयं ॥ पश्चात् मरकतत्रयं नीलत्रयं ॥
उत्तरतो वैडूर्यत्रयं च पद्मरागत्रयं च तैः खचितं राजतशृंगचतुष्टयं वा स्थापयेत् ॥ श्रीखंडखंडान् निवे
द्याग्निकोणरूपविभागे स्थापयेत् ॥ प्रवालानि च अवनरणभागे स्थाप्यानि पूर्वादिषु यथाशक्ति सुवर्ण
निर्मितब्रह्मविष्णुरुद्रसूर्यप्रतिमाः ॥ यथाशक्ति रजतनिर्मितशृंगचतुष्टयं शृंगोपरि यथाशक्ति सुव
र्णनिर्मितान्यक्षिरोयोनि नध्यभृंगाधस्तात् स्थापयेत् ॥ शृंगे मध्ये बहिर्यथाशक्ति रजतनिर्मिताल्लोकपा
लान्दिग्विदिक्षु स्थापयेत् ॥ मध्ये च रजतसूत्रेणावेष्टयेत् ॥ ततः पूर्वादिषु शुक्लपीतकर्बुररक्तानि वा
सांसि मेघाकाराणि स्थाप्यानि ॥ घृतपात्रचतुष्टयं पञ्चवर्णास्थानेषु स्थाप्याः इक्षुभिः कंदराः कल्प

रीयाः ॥ समंततश्चंदनपुष्पफलानि स्थापयेत् ॥ ततः पूर्वे कल्पितमेरुचतुर्थांशाद्व्रीहिभिर्यवैर्वा मंदरं परिक
ल्प तदुपरि शाल्क्या सौवर्णं पुरुषत्रयं सौवर्णं च कदंबवृक्षं वृक्षमूले च सुवर्णनिर्मितं कामं षण्मुखं स्थाप्य
राजतं रजतपात्रं क्षीरपूर्णं मरुणेसरःस्थाने कल्पयित्वा ॥ रजतशकलैः चैत्ररथाख्यं वनं कल्पयित्वा नाना
फलवस्त्रचंदनपुष्पैर्धूपयेत् ॥ ततो दक्षिणेनावह्निर्गोधूमैः ॥ गंधमादनं तदुपरि सुवर्णेन जंबूवृक्षं त
न्मूले चोदङ्मुखीं धनदप्रतिमां संस्थाप्य घृतपूरितं रजतपात्रं मानससरःस्थाने परिकल्प्य रजतशकलै
र्गंधर्ववनं परिकल्प्य नानामूलवस्त्रचंदनपुष्पैर्धूपयेत् ॥ ततः पश्चिमेनावह्निस्तिलैर्विपुलं कल्पयि
त्वा तदुपरि सौवर्णं पिप्पलं पिप्पलमूले सौवर्णं हंसं प्राङ्मुखं स्थाप्य दधिपूरितं रजतपात्रं सितोदसरः
कल्पयित्वा रजतशकलैर्वैभ्राजवनं परिकल्प्य वस्त्रादिभिर्धूपयेत् ॥ ततउत्तरेणावह्निर्माषैः सुपार्श्वं
तदुपरि सौवर्णं वटं मूले च सौवर्णं कामधेनुप्रतिमां दक्षिणाभिमुखीं संस्थाप्य मधुपूरितं राजतपात्रं भ

॥ दा·वि ॥
॥ २१६ ॥

द्रसः प्रकल्प्य रौप्यशकलैः सावित्रं वनं प्रकल्प्य वस्त्रादिभिर्भूषयेत् ॥ ततउपरि वितानं वध्नीयात् ॥ कर्त्ताधि
वासनदिने देशकालौ संकीर्त्य मम सुरपूजितलोकप्राप्यप्सरोगणगंधर्वविराजमानदिव्यविमानकरणक
पुगमनानंतरदेवलोकनिवासोत्तरभूलोकराजराजत्वप्राप्तिसाध्यमन्वंतरशतावच्छिन्नकालब्रह्मलोकम
हितत्वकामः श्वोधान्यपर्वतदानं प्रतिपादयिष्ये करिष्ये तन्निवासं कल्प्य ॥ गणेशपूजनं पुण्याहवाचनं
चतुर्णामस्तानां वार्त्विजां वरणादिमधुपर्कान्तं कृत्वा पूर्वभागस्थितेनैकहस्तं कुंडं मंडपं कृत्वा भडं करोंभि
रिन्यादिमहाध्वजोच्छ्रयणानेमधेगोमयेनोपलिप्योक्तप्रकारेण धान्यपर्वतं कृत्वा कामदेवादीक्ष्लोकपा
लादीन्पर्वतांश्च नाममंत्रेण संपूज्य कुंडे अग्निं प्रतिष्ठाप्य ध्याने वेद्यां ग्रहान् विनायकादीनधिदेवताः प्र
त्यधिदेवतांश्चावाह्य पूजयित्वा होमार्थं ऋत्विजो नियोजयेत् ॥ नवग्रहाधिदेवताविनायकादिपंचदशादि
क्पालवरुणाष्टकैकादशरुद्रद्वादशादित्यब्रह्मविष्णुशिवसूर्यकामधनदहंसकामधेनुभ्यो वैदिकैर्नाममंत्रै

॥ राम ॥
॥ २१६ ॥

वीप्रत्येकं तिलयवोडुंवरसमित्कुशीर्घृतार्क्कैस्त्रयोदशत्रयोदशसंख्ययाजुहुयात् ॥ अथ स्थापनं वाहेमानेराज्ञो यज
मानः पर्वतानावाहयेत् त्वं सर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेष्वमरपर्वतनाशयाशु ॥ क्षेमं विधत्स्व कु
रुशांतिमनुत्तमां नः सम्पूजितः परमभक्तिमता मयाद्य ॥ त्वमेव भगवानीशो ब्रह्मा विष्णुर्द्दिवाकरः ॥ मूर्त्तामू
र्त्तं परं वीजमतः पाहि सनातन ॥ यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मंदिरं ॥ रुद्रादित्यवसूनां च तन नः शां
तिं प्रयच्छ मे ॥ यस्मादशून्यममरैर्नारीभिश्च शिरस्तव ॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ मेरुं
यस्माच्चैत्ररथेन त्वं भद्राश्वेन च सर्वदा ॥ शोभसे मंदर क्षिप्रमतस्तुष्टिकरो भव ॥ मंदरं ॥ यस्माज्जम्बूजन
शीर्जम्बूद्वीपं त्वं गंधमादन ॥ गंधर्वकुतशोभोवा ततः कीर्त्तिर्दृढास्तु मे ॥ गंधमादनं ॥ यस्मात्त्वं केतुमाले
न वैभ्राजेन वनेन च ॥ हिरण्मयाश्वत्थसरस्तस्माल्लक्ष्मीर्ध्रुवास्तु मे ॥ विपुलम् ॥ उत्तरैः कुरुभिर्यस्मा
त्सावित्रेणावनेन च ॥ सुपार्श्वराजसे नित्यमतः श्रीरक्षयास्तु मे ॥ सुपार्श्वं ॥ एवमावाह्य पूजयेत् ॥ ततः

ध्यानः स्विष्टकृद्बलिपूर्णाहुतिं यजमानाभिषेकान्ते यजमानो गृहीतपुष्पांजलिः पार्वनान्त्र दक्षिणे क्रमपु(
ष्पांजलिं समर्प्याचार्यं संपूज्य पूर्वं फलं दत्त्वाचार्यमं धान्यमेरुं हैममंदरादिनरुचयवत्रल विष्णुरूपार्कयुतं
तुक्कादियुतराजनभृंगवतुष्कनिनवेंद्रादिपतिमातृनमिश्रवंशाह्वनेकंदर्पादिकचतुष्टयस्थापितराज
नपृतयात्रकलितोदकस्त्रवर्णवासोघनाह्वनंमाल्यादिभूषितं गुरुनामगोत्रे समुच्चार्य संप्रदद्यामि(
दद्यात्॥ अन्नंब्रह्मयतः प्रोक्तमन्नेप्राणाःप्रतिष्ठिताः॥ अन्नाद्भवन्तिभूतानि जगदन्नेनवर्तते॥ अन्नमे
वयतो लक्ष्मीरन्नमेवजनार्दनः॥ धान्यपर्वतरूपेण पाहितस्मान्नमोनमः इतिपठेत्॥ ततोगुरुः स्वस्ती
त्युक्त्वाकामस्तुतिं पठेत्॥ ततोऽग्निकह्स्ले इमं पूर्वावस्थितधान्यमंदरं हैमगणत्रयमूलस्थितकामम
हदेवयुतम्॥ श्रीरपूर्णराजतयात्रकलितारुणोदसरस्संराजनचैत्ररथवनं वस्त्रादिभूषितं संक
ल्पयेत्॥ इमं दक्षिणावस्थितगोधूमकल्पितगंधमादनं हैममूलस्थितकुबेरजंबूवृक्षं घृतपूर्णराजत

पात्रकल्पितंमानससरसंरजनशाककलह्रुनगंधर्वंवनंवस्त्रादिभूषितंसंकल्पयेत् ॥ इमंपश्चिमावस्थितं
निलकल्पितविपुलांविष्कंभंहेममूलस्थितहंसपिप्पलयुतंदधिपूर्णरजनपात्रकल्पितसितोदसरसंर
जनशाकवकल्पितवैभ्राजवनंवस्त्रादिभूषितंसंकल्पयेत् ॥ इमंउत्तरावस्थितमाषनिर्मितसुपार्श्वंवि
ष्कंभंहेममूलस्थकामधेनुवटमधुपूर्णरजनपात्रकल्पितभद्रसरसंरजनशाककलह्कनसावित्रवनंव
स्त्रादिभूषितंसंकल्पयेत् ॥ ततोगांदक्षिणात्वेनसंकल्पयेत् ॥ चतुर्विंशतिपक्षेअष्टौगुरवे·दद्यापक्षेषट्
अष्टपक्षेचत्वारःसप्तपक्षेत्रिस्त्रःपंचपक्षेएकैकामिति ॥ एकपक्षेसर्वेभ्यःसहस्रंसुवर्णानांवादक्षिणात्वं
यथागुर्वेर्त्विग्भ्योगाःसंकल्पतदनुज्ञयापर्वतान्नानामगोत्रेभ्यःसंकल्पयेत् ॥ ततोग्रहादीनामुत्तरपूजां
विसर्जनंचकृत्वायथाशक्तिब्राह्मणान्भोजयेदिति ॥ शिवलोकप्राप्तिपूर्वककल्पावधिकालोमातोकीन
वासानंतरपरमगतिप्राप्तिकामइतिलचणावले ॥ पापक्षयगंधर्वपूज्यमानत्वकल्पशतकालगौरीलो

कपूज्यमानोन्नरकालावच्छिन्नायुरारोग्यसंपन्निसमृद्धीपाधिपत्यकामइनिगुडाचले ॥ पापक्षयपूर्वककल्प
ज्ञानावच्छिन्नब्रह्मलोकावस्थितिनिनदनंनरपरमगतिप्राप्तिकामइनिसोवर्णे ॥ पापक्षयदीर्घायुस्सुपुत्रपौ
त्राघवाप्तुत्तरपितृदेवगंधर्वपूज्यमानत्वविशिष्टसुगमनानंतरवैस्नवपदप्राप्तिकामइनितिलाचले·
पापक्षयकल्पावच्छिन्नरुद्रलोकनिवासोत्तरभूलोकराजराजत्वकामइनिकार्पासाचले ॥ पापक्षयहंस
सारससुनार्कवर्णविमानाधिरोहणविशिष्टशंकरलोकगमनापितृभिरुविद्याधरपूज्यत्वकामइ
निघृताचले ॥ सर्वपापनाशपूर्वकामरेश्वरपूज्यमानत्वकल्पज्ञानावच्छिन्नविष्णुलोकवासोत्तरसमृ
द्धीपाधिपत्यकामइनिरत्नाचले ॥ सर्वपापक्षयायुतगोदानफलावाप्तिगंधर्वकिंनराप्सरोगणा
पूज्यमानत्वविशिष्टलोकनिवासकामइनिरजताचले ॥ पापक्षयपूर्वकामनुजीविसहितचंद्रा
दित्यप्रतीकाशविमानकरणकशिवलोकविष्णुलोकप्राप्त्युत्तरजन्मायुतनत्रयावच्छिन्नायुरारोग्य

सप्तद्वीपाधिपत्यकामश्चेति शर्करावले दानवाक्यानि ॥ ॥अथ द्वादशमेरुदानं हेमाद्रौ कालोत्तरेद्वे
वधात्रे ॥ ॥अथातः संप्रवक्ष्यामि मेरुदानं यथाक्रमं ॥ आकार्त्तिकात्समारभ्य मेरुव्रतं समाच-
रेत् ॥ कार्त्तिक्यां रत्नमेरुश्च दानस्य सुखितायतः ॥ सर्वेषां चैव मेरूणां प्रमाणं क्रमशः शृणु ॥ व-
ज्रपद्ममहानीलनीलस्फटिकसंज्ञितः ॥ पुष्पं मरकतं मुक्ता याद्याः स्वस्तिभवेन्ततु ॥ प्रस्थमात्रन्तु
संख्याताः एषस्यात्प्रथमेव च ॥ यथाशक्त्याथवा देयाविन्नशाठ्यंविविनास्तुत ॥ मेरोर्विभागं वक्ष्या-
मि शिवस्याग्रे यथार्चयेत् ॥ कार्णिकायां न्यसेन्मेरुं ब्रह्मविष्णीशभूषितं ॥ तत्पूर्वे माल्यवान्नाम
पर्वतं पूजयेत्तदा ॥ तत्पूर्वे भद्रसंज्ञं च अश्ववृक्षं ततः परं ॥ मेरुतः पूर्वदिग्भागे पूर्वपूर्वतः
रंत्रयं ॥ कथितं सर्वशोभेण दक्षिणास्यां ततः परं ॥ निषधो हेमकूटश्च हिमवांश्च तथात्रयं
एवमुत्तरभागे तु नीलश्वेतश्च शृंगवान् ॥ पश्चिमे गंधमादाख्यो केतुर्वैकेतुमाल्यकं ॥ एवं द्वाद

शसंयुक्तंमेरुंपर्वतनायकम्॥सोपवासःशुचिर्भूत्वाविधिनायस्तुजयेच्छिवं॥महादानंप्रकर्तव्यंमहाप्रजा
नथागुन॥पूजांतेदेवदेवाग्रेरत्नमेरुंप्रकल्पयेत्॥ध्वजाद्धिवविधायशिवमंत्रमनुस्मरन्॥दशशेरोस्तु
नैवेद्यमष्टशेरैरथापिवा॥दशशेरासमंयुक्तंआढकेनविधीयते॥वित्तहीनंस्यभक्तस्यनात्रकार्यावि
चारणा॥भेरीमृदंगमरुजनिमिलापटहादिभिः॥वादित्रैर्विविधैश्चान्यैरांदोलैर्विविधैरपि॥जागरं
कारयेत्तत्रपार्थयेत्तुयथाक्रमं॥स्वभूमण्डलत्तरार्ध्यैश्चतथासंबंधिबांधवैः॥सार्द्धंपदक्षिणांकृत्वाप्रा
र्थयेल्लिंगमीश्वरं॥द्रव्यहीनैःक्रियाहीनैःश्रद्धाहीनैःसुरेश्वरः॥कृतंवाप्यकृतंवापिक्षंतुमर्
हतिशंकरः॥इत्युक्त्वादेवरुद्रंचत्वारितंशांतिमेवच॥सद्यस्येवमहावीजंतथापंचाक्षरेणवै॥
नमःकांचनदेहायधराधारायवेनमः॥ब्रह्मविष्णुर्द्राभृंगायधरानाभिस्थितायच॥नगधार
दशनाथायसर्वपापापहारिणे॥शिवभक्तायपूजायत्राणांमेकरूसर्वदा॥निःपापःपितृभिः

सार्द्धं शिवं गच्छामि हृष्टं नमः ॥ त्वं शिवस्तु शिवस्यापि शिवो हं च शिवाय च ॥ निवेदयामि भक्त्या तु पितॄणां तार(
येदिति ॥ हेममेरुप्रमाणां तु फलं चैव भ्रगुष्वनन् ॥ फलानां तु सहस्रेणा मध्ये मेरुं प्रकल्पयेत् ॥ भक्ष्यत्रय
समायुक्तं वस्त्र विष्णु हरान्वितम् ॥ एकैकं पर्वतं तत्र स्थापनं कैकेन कारयेत् ॥ मेरुणा सह पूर्वेण विख्यातानु
त्रयोदश ॥ एवं शिवाय नो मेरुर्दानं च समुपयान्तनः ॥ अयनेषु च सर्वेषु ग्रहणेषु विशेषतः ॥ आचार्य(
य प्रदातव्यः संहितापारगाय च ॥ पूर्वोक्तस्य महामेरोः सनकस्य महात्मनः ॥ शिवलोके वसेत्सोपि या
वन्तः परमाणवः ॥ पितृन्पितामहांश्चैव तथैव प्रपितामहान् ॥ पुत्राः पौत्राश्च पौत्रांश्च तारयेत्कि
मतः परं ॥ भोगान्भुक्त्वा महीं कृत्स्नां भुंक्ते च शिवभावितः ॥ दरिद्रो रूप्यमेरुं च हेममानेन कारयेत्
येत् ॥ पर्वता द्वादश तथा संकल्पा रचनान्विताः ॥ उत्तरे ह्ययने देयं देयं वा ग्रहणद्वये ॥ प्राप्तं तु
फलं तस्य भवत्यत्र न संशयः ॥ भूमिमेरुप्रमाणां तु कुसुमानं भ्रगुष्वनन् ॥ विप्रेयं मंडलं वाथ ग्रा

मंवा पर्वतंस्मरेत् ॥ शेषास्तद्दष्टमानेन नगास्तु रविसंख्यया ॥ भूमिपर्वतप्रमाणं तु कोवा वर्णयितुं क्षमः ॥
परमाणुरजो यावत् क्षितौ तो भवति ध्रुवं ॥ तावत्कोटिसहस्राणि शिवलोके महीयते ॥ भोगान्भुक्त्वा ततो
राजा जायते योगिनां कुले ॥ ज्ञानं प्राप्य तत दानस्य पुनर्जन्म न विद्यते ॥ हस्तिमेरुमतो वक्ष्ये संक्षेपात्पार्व
तीसुत ॥ तद्वद्धं न तथा वालं दन्तयुक्तं शुभं ॥ सौवर्णगोपेतं घंटाचामरभूषितं ॥ नक्षत्र
मालासंयुक्तं शस्त्रध्वजविभूषितं ॥ दिव्यवस्त्रसमायुक्तं स्वर्णारजतान्वितं ॥ सूर्यस्य ग्रहणे देयं गु
रवे तं शिवायतनः ॥ तेन दत्तेन दत्तं तु लक्षयोजनपर्वतं ॥ पुरुषत्रय संयुक्तं पर्वतं वा दशान्वितं ॥ मु
च्यते सर्वपापेभ्यः शिवसायुज्यतां व्रजेत् ॥ पितरस्तस्य मोदन्ते शिवलोके समं ततः ॥ एतत्तु वस
मारव्यातं हस्तिदानं समासतः ॥ अथाश्वमेरुर्वा देयो यो दत्तो रविणा पुरा ॥ श्वेतैर्विनीतैः सौवर्णैः
प्रमथैः पंचसंख्यया ॥ मध्ये मेरुः कल्पितव्यो रविसंख्यास्तु पर्वताः ॥ सवस्त्र हेमदानैश्च सन्नवाश्वजम्

षिनाः ॥ वैशाख्यां वाथ कार्त्तिक्यां दानव्यःस्तु शिवायनः ॥ विप्राय शिवभक्ताय संहितापारगाय च
तस्मै देयो यथोक्तश्च हयमेरुर्विधानतः ॥ संपूज्य परया भक्त्या हेमकंकणकुण्डलैः ॥ रसनामु
कुटैश्चैव अंगुलीयद्वयेन तु ॥ सर्वेषां चैव दानानां भूषणैर्भूषयेत्तदा ॥ अकृत्रिमैर्भूषणैस्तु राजमे
रुं विभूषयेत् ॥ अश्वमेधप्रदानेन रुद्रलोके महीयते ॥ अश्वाभावे दरिद्रस्तु मेरुं वा पिष्टकल्पये
त् ॥ अश्वसंख्याप्रमाणेन फलं वै तत्समं भवेत् ॥ अथवा वस्त्रमेरुश्च दानव्यस्तु शिवायनः
भारमात्रेण देयस्तु नानावर्णोपपर्वतः ॥ मध्यमेरुः कल्पनीयो वस्त्रैः शेषांस्तु कल्पयेत् ॥ मेरुव
स्त्रसमानेन नानावर्णैः सुशोभनैः ॥ प्रत्येकं पर्वताः कल्प्या हैमशृंगाः सुवर्णकाः ॥ शिवभक्ता
य विप्राय दातव्यास्तु शिवायनः ॥ दिव्यैश्वर्यपदं याति सहस्रक्रतुसंभवम् ॥ दिव्यवर्षश
तेसम्यक् कुर्याद्भोगं यथेच्छया ॥ चक्रवर्त्तिनमभ्येति ज्ञानवान्जायते तदा ॥ शिवालयं ततो याति

नभ्यो जन्म त्वाप्नुयात् ॥ अथवा घृतमेरुस्तु दानवः कथने मया ॥ मेरुः पलानां मध्ये तु सहस्रैः पं
चभिर्हितः ॥ शानैः पंचभिरेकैकं पर्वतं तत्र कल्पयेत् ॥ त्रिशृंगं त्रिपलं मेरोः कांचनं देवतार्चनम्
एकैकं पलिकं शेषं पर्वतेव सत्व भूषिते ॥ कृत्वा पूजां विशेषेण शिवस्याग्रे प्रकल्पयेत् ॥ शिवभक्ता
य विप्राय दानं शिवमिच्छता ॥ कुलमुद्धरते सोपि पैतृकं मातृकं तथा ॥ दिव्यं वर्षशतं सार्धं रुद्रलोके म
हीयते ॥ भारते पृथिवीखंडे वर्त्तिर्भवति नान्यथा ॥ एवं वै खंडमेरुं तु शिवाखंडेन कल्पयेत् ॥ रुद्रलो
कपदं प्राप्य पितृभिः सह मोदते ॥ अथवा धान्यमेरुं तु शिवस्याग्रे प्रकल्पयेत् ॥ पंचखारीमितं मध्ये मेरुं धा
न्येन कल्पयेत् ॥ एकैकं खारिमात्रेण पर्वतं शेषमादिशेत् ॥ पूर्ववत्क्रमशृंगं तु सवस्त्रं परिकल्पयेत् ॥
शिवपूजाविधानेन शैवविप्राय दापयेत् ॥ कल्पकोटिसहस्राणि शिवलोके महीयते ॥ पितृन्दश समु
मोदं नेतु स लोके तथा चिरं ॥ एतद्धान्यप्रमाणेन तिलमेरुं प्रकल्पयेत् ॥ शृंगाणि पूर्ववत्तस्य तथान्येषु

नगेषु च ॥ तेन मेरुः प्रधानत्वाः शिवस्यायं गुरोः सदा ॥ त्रयाणि शिवसायुज्यं वंधुभिः सहितो नरः ॥ मेरुंदा
नमिति षोडशपर्वतसहितमेरुदानमित्यर्थः ॥ सच रत्नसुवर्णरौप्यभूगजाश्वगोवस्त्रघृतखंडधा
न्यतिलमेरुभेदषोडशधा ॥ रत्नमेरुरपि वज्रादिभिरष्टधा ॥ तत्र मेरुज्येष्ठो वमाल्यवदादिषोडश
पर्वतनिर्माणं मेरुषोडशांशपरिमितेन धान्यतिलमेर्वोसुपंचमांशमितेन हेममेर्वादिषु तत्
थादर्शनात् ॥ तत्र षोडशमेरुदानेकार्त्तिक्यां रत्नमेरुं मार्गशीर्ष्यां सुवर्णमेरुरित्यादिक्रमः ॥ त्र
ष्ट्यातु यस्मिन्कस्मिंश्चित्पर्वणि यस्य कस्यचिद्दानमिति ॥ अत्र च लक्षयोजनपरिमितमेरुपर
माणुसमसंख्यत्वसहस्रावच्छिन्नशिवलोकमहितत्वसप्तकुलसंततत्यंनगरनगरुद्रो हि पितृघा
तकादिमहापातकिपतितादिकर्मकाशिवसामीप्यनपरकामदत्तिरत्नमेरौ ॥ मेरुपरमाणुसमसंख्यक
ल्पावच्छिन्नशिवलोके शंभुनरजन्मावच्छिन्नसकमहामंडलराजत्वपितृपुत्रादित्रयोदशकामदत्तिहेम

मेरौ ॥ राजतेप्येवं ॥ मेरुपरमाणुसमसंख्यकल्पसहस्त्रावछिन्नशिवलोकमहितत्वोत्तरणो — — कुलोत्पन्नि
राजत्वभवनोत्तरनन्तज्ञानघाणकमुक्तिकामइतिभूमेरौ ॥ सर्वपापक्षयपूर्वकशिवसायुज्यकामइति
हस्तिमेरौ ॥ रुद्रलोकमहितत्वकामइतिभस्वमेरौ ॥ गोमेरावप्येवं ॥ दिव्यवर्षशतावछिन्नरुद्रलोकमहित
त्वोत्तरभारतखंडस्वाम्यकामइतिघृतमेरौ ॥ पितृसहितरुद्रलोकाधिकरणकानंदकामइतिशर्करामेरौ
कल्पकोटिशतावछिन्नात्मकर्मकशिवलोकमहितत्वब्रह्मलोकाधिकरणकचिरकालावछिअपिचायानंदका
मइतिधान्यमेरौ ॥ बंधुसहितशिवसायुज्योत्तरजन्मावछिन्नसमपृथिवीभोगोत्तरशिवसायुज्यकामइति
तिलमेरौ संकल्पः ॥ शेषप्रयोगस्स्पष्टः ॥ विष्णुधर्मोत्तरे ॥ अत्रसौवर्णोराजतताम्रकांस्यलोहसीसलवणाब्रीहिशर्करा
गुडकस्तूरिकर्पूरकुंकुमकार्पासानां परिमाणं विशिष्टानां मेरुरुक्ता: ॥ माल्यवदादिपर्वताश्चनोक्ता: ॥ तन्त्राण्ये
तेज्ञेयाइतिकेचित् ॥ नेत्यन्ये ॥ ॥ अथशिखरदानम् ॥ ॥ विष्णुधर्मोत्तरे ॥ माघशुक्लतृतीयायांमार्गशीर्षे

हेमाद्रौ मात्स्यात् ॥ ॥अथ हिरण्यरत्नधेनुः ॥ मात्स्ये ॥ हिरण्यरत्नधेनुश्च प्रदेया विधिना बुना ॥ मुच्यते स
र्वपापेभ्यः सर्वान्कामानवाप्नुयात् ॥ गुडधेनुविधानेनेत्यर्थः ॥ ॥अथ धान्यधेनुः ॥ वाराहे ॥ उत्तमा धान्य
धेनुः स्याद्द्रोणानां तु चतुष्टयं ॥ मध्यमा च तदर्द्धेन तत्तदर्द्धेन कनीयसी ॥ चतुर्थांशेन धेन्वाश्च वत्सं तु प
रिकल्पयेत् ॥ रुक्मेणाश्रृंगे कर्त्तव्ये राजताश्च खुरास्तथा ॥ गोमये नाक्षिणी कुर्यात् त्रपुणां अगरुचंदंद
नं ॥ मुक्ताफलमया दन्ता गुडक्षौद्रमयं मुखं ॥ प्रशस्तयचश्रवणा कांस्यदोहनकान्विता ॥ इक्षुयष्टिम
याः पादाः क्षौमपुच्छसमन्विता ॥ नानाफलसमोपेता रत्नगर्भसमन्विता ॥ पादुकोपानहं तं छत्रभाजनं
दर्पणं तथा ॥ इत्येवं रचयित्वा गां कृत्वा दीपार्चनादिकं ॥ पुण्यकालं च संकल्प्य स्नातः शुक्लाम्बरो गृही ॥ त्रिः
प्रदक्षिणमावृत्य मंत्रानेनानुकीर्त्तयेत् ॥ भवाविष्णुमहाभागवेदवेदांगपारग ॥ एतां मम मोपकाराय
गृह्णीय त्वं द्विजोत्तम ॥ प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥ त्वमेव लक्ष्मीर्गोविंदे स्वाहा चैव विभा

वसो ॥ शाकेश्चीति विख्याता शिवे गौरीति संस्थिता ॥ गायत्री व्रसिसाप्रोक्ता ज्योतिश्चन्द्रे रवौ प्रभा ॥ वुद्धिर्वृ
हस्पतौ ख्याता मेधा मुनिषु सन्नमो ॥ तस्मात्सर्वमये देवि धान्यरूपेण संस्थिता ॥ एवमुच्चार्य तां धेनुं प्रद
द्याद्यः प्रदाननः ॥ तस्मान्नरेन्द्र दातव्या भुक्तिमुक्तिफलप्रदा ॥ इहलोके च सौभाग्यमायुरारोग्यमयं सु
खं ॥ अक्षिणी सिल्हकमये कर्णौ चागरुकाष्ठजौ ॥ देवदारुमयं पुछं गुदं गुग्गुलसंभवं ॥ कुष्टंकपो
लके घ्राणं शृंगी रंवर्म चैव तु ॥ उदरे वदने दद्यात्कुणपेन रवमेव च ॥ एवं संकल्प कर्पूरधेनुं वस्त्रे
ण पूजितां ॥ विप्रं संपूज्य कर्पूरवस्त्रयुग्मेन वै वरि ॥ कर्पूरधेनुं विप्रेंद्र गृहाणेमां सुपूजितां ॥ पु
ष्पगंधस्थितामेतामेकमला प्रीयतामीति ॥ दत्वा धेनुमिमां राजन् गंधर्वाणां समो भवेत् ॥ कल्पत्रयं
वसेत्स्वर्गे राजराजो भवेदिह ॥ सर्वान्कामानवाप्नोति गौरीलोके महीयते ॥ ॥ अथ कस्तूरिधेनुः ॥
तथा कस्तूरिका धेनुः श्रद्धाविन्नसमन्वितः ॥ पात्रे दद्यात्तु पश्चेत मंत्रमेतमुदीरयेत् ॥ एवं कर्पूरधे

धेनूक्तं ॥ ॥ इदं च सर्वेति कर्तव्यतोपलक्षणं ॥ ॥ अथ गंधधेनुः ॥ दत्वा गंधमयीं धेनुं कामानां फलमाप्नुयात्
सर्वकाम्यफलमित्यर्थः ॥ ॥ अथ दधिधेनुः ॥ ॥ स्कान्दे ॥ अनुलिप्ते महीभागे गोमयेन नराधिप ॥ गोचर्ममात्रं तु
पुनः पुष्पप्रकरसंयुतं ॥ कुशैरास्तीर्य वसुधां कृष्णाजिनकृतास्तरां ॥ दधिकुंभं च संस्थाप्य सप्तधान्यस्य चोपरि
चतुर्थांशेन वत्सं तु सौवर्णमुखसंयुतां ॥ पद्मरागपत्रश्रवणां मुक्ताफलमयेक्षणां ॥ चंदनागरुशृंगीं च शुभं
वै गंधमालिकां ॥ जिह्वा शर्करया राजन् घ्राणं श्रीखंडकं तथा ॥ फलमूलमया दंताः सितसूत्रस्य कंबलः ॥ ना
म्रपृष्ठा दर्भरोमा च छस्त्रचमयं तथा ॥ स्वर्णशृंगीं रूप्यखुरां नवनीतमयस्तनीं ॥ इक्षुपादां सुसंस्कृत्य सर्वा
भरणभूषितां ॥ आच्छाद्य वस्त्रयुग्मेन पुष्पगंधैः सुपूजितां ॥ पुच्छदेशोपविष्टाय गौडकाकराभ्युदयणाम् ॥
पादकोपानहौ छत्रे दत्वा मंत्रमनुस्मरेत् ॥ दधिक्राव्णो निमंत्रेण दधिधेनुं प्रदापयेत् ॥ एकाहारो दिनं ति
ष्ठेद्ध्यावानंदनंदन ॥ यजमानो वसेज्जाता त्रिदिनं च द्विजोत्तमः ॥ दश पूर्वान्दश परानात्मानं चैकविंशकं

विष्णुलोकमवाप्नोति सर्वं यांति परां गतिं ॥ ॥अथ रसधेनुः कथ्यते॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्त-
रे ॥ रसस्य तु घटं राजन्कृत्वा पूर्णमैक्षवस्य तु ॥ नवत्सं कल्पयेत्प्राज्ञश्चतुर्थांशेन चैव हि ॥ इक्षुदंडमयाः पादा राज-
नखुरसंयुताः ॥ सुवर्णशृंगाभरणा वस्त्रपुच्छा च ... नस्तनी ॥ पुष्पकंबलसंयुक्ता शर्करामुखजिह्विका ॥ दन्ताः
फलमयास्तस्याः पृष्ठं ताम्रमयं शुभं ॥ पुष्परोमा तु राजेंद्र मुक्ताफलकृतेक्षणा ॥ सप्तव्रीहिसमायुक्ता चतुर्दिक्षु
सदीपिका ॥ सर्वोपस्करसंयुक्ता सर्वगंधविभूषिता ॥ चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् ॥ धेनुं च
पूजयित्वाग्रे गंधधूपस्रगादिभिः ॥ पूर्वोक्तायैव ते मंत्रास्तानेव प्रयतः पठेत् ॥ एवमुच्चारयित्वा यो ददा-
नि द्विजसत्तमे ॥ दशपूर्वान्परांश्चैव आत्मानं चैकविंशकम् ॥ नयत्तु परमं स्थानं यस्मान्नावर्त्तते पुनः
दाता वा याचको वापि एकाहं रसभोजनः ॥ पूर्वोक्ता मंत्रा या लक्ष्मीरित्यादयः स्वरूपं धेनुदानमतिदाने
साधं ॥ ॥अथ गुडधेनुः॥ अन्वशिष्टं तं पंचदशोत्तरविंशानयदस्य साकपृष्ठे प्रथमयंत्रो द्रष्टव्यम् ॥ ऐं

ण्पवर्द्धनम् ॥ विमानेनार्कवर्णेन किंकिणीरत्नमालिना ॥ स हदेवाप्सरोभिश्च प्रयाति शिवमंदिरम् ॥ याव
त्त्वस्यान्नेजन्मनावन्त्स्वर्गे महीपते ॥ ॥ अथ सप्तव्रीहिधेनवः ॥ ॥ विश्वामित्रः ॥ सप्तव्रीहिमयाः सप्तधे
नवः परिकीर्त्तिताः ॥ यथा तिलमयी धेनुस्तथैवैतास्तु कारयेत ॥ यवव्रीहिमयी धेनुर्गोमसा तिला परा ॥
माषमुद्गमयी चैव सर्षपंण्श्च सप्तमी ॥ उपस्करंतु सर्वांस्तु तिलधेनुवदीरितं ॥ सप्तव्रीहिमयाः सप्तयो
दानि हि मानवः स याति परमं स्थानं तवाशुभंनश्वरम् निमान ॥ धेनुदानेन पुण्येन यान्ति विष्णोः परं पदं ॥ ॥
अथ गुडादिधेनवः ॥ आग्नेये ॥ या मया धेनवः प्रोक्ता हृषास्तावंनस्वहि ॥ इत्येतानि योज्यानि सुईशाय वनथा
हृषाः ॥ तत्र गुडादिहृषाणां स एव विधिः ॥ सुवर्णे हृषोविशेषस्तु नैव ॥ भारादित्रियलानवहृषहक्त्वावि
धानतः ॥ शुनं धेन्वाथवा दस्या ढक्किनोनृपसन्नम ॥ गोमयेन समालिप्ते पट्टवस्त्रसमाहृते ॥ हृषं हेममयं
नत्रैरौप्यं वा रत्नसंयुतं ॥ नस्यनीतमयेभृंगे मौक्तिके च क्षुषीरदाः ॥ घाणे शाकुभहृन्तानि विद्रुमोष्ठोनु

नासिका॥ मरकतं तु निर्दिष्टं कर्णौ वै हरिनामके॥ पद्मरागेण वै पादाः खुरा रूप्यमयाः स्मृताः॥ राज
तानि च रोमाणि क्षौमवस्त्रेण कंबलं॥ पटेनछद्म तु दिष्टं सर्वेषामप्ययं विधिः॥ हृष्यरोमा स्फटिकस्या
पि मणिलिंगेप्रकीर्त्तितः॥ तथा धेनुर्यथा तद्वान्नु वर्णस्य तु कारयेत्॥ या हृषोयत्त दाने भुक्तानी कस्य
निष्कलः॥ जातरूपमयः सोयं नारिजामां न संशयः॥ एवं सन्निभवं दानमनंतफलदं स्मृतम्॥ निःस्वेपे
वस्वल्प दाना दाप्ताना विकल्पं फलं॥ पुनर्मिति॥ तां धेनुं तेन हृष्येण सहाथवा धेनुमेवं वेति यक्षत्र यमि
त्यर्थः॥ सर्वेषामिति॥ गुडादिहृषेपि शृंगादिकं उक्तनीत्यादि घटितमित्यर्थः॥ तथा धेनुरिति॥ यथाशा
स्त्रोविधयथेयेणापो ज्ञौ॥ अन्यथा यामयेत्तु पक्रमविरोधायत्तेः॥ भावदीनि॥ इदं तु पलक्षणं॥ हृष्टहृयं
हिरण्येन सहस्रेणाथ कारयेत्॥ तदर्द्धेनाथवा धीमान्तदर्द्धार्द्धेन वा पुनः॥ अशक्तस्त्वर्द्धमानेनापि हृषभं ध
नरूपिणामिति लैंगात्॥ अत्र सहस्रादिशब्दो निष्कपर इति हेमाद्रिः॥ जांबूनदस्य भद्रस्य यत्तैस्त्रिशति

भिन्नथा॥ नर्देर्द्धेननर्देर्द्धेनयथाशक्त्या यवैस्तिभिः॥ वाभ्यामेकेनवाकार्यो वृषः सर्वांगशोभनः॥ पलाद्धीनक
र्त्तव्यो वृषः शोकभयायह्यतनिगारुडात्म॥ नमनालमयेनि॥ स्वदमुपलक्षणं॥ ताला टेकारयेत्तु इमध्य
वंडकलाकृतिः॥ स्याटिकेनतु कर्त्तव्यः खुराम्बरजनेन च॥ पुंड्रनिलकंस्फाटिकमित्यर्थः॥ ग्रीवांतुयमर
गेण ककुदो मेदकेन च॥ ग्रीवायांघंटावलयं रत्नचित्रंतुकारयेदिति लिंगपुराणीयोपस्कराणांगारुडे
नूयस्करानोक्ताः अनःशक्त्याविकल्पः एवं सविभवमिति॥ लैंगेतु वृषांकंकारयेत्तत्रीकंकिणीकृतयं
नगं॥ वृषांकोमहेश्वरः॥ तल्लक्षणं॥ त्रिनेत्रश्चचतुर्वक्त्रो जटामंडलमंडितः॥ त्रिशूलखड्गवरदाभयपाणिर्म
हेश्वरः॥ इतिहेमाद्र्युक्तं॥ वृषभंस्थापयेत्तत्र पश्चिमामुखमग्रतः॥ ईश्वरंपूजयेद्भक्त्या वृषारूढंवृषध्वजं
वृषेंद्रंपूजयेद्भक्त्या नमस्कृत्वाविधानतः॥ तीक्ष्णशृंगायविद्महे धर्मपादाय धीमहि॥ तन्नो वृषः प्रचोदया
त्॥ मंत्रेणानेन संपूज्यो वृषो धर्मविवृद्धये॥ होनवंच प्रनाप्रेम्य यथाविभवविस्तरं॥ वृषगायत्र्येवहोमो

दा वि
२२६

स्त्रशनमष्टसहस्त्रकं वा ॥ वृषः संपूज्य दातव्यो ब्राह्मणेभ्यः शिवाय च ॥ दक्षिणां चैव दातव्यां यथावित्तानुसार
तः ॥ गारुडे वृषदानमंत्रः ॥ नमस्ते जगदाधारः श्रियः पुण्यकृतामसि ॥ त्वद्विहीने यस्मिन्न कश्चित्सुखमश्नु
ते ॥ नमस्ते धर्मराजाय वृषरूपधराय वै ॥ त्वं मामुद्धर देवेश दुर्गसंसारसागरात् ॥ यशःकीर्तिर्धनं धा
न्यं पदम्परमपि संस्तुतं ॥ तन्मया यच्छ देवेश परत्र च शुभांगतिमित्युक्तः ॥ ततो शिवासनमधिकमुक्तं गारु
डे ॥ दानमंत्रमसमस्य च ॥ अत्र फलं लैंगे ॥ एतदघः कृत्स्नेन भक्त्या वृषदानमनुत्तमं ॥ शिवस्यानुचरो भूत्वा
सुचिरं तत्र मोदते इति ॥ गारुडे ॥ दत्वा दानमिदं सम्यग्विधिनानेन पार्थिव ॥ कुर्याद्दिग्विजयं विप्रो
वेदकर्म समाचरेत् ॥ वैश्यः समृद्धगमनं शूद्रः कर्म यथेप्सितमित्युक्तं ॥ ॥ अथ रूप्यवृषं ॥ कृष्टहव
वृषदानं जपितं कृतं कर्मविपाकसारे तृतीयं ॥ हेमाद्रौ स्कान्दे ॥ त्रिंशत्पलात्समारभ्य पलत्रितयमंत
तः ॥ वृषं रौप्यमयं कृत्वा सर्वरत्नैरलंकृतं ॥ क्षौमवस्त्रपरिछन्नं धान्यविन्याससम्भूषितं ॥ यथोक्तकाले

॥ दान ॥
॥२२६॥

पात्रायांथविप्रायोपपादयेत् ॥ दानमंत्रमिमंश्राज्ञोदानकालेसमुच्चरेत् ॥ धर्मस्त्वंहृषरूपेणजगदा-
नंदकारकः ॥ अष्टमूर्त्तेरधिष्ठानमतःपाहिसनातन ॥ एवंददातियोमर्त्याकलधौतमयंनृप ॥ सर्वपा-
पविनिर्मुक्तोदेववद्दिविमोदते ॥ गारुडेन ॥ पाताख्यकेचरौप्येणाकृत्वाहयमनुत्तमं ॥ मुक्ताफलैरलंकृ-
त्यन्यमरागैःसुशोभनैः ॥ सुवर्णतिलकोपेतंचारुचामरपूजितं ॥ गत्वाशिवालयेसम्यक्पूजयित्वाशि-
वंततः ॥ रुद्राध्यायंजपित्वातुषडंगंसरहस्यकं ॥ होमश्चशिवमंत्रेणतिलाज्येनविधीयते ॥ अथाहूय
द्विजवरंवेदवेदांगपारगं ॥ वस्त्रालंकारमाल्याद्यैःपूजयित्वाशिवंयथा ॥ उमापतेस्त्रिलोकेशजगत्कार-
णकारण ॥ स्ववाहनप्रदानेनप्रीतोभवनमोस्तुते ॥ मंत्रेणानेनदद्याद्धेमदक्षिणायान्वितं ॥ दानस्या-
स्यप्रदानेनशिवलोकेमहीयते ॥ ॥ अथैतेषांसर्वसाधारणप्रयोगः ॥ ॥ कर्त्तादेशकालौसंकीर्त्यमम
इहलौकिकायुरारोग्यसमृद्ध्युत्तरहरिस्मरणासहितमरणोत्तरविष्णुपदप्राप्तिकामोगुडधेनुदानं

करिष्ये इति संकल्प्य गणेशपूजापुण्याहवाचने कृत्वाचार्यं वृणुयात्॥ आचार्यो भवनं गोमयेनोपलिप्य
कुशैरास्तीर्य तत्र प्रसारितेन कृष्णाजिनेन पूर्वोक्तान्यतममानेन गुडादिना प्राक्शिरसमुदीचीनपादं धे
न्वाकारं कृत्वा मुखप्रदेशे घृतपूर्णपात्रं· कर्णदेशे शुक्तिके· पाददेशे इक्षून्· अक्ष्णोर्मुक्ते· नासिकयो
रिन्द्रनीलौ· शिरसि सितस्वर्णशृंगाणि· सास्नायां सितकंबलं· ककुदपृष्ठयोस्ताम्रपटं॥ रोमसु सितचामरं
भूषयेद्विद्रुममयं· स्तनचतुष्टयेन नवनीतपात्रचतुष्टयं॥ पुच्छे क्षौमं० दन्तेषु नानाफलानि· घ्राणयोर्गंध
करंडकं स्थापयेत्॥ ततः सुवर्णशृंगीं रौप्यखुरां कांस्यदोहां सितसूक्ष्मवस्त्राच्छन्नां कुर्यात्॥ एवं धेनोरु
त्तरतो धेनुद्रव्यचतुर्थांशेन प्राङ्मुखं स्तनाभिमुखं वा वत्सं निर्माय धेनूपस्करद्रव्यैरुपस्कृत्य सवत्सा
यै गुडधेनवे नम इति नाममन्त्रेण षोडशोपचारैः संपूज्य गृहीतपुष्पांजलिर्धेनुं प्रदक्षिणीकृत्य·
या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या

लक्ष्मीर्या लक्ष्मीर्जनार्दनस्य च ॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे ॥ स्वधा या पितृमुख्यानां स्वाहा य
ज्ञभुजां तथा ॥ सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥ इति यश्रं यं च के पठित्वा पुष्पाञ्जलिं प्रक्षिप्य पु
च्छदेशे उपविश्य पूर्वोक्तं फलमुच्चार्य गामनुकयरिमाणगुडनिर्मितां घृतास्यां शुक्तिकर्णामिक्षुपादां
मुक्ताफलेक्षणां मिंद्रनीलतारकां नानाफलमयदन्तां गंधकाण्डघ्राणां सितसूत्रसिरां कंबलसास्नां
ताम्रककुत्पृष्ठां सितचामररोमकां विद्रुमभ्रूयुगां नवनीतस्तनीं क्षौमपुच्छकां कांस्यदोहां सुवर्णशृंगीं रौप्यखु
रां सितवस्त्राच्छन्नां धेनुद्व्यतुरीयांशनिर्मितनानावडुपस्करसहितवत्सां विष्णुदेवतां तुभ्यं संप्रददे इति पु
च्छदद्यात् ॥ ततः कृतेन गुडधेनुदानकर्मणः प्रतिष्ठार्थं यथाशक्तिसुवर्णदक्षिणां संप्रददे इति दक्षि
णां दत्वा ॥ अन्यसंसंकल्पकर्मेश्वरार्पणं कुर्यादिति ॥ घृतधेन्वादौ तु ओं पदेशिकद्रव्येराणि देशिकानां
वाधः ॥ अनुक्तशृंगादिषु द्रमान्येव ग्राह्याणि ॥ आवाहनमंत्राश्चैतेष्व ॥ फलोच्चारणमंत्राश्च नच्च न

॥ दा॰वि ॥
॥२२८॥

त्रयस्त्रय इति ॥ ॥मीमांसैकधुरंधरः श्रीजिष्णोरन्वायेपि वागीश्वरः साहित्यामृतसागरः सुजननाथश्रीद
सालद्रुमः ॥ यं विद्वन्मणिरेषवो दिनकरः श्रीमन्नविश्वेश्वरं तेनाकारि समग्रधेनुददनो त्स्त्रीनयेयग्र
नि: ॥इति दिनकरभट्टसूनुगागाभट्टपूरिते दिनकरोद्योते दानकाण्डे गुडादिधेनुदानप्रयोगः ॥ सूनो
र्दिनकरस्यैष गागाभट्टमनीषिणः ॥ ॥इदानीं देवतादानविधौ लीलाविजृंभते ॥ ॥अथ ब्रह्मविष्णुम
हेश्वरदानम् ॥ हेमाद्रौ लैंगे ॥ अथान्यं संप्रवक्ष्यामि सर्वदानोत्तमोत्तमम् ॥ पूर्ववद्देशकाले तु मण्डपे
वा विधानतः ॥ प्रपायां कूटमध्ये वा स्थंडिले शिवसन्निधौ ॥ पूर्वं विष्णुं समाराध्य यमयोनिं ततः परं ॥ मं
त्राभ्यां विधिनानेभ्यः प्रणवादिनमोंतकं ॥ पूर्ववत्तुलापुरुषवद्दिनत्वर्थसन्निधानात् ॥ प्रपाकूटो मंडप
विशेषौ ॥ स्थंडिले वेद्यामित्यर्थः शिवसन्निधाविन्त्यनेन तीर्थादिदिव्यप्रतिमाकरणं न उक्तं कामिके ॥ मंड
लां नः शिवं हेमं पार्श्वयोर्ब्रह्मकेशवौ ॥ तान्निद्दिश्यद्विपादानं वा ब्राह्मणेभ्यो धनं वदन् ॥ उत्तमं त्रिसहस्रं तु म

॥ राम ॥
॥२२८॥

ध्यामं द्विसहस्रकं ॥ सहस्रं कन्यसंप्रोक्तं समासाश्चोप्यनेनया ॥ पूर्ववद्धिवपूजा च आन्विगाचार्य दक्षिणा ॥ मं
त्राभ्यामिति नारायणाय विद्महे वासुदेवाय धीमहि ॥ तन्नो विष्णुः प्रचोदयात् ॥ हरहरिहरणाभेदाय ब्रह्मणे
धनदायिने ॥ शिवाय हरये स्वाहा स्वधा वौषट् हुं फट् नमः ॥ इत्येताभ्यां प्रणवादिनमो नाभ्यां ब्रह्मविष्णोः शिव
स्य वक्ष्यमाणा रुद्रेणेति हेमाद्रिः ॥ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ इति शि
वगायत्र्या पूजा रुद्रजपो हवनार्थं इति वयं हि मंत्रमाचरेत् ॥ सर्वद्रव्यं च होतव्यं ताभ्यां कुंडे विधानतः ॥ जप्त्वा
रुद्रं सुनियतः शिवैकगतमानसः ॥ आत्विजौ वेदतत्वज्ञौ सगुणौ वेदपारगौ ॥ नात्र हि द्विजयथाम्नायं विप्रेभ्यो
दापयेद्धनं ॥ शतमष्टोत्तरं तेभ्यः पृथक्पृथगतुत्तमं ॥ वस्त्राभरणसंयुक्तं यथाविभवविस्तरं ॥ गुरुश्चत्र
त्विजौ चैव ब्रह्मविष्णुमहेश्वरान् ॥ तेषां पृथक्पृथग्दद्याद्भोजयेद्ब्राह्मणानपि ॥ शिवार्चनाच्च कर्तव्यास्तय८
नादियथाक्रमं ॥ सर्वमितिति लोकं तिलादिद्याभ्यां आत्विग्भ्यां गुरुसहिताभ्यां हेमनवमिनपर्थः ॥ महेश्वरा

॥ दा.वि ॥
॥ २२९ ॥

निनिविधायेनिशेषतः ॥ मूर्त्तित्रयं त्रिभ्योदद्यादिनयर्थः ॥ देशिकं पूर्ववन्मूर्त्यृत्विजश्चापि पूजयेत् ॥ पुराणह
वाचकान्विप्रान्सर्ववत्पूजयेद्बुधः ॥ एवं कृते चलमते सर्वयज्ञफलंनरः ॥ सर्वान्कामानवाप्नोति निर्वाणं चा
धिगच्छति ॥ अथत्रिमूर्त्तिदानं ब्रह्माण्डे ॥ त्रिमूर्त्तिदानं दानानामुत्तमोत्तममुच्यते ॥ विषुवत्ययने वापि च
न्द्रसूर्यग्रहादिषु ॥ नित्यं वायं च दशणांच जन्मर्क्षेषु समाचरेत् ॥ देवालये नदीतीरे ब्राह्मणस्थापनेनेषु च.
गृहेवाकारयेद्दानं यत्रभूमिःशुचिर्भवेत् ॥ चतुरस्रां समां भूमिं गोमयेनानुलेपयेत् ॥ तत्राक्षताभिर्वि
किरेत्पुष्पांजलीन्समंततः ॥ एकहस्ताधिहस्ता वा त्रिगुणादेर्यतः स्मृताः ॥ त्रिवेदिकाभवत्तिर्यकृष्णेन
तंडुलमिश्रिता ॥ ब्रह्माथविष्णुर्भगवान्मुरारिर्हिरण्मयास्तत्र निवेशनीयाः ॥ चतुर्भुजाःसायुधभूष
णाद्याःकिरीटिनश्चापि यथाक्रमेण ॥ स्नानार्घपद्याचमनीयवस्त्रगंधादिभिस्तानभिपूज्य भक्त्या ॥ प्र
दक्षिणीकृत्य सपुष्पहस्तःप्रणम्यचोद्दापनमंत्रदद्यात् ॥ प्रत्येकमेकं बहुमानपूर्वं संपूज्य दानत्रयम

॥ राम ॥
॥ २२९ ॥

तुक्रमेण ॥ त्वयाजगत्सृष्टिकरस्तमेनत्त्वमेवसर्वस्यपितामहोसि ॥ त्वमेवकर्ताजगतांविकर्तात्वमेवधा
ताजगतांविधाता ॥ यत्त्वंप्रदानादनघोयथाहंत्वयाचसायुज्यमुपैमिदेव ॥ तथाकरुत्वंशरणांप्रपन्ने
मयिप्रभोदेववरप्रसादम् ॥ त्वयामराणाममृतंविधायहालाहलंसंहृतमेवयस्मात् ॥ तथासुराणां
त्रिपुरंचदग्धमेकेषुणालोकहितार्थमीश ॥ त्वद्रूपदानादहमप्यशेषैर्दोषैर्वियुक्तस्तुगणाम्प्रपद्ये ॥ त
थाकुरुत्वंशरणांप्रपन्नेमयिप्रभोदेववरप्रसीद ॥ इत्येवमुक्त्वाविधिवद्ददानिसयानिसायुज्यमथत्रि
मूर्तेः ॥ यःकारयेद्विप्रवरायतस्मैसुवर्णसंख्यापरिणतंहिरण्यं ॥ दशाब्दवासोनुगमादरेणतथाकृते
यंलभतेफलंतत् ॥ ॥ अथत्रिपुरूपदानम् ॥ मृत्युंजये ॥ सुवर्णरक्तिकानांचशतेनैकेनशक्तितः ॥
कार्योब्रह्माथविष्णुश्चशंकरश्चतथैवच ॥ पलद्वादशमानेनपीठंलोहेनकारयेत् ॥ देवतास्थापनार्थी
यचक्रवत्परिमंडलम् ॥ ततब्रह्मादयःस्थाप्यायमईनंडरोन्यसेत ॥ चतुर्मुखश्चतुर्बाहुपद्महस्तःपिता

॥शा॰ता॥ ॥२२०॥ महेशःशांकरोद्विभुजःशूलीवृषारूढस्त्रिलोचनः॥ विष्णुश्चतुर्भुजश्चक्रीगदीगरुडवाहनः॥ यमइनःपाशपा
णिदंडवान्विकृताननः॥ सप्तलोहमयःकार्योभीनोवरुणश्चवाहनः॥ ततोविधायदेवानांपूजांपुष्पफलादि
भिः॥ यजमानःकरेरत्नंगृहीत्वानिधिनंनवं॥ इदंशिरश्छिन्नमीतिइतस्यास्यदुरात्मनः॥ इत्युच्चार्यशि
रश्छिंद्याद्धृतस्वयमदिग्मुखः॥ ततश्चतुर्भिर्विप्रैस्तुकार्यंब्राह्मणवाचनं॥ ततोब्रह्मादिदेवानांदानंकु
र्यात्प्रयत्नतः॥ देवालयेगृहेवापितीर्थेवान्यत्रकुत्रचित्॥ ब्राह्मणायतुतान्दद्याद्व्यंगायत्रीविदे॥
सुवर्णदक्षिणायुक्तान्ब्राह्मणान्तुपूर्वशः॥ अथमृत्युभयात्रस्योपायोदयाद्वदतांवयम्॥ तस्यमृत्युर्वि
नश्येतदानादस्मान्नसंशयः॥ मृत्युनाग्रस्यमानोपिजीवत्येवनरःस्फुटं॥ चामीकरप्रतिकृतित्रिनयं
विधायब्रह्मादिदानमिदंयःपुरुषःकरोति॥ रोगान्निरस्यसकलानपिदुर्निवारान्नैवायमृत्युभय ॥राम॥
मेतिनरःकदाचित्॥ ॥अथवज्रमूर्तिदानम्॥ ॥ब्रह्मांडे॥ चतुरस्रांसमांभूमिंलिप्त्वागोमयवारि ॥२३०॥

णा ॥ वनस्थस्थस्थलेस्थाः सुःप्राच्योदीच्यसुतास्समाः ॥ नवकोष्ठानि तत्रस्थः कोणकोष्ठानि वर्जयेत् ॥ तत्र
तेषु च मूर्त्तीश्च चतुर्दिक्षु निवेशयेत् ॥ प्रागाद्युत्तरपर्यन्तं ज्ञानरूपमयीः शुभाः ॥ शुभनं तु दलपद्मेषु पुरा
पंचस्तु निवेशयेत् ॥ पुरस्तो वासुदेवं च संकर्षणमनः परम् ॥ प्रद्युम्नं चानिरुद्धं च चतुर्मूर्त्तिर्यथाक्रम
म् ॥ शंखचक्रगदापाणिं पीतवाससमच्युतम् ॥ श्रीवत्सांकं चतुर्बाहुं केयूरमुकुटोज्ज्वलं ॥ नीलांवरध
रं देवमनंतं मुशलायुतम् ॥ संकर्षणं चतुर्बाहुं कटकादिविभूषणाम् ॥ प्रद्युम्नश्चानिरुद्धश्च शंखच
क्रगदाधरौ ॥ पीतश्वेतांवरधरौ केयूरादिविभूषितौ ॥ एवं कृत्वा चतुर्मूर्त्तिं चतुर्बाहुं समर्चयेत् ॥ प
तस्याग्रे सुवर्णेन यथाशक्ति विनिर्मितम् ॥ प्रागाद्युत्तरपर्यन्तं देवानामर्चनाक्रमः ॥ स्वस्वमंत्रेण देवा
नामाराधनमनुक्रमात् ॥ स्नानं वासो युगं चार्घ्यं पाद्यमाचमनीयकम् ॥ गंधं सुमनसो धूपं दीपं नै
वेद्यमेव च ॥ धारात्रयं भुवजले स्थाम्बलं विनिवेदयेत् ॥ परितो लकपालांश्च गंधादिभिरथार्चयेत्

॥दा.वि॥
॥२३१॥

त्रिःप्रदक्षिणमावर्त्त्यगृहीतकुसुमाञ्जलिः ॥ वक्ष्यविधानाराध्यदद्यान्मंत्रमुदीरयन् ॥ नमोस्तु वादेवायज
गतांपतनयेनमः ॥ नवसंकीर्त्तनाद्दानाच्छ्रेयःस्यात्तु सदा मम ॥ संकर्षण नमस्तेस्तु जगत्स्थित्यंतकर्मणा.
नवदेवप्रदानं मे सर्वपापहरं भवेत् ॥ प्रद्युम्नायाखिलेशाय भक्तानां दुःखहारिणे ॥ नमोस्तु देवदेवा
य भक्तानामार्त्तिहारिणे ॥ सदा नमोस्तु जगतः सृष्टिस्थित्यंतहेतवे ॥ अनिरुद्धाय देवाय विश्ववेयपर
मात्मने ॥ यो हि दद्यात्स्वचतुर्मूर्त्तिः श्रद्धायुक्तस्तु नारद ॥ नारी वा पुरुषो वापि यथोक्तं फलमश्नुते ॥ ॥
अथ पंचमूर्त्तिदानम् ॥ ॥ब्रह्मांडे॥ अथ दानं प्रवक्ष्यामि पञ्चमूर्त्तेरिति श्रुतं ॥ यत्कृत्वा पुरुषः स्त्री
वा सर्वसिद्धिमवाप्नुयात् ॥ यस्मात्पापं मनसा वाचा कर्मणा मन्युना कृतम् ॥ जन्मांतरसहस्रेषु नन्ना
शं याति सर्वतः ॥ दानमारोग्यमायुष्यं श्रीकरं भुक्तिमुक्तिदम् ॥ चंद्रसूर्योपरागे चाथ विषुवत्ययनादि
षु ॥ पुण्यकालेषु सर्वेषु गृहे वा दानमाचरेत् ॥ आचार्यं वरयेद्विप्रं नस्यात्तज्ज्ञामवाप्यच ॥ विधावि

॥ राम ॥
॥२३१॥

नयसंपन्नं सर्वैनैनैव कारयेत् ॥ लेपयंतु समां भूमिं गोमयेनोदकेन च ॥ चतस्रस्तत्र लेखास्युः प्राचोदीच्याग्र
ताः समाः ॥ त्रिहस्तमात्रास्ताः सर्वास्तिस्रः स्युर्नवकोष्ठकाः ॥ तत्र पंचैव संख्यास्ताभ्यस्तु कोणान्विसर्जयेत् ॥
तेषु पंचसु कोष्ठेषु मध्ये कंकमलं न्यसेत् ॥ श्वेततंदुलपुंजेन अष्टपत्रं सकर्णिकं ॥ तेषु तंदुलपद्मेषु पं
चमूर्त्तीन्निवेशयेत् ॥ सुवर्णनिर्मिताः पंचमूर्त्तीः कृत्वा विधानतः ॥ ईशानं सोमवर्णाभासीनं कर्पूरकुंदोज्ज्व
लं ॥ चतुर्बाहुमुदारांगं कटकादिविभूषितं ॥ दक्षिणायभ्यं हस्ते सव्येतु मृगयानकं ॥ अभयं दक्षिणेष
वेभूतं तत्र तत्र यं न्यसेत् ॥ सद्योजातं वामदेवं अघोरं तत्पुरुषं तथा ॥ सुवर्णेनैव कुर्वीत प्रभानादर्धमानतः
सद्योपश्चाद् उत्तरे वामदेवं तं चान्यस्मिं दक्षिणे चाप्यघोरं ॥ सद्यः सद्योजातं तत्स्थानं पुरुषं पूर्वकोष्ठे तेषां मध्ये
चमीशानमेव ॥ तत्फलोक्तं पुरुषं तत्तुरूपमिमं प्रार्थः ॥ स्नानं वस्त्रं चार्घ्यपाद्याचमेयं गंधपुष्पं धूपदीपौ ह
विष्यं ॥ अभ्यर्चिताः पंचमूर्त्तीः क्रमेण मंत्रैः पंचब्रह्मसभिमीनपूर्वं ॥ संपूज्य चैवं विधिनोदितेन सद्यादि

देवाश्च यथाक्रमेण ॥ पंचब्रह्मणः सद्योजातंप्रपद्यामीत्यादि पंचमंत्राः ॥ तेनैव विधिना सर्वमेतत्कृत्वैव दा
नं स्वयमेव कुर्यात् ॥ दानकाले तु संप्राप्ते यदा नारी नरोथवा ॥ स्नापयित्वा गुरुणानेन मंत्रपूतैः कुशोदकैः ॥ अ
भ्यर्च्य विष्णुं गंधाद्यैर्मंत्रेणानेनानुदीरयेत् ॥ प्रत्येकमेकाग्रमना देवमूर्तिरनुक्रमात् ॥ नमोस्तु सद्योजाता
य नमो भगवन्मायिने ॥ भवभंगो भवेन्मह्यं नवरूपप्रदानतः ॥ सोमाग्रा वामदेवाय शिवाय शिवरूपिणे
स दामे शिवमेवास्तु नवरूपप्रदानतः ॥ नमो घोराय घोराय जगत्संहृतिकर्मणे ॥ शरणं त्वां प्रपन्नोहमशं
कं मम शंकरः ॥ पुरुषाय पुराणाय हराय वरदाय च ॥ नस्वरूपप्रदानं मे श्रेयसेस्तु नमोस्तु ते ॥ ईशानो
जगतामीशो देवानामभयंकरः ॥ रक्षत्वशेषभूतानामीशमांशरणागतम् ॥ विप्रं दक्षिणमाहूय गृही
तकुसुमांजलिः ॥ प्रणिपत्य ततो दद्यादेभिर्मंत्रैर्यथाक्रमम् ॥ गुरवे दक्षिणां दद्यादन्यस्मै वा प्रदाप
येत् ॥ दक्षिणां गुरवे दद्यात्सुवर्णं चैव वाससी ॥ एतन्नरोथवा नारी दानं विधिवदाचरेत् ॥ मुच्यते स

वैपापेभ्यः शिवसायुज्यमाप्नुयात् ॥ ॥ अथ शालग्रामदानम् ॥ ॥ मदनरत्ने हरिवंशे च ॥ चतुःसागरपर्यन्तां
सशैलवनकाननां ॥ दत्वा यत्फलमाप्नोति शालग्रामान्तदश्नुते ॥ शालग्रामशिलादानमतिदानं प्रकीर्तितम् ॥
शालग्रामं तथा लिंगं यो ददाति कुरुद्वह ॥ समलोकमवाप्नोति शिवलिंगप्रदानतः ॥ पाद्मे ॥ शालग्रामशिला
चक्रं यो दद्याद्दानमुत्तमं ॥ भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं ॥ पौरुषे रौप्यवस्त्रकेन संपूज्य च यथाविधिः
सौवर्णे राजते वापि ताम्रे वा भाजने न वे ॥ नववस्त्रसमास्तीर्णे प्रतिष्ठाप्य हरिं ततः ॥ संपूज्य क्षीरपक्वान्नैर्नै
वेद्यादीन्समर्पयेत् ॥ ततः संपूज्य विप्रेंद्रं मधुपर्कपुरस्सरं ॥ ततः सुवर्णसहितं वस्त्रयुग्मसमन्वितं ॥ शा
ह्यंसपात्रं हस्ते न शिलाचक्रं नराधिप ॥ ततः परमिमं मंत्रं देशकालादिकीर्त्य च ॥ शालग्रामशिलाचक्रे
भुवनानि चतुर्दश ॥ तस्माद्दस्य प्रदानेन प्रीयतां हरिरीश्वरः ॥ नारायराजगन्नाथ शंखचक्रगदाधर ॥ स
प्तजन्मनि यज्ञादेर्विघ्नं दैवकृतं मम ॥ चक्रहस्तगदायायोदामयाभुजगत्पते ॥ प्रणवं च समुच्चार्य शि

लावकं मदान्मकं ॥ मत्रक्रायप्रदानं च जलदानपुरःसरम् ॥ देवस्याग्नेनिराजन्वेशीमं मंत्रस्तनः परं ॥ त्रनिश्च
हीत्रयत्नेन यठनीयो यथाक्रमं ॥ ततः परं कृतं कर्म कार्यं सर्वं मदर्पणम् ॥ एवं यः कुरुते भक्त्या शिलादानं
यथाविधि ॥ समहायापसंघेभ्यः सम्यस्व विमुच्यते ॥ यं यमर्थं समुद्दिश्य शिलादानं करोति यः ॥ सतं
तमर्थं लभते मन्त्र सादान्नराधिप ॥ शालग्रामसमं दानं नास्ति कुत्रापि वैष्णवः ॥ सर्वेषामपि दानानामुत्त
मं तन्मुत्रवक्ष्यते ॥ यः करोति विधानेन समेति श्रीति वर्द्धनः ॥ व्यासः ॥ यो ददाति शिलां विष्णोः शालग्राम
समुद्भवां ॥ वैष्णवो विष्णुभक्ताय ते नेष्टं कृतुभिः शतैः ॥ ॥ अथ लोकपालाष्टकदानं लैंगे ॥ ॥ लोकपा
लाष्टकं दिव्यं साक्षात्परमदुर्लभम् ॥ सर्वसंपत्करं पुण्यं परचक्रविनाशनं ॥ मध्ये शिवं समभ्यर्च्य यथा
न्यायं यथाक्रमम् ॥ दिग्विदिक्षु च कर्तव्यं स्थंडिलं वालुकामयम् ॥ अष्टौ विप्रान्समाहूय वेदवेदांगपा
रगान् ॥ जितेंद्रियान्कुलोद्भूतान्सर्वलक्षणसंयुतान् ॥ शिवाभिमुखमासीनान न्हने ष्वं वरेषु च ॥ वस्त्रे

रामरसौर्दिव्यैर्लोकपालान्स्वमंत्रकैः ॥ गंधैः पुष्पैर्धूपदीपैर्ब्राह्मणांश्चार्चयेत्क्रमान् ॥ पूर्वतो होमयेद्वह्नौ लो
कपालाष्टमंत्रकैः ॥ समित्घृताभ्यां होतव्यमभिकर्मक्रमेणतु ॥ एवं कृत्वा विधानेन ब्राह्मणान्वेदपारगान्
यजमानः समाहूय सर्वाभरणभूषितान् ॥ सुस्नातान्पूजयित्वाथ द्विजेभ्यो दापयेद्धनं ॥ पृथकपृथकस्व
मंत्रैश्च दशनिष्कं च भूषणाम् ॥ दशनिष्केण वस्त्रार्द्धआसनं कंबलं पृथक ॥ स्नपनं तस्य कर्तव्यं शिवव
स्य विधिपूर्वकम् ॥ दक्षिणा च प्रदातव्या विभवविस्तरम् ॥ अत्र कुंडमंडपादितुलापुरुषोक्तेति कर्त्त
व्यताभवतीति हेमाद्रिः ॥ वेदिकामात्रं तु लोक्तं अन्यद्यथोक्तं ॥ अतिदेशेप्रमाणाभावादिनिवयम् ॥ य
ज्ञिमप्रदेशे मध्ये श्रिवेदिकाः परितो दिग्विदिक्षु वेदिकाष्टके लोकपालपूजा ॥ आचार्यसहितब्रा
ह्मणाष्टकाय दानं पूर्वतो होमः ॥ निष्कदशकदक्षिणा ॥ दावाचार्याय नियथाविभवं दद्दिरोत्यपि हे
माद्रिः ॥ कामिके तु एकस्मिन्स्थंडिले वाथ कुंडे वा होममाचरेत् ॥ लोकपालाष्टमंत्रैस्तु पृथगष्टोत्तरं शतन्

म् ॥ समित्घृताभ्यां होमं वै अन्ते पूर्णाहुतिं ददेत् ॥ एवं यः कुरुते दानं लोकेशानां तु भक्तितः ॥ लोकेशानां
विरंचित्वा स्थाने शुभ सम्मुखं नरः ॥ कलशं शिव पुरे रक्षित्वा सार्वभौमो भवेद्भुवि ॥ ॥ अथ नवग्रहदानं ब्रह्मां
डे ॥ ॥ ग्रहदानं यथा वक्ष्ये सर्वसिद्धिकरं परम् ॥ सर्वशान्तिकरं नृणां सर्वपापप्रणाशनम् ॥ विषुव
पने राहुग्रहणे शशिसूर्ययोः ॥ जन्मर्क्षे सौरवारे वा यंच दद्यात्तथैव च ॥ पुण्यकाले शुभे वै शुभपुण्यदे
शे विशेषतः ॥ ग्रहदानं तु कर्तव्यं नित्यं श्रेयोभिकांक्षिणा ॥ हस्तमात्रं त्रिहस्तं वा त्रिहस्तं वा यथा नारद ॥ च
तुरस्रां समां भूमिं गोमयेनानुलेपयेत् ॥ रेखाः प्राच्य उदीच्यश्च सुश्वेतस्तथा समाः ॥ नवकोष्ठपु
ष्पाणि विन्यसेत्श्वेततंडुलैः ॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ॥ राहुकेतु इति प्रोक्ता
ग्रहा लोकसुखावहाः ॥ एषां हैरण्यरूपाणि कारयित्वा यथाविधि ॥ त्रिनिष्केणाथवा कुर्याद्यथाशक्त्या
पृथक् पृथक् ॥ आदित्यं मध्यमे कोष्ठे दक्षिणे अंगारकं न्यसेत् ॥ उत्तरे तु गुरुं विंद्यात् बुधं तु ईशान पूर्वके ॥

भार्गवं पूर्वतोन्यस्य सोमं दक्षिणपूर्वकं ॥ पश्चिमे ऽर्कसुतं न्यस्य राहुं पश्चिमदक्षिणे ॥ पश्चिमोत्तरके केतुं सं
निवेश्य यथाविधि ॥ नवर्णांगवपुष्याये स्ववर्णैर्यन्त्रस्व मंचके ॥ ध्यानं भूजेथवाकुर्यात् स्त्रीवानचतुना
रद ॥ ध्नतेयनादियत्कार्यं सर्वं विधेण कारयेत् ॥ ध्यानकालेतु संप्राप्ते स्नात्वा तिलकुशोदकैः ॥ प्रय
तोयजमानस्सुधीर्नवस्त्रः प्रसन्नधीः ॥ अर्चयित्वा स्वयं दद्यादृक्करसुखान् ग्रहान् ॥ प्रत्येकमेकवि
प्रेभ्यो स्वर्णं मंत्रमुदीरयेत् ॥ पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः ॥ दिवाकरो लोक
गुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ १ ॥ श्वेताम्बरः श्वेतविभूषणाश्च श्वेतद्युतिर्दण्डधरो द्विबाहुः
चंद्रोमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः ॥ २ ॥ रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मे
षगमो गदाभृत् ॥ धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशान्तः ॥ ३ ॥ पीताम्बरः पीतवपुः
किरीटी चतुर्भुजो दण्डधरश्च हारी ॥ चर्मासिधृक्सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ॥ ४ ॥

पीनांबरः पीनवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु
मह्यम्॥ ५॥ श्वेतांबरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च जप्यं
च बिभ्रद्वरदोस्तु मह्यम्॥ ६॥ नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्॥ चतुर्भु
जः सूर्यसुतः प्रशांतो वरप्रदो मेऽस्तु स मंदगामी॥ ७॥ नीलांबरो नीलवपुः किरीटी करालवक्त्रः क
रवालशूली॥ चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यम्॥ ८॥ धूम्रो द्विबाहुर्वरदो
गदाभृद्गृध्रासनस्थो विकृताननश्च॥ किरीटकेयूरविभूषितांगः सदास्तु मे केतुगणः प्रशांतः॥ ९
इत्युच्चारापयेत्सर्वमादित्याद्यान्नवग्रहान्॥ पुरुषो वाथ नारी वा यथोक्तफलमाप्नुयात्॥ मध्यमं
तु रवेर्दद्यादन्यत्सर्वमेवाप्रदापयेत्॥ अथवा दक्षिणां दद्यात्सुवर्णं वा समाशुभे॥ ॥अथ दशावतार
दानम्॥ विश्वामित्रः॥ ॥दानानामुत्तमं दानं हेमं विष्णोः स्वरूपकम्॥ तस्मात्पुण्यार्थिना देया हेमा

विष्णोः स्वरूपकाः ॥ मत्स्यः कूर्मोथ वाराहो नारसिंहोथ वामनः ॥ रामो रामश्च कृष्णश्च बुद्धः कल्की च ते द
शा ॥ वामे शंखं गदां दक्षे विभ्रद्दै मत्स्यरूपधृक् ॥ नरो हि मत्स्यरूपी वा मत्स्यरूपी जनार्दनः ॥ ए० न देव
कूर्मलक्षणं ॥ मधुपिङ्गलवर्णाश्च चतुर्बाहुस्तु धैर्युतनम् ॥ नरांगसूकरास्यं च मनाकपीनं शुभाषणाम्
श्रीर्वामकूर्परस्था तु धरा नंनो पदा तु गो ॥ एतद्द्वयधरं देवं वाराहं भुक्तिमुक्तिदम् ॥ ज्वलद्दीप्तसमाका
रं सिंहवक्त्रं जरागकम् ॥ दंष्ट्राकरालवदनं ललज्जिह्वं सुभीषणम् ॥ हन्नाक्षं जटिलस्कन्धं आतीछं
पीनवक्षसम् ॥ अमेघनीलनखरं वामो रुक्मनदानवम् ॥ नखक्षोदरयन्तश्च कराभ्यां नखरैर्भृश
म् ॥ गदाचक्रधरं बाभ्यां नरसिंहं जगत्प्रभुम् ॥ दण्डी छत्रधरो द्विर्वेर्वामनः परिकीर्तितः ॥ छत्रांनकार
रां घोरं ड्ढहन्परशुं करम् ॥ जामदग्न्यः प्रकर्त्तव्यो रामो रोषारुणेक्षणः ॥ सुवाप्रसन्नवदनः सिंह
स्कंधो महाबलः ॥ आजानुबाहुः कर्त्तव्यो रामो बाहुर्धनुर्द्धरः ॥ शंखचक्रधरः कार्यो नीलोत्पलदलछ

॥ दा॰वि ॥ विः॥ कुम्भोदरीर्यद्विवाहुश्च सर्वदैत्यक्षयंकरः॥ काषायवस्त्रसंवीतः स्कंधमंसक्तचीवरः॥ पद्मासनस्था
॥ २३६ ॥ द्विभुजो ध्यायी बुद्धः प्रकीर्तितः॥ खड्गी घनकरः क्रुद्धो हयारूढो महाबलः॥ म्लेच्छोच्छेदकरः कल्की द्वि
भुजः परिकीर्तितः॥ यथाशक्त्या प्रकुर्वीत सुवर्णैर्निर्विज्ञानता समेन षोडशेनैव समान्येतानि कारयेत्
संपूज्य नामभिस्तैस्तु गन्धपुष्पनिवेदनैः॥ भक्तिनम्रः प्रणामांते निवेश्य हयाननः॥ आहूय ब्राह्म
णान् राजन् पादप्रक्षालयत्ततः॥ उपवेश्यासने सर्वांश्चंदनेनानुलेपयेत्॥ सुगंधैः कुसुमैश्चैव धू
पदीपैस्तथैव च॥ आच्छाद्य वस्त्रयुग्मैस्तु ग्रहणोत्वंडस्पर्यपोः॥ ग्राहकान्विप्ररूपांस्तु अर्चयेन्नविमत्
त्सरः॥ एकैकं देवरूपं तु मेकैकस्य समर्पयेत्॥ अथवा विदुषे सर्वान्दद्यात्संपूज्य मानवः॥ देवरूप
मयाविप्रकारितं कांचनं शुभम्॥ न कृष्णाप्रदानेन प्रीयतां विश्वरूपधृक्॥ एनरुद्धार्यविप्रस्य ह ॥ राम ॥
स्ते नो यं क्षिपेत्स्वयम्॥ प्रदक्षिणानतो दद्यात्संप्राप्य विप्रो गृहम्॥ ॥ अथ द्वादशादित्यदानमुलाउ ॥ २३६ ॥

भृगुनारदभद्रेनेदानमादित्यसंज्ञितम्॥ यथोक्तंलोकगुरुणाविष्णुनाप्रभविष्णुना॥ कर्तुःपापहृ
दंपुण्यंमायुष्यंश्रीकरंशुभम्॥ आरोग्यंसर्वमांगल्यंदुःस्वप्नादुननाशनम्॥ सर्वशांतिकरंह्येतन्सर्व
सिद्धिफलप्रदम्॥ विषुवत्ययनेराहुर्यग्रहणेचंद्रसूर्ययोः॥ जन्मर्क्षेसौरवारेचपंचदश्यर्कसंगमे॥
सन्नमांवाथसावित्रेनक्षत्रेदुनदर्शने॥ दुःस्वप्नदर्शनेकुर्याद्दानमादित्यसंज्ञितम्॥ देवालयेनदी
तीरेनडागेवरुणालये॥ अन्येषुपुण्यदेशेषुदेवदानंसमाचरेत्॥ आनियवेद्यादशहस्तदैर्घ्या
क्षितिंनथागोमयसंयुताभिः॥ तस्मिन्निमैसंदुलपुंजकेश्चविस्तारयेद्वादशपंकजानि॥ प्रादेशमा
त्राणिशुभानितानिसकर्णिकान्यष्टदलेषुतेषु॥ हिरण्यरूपाणिरवेर्विधाययथाक्रमादुत्तरतोथ
थर्व॥ तेषांलक्षणंशास्त्रोक्तं॥ पत्रमञ्जुखान्प्राञ्जुखस्पवेदवांसंघ्राणगन्धादिभिरर्चयित्वा॥ दद्याद्पु
पंसघृतंतंउत्थंवस्त्रैरथोवेष्ट्ययथाक्रमेण॥ प्रत्येकमेकंद्विजपुंगवायआराध्यगंधादिभिरादरेण

संज्ञीयनामित्यथचक्रमेणाथमेकमुच्चार्यनदीयनाम॥धाताचमित्रश्चततःपरेणमार्तंडनामावरुणस्त-
थार्यमाच॥शक्रश्चदेवोवरुणस्तथासोभगोविवस्वान्नवमस्तथैषां॥आदित्यनामासविताथान्य-
स्त्वष्टातथैकादशमश्चतेषां॥विष्णुस्तथाद्वादशमश्चमंत्रैराराधयेद्देववरान्द्विजांश्च॥ ॥अथ
रुद्रानप्रस्तांडे॥ ॥अथातःसंप्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः॥यद्यत्कामयतेदाताततत्फलमुपा-
श्नुते॥पुण्यकालेषुसर्वेषुजन्मक्षेत्रेषुविशेषतः॥पुण्यदेशेषुसर्वेषुगृहेवादानमाचरेत्॥देवास
कोनपंचाशद्देवेंद्रसमतेजसः॥अनराःपुरुहूतस्यमरुतःसूर्यवर्चसः॥किरीटहारकेयूरक-
टकादिविभूषिताः॥खड्गचर्मधराणित्यंशक्रस्यानुचराःसदा॥तेषांतुप्रतिरूपाणिज्ञानरूपेणकार-
येत्॥तेषांदानानितत्सर्वविधिनैवसमाचरेत्॥शुचौदेशेसमाभूमिंलिप्यगोमयवारिणा॥दक्षि-
णोत्तरतोविद्यालेख्याःषट्पंचनासमाः॥प्रागेकादशरेखाःस्युःपंचाशत्कोष्ठमुच्यते॥ चतुरस्राःसमा

सर्वेऽस्मिन्निनयसंमिता ॥ कोष्ठे मध्यमवीथ्यां वै प्रष्ठे चोत्तरतः स्थितम् ॥ इन्द्रमासनमित्युक्तं भानरेमरु
त्तस्तथा ॥ कोष्ठेषु सर्वेषु सरोरुहाणि कृत्वासिते संडुलमंडलेष्व ॥ पद्मानि देवासनमारभेत संस्थापये
त्तेषु यथाक्रमेण ॥ अत्र दक्षिणोत्तरायतं रेखाषट्कमालिख्य पूर्वपश्चिमायताभिरेकादशरेखाभिः
पंचाशत्कोष्ठनिष्पत्तिः स्यात् ॥ तत्र मध्यमवीथ्यां उत्तरतः षष्ठकोष्ठके इन्द्रासनं भवसिष्ठकाः मरुत्ता
मासनं ॥ मरुत्नामानि वाउपुराणे ॥ तत्र तेषां तु नामानि मातापित्रोः पवक्रतुः षाड्गुण्यैः कर्मभिश्चैव
मरुतां तौ पृथक्पृथक् ॥ शुक्रज्योतिश्च सत्यादिन्यः सत्यज्योतिस्तथापरः ॥ चित्रज्योतिश्च ज्योतिष्मान्
संहातुतपास्तथा ॥ प्रथमोऽयं गणः प्रोक्तो द्वितीयं तु निबोधतत् ॥ ऋतजित्सत्यजिच्चैव सुषेणः से
नजित्तथा ॥ अतिमित्रो ह्यमित्रश्च दूरेमित्रस्तथापरः ॥ गणस्त्वेष द्वितीयस्तु तृतीयं तु निबोधतः
ऋतः सत्यो ध्रुवो धर्त्ता विधर्त्ता च विधारयः ॥ वरुणश्च तृतीयेच चतुर्थं मे निबोधतः ॥ ध्वांतश्च धु(

निश्चैव उग्रभीमस्तथैव च ॥ अभियुक्तोक्षिपश्चैव सासह्यांश्च गणाः स्मृताः ॥ ईदृक्षश्चैव नथान्यादृकस दृक्प्रमि
मदृक्नथा ॥ मितश्च संमितश्चैव सभरश्च तथा गणाः ॥ ईदृक्षासः पुरुषश्चैव अन्यादृक्षास रुतनौ ॥ सं
मिताः समदृक्षासः प्रतिदृक्षाश्च वै गणाः ॥ मरुतेन्द्रस सरस्तथा देवविशोपरः ॥ यन्तश्चैवानुवर्त्मानस्त
था न्योमानुषी विशः ॥ दैत्यदेवाः समाख्याताः सप्तैते सप्तका गणाः ॥ एतेषां कोन पंचाशन्मरुतो नाम नः
स्थिता इति ॥ आगादि पूर्वोक्तरमन्त्रैव सर्वाणि कृत्यानि च कारयित्वा ॥ वस्त्रैरथावेष्ट्य कुशोदकैश्च
संप्रोक्ष्य नद्विजः पुनर्यजुभिः ॥ मध्ये महेन्द्रं विगुणेन हेम्ना चक्राकुधः शक्तिधरः किरीटी ॥ हारादिके
यूरविभूषितांगो देवाधिपो लोकपतिः प्रशान्तः ॥ कार्यस्तथा या गयं प्राम्भेभुभेणरापेका लेपि दाना
स्नानानतः ॥ तिलमिश्रैः कुशोदकैः प्रदक्षिणां पयपूत हीनहस्तः क्षत्वानु विप्रेण सहैव सर्वान् ॥ प्रणम्य पु
ष्पांजलिनां च सर्वं प्रदापये देवगणांक मेणः ॥ प्रत्येकमेके द्विजपुंगवानां प्रणाम्य मन्त्रं समुदाहरेद्वै

कृणोमि देवं मरुतां तथैकं मयि प्रभो देव कुरु प्रसादम् ॥ तव प्रसादाद् घनाशनं मे सुवर्णरूपास्तु स
दा मरेशाः ॥ इत्येवमुक्त्वा मरुतः प्रणयन्ततो महेन्द्रं प्रददेत्तु देवम् ॥ यः कारयेद्विप्रवरस्तु तस्मै स्वशक्ती(
तिविप्रांश्चतुरो निधाय ॥ ततः संपूज्य गुरवे दक्षिणां च यथोचिता ॥ स्वस्तिवाच्य विप्राणां दक्षिणां च
यथार्हतः ॥ त्रैलोक्यनाथो जगतामधीशो देवाधिपो दैत्यगणानि हन्ता ॥ श्रेयांसि मह्यं प्रददातु दातु
देवाग्रजो वज्रधरः प्रशान्तः ॥ इत्युच्चार्य ततो दद्याद् देवं वज्रहरं हरिं ॥ पूजायामपि शक्रस्य पंचदशः प्र(
कीर्तितः ॥ मरुत्वं कुरुते दान मरुतां विधिपूर्वकम् ॥ स सर्वकालसंपन्नो देववद्दिवि मोदते ॥ यथोक्तं ब्र
ह्मणा चेदं नारदाय पुरर्षये ॥ तथा तवापि वा सर्वं प्रोक्तं वै मुनिसत्तमाः ॥ ॥ अथ चन्द्रादित्यदानम्
विष्णुधर्मोत्तरे ॥ चन्द्रादित्योपदानञ्च सूर्यः सौवर्ण उच्यते ॥ शुद्धस्य रजतस्यैव मंडलं हिमवान्विधः
षोडशाङ्गुलहस्तं तु उभयोरपि मंडलम् ॥ हस्तोपमसमाकारो मध्ये चैव तु कर्णिका ॥ भानुं नाम मम

॥ यावि ॥
॥ २३९ ॥

ये पात्रे घृतपूर्णे तु निक्षिपेन्नरः ॥ सोमं शंखे क्षीरपूर्णे उपरिस्थापयेद्बुधः ॥ सूर्ये तु रक्तकुसुमैः सोमं शु
क्लैस्तथैव च ॥ आदित्याय सुगंधिं च धूपं च प्रतिपादयेत् ॥ सोमस्य गुग्गुलुर्देयो गंधः शुक्लस्तथैव च ॥
कुंकुमं तु यतंगाय दीपं चैव घृतेन तु ॥ एवं संपूज्य यत्नेन चंद्रादित्यौ पृथक्कृतो ॥ अस्तुनपूर्तये सोमं न
मोनेनैव पूजयेत् ॥ आहूय ब्राह्मणं भक्त्या वेदवेदांगपारगम् ॥ कुटुम्बिनं दरिद्रं वा आहिताग्निं तथै
व च ॥ रक्तेन वाससा छाद्य कुंकुमेनानुलेपयेत् ॥ संपूज्य धूपदीपैश्च द्विजं सूर्यमिवापरम् ॥ समर्पये
द्ब्राह्मणाय मंत्रेणानेन भूमिपः ॥ रुक्मं च पुरुषं चैव परांडकरव्येव च ॥ त्रयी विद्या च सांगा तु यस्यांग
विश्वरूपिणा ॥ स मे दिवाकरो देवः प्रीयतां विश्वमाचिरम् ॥ एवमुच्चार्य भानुं तु ब्राह्मणाय निवेदयेत्
क्षीरशंखविध्यिनं देवं द्विजराजं तथैव च ॥ अमृतमूर्तिशीतांशुश्चन्द्रमामित्रो द्विजोत्तमः ॥ गायत्र्यैव तु सू ॥ राम ॥
र्यस्य भूर्इशां जायते विभो ॥ सोमं नरक्षमं दीनिशुचिः शुक्लेन वेनसा ॥ एवं वंद्य रविं दत्वा वली राज्यमवा ॥ २३९ ॥

पह ॥ ॥अथ कालपुरुषदानम् भविष्योत्तरे ॥ ॥पुण्यं दिनमथासाद्य भूमिभागे समे शुभे ॥ चतुर्दश्यां च
तुर्थ्यां वाष्टम्यां वा पांडुनन्दन ॥ पुमान्कृष्णतिलैः कार्यो रौप्यदन्तः सुवर्णदृक् ॥ खड्गोद्यतकरो दीर्घो जपा
कुसुमकुण्डलः ॥ रक्ताम्बरधरः स्रग्वी शंखमालाविभूषणः ॥ तीक्ष्णासिपुत्रीबंधेन विस्फारितकटीत
टः ॥ उपानद्युगसंक्रान्ताङ्घ्रिः कृष्णकंबलपार्श्वकः ॥ गृहीतमांसपिंडश्च वामेकरतलेन तथा ॥ एवं विधः पु
मान्कृत्वा गृहीतकुसुमांजलिः ॥ संपूज्य गंधपुष्पाद्यैर्नैवेद्यं च निवेदयेत् ॥ यजमानः प्रसन्नात्मा इमं मं
त्रमुदीरयेत् ॥ सर्वं कलयसे यस्मात्कालस्त्वं तेन चोच्यते ॥ ब्रह्मविष्णुशिवादीनां त्वमसाध्योसि सुव्र
त ॥ पूजितस्त्वं मया भक्त्या प्रार्थितश्च यथासुखम् ॥ यद्युज्यते भवविभो नस्कुरुष्व नमो नमः ॥ एवं सं
पूजयित्वा तं ब्राह्मणाय निवेदयेत् ॥ दक्षिणां भक्तितो दद्यात्प्रणिपत्य विसर्जयेत् ॥ अत्र दक्षिणा ॥ ज्ञे
यं निष्कशतं पार्थ्य दाने शुभविधिरुत्तमः ॥ मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृतः ॥ अशक्तस्यापि कृ

॥ दा·वि ॥
॥२५०॥

म्नोयंपंचमोवर्णितोविधिः ॥ अतोप्यल्पेनयोदद्यान्महादानंनरोत्तमः ॥ प्रतिग्रहकृतानिवानस्यदुःखशोक
भयावहमिमुक्ता ॥ अनेनविधिनायस्तुदानमेतत्प्रयच्छति ॥ नापमृत्युभयंतस्यनचव्याधिकृतंभवे
त् ॥ भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ॥ देहान्तेसूर्यभवनंभित्वायातिपरंपदम् ॥ प्राणप्र(
यादिशगत्वाराजाभवतिधार्मिकः ॥ माघ्यांचतुर्दश्यांचतुर्थ्यांभजायावादेशकालौसंकीर्त्यममाप
मृत्युव्याधिभयनाशाव्याहतैश्वर्यसूर्यभवनभेदपूर्वकपरमपदस्थितिपुत्ररजन्मांतरावछिन्न(
धार्मिकराजत्वभवनकामः कालपुरुषदानंकरिष्ये ॥ इतिसंकल्प्य ॥ गणेशंसंपूज्यब्राह्मणंवृ
त्वावासोभूषणादिभिः संपूज्यकालपुरुषंनाममंत्रेणसंपूज्यपुनः फलमुच्चार्येमंकालपुरुषंश्रे
णाधिकपरिमाणकृष्णतिलनिर्मितमूर्द्धखड्गकरंजपानिर्मितकुंडलरत्नांबरंशस्त्रमालंकृतिक
टिसोपानत्कपादकृष्णकंबलपार्श्वकंवामकरगृहीतमांसपिंडंतुभ्यंसंप्रददे ॥ ततः कृतस्यकाल

॥राम॥
॥२५०॥

पुरुषदानस्य प्रतिष्ठार्थं तूक्तनिष्कशतात्मनमां दक्षिणां दद्यादिति ॥ ॥अथ पापपुरुषदानम् स्कान्दे ॥
अज्ञानान् ज्ञानतो वापि यत्पापं कुरुते नरः ॥ पापपुरुषदानेन मुच्यते नात्र संशयः ॥ मन्वादिदिवसे प्रा
प्ते यदा सूर्यदिनं भवेत् ॥ तदास्य मूर्तिः कर्तव्या हैमी विप्राय तुष्टये ॥ अत्रार्थिकं मानमिति मदनरत्ना
दयः ॥ पलाधिकसहस्रपलावधिकमिति कल्पतरुः ॥ तुलापुरुषवत्कार्यं कुंडमंडपयोर्विधिः ॥ परं
होमः प्रकर्तव्यो गायत्र्या केवलं नृप ॥ तुलापुरुषवदित्यनेनैकाग्निपक्षः कृत्यश्चोक्तः ॥ गायत्र्येति
सूर्यस्य वदेवता ॥ अत्र होमबाधः केवलमित्यनेन ॥ संस्थाप्य पंचगव्येन ततः स्नात्वापि पूजयेत् ॥ पंच
विंशति संख्याभिः श्वेतपुष्पैर्नराधिप ॥ संस्थाप्येत्यस्य प्रतिमामित्यादिः ॥ स्नात्वेति अधिवासनोत्तरं स्ना
तरभिषिक्त इत्यर्थः ॥ ॐ पृथिव्यै नमः जलाय तेजसे वायवे आकाशाय श्रोत्राय त्वचे चक्षुषे
जिह्वायः घ्राणाय शब्दाय स्पर्शाय रूपाय रसाय गंधाय वाचे पाणिभ्याम् पादाभ्याम् पायवे

उपस्थापःमनसेःबुद्ध्यैः अहंकाराय आत्मने परमात्मने इति ॥ एवं संपूज्य राजेंद्र कर्पूरं दीपमाचरेत्
धूरसीतिच धूपं च अग्निर्ज्योतीति दीपकम् ॥ युवासुवासेति नूतनं वाससी परिधापयेत् ॥ ततो
ब्राह्मणमानीय वेदवेदांगपारगम् ॥ आचार्यं पूजयित्वेत्थं प इति केचित् ॥ प्रतिग्राहकोन्य आचा
र्यादिभ्यः पारितोषिकी दक्षिणोत्तमे ॥ प्रक्षाल्य चरणौ तस्य वस्त्रादि परिधापयेत् ॥ केयूरैः कटकै
श्चैव अंगुलीयकभूषणैः ॥ भूषयित्वा ततं तस्य तनौ मूर्तिं समानयेत् ॥ स्पृशेदित्यर्थः मंत्रेणानेन
राजेंद्र ततस्तस्मै निवेदयेत् ॥ एष आत्मा मया दत्तस्तुभ्यं हेममयो द्विज ॥ यत्किंचित् विहितं पूर्वं पापं
नाशय मेखिलम् ॥ ततस्तु ब्राह्मणो मंत्रमिमं राजन्समुच्चरेत् ॥ यदेतद्विहितं यापं त्वया पूर्वं मया
हितं ॥ गृहीतं मूर्तिरूपेण ज्ञानरूपं यापवर्जितः ॥ एवं कृते ततस्तस्मै दत्वा वा यथ दक्षिणां ॥ यथा
तुष्टिं समभ्येति ततः पापाज्जयत्यसौ ॥ एकजन्मकृतं पापं निजकायेन निर्मितम् ॥ शिवालयेन देवा

स्पसहस्त्रंगरोगानं हरेत्॥ अत्रैकजन्मकृतज्ञाताज्ञातसकलपापक्षयकामश्चेति संकल्पः॥ शेषं साध्यम्॥
श्रप्यात्मप्रकृतिपदानम्॥ भविष्ये॥ हैमीं प्रतिकृतिं रम्यां कारयित्वा ततो नृप॥ अभीष्टलोकसहितां सर्वोप
स्करसंयुताम्॥ अभीष्टलोकाः सुन्दरभार्यादिः॥ नेत्रपट्टपटीवस्त्रैर्भूषादिनां स्वामिभूषणैः॥ कुंकुमेनानु
लिप्तांगीं कर्पूरागरुवासिताम्॥ स्त्रीचेद्दानिशयने शायितां कारयेत्स्वयम्॥ यच्चान्यदिष्टतमं किंचित्तत्स
र्वं पार्श्वतोन्यसेत्॥ उपकारकरं स्त्रीणां पुरुषाणां च यद्भवेत्॥ तत्सर्वं स्थापयेत्पार्श्वे स्वयं संचिंत्य चेतसि
एतत्सर्वं स्थापयित्वा स्वे स्वे स्थाने नियोजयेत्॥ गुर्वीत्विजो होमादिकर्तृमात्राय येदित्यर्थः॥ पूजयित्वा
लोकपालान् ग्रहान्देवीं विनायकम्॥ रात्रौ होममत्र नि केचित्॥ तुलापुरुषवदित्यनुक्ते होमशान्त्यावीयदेशि
क्यां सत्यामपि नाधिवासनमित्यन्ये॥ ततः शुक्लाम्बरः स्नात्वा गृहीतकुसुमांजलिः॥ इममुच्चारयेन्मंत्रं विप्र
स्यपुरतः स्थितः॥ आत्मनः प्रतिमा चेयं सर्वोपकरणैर्युताम्॥ सर्वरत्नसमायुक्तां तुभ्यं विप्र निवेदिता॥

आत्माशांशुः शिवः शौरिः शाङ्कः शिवगणोऽर्जुनः ॥ तस्मादात्मप्रदानेन मम मत्वात्मापसीदतु ॥ इत्युच्चार्य ततो
दद्याद्ब्राह्मणाय युधिष्ठिर ॥ ब्राह्मणश्चाथ गृह्णाति को दादिति च कीर्तयेत् ॥ ततः प्रदक्षिणीकृत्य ब्रा
ह्मणं तं विसर्जयेत् ॥ सायं वर्षशतं भव्यं सर्वलोकैः सुरैर्वृतः ॥ अभीष्टफलदानेन सोऽभीष्टफलभाग्भवे
त् ॥ यत्रैवोत्पद्यते जंतुः प्राप्तकर्मक्षयः क्षणात् ॥ तत्रैव सर्वकामानां फलभोक्ता भवेन्नृपः ॥ इष्टबन्धु
जनैः सार्द्धं न वियोगः कथंचन ॥ शाश्वतीं तु रुचिं राजन्स्वर्गे चानन्त्यमश्नुते ॥ ॥ अथ कालचक्रदानम् ॥
मृत्युंजये ॥ ॥ चक्रं रूप्यमयं कृत्वा सुक्ष्मरश्मिमयात्मकम् ॥ कृत्वा मूर्द्धि शरत्वं च रश्मिमात्मन्नरस्थित
म् ॥ तमास्यनेकरूपाणि गात्रेषु च समंततः ॥ एवं ध्यानवतस्तस्य सर्वदुःकृत्स्नतां व्रजेत् ॥ ततोऽयनं तरं
पश्चात्स्थित्वा विषवः प्रदक्षिणाम् ॥ तं गृहीत्वा व्रजेदन्ते अदृष्टत्वमपि व्रजेत् ॥ स्वयं यथा मृतसंघातपूर्णका
यइति स्थितः ॥ इमं तेराजन्तं चंद्ररश्मिजालसमाकुलं ॥ अपमृत्युविनाशाय ददामीति समुच्चरेत् ॥ सुवर्ण

दक्षिणासुक्तं वा स्वर्णायनिवेदयेत् ॥ ततो गृह्योक्तविधिना स्थापयेज्ज्ञानवेदसं ॥ जुहुयात्कालतत्त्वानुशतम
ष्टोत्तरं तिलैः ॥ ततस्तु भोजयेद्भक्त्या विप्रान्वा दशसंख्यकान् ॥ स्वयमक्षारलवणां भुंजीत सह देवहि ॥ एवं कृ
तेन नरो नूनं चिरंजीवेन्न संशयः ॥ तथा कृतो व नश्येत अपमृत्युर्न संशयः ॥ मीमांसैकधुरंधरः श्रुतिधरो न्या
येपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः ॥ यद्विद्वन्मणिशेखरो दिनकरः श्रासूनवि
श्वेश्वरस्तेनाकारि समस्तदेवददतो दानेधियापद्धतिः ॥ शास्त्राण्यपारांस्वकृतिकुंचिकया गभीरमुद्घाटयन्दि
नकरः सुखबोधमेष ॥ विश्वेश्वरः सकलदैवतरूपदाने युक्तार्थया च ददतो विधिमाततीति ॥ ॥ हेमाद्रौ
स्कान्दे ॥ भाजनं यः प्रयच्छेत विप्रेभ्यो भाजनं शुभं ॥ स गंधर्वपदं प्राप्य उर्वश्या सह मोदते ॥ ताम्रं यो भाजनं
दद्यात्ब्राह्मणेभ्यो विशेषतः स भवेद्यक्षराजस्य प्रभुर्बलसमन्वितः ॥ ॥ क्षेमप्रकाशे ॥ प्रथमं तिलपात्रं
स्यादाज्यपात्रं द्वितीयकं ॥ लवणा च तृतीयं स्याच्चतुर्थं शर्करान्वितं ॥ पंचमं क्षीरपात्रं स्याद्दधिषष्ठमुदा

॥ दा॰वि ॥
॥ २४३ ॥

हतं ॥ सप्तमं गुडपात्रं च व्रीहिपात्रं ततः परं ॥ नवमं रसपात्रं च नवनीतमथापि वा ॥ एकादशं वारिपात्रं फल
पात्रमतः परं ॥ त्रयोदशं तैलपात्रं मधुपात्रमतः परं ॥ रत्नपात्रं ततः पात्रसंख्या या दशपंचमं ॥ वाराहे तु का
र्यास्य पात्रं षोडशमितं स्मृतं ॥ पात्रमानं मदनरत्ने ॥ उत्तमं पलषष्ठिश्च चत्वारिंशत्तु मध्यमं ॥ द्वाविंशदधमं प
त्रं तन्मात्रं चापसंस्मृतं ॥ अथो धातुपात्रं वाराहे॰ कृत्वा नाम यं पात्रं यथाविभवविस्तरं ॥ उमया सहितं
शंभुं हरिं सश्रीकमेव वा ॥ कृत्वा तु कांचनीं मूर्त्तिं संपूज्यावाहनादिभिः ॥ विप्रस्य वरणं कुर्याद्वस्त्रभूषा
नुलेपनैः ॥ ततः प्रतिष्ठयेत्पात्रं स्वैः स्वैर्मंत्रैश्च पूजयेत् ॥ पश्चाद्विप्राय दातव्यं स्वर्णकेन समन्वितं
प्रतिमां ब्राह्मणे दद्यात्पात्रं भूतेविपश्चितः ॥ एवं दत्वा तु राजासौ सप्तजन्मान्तरे भवेत् ॥ सुभगो दर्शनी
यश्च नारी वा पुरुषोपि वा ॥ आत्मानं सकलत्रं च ह्यानयेद्ब्रह्मणोंतिकं ॥ अत्र च षोडशपात्राणि एकदे
वसंस्थाप्य सर्वान्मंत्रान्पठित्वा ब्राह्मणेभ्यो दद्यात् ॥ शक्त्या द्वित्र्येकं वा पात्रं संस्थाप्य दद्यादिति वा॰

॥ राम ॥
॥ २४२ ॥

पात्राणिषोडशादायब्राह्मणायनिवेदयेत् ॥ षोडशस्यार्द्धमर्द्धंवादद्यादल्पफलोपिवेतिमदनरत्नेवाराहात्
सर्वपात्रेषु ॥ सकलपापक्षयपूर्वकात्मसकलवंशब्रह्मसमीपनयनोत्तरसप्तजन्मावच्छिन्नसुभगदर्शनीयत्व
जन्मभवनकामसकलपापक्षयपूर्वकविष्णुलोकप्राप्तिकामइतिवासंकल्पः ॥ सर्वपात्रेषुविष्णुर्देवतायथाश
क्तिसुवर्णंदक्षिणा ॥ यवायमस्तिलपात्रे आज्यपात्रेवह्निः लवणपात्रेसिंधुः शर्कराक्षीरपात्रेषुचंद्रःगुडपात्रे
ऽग्निः व्रीहिपात्रेप्रजापतिः रसपात्रेग्निः जलपात्रेईशोवरुणोवा फलपात्रेब्रह्मा नेतपात्रेपर्जन्यः मधुपात्रे
वनस्पतिः रत्नपात्रेसमुद्रः अथक्रमेणमंत्राः देवदेवजगन्नाथवांछितार्थफलप्रद ॥ तिलपात्रप्रदानेन
शांतिर्भवतुमेसदा ॥ आज्यंतेजःसमुद्दिष्टमाज्यंपापहरंस्मृतं ॥ आज्यंदेवानामाहारआज्येदेवाःप्रतिष्ठिताः ल
वणोवैरसाःसर्वेलवणोसर्वदेवताः तदधीनानिचान्नानिरसःस्वादुयुतःसदा ॥ तस्माल्लवणदानेनसमृद्धिर्मे
स्तुसर्वदा ॥ देहस्थपापनाशायशर्करापुष्टिदास्मृता ॥ तस्मादस्याःप्रदानेनममसंतुमनोरथाः ॥ क्षीरादमृत

संभूतिः क्षीराज्जातः कलानिधिः ॥ क्षीराब्धी रोदकी कीर्तिः क्षीरे विश्वस्य संभवः ॥ क्षीरपात्रप्रदानेन मम संतु मनो-
रथाः ॥ पवित्रं मंगलं चैव कुंदेंदुधवलं दधि सर्वमंगलदं यस्मात्ततः शांतिं प्रयच्छ मे ॥ स हेमक्षीरमाध्वीकं
सर्वपुष्परसैर्युतं ॥ सौभाग्यदं भवास्माकं यतः शांतिं प्रयच्छ मे ॥ रत्नानि सर्वदेवानां भूषणानि स्त्रियामपि
रत्नपात्रप्रदानेन समृद्धिर्मेस्तु सर्वदा ॥ अथ तिलताम्रपात्रदानं विस्तुः ॥ ताम्रपात्रे तिलान्कृत्वा पलषोड-
शकल्पितैः सहिरण्यं स्वशक्त्या च विप्राय प्रतिपादयेत् ॥ नाशयेत् त्रिविधं पापं वाङ्मनःकायसंभवं ॥ अथ
तिलकांस्यपात्रं ॥ पुष्पकांस्यस्य पात्रस्य प्रमाणं पंचविंशति ॥ पलानामत्र निर्दिष्टं तिलानां प्रस्थसप्तकं ॥
गोमयेनाथ संलिप्य गृहमध्ये च सर्वतः लिखेत्पद्मं द्वादशारं कुंकुमेनाथ चंदनैः ॥ ततो वह्निं स्थापयित्वा होमं
कुर्याद्यवैस्तिलैः ॥ तत्र पात्रं प्रतिष्ठाप्य पूजयेद्भक्तिसंयुतः ॥ गंधचंदनपुष्पादिधूपदीपैश्च शोभितं ॥ पात्रे
प्रक्षाल्य विधिवत्स्नातः श्रद्धासमाचरेत् ॥ तत्र संपूजयेद्विप्रं पुष्पधूपविलेपनैः ॥ वस्त्राणि परिधाप्याथ सो-

सुभगानि मृदूनि च ॥ जीवन्तीं भूषयेद्वस्त्रै र्भोज्यैरपि विभूषणैः अमावास्या यथा दत्ता पितृणां च मया पुरा ॥
तथा माघी मया दत्ता मातृणां नात्र संशयः ॥ दत्तं जन्मदुग्धं तस्यास्तं विधिवत्तर्पणाकृतं ॥ तद्दक्षस्य फलं सर्वं जाय
ते मुक्तिरेव च ॥ विप्रं संपूज्य पित्ना वन्तन्या त्वं तस्य दापयेत् ॥ प्रणाम्य विधिवद्भक्त्या मंत्रमेनमुदीरयेत् ॥ कां
स्यपात्रं मया दत्तं मातुरानृण्यकांक्षया ॥ भगवन्वचनात्तुभ्यं यथा मुक्तिस्तथा वद ॥ दशमासाश्च उदरे जनन्या
संस्थितस्य मे ॥ क्लेशिता बालभावेन स्तनपानै र्द्विजोत्तम ॥ मलमूत्रादिसंलेपलिप्ता पच्चकृता मया ॥ भव
तो वचनादस्या मम मुक्तिर्भवेद्ध्रुवात् ॥ कांस्यपात्रं सुवर्णं च तिलाव स्त्रादिदक्षिणां ॥ समधान्यं मया दत्तं
मम मुक्तिर्भवेद्ध्रुवात् ॥ कांस्यपात्रप्रदानेन तत्त्वज्ञानशरीरकं ॥ तथा हेमप्रदानेन परमात्मानमव्ययम्
श्राद्धादनं तु ब्रह्मांडे ग्रस्य मे नत्स्नानानं ॥ विशाखादनदानेन परमात्मा सपूजितः ॥ तिलसंख्याकृतं दुः
खं जनन्या मम मे वितं ॥ तिलदानप्रभावेन कृतेमुक्तो भवाम्यहं ॥ एवमुक्त्वा ततः पात्रं प्रदद्याद्ब्राह्मणाय वै.

बाह्मणेननतोवाच्यंजननीसंभवाद्दशात् ॥ गुप्तस्वंपात्रदानेनमहेश्वरवचोयथा ॥ दत्वाविप्रस्यपात्रंतुक्षेमं
कुर्यात्स्वयत्नतः ॥ सोपस्करंसनावृतंक्षमाप्यनुविसर्जयेत् ॥ अन्येषामपिविप्राणांभोजनादिप्रदापयेत्॰
अथभांडदानं ॥ नानिचस्वर्णरजतताम्रकांस्यलोहदारुवंशमृण्मयानि ॥ हेमाद्रौलैंगे ॥ स्वर्णरौप्यमयंभा
रदेवनार्थेददातियः ॥ कुबेरलोकमासाद्यमोदतेवरुवत्सरान् ॥ ताम्रायसानांभांडानांदानंयक्षाधिपोभ
वेत् ॥ हरिभक्तिविलासे॰ दिव्यशोभोपयोग्यानिशिल्पभांडानियोनरः ॥ दद्याद्वावाघभांडानिगरोद्दात्वम
वाप्नुयात् ॥ वारिधानीनथादत्वावारुणंलोकमश्नुते ॥ कमंडलुप्रदानेनयज्ञस्यफलमाप्नुयात् ॥ माल्याधा
रंतथादत्वाधूपाधारंतथैवतु ॥ गंधाधारंतथायात्रकामानांयात्रांतांव्रजेत् ॥ समृद्धज्ञानिपात्राणिदत्वावैने
जसानिच ॥ पात्रंभवतिकामानांविद्यानांचधनस्यच ॥ मंत्राउक्ताः ॥ अथस्थालीदानं॰ भविष्योनरे ॥ कृत्वा
ताम्रमयींस्थालींपलानांपंचभिःशतैः ॥ अशक्तस्तुतदर्द्धेनतदर्थार्धेनवापुनः सर्वशक्तिविहीनस्तुमृन्मयीं

मपिकारयेत् ॥ सुगंभीरोदरहरीं हस्तदंडकउष्ठकां ॥ कउष्ठकोदर्वी ॥ मृडुनं डलनिष्पन्नष्ठत्रक्षीरेणापूरितां·पा
यसपूर्णामित्यर्थः ॥ उपदंशोदकयुतां घृतपात्रसमन्वितां· स्थाप्य मंडलकं वस्त्रैः पुष्पधूपैरथार्चयेत् ॥ आदि
त्यवारे संक्रांतौ चतुर्दश्यष्टमीषु च· एकादश्यां तृतीयायां विप्राय प्रतिपादयेत् ॥ मंत्रः ॥ ज्वलनेसनिपार्श्वस्थे सं
डुलैः सजलैरपि· ननावप्नोऽज्यसंमिश्रैर्भूतानां पिठरीं विना ॥ त्वं सिद्धिः सिद्धिकामानां त्वं पुष्टिः पुष्टिमिच्छतां·
अनस्त्वां प्रणतो याचे सम्पंऊरु वचो ममः ॥ ज्ञातिबंधुसुहृद्वर्गविप्रेषु स्वजने तथा ॥ अभुक्तवत्सु नाश्नीयां न
था भव वरप्रद· ॥ इत्युच्चार्य प्रदातव्या हंडिका द्विजपुंगवे ॥ स्थालीं विशालवदनां सकउष्ठकां च यष्ठकं निर्यमं
धुरश्चल्ववतीं द्विजेभ्यः ॥ तेषां सुहृत्स्वजनविप्रजने न भोज्यं संभुज्यमानमपि कृष्णमनत्पाविनाश· ॥ अथपाक
दानं· भविष्योत्तरे· ॥ आपाकाख्यं महादानं कथयामि युधिष्ठिर· यत्कृतारावलंडखांकं भकारं च पूजयेत्· ॥
वासोभिर्भूषणैश्चैव पुष्पैश्चागरुचंदनैः ॥ ब्रूयात्तथेदं सामात्यं यथा तुष्टोभिजायते ॥ त्वं मे भांडनिविचारीणा

गुरुणावलघुनिच॰मणिकादीनिभूषणाणिस्थाल्यश्चसुमनोहराः॥घटकान्करकांश्चैवप्रणीताःकुंडलानिच॰
शरावादीनिपात्राणिभांडान्युच्चावचानिच॥एवमन्यच्चयत्किंचिदुपभोग्यंभवेद्गृहे॥संपादयमहाभाग
विश्वकर्मान्त्वमेवहि॥भोगैर्वोपिप्रयत्नेनभांडैर्घैरन्वितंशुभं॥आयाकंकल्पयेद्देवंविधिदृष्टेनकर्मणा॰
सहस्रमेकंभांडानांस्थापयित्वाविचक्षणः संध्याकालेमथित्वानुदत्वाचापिडनाशनं॥रात्रौजागरणंकुर्या
गीनमंगलनिःस्वनैः॥ननःप्रभातेविमलेज्ञात्वानिर्वापितंशनैः॥रक्तवस्त्रैःसमाछाद्यपुष्पमालाभिरर्च
येत्॰॥यजमानस्ततःस्नात्वाशुक्लांवरधरःशुचिः॥हेमरौप्यानिभांडानिताम्रतोहमयानिच॰पवित्रःस्था
पयित्वाचस्वर्णान्यानानिषोडश॰॥तानिचत्वारिचत्वारिस्मसेपूर्वादिदिक्क्रमात्॥पूजयित्वाप्रयत्नेनकृत्वा
वापिप्रयत्नतः॥नार्यश्चाविधवास्तत्रसमानीयप्रपूजयेत्॥प्रदक्षिणांततःकृत्वामंत्रमेनमुदीरयेत्॰॥
आयाकब्रह्मरूपोसिभांडानीमानिजंतवः॥प्रजानांतेप्रजापुष्टिःस्वर्गश्चास्तुममाक्षयः॥भांडानियानिया

न्यत्रकल्पितानिमयाकितः भुक्त्वासन्त्वानुरूपाणिउयतिष्वंगुनानिच ॥ योस्त्रार्थीयेनभांडेनतत्तस्यप्रतिपादयेत्
स्वेछयासैवसुस्कल्पंतुननिवार्यस्तुकश्चन ॥ अनेनविधिनायस्तुदानमेतत्प्रयच्छति ॥ विश्वकर्माभवेत्तुस्कलस्य
जन्मत्रयंनृपः ॥ नारीदत्वाचसौभाग्यमतुलंप्रतिपद्यते । गृहंसर्वगुणोपेतंभृत्यमित्रजनैर्वृतं ॥ अवियोगंस
दाभर्त्रारूपंचानुत्तमंलभेत् ॥ सौभाग्यावैधव्यसर्वगुणोपेतंगृहप्राप्तिपुत्रपौत्रादिसंततिस्वाम्ययोगप्स
दासुखकामोहमिममायाकंनानाभांडरचितंवैष्णवंनानाजनेभ्यउत्सृजामीतिसंकल्पः ॥ ॥ मीमांसेक
धुरंधरःश्रुतिधरोन्यायेपिवागीश्वरःसाहित्यामृतसागरःसुजननाथवल्लीरसालद्रुमः ॥ यंविद्वन्मणिशेखर
रोदिनकरःप्रासूतविश्वेश्वरंतेनाकारिसमस्तपात्रदत्तौसन्दीनयेपप्रतिः ॥ अथमेष्यादिदानं । भविष्योत्त
रे । भृगुपार्थपरंदानंसर्वकिल्विषनाशनं ॥ सुवर्णरोमांसौवर्णपत्यक्षांवासुशोभनां । सुवर्णतिलकोपेतां
सर्वालंकारभूषितां । दिव्यपुष्पोपहारांश्चसर्वधान्यरसैर्युतां ॥ सप्तधान्यसमायुक्तांफलपुष्पवतींतथा । श्रा

॥ धा॰वि ॥
॥२४७॥

तेनकारयेत्तांतुसुवर्णस्यप्रयत्नतः॥ यथाशक्त्याथवाकुर्याद्वित्तशाठ्यंनकारयेत्॥ दुःस्वप्नदर्शनेचैवजन्मर्क्षेतिथि
संक्षये॰॥ यदावाजायतेवित्तंचित्तंश्रद्धासमन्वितः॥ तत्रसंस्थाप्यदेवेशमुमयासहशंकरं॰ ब्रह्माणंसहगायत्र्या
सश्रीकंश्रीधरंतथा॰ रत्यासहतथानंगंलोकपालान्ग्रहांस्तथा॰॥ उमाशंकरस्वरूपमाहविश्वकर्मा॰॥ चर्मधारी
चतुर्बाहुःशूलखट्वांगपाशभृत्॥ वृषांकःशंकरोगौरीवामोत्संगेस्थिताभवेत्॥ ब्रह्मगायत्रीलक्ष्मीनाराय(
रारतिकाममूर्त्तयोब्रह्माण्डहेमहस्तिरथकल्पवृक्षदानेप्रोक्ताः॥ तांतुपूज्यविधानेनगंधपुष्पनिवेदनैः॥ अ
लंकृत्यद्विजंशांतंवासोभिःपरिपूज्यच॥ तल्लिंगमंत्रैर्होमंचतिलाज्यंज्वलितेनले॥ ब्रह्मगायत्रीलक्ष्मीना
रायणारतिकामदेवप्रकाशकैरित्यर्थः॥ तेचब्रह्मजज्ञानं॰गायत्री॰सुज्ञमिव॰इदंविष्णुः॰रतिकामयोर्नाम(
मंत्रौ॥ ग्रहलोकपालानांप्रसिद्धाः॥ ततस्तांतिलकुंभस्थांलवणासनसंस्थितां॰॥ पूजयित्वाविधानेनमंत्रमे
तमुदीरयेत्॥ रोमंत्वंध्यासमज्ञाघैःसर्वोपकरणैःसदा॰जगतःसंप्रहृतासित्वामतःप्रार्थयेशिवं॰॥ वा

॥ राम ॥
॥ २४७॥

क्षमः कायजनितं यत्किंचिन्मम दुःकृतं ॥ तत्सर्वं विलयं यातु तव दानादुपसंचितं ॥ एवं कृत्वार्थिनां दयात्वास्वगा
यकं दुर्विने नाभिभाषेन्न तो दत्वा तन्मुखं नावलोकयेत् ॥ दक्षिणां च सुवर्णादिः अश्वत्तो लभते पुत्रं धनो लभ
ते धनं ॥ दत्वा दानं भुवं मां कांतिं विपुलां च तथा श्रियं ॥ य इमं शृणुयान्नित्यं दानकांडमनुत्तमं ॥ अहोरात्रकृता
त्पापान्मुच्यते नात्र संशयः ॥ अथ मेषदानं भारते ॥ अजाविकं च महिषं दत्वा विप्राय शक्तितः घृतक्षीरवस्
न घोयत्र तत्र समोदते ॥ मंत्रस्तु । यस्मात्त्वं छाग यज्ञानामादुतित्वे व्यवस्थितः ॥ यानं विभावसोर्नित्यमतः
शांतिं प्रयच्छमे ॥ मेषस्य बौधायनः अग्नेर्मीध्यं भवेत्तस्य यस्यैवाग्नि विनाशकः ॥ वक्ष्येत्तस्य पत्नीकारं यत्
थोक्तं वह्निना पुरा ॥ पलार्द्धेन तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ राजतं कारयेन्मेषमग्नेर्वाहनमुत्तमं ॥ सो वर
र्णाश्च खुराः कार्याः श्वेतवस्त्रेण वेष्टयेत् ॥ तंडुलोपरि संस्थाप्य पुनः सं पूजयेत्सुधीः ॥ तंडुलानां पुमाणं
तु द्रोणाद्वयमुदाहृतं ॥ आग्नेयां दिशि होमस्य समिदाज्यतिलैरपि ॥ अग्निमूर्द्धेति मंत्रेण समिद्धोमः प्र

शासने॥ पूर्णाहुत्यंतं कृत्वा· आपोहिष्ठेति ऋचा· हिरण्येति च ऋचा· पावमानानुवाकेन रोगिणं मार्जयेत्॥ ततोद्या
त्॥ अथ प्रार्थना· देवानां यो मुखं हव्यवाहनं सर्वदेवताः तस्य त्वं वाहनं पूज्यं देवैः सेंद्रैर्महर्षिभिः॥ अग्निमांघं पूर्वकर्म
विपाकोत्थं तु यन्मम॥ तत्सर्वं नाशय क्षिप्रं जठराग्निं विवर्द्धय॥ अग्निमांघहरमेव स्यात्· अथाजादानं तु मंत्रः॥ प्र
जापतिस्तपस्त्वा अजा ब्रह्मा घ यत्नतः यज्ञार्थं तत्तु तं कल्पपशुं यज्ञसमुद्भवा विनापकम्प· अयने विषुवे चैव युगा
दौ ग्रहणे तथा च· अमावास्यामजादानं पौर्णमास्यां च शासने॥ विधिं तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितं॥ सर्व
रत्नोपसंपन्नां सप्तधान्योपरिस्थितां॥ वस्त्रमाल्योपमाल्यैस्तु भूषितां पशुजानकीं॥ वज्रनेत्रां हेमशृंगीं ताम्रपृष्ठां
सदोहनां॥ समुतां रौप्यपादां च कक्षोदपानितोदकं॥ गोदानवत्सगुंजीन मंत्रेणानेन संयतः॥ मंत्रा वासे अजे(
भक्षो सर्वसंपत्करे शुभे॥ स्पृष्ट्वा त्वं हरमे पापं जन्मांतरशतैः कृतं॥ एवं समुच्चरेत् कन्या द्विजहस्ते जलं क्षिपे
त्॥ प्रीयतां यज्ञनाथाय वासुदेवाय वै नमः॥ एवं प्रदक्षिणी कृत्य सूर्यं समवलोकयेत्॥ ततश्च गच्छेत्स्वगृहं ह

रिंसंस्मृत्यमानवः ॥ यद्बालत्वेकृतंपापंकामतोवाप्यकामतः यौवनेवार्द्धकोन्मादेहसंगेनापिपातकं ॥ अजादानस्यमा
हात्म्याद्विःपापोजायतेनरः ॥ विष्णुधर्म्मेनु ॥ तस्मादजांप्रयच्छत्वंततःसर्वमवाप्स्यसि ॥ मंत्रेणानेनविधिवद्दत्तंकृ
त्यस्वशक्तितः ॥ त्वंपूर्वंब्रह्मणासृष्टायविष्ठंभवतीपरं ॥ त्वन्मस्मृतोस्थितायज्ञास्तस्माच्छांतिकरीभव ॥ ख्यातिस्मृती
ननांचैवपृष्ठदेशेद्विजोत्तमः ॥ एवंप्रदायविप्रायसर्वपापैःप्रमुच्यते ॥ अश्वमेधफलंप्राप्यमोदतेवैष्णवेपुरे ॥ अ
थाजदानंभारते ॥ अजादानंमुक्त्वानमेवलोकमाप्नोतिदत्वाजंविधिवन्नरः ॥ तंवह्निलोकंविधिवद्दिव्यज्ञादाने
निकर्त्तव्यनातिदेशाः ॥ अथमहिषीदानंभविष्योत्तरे ॥ महिषीदानमाहात्म्यंकथयामियुधिष्ठिर ॥ पुराणेपवित्र
मायुष्यंसर्वकामसमृद्धिदं ॥ चंद्रसूर्यग्रहेपुण्येकार्त्तिक्यामयनेतथा ॥ शुक्लपक्षेचतुर्द्दश्यांसूर्यसंक्रांतिवास
रे ॥ यदावाजायतेवित्तंचित्तंचकुरुनंदन । नदेवदेयामहिषीसंसारभयभीरुणा ॥ सुपयोधरासुजघनासुभ्रूः
गीःसुखुरातथा ॥ प्रथमप्रसूताननरुणासुशीलादोषवर्जिता ॥ सुवर्णशृंगतिलकाघंटाभरणभूषिता ॥ रक्तव

स्त्राह्मनारम्यानाम्रदोहनकान्विता॥ पिण्यापकपिष्टकोपेतां महिषरूपां च शक्तितः॥ सप्तधान्ययुतां दद्याद्ब्राह्मणायवे
दपारगे॥ मंत्रस्तु॥ इंद्रादिलोकपालानां या राज्यमहिषी शुभा॥ महिषीदानमाहात्म्यमस्तु मे सर्वकामदं॥ धर्म॰
राजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः महिषासुरस्य जननी या सास्तु वरदा मम॥ दद्यात्सदक्षिणां कृत्वा ब्राह्मणोत्तं
पयस्विनीं॥ प्रतिग्रहस्मृतस्तस्याः पृष्ठदेशे स्वयं शुवा॰॥ एवं दत्वा विधानेन ब्राह्मणाय गृहं नयेत्॰॥ क्षमापयेत्ततो
विप्रं तु संतुष्टो भवेत्ति च॥ अनेन विधिना दत्वा महिषीं द्विजपुंगव॰ सर्वान्कामानवाप्नोति इह लोके परत्र च॰॥ या
स्त्री ददाति महिषीं सा राजमहिषी भवेत्॥ महाराजः प्रमांश्च सा व्यासस्य वचनं यथा॥ यज्ञयाजी भवेद्विप्रः क्षत्रि
यो विजयी भवेत्॥ वैश्यस्तु धान्यवान्शूद्रः सर्वकामार्थसंयुतः॥ तस्मान्नरेणादातव्या महिषी विभवे सति॰ पुत्र
पौत्रप्रपौत्रार्थमात्मनः शुभमिच्छता॥ दद्याधेनुसमां राजन्महिषीं नारदोब्रवीत्॥ विंद्याधेनुसमां व्यासः सर्वदा
नोत्तमां कविः॥ महिषीदानमाहात्म्यं यः शृणोति सदा नरः॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ दुग्धाधि॰

कावमहिषींनवमेथवर्णांसंतुष्टनर्णकवनीजघनाभिरामां ॥ दत्वासुवर्णांतिलकांद्विजपुंगवायतोकद्वयंजय
तिनेनकिमत्रचित्रं ॥ अत्रसुवर्णांदक्षिणा॰मृत्युंजयमहिषीदानेतुसुवर्णांदशकं ॥ तद्विधिःपितृकृतकर्मविपा
कोघोनेसस्थः ॥ अथकृष्णाजिनदानं॰मात्स्ये ॥ कृष्णाजिनस्यदानस्यविधिंकालंचकीर्त्तय ॥ मत्स्यउवाच ॥ वै--
-॥ अथकृष्णाजिनदानं ॥ विष्णुः ॥ अथवैशाख्यांपौर्णमास्यांकृष्णमृगाजिनंसखुरंसशृंगंरौप्यखुरंमुक्तालांगू
लभूषितंकृत्वाविकेवस्त्रेप्रसारयेत् ॥ ततस्तिलैःप्रच्छादयेत् ॥ सुवर्णनाभंचकुर्यात्॰अहतेनवाससायुगेनप्रच्छा
दयेत् ॥ चतसृषुदिक्षुचत्वारितैजसानिपात्राणिक्षीरदधिमधुसर्पिःपूर्णानिनिधायाहिताग्नयेब्राह्मणायवा
ससुगप्रच्छादितायदद्यात्॰ ॥ वैशाख्यामित्युपलक्षणं ॥ कार्त्तिक्यांपौर्णमास्यांवैशाख्यांवाचंद्रसूर्यग्रहेविषुवत्यय
नयोर्व्यतिपातस्योक्तेः ॥ पौर्णमासितुयामाघेआषाढीकार्त्तिकीतथा ॥ उत्तरायणेद्वादशीवातस्यांदत्तंमहाफलमितिम
त्स्याच्च ॥ युगादेवाथयत्कंतिविधिनायेतुवैद्विजाः ॥ इतिकालिकापुराणाच्च ॥ द्वादश्यांचचतुर्दश्यांकृष्णायांतुविशेष

तद्दत्यानेयान्व· अत्र विशेषनत्रनुक्तेः भुक्तापि चतुर्दशीकाले॥ सशृंगमित्युपलक्षणं कृष्णमृगाजिनं॥ सखुरं सशृं
गमवर्णं मनोहरं हिरण्यशृंगं रूप्यखुरं मुक्तालांगूलभूषितं यन्नर्मांसं वहितो मषाग्नीव गोमयोपलिप्तायां भु
वि कुतपानास्तीर्य तस्मिन्नाविकं वस्त्रं प्रसार्ये तिष्ठलस्योक्तेः॥ तथा वकृष्णाजिनखुरषड्भुक्तसुवर्णशृंगादीनि
स्थाप्यानीति· अंतरितिउपरिलोमकमधस्ताद्विशनमित्यर्थः॥ रूप्यखुरमित्युपलक्षणं· कर्त्तव्यं रुक्मशृंगं
तु रूप्यदंतं तथैव च॥ हेममुक्ताविद्रुमं च दाडिमं वीजपूरकं॥ पद्मासनपत्रश्रवणे खुरे शृंगाटकानि च॥ एवं कृ
त्वामयोक्तेन सर्वशावाफलानि चेति मान्स्यात्॥ कुतपो नेपालकंबलः॥ वहुवचनान्तत्र कशाद्यनि हेमाद्रिः
ततस्तिलैरिति पूर्वं सुवर्णकृष्णाजिनमध्ये संस्थाप्य पश्चात्तिलाच्छादनमर्थात्॥ यद्यप्यत्र तिलयानं नोक्तं त
थापि तिलैरात्मसमं कृत्वा वाससाच्छादयेद्बुधः इति मान्स्यादुपविष्टात्मसमराशिकरणासमर्थत्वयार्थिक
परिमाणं वोध्यं· भविष्योत्तरे तु द्रोणमिनत्वमुक्तं॥ तैजसानीति पात्राणि स्थाप्यानीति शेषः॥ कांस्यमयानी

त्यर्थः ॥ कांस्यपात्राणि चत्वारि दिक्षु दद्याद्यथाक्रममिति मात्स्यात् ॥ पलस्य स्मनोनु चनसृष्टुदिक्षु चत्वारि पात्राणि
ताम्ररौप्यकांस्यसौवर्णानि यथाशक्ति नद्भवत्कं ॥ तत्र यथाशक्ति नद्भवत्केः ॥ पात्रचतुष्टये ताम्रमयत्वरौप्यम
यकांस्यमयत्वसुवर्णमयत्वनां विकल्प इति केचित् ॥ शक्तिनद्भवस्य यथाशक्ति यरिमाणानीत्यर्था क्रमेणा
पात्रचतुष्टयमित्यन्ये ॥ क्षीरेति क्षीरादिपूर्णानि मृन्मयानि स्थाप्यानीत्यर्थः ॥ सुवर्णनाभं तत्कुर्यादलंकुर्याद्वि
शेषतः ॥ रत्नैर्गंधैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ॥ कांस्यपात्राणि चत्वारि दिक्षु दद्याद्यथाक्रमं· मृन्मयेषु च
पात्रेषु पूर्वादिक्रमकेणतु ॥ क्षीरं दधि घृतं क्षौद्रमेवं दत्वा यथाविधिरिति मात्स्यात् ॥ अत्र सर्वरत्नैरित्यस्याल
करणोन्वितस्याप्याकांक्षायां कांस्यपात्रेष्वपि संबंधात्सर्वरत्नानां कांस्यपात्रेषु स्थापनं क्षीरादीनां मृन्मयेषु नि
धानमिति हेमाद्रिः ॥ तत्र सौवर्णं क्षीरपात्रं तु पूर्वस्यां दिशि दापयेत्· राजतं दधिपात्रं तु दक्षिणास्यां निधापये
त् ॥ ताम्रपात्रं घृतपूर्णं पश्चिमायां निधापयेत् ॥ कांस्यपात्रं क्षौद्रपूर्णमुत्तरेण निधापयेदिति विष्णुधर्मोत्तरे

धाउपेक्ष्यं॥ कल्पतरुस्तु उभयत्रापि क्षीरादिनिधानमित्याह॥ कांस्यपात्राणि केवलानि क्षीरादीनि तु मृन्मयेष्वेव(
ति कनिष्ठपितृव्याचरणाः॥ मात्स्ये विशेषो पणकृतः॥ पंचकस्य तथा शाखामत्र गांकुंभमेव च। वा शोयपस्थापनं कृत्वा
भुभचिन्तो निवेदयेत्॥ दानदेशाद्बहिश्चं पकशाखायुक्तं कुंभं स्थापयेदित्यर्थः॥ चतसृषु दिक्षु चतस्रो गृधीर्भि
दध्यादि निपुलस्त्यः॥ मात्स्ये तु धातुमयानि पात्राणि पादेष्वस्य निवेदयेत्॥ लोहताम्ररौप्यसुवर्णपात्रचतुष्ट
यं चतुर्भिर्मंत्रैः पादेषु स्थाप्यमित्यर्थः॥ मंत्राः प्रयोगे वक्ष्यन्ते॥ मृतस्मास्मृति विष्णुधर्मोत्तरयोर्हेमोपक्तः॥ प(
श्चिमे भागे सुसमिद्धमग्निं कृत्वा परिसमुह्य पर्युक्ष्य परिस्तीर्य प्रागग्रैर्दर्भैर्महाव्याहृतिभिस्तिलान् घृताक्ता
न्जुहुयात्॥ ऋद्रस्य नमस्कारेणाततआहिताग्नये ब्राह्मणाय सर्वांगैः परिपूर्णाय पाठसंयुक्ताय विदुषे व(
स्त्रयुगोपच्छन्नायालंकृताय दद्यात्॥ सर्वस्याविशिष्टं कृष्णाजिनं ददामीति नाभिं स्पृशन् दिनये कृष्णाजि
नं प्रतिगृह्णामीत्यसावपि गृह्णीयात्॥ विष्णुधर्मेतु॥ संपूज्य वस्त्रयुग्मेन अलंकारैश्च शोभनैः दिव्याः संप्रो(

क्षयगायत्र्यानिलमिश्रेणावारिणा ॥ कृष्णाजिनं द्विजश्रेष्ठ सशिरो गृष्ठिभिर्युतं । दद्यामि प्रतिगृह्णीष्व प्रीयतां ध
र्मराडिति ॥ नाभिं स्पृशन्निति पूर्वस्यापि न सुवर्णादेशं स्पृशन्नित्यर्थः ॥ अदिन यदि निप्रतिग्रहिताउक्तस्य श
स्त्रनियमकाले अदिनि यैर्थारिति मन्त्रं जपेदित्यर्थः ॥ प्रतिग्रहस्थनस्योक्तः उक्तदेशोमहीयन इति मात्स्यात् ॥ अ
दिनि यैर्थारिति जपेत्स्मरणावेनाभिनंदिनामिति विष्णुधर्मोक्तेः अत्र विष्णुधर्मोत्तरे गोभूहिरण्यसंयुक्तं मार्गमे
नदद्यानियदत्तुक्ते गोभूहिरण्यादीनां दक्षिणात्वमिति हेमाद्रिः ॥ गारुडेतु ॥ ज्ञात्वा निष्कसमोपेतं नदद्याद्यर्द्धमथापि
वा ॥ अतोन्यूनं न दातव्यमधिकं फलमूर्जितं ॥ उक्तमंत्रेणानेनैवमधमं तु न दर्शनः ॥ नदद्यैनकनिष्कं तु देयं कृष्णमृ
गाजिनं ॥ नविनाशाद्यं कुर्वीन फलहानेस्तु कारयेदित्युक्तं ॥ कालिकापुराणेतु ॥ पलं पलार्द्धमथार्द्धवाविनरेद्धेम
संयुतमित्युक्तं दानोत्तरं च स्वगृहान्प्रेष्यनं विप्रजनैः स्नानमथाचरेत् ॥ पूर्णांकुंभेन राज्ञेद्दशारवयाचं पकस्य
वे ॥ कृत्वा वायोजनत सिंचेन्मंत्रेणानेन मूर्द्धनि ॥ आप्यायस्व समुद्रज्येष्ठा ऋचो ज्ञेयास्तु षोडश ॥ अहन्नेवासंसी

वीतआवांतः शुचिर्नामियात्॥ जीर्णवस्त्रेणावीतेन सर्वांगाणि च मार्जयेत्॥ नवस्त्रं कुंभसहितं नीत्वा क्षेप्यं चतुष्प
थे इत्युक्तं॥ अत्र फलं॥ स सर्वपापकर्मापि सा सायुज्यं ब्रह्मणो व्रजेदित्युक्तं॥ मात्स्येतु॥ समग्रभूमिदानस्य फलं
प्राप्नोति मानवः॥ सर्वाश्वोकांश्चचरति कामचारी विहंगमः॥ आभूतसंप्लवं यावत्स्वर्गलोके महीयते॥ नपि
तृपुत्रमरणं वियोगं भार्यया सह॥ धनदेशपरित्यागं नचैवेह प्राप्नुयात्क्वचित्॥ त्रिंशत्कोट्यस्तु लक्षाणि अ
शीत्यभ्याधिकानि वा॥ सिंहासनोपविष्टस्तु श्वेतवस्त्रपरिच्छदं॥ वसते तत्र वै कालं यावदाभूतसंप्लवं॥ यदि
मानुष्यमायाति कदाचित्कालपर्यये॥ चतुर्वेदगृहे जन्मजायते महतां कुले॥ रूपवान्बलवांश्चैव दीर्घायुः
प्रियदर्शनः॥ वल्लभः सर्वनारीणां दाता भोक्ता तथैव चेत्युक्तं॥ ॥इति गागाभट्टकृतदानोद्योते कृष्णाजिन
दानविधिः॥ ॥अथ प्रयोगः॥ देशकालौ संकीर्त्य सर्वपापक्षयपूर्वकब्रह्मसायुज्यकामः समग्रभूदान(
समफलप्राप्ति सर्वलोकचरणकामचारित्व समग्रभूतसंप्लवावधिस्वर्गलोके महितत्वाशीत्यधिक

त्रिंशत्कोटिवर्षावच्छिन्नसिंहासनोपवेशनब्रह्मलोकमहितत्वोत्तरैहिकवेदचतुष्टयविद्विप्रकुलजन्मरूपबल
दीर्घायुष्ट्वसकलनारीप्रियत्वपूर्वकराजराजत्वभवनकामोवाहं स्माजिनदानं करिष्य इति संकल्प्य ॥ गणेशं
संपूज्याचार्यं वृणुयात् ॥ ततः आचार्यः स्वयंवा गोमयोपलिप्तचतुरस्रे कुशानास्तीर्य· तत्र कंबलं प्रागग्रं तदुप
रिकृष्णाजिनं सपुच्छं सखुरं सशृंगं सकर्णीयथालब्धंवा प्राग्ग्रीवमुत्तरलोमास्तीर्य· तत्र मध्ये यथाशक्ति हिर
ण्यं निधाय तदुपरि जैत्रामितानुयविस्तान्नसमराशीकरणयोग्यान्वा तिलान्निधाय· यथाशक्ति सुवर्णाश्च
गे शृंगयोरूप्यख— शृंगाटकानि चखुरेषु पलासपत्रद्वयं कर्णयोर्मुक्ताफलानि पुच्छे रूप्यं दंतदेशे संस्थाप्य
वासोद्वयेनाछाद्य रत्नैर्गंधादिभिर्भूषयेत् ॥ पूर्वादिदिक्षु चत्वारि कांस्यपात्राणि ताम्राणि रूप्याणि सौवर्णानि वा
एकैकं वानाम्ररूप्यकांस्यसुवर्णमयं स्थापयेत् ॥ यदा वैकैकं तत्र दक्षीरपूर्णं सौवर्णं पूर्वतः दधिपूर्णं राजतं
दक्षिणस्यां· ॥ घृतपूर्णं ताम्रं पश्चिमस्यां· मधुपूर्णं कांस्यमुत्तरस्यां· यद्वा तु सर्वाण्येकधातुमयानि तत्र दाम्न्यान्ये

॥दा॰वि॥
॥२५३॥

व॰मृण्मात्रचतुष्टयंचपूर्वादिक्रमेणक्षीरदधिघृतमधुपूर्णा॰संघःप्रस्नुतगोचतुष्टयंचस्थाप्यंततोयःपात्रंद्वयं॰
पापानियानिकाम्यानिमयालोभात्कृतानिवै॥लोहपात्रप्रदानेनप्रणश्यन्तिममाशुवै॥इतियःपश्चात्ततोन्न
रखुरेदक्षिणाखुरेमंत्राहन्यानिधेयं॥ततोग्रभागदक्षिणाखुरे॰परापवादमैथुन्यात्रष्टमांसस्यभक्षणात्
नत्रोत्थितंचमेपापंताम्रपात्रान्प्रणश्यतु॥इतिमधुपूर्णताम्रपात्रंसंस्थाप्योत्तरखुरेतिलपूर्णरजतपा
त्रंकन्यानृतंगवांचैवपरदारप्रधर्षणं॥रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमइतिस्थाप्यमध्येतिलव
स्त्रोपरिअक्षतपूर्णसुवर्णपात्रंजन्मजन्मसहस्रेषुकृतंपापंकुबुद्धिना॰सुवर्णपात्रप्रदानात्तन्नाशयाशुज
नार्दनेतिस्थापयेत्॰॥समन्ताच्चहैममुक्ताप्रवालदाडिमबीजपूरादिफलानिशाकांश्चस्थापयेत्॥ततः
कृष्णाजिनस्थापनदेशाद्बहिरुत्तरतश्चंपकशाखायुक्तंजलपूर्णकलशंस्थापयेत्॥ततःकृष्णाजिनंसं
पूज्यपश्चिमतःस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्याज्यभागांतेभूर्भुवःस्वर्महर्जनस्तपःसत्यंस्वाहेत्यष्टसह

॥राम॥
॥२५३॥

त्वमष्ठ्यानंवानुरूयात्·प्रजापतिर्देवता॥नमःस्वाहेतिभूप्रस्यमंत्रः ततआचार्यंवस्त्रद्वयेनालंकारादिभिःसंपूज्य·
पूर्वोक्तफलप्राप्त्यार्थेदंकृष्णाजिनंतिलद्रोणयुतंमध्यस्थितसुवर्णंसुवर्णशृंगंरूप्यखुरंमुक्ताभूषितलांगूलंरत्न
दंतंलोहिताम्रराजतपात्रचतुष्टयस्थितखुरंदिक्चतुष्टयस्थितशृषिचतुष्टयकांस्यपात्रंदिक्चतुष्टयस्थितक्षी
राद्दिपूर्णमृत्पात्रचतुष्टयभक्तानांगिरोदैवतंतुभ्यंसंप्रददइतितिलमध्यस्थितसुवर्णंहस्तेलापयित्वापात्रह
स्तेसंकल्पयेत्॥ ततःसर्वगुणविशिष्टंकृष्णाजिनंददामीतिपठेत्॥कृष्णाजिनंद्विजश्रेष्ठसशिरोशृषिभिर्यु
तं·ददामिप्रतिगृह्णीष्वप्रीयतांधर्मराडितिवाप्रतिगृहीतापुच्छेहस्तंलापयित्वा॥अदित्येकृष्णाजिनंप्रति
गृह्णामीत्युक्त्वाअदितिर्द्यौरितिमंत्रंपठेत्॥स्वस्तीत्युक्त्वादानस्तुतिंच॥ततःकृतस्यकृष्णाजिनदानस्यप्र
तिष्ठार्थमिदंसुवर्णमाग्नेयंदक्षिणांसंप्रददइत्युक्त्वापरिमाणांसुवर्णंदक्षिणांदद्यात्॥ततःस्नात्वाजीर्णं
पीनवस्त्रद्वयेनांगप्रक्षालनंकृत्वातद्वस्त्रद्वयंएकशाखासहितंकुंभंचचतुष्पथेक्षिपेत्·॥ततःकर्मेश्वरार्पणं

॥घ.वि॥ कुर्यात्॥ ॥इतिगागाभट्टकृतदिनकरोद्योते कृष्णाजिनदानप्रयोगः॥ ॥अग्निपुराणोक्त॥ संलिप्य गोमयेना
॥२५४॥ थचतुर्हस्तप्रमाणतः॥ वस्त्रं प्रसारयेद्भूमा वाजिनं तत्र विन्यसेत्॥ कृष्णैस्तिलैस्तु संछन्नं कृत्वा तत्रोपरि न्यसेत्
मधुसर्पिर्युतं पात्रं हैमं चोडुंबरं तथा॥ सुवर्णं प्रक्षिपेत्तत्र पलं वाथ स्वशक्तितः॥ संछादयेत्तु कुंभैर्वस्त्रैः पात्रं
यज्ञोपवीतिनं॥ कुंभांश्चाष्टौ तथा दिक्षु सवस्त्राः पात्रसंयुताः॥ संस्थाप्यावाहनं कृत्वा विधिवत्पूजयेत्केशवं॥
कृष्णाजिनं समभ्यर्च्य ब्राह्मणायोपपादयेत्॥ कृष्णोस्मि कर्मणा कृष्णः कृष्णाजिन मनस्तिलैः॥ कृष्णैर्युतं प्र
तीछस्व कृष्णः संप्रीयतामिति॥ एवं दत्वा द्विजेभ्यस्तु पश्चाद्दद्याच्च दक्षिणां॥ तिलाहारो भवेत्तत्र ब्राह्मणान्भो
जयेत्ततः॥ एवं कृष्णाजिनं दत्वा नरो विगतकल्मषः॥ पितामहान्समुद्धृत्य स्वर्गं याति न संशयः॥ सर्वपाप
क्षयपितृउद्धारणपूर्वकपित्रादियुतस्वर्गभोगोत्तरविष्णुपदप्राप्तिकाम इति संकल्पः॥ ॥अथार्द्धकृष्णा ॥राम॥
जिनदानं॥ भूमिं प्राक्प्रवणां शुभ्रां गोमयेनोपलेपयेत्॥ तस्यां हरितदर्भांस्तु घनानास्तीर्य यत्नतः॥ म ॥२५४॥

ध्येकृष्णाजिनंराजन्नार्द्रसर्वांगिकंदृढं॥आस्तीर्यश्टंगसहितंप्राग्ग्रीवंशिरसासह॥केनिनंब्राह्मणांपूर्वंयाचन्त
क्षणालक्षितं॥केनिनमिनिमंत्रितमित्यर्थः॥प्रक्षाल्ययादेनसैवदद्यात्कृष्णेतुवाससी॥सौवर्णेकुंडलेदेये
कंठाभरणमेवच॥सौवर्णेकंकणेदेयेहस्ताभरणमेवच॥स्रग्दामभिस्तुसंपूज्यश्टंगयोर्मध्यदेशतः॥ब्रा
ह्मणंब्राह्मणास्थाप्यमृगंसौवर्णश्टंगिकं॥तिलैराच्छादयेत्कृष्णैर्बालानांशिरसासह॥यदाशिरोब्राह्मणा
स्यमग्नंभवतिभूभुज॥नयेद्वैमूलमंत्रेणगायत्रीवासमाहितः॥यापंसंचिंत्यचित्येनरुन्ननंब्राह्मणास्यतु
नाभिमात्रंसमुत्कृत्यतिलैःसंछादयेत्पुनः॥संछादितेपुनर्विप्रजपेन्मंत्रंचपूर्ववत्॥पुनरुत्कृत्यविप्रंतु
नाभिंयावत्तुपार्थिव॥पुनःसंछादयेन्नस्सशिरःकृष्णतिलैस्तथा॥त्रिःकृत्वस्तुनिमज्जेवंदानादस्यान्कृ
गाजिनं॥पात्रंमनसिसंपूज्यनोयमस्तुविनिक्षिपेत्॥पीयतांविश्वकर्मातुविश्वात्माविश्वरूपधृक्
एवंकृष्णाजिनंदत्वाब्रह्महत्यांव्यपोहति॥पापिष्ठःपरमंस्थानंयातियत्रनशोचति॥इतितेगद्यमाख्या

नं दानं सर्वाघनाशनं॥ अंडिनेनत्रुकच्छायब्राह्मणो यानि मे सनि॥ सहस्रं दक्षिणां दद्यात्त्रियतं ब्राह्मणाय
तु॥ अथ प्रयोगः॥ देशकालौ संकीर्त्य ब्रह्महत्यापापक्षयपूर्वकाशीवनीयस्थानप्राप्तिकाम आर्द्रकृष्णाजि
नदानं करिष्य इति संकल्प्य वरुवा रथश्चक्रतनप्रतियरुनिश्चयं पात्रं हत्वा कृष्णवस्त्रं दयकुंडलकं गम द
णाकं करणांगु-गंधमाल्यैः संपूज्य॥ गोमयेनोपलिप्तभूमौ हरितदर्भेष्वार्द्रकृष्णाजिनमास्तीर्य स्वर्णशृं
गादीनि निधनिधाय तत्कृष्णाजिनमध्ये प्राङ्मुखं ब्राह्मणमुपवेश्य न उपरि तिलान्दद्यात्॥ यथा ब्राह्मणास्तिल
मध्ये निमज्जति -- ब्राह्मणोऽष्टशतं तिलो सिसो मे देवत्य इति वा मंत्रं जपेत्॥ ब्रह्महत्यां मनसि विभाव्य
नाभिपर्यन्तं विप्रमकृष्णपञ्चरत्नैस्तिलैः पूरयेत्॥ एवं विधिः कृत्वा पूर्ववत्फलमुच्चार्य इदमार्द्रकृष्णाजिनं सु
वर्णशृंगादियुतं तुभ्यं संप्रददे॥ प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृगिति पठित्वा॥ सहस्रसुव ॥ राम ॥
र्णं दक्षिणां संकल्पयेत् अन्यत्पूर्ववत्॥ ॥ इति गागाभट्टप्रणीतदानदिनकरोद्योते आर्द्रकृष्णाजिन ॥ २५५ ॥

दानप्रयोगः ॥ ॥भूगदानं कर्मविपाकसारे स्पष्टं ॥ अथ दशदानानि ॥ गोभूतिलहिरण्याज्यवासोधान्यंगुडानि च ॥
रौप्यं लवणमित्याहुर्दशदानानि पंडिताः ॥ एतन्मेरिमाणं धर्मप्रवृत्ता ब्रुवन्ते ॥ गोमूल्यं सवर्णरूप्ययोर्निष्कं न दर्श
न दर्शं वा ॥ भूमानं गोचर्म दशहस्तापंचहस्तावा सुवर्णनिष्को दक्षिणा ॥ तिलाद्रोणमिताः न दर्शं न दर्शं वा ·
षोडशपलमितं तिलयात्रं वा ॥ माषचतुष्टमितं सुवर्णं दक्षिणा ॥ हिरण्यमेकसालकसावन्येव दक्षिणा
आज्यमानं षष्टिचत्वारिंशत् वा दशवा पलानि ॥ हेममाषो दक्षिणा ॥ वासांसि द्वीणि ॥ धान्यं पंचद्रोणास्स
दर्शं न दर्शं वा ॥ शक्त्या दक्षिणा लवणं षष्टिचत्वारिंशत् वा दशवा पलानि ॥ गुडश्चैतन्न्या द्विगुणः हेममाषचयं
दक्षिणा ॥ रूप्यं तोलकचतुष्टयं न दर्शं न दर्शं वा ॥ चतुर्थांशो दक्षिणा ॥ ॥ अथ दानाष्टकं ॥ तानि चनिनालो
हं हिरण्यं च कार्पासं लवणं तथा ॥ सप्तधान्यं मही गावः प्रत्येकं पावनं स्मृतं ॥ एतन्मानं दिवोसी येप्रकारेच
येन ॥ तिलादशद्रोणमिता लवणं द्रोणपंचकं ॥ सार्द्धसप्तदशद्रोणांसप्तधान्यमुदाहृतं ॥ गोचर्ममात्रा प्र

॥ शा॰वि ॥
॥ २५६ ॥

थिवीनिस्तोगावः सवत्सकाः ॥ देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत् ॥ तदभावे दशांशं तु यथाशक्त्याथ
वा भवेत् ॥ भूमिरश्वो यथाशक्ति तिलाद्रोणद्वयं तथा ॥ गौः सुशीला च दोग्ध्री च कुंभैराज्यं च पंचभिः ॥ पल
मेकं तु रूप्यस्य सुवर्णस्य सुवर्णकं ॥ दशवस्त्रं मेरुदानं दानद्रव्यं तु विचक्षणाः ॥ अथ मंत्राः ॥ गवामंगेषु
तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥ गौः सर्वभूताश्रया भूमिर्वराहेण
समुद्धृता ॥ अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे ॥ भूमेः ॥ महर्षेर्गोत्रसंभूताः काश्यपस्य तिलाः स्मृताः ॥
तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥ तिलानां ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्य
फलदमतः शांतिं प्रयच्छ मे ॥ सुवर्णस्य ॥ कामधेनुषु संभूतं सर्वक्रतुषु संस्थितं ॥ देवानामाज्यमाहारम
तः शांतिं प्रयच्छ मे ॥ आज्यस्य ॥ शरणं सर्वलोकानां लज्जाया रक्षणं परं ॥ सुवेषधारि वस्त्र त्वमतः शांतिं प्र
यच्छ मे ॥ वाससः ॥ सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥ प्राणिनां जीवनोपायमतः शांतिं प्रयच्छ मे ॥

॥ राम ॥
॥ २५६ ॥

धान्यस्य ॥ यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ प्रणवः ॥ सर्वमंत्रा
णां नारीणां पार्वती यथा ॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा ॥ गु
डस्य ॥ प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा ॥ शिवनेत्रोद्भवं रूप्यमतः शांतिं प्रयच्छ मे ॥ रजतस्य ॥ य
स्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ शंभोः प्रीतिकरं नित्यमतः शांतिं प्रयच्छ मे ॥ लवणस्य ॥ इमानि दश
दानानि प्रायश्चित्तानंतरं सर्वेभ्य एव देयानीति जगद्गुरुनारायणपंडिताचरणाः ॥ वस्तुतस्त्वेषामंगत्वाभा
वादनेभ्योपीत्युक्तं ॥ इमानि च प्रायश्चित्तानंतरमन्यस्मिन्काले दानमानि ॥ आवारस्तु प्रायश्चित्तोत्तरमे
वेति ॥ ॥ इति गागाभट्टपूरिते दानदिनकरोद्योते मेध्यादिदानप्रयोगः ॥ ॥ नक्षत्रयुक्ततिथिवारभयो
गकल्पसंक्रांतिमासकरणोद्युगादिकाले ॥ संवत्सरेषु सकलेष्वपि दानवाक्यान्यालोच्य देनकरेण तनुते
प्रयोगः ॥ तत्रादौ तिथिदानानि ॥ प्रतिपद्यप्यपष्ठ्याराणां द्वितीयायां घृतस्य च ॥ उपानहस्तृतीयायां चतुर्थ्यां मोद

कान्तुनः॥ पंचम्यां तु फलानां वैषख्यां स्नानस्य मानदः॥ सप्तम्यां चाप्यपूपानां मष्टम्यां च गुडस्य च॥ कुल्माषस्यन
वम्यां तु दशम्यां भोजनस्य च॥ एकादश्यां सुवर्णस्य द्वादश्यां वसनस्य च॥ त्रयोदश्यां तु गंधानां शिनयास्नद
नं नरं॥ दानं च परमान्नस्य पंचदश्यां महाफलं॥ माधवीये भविष्योत्तरे॥ प्रतिपत्सु द्विजान्पूज्य पूजयित्वा प्र
जापतिं॥ सौवर्णमरविंदं च कारयित्वा ष्टयत्रकं॥ कृत्वा त्वौडंवरे पात्रे सुगंधिघृतपूरिते॥ पुष्पैर्धूपैः पूजयि
त्वा विप्राय प्रतिपादयेत्॥ अथ नक्षत्रयुक्तपौर्णमासीदानानि॥ हेमाद्रौ विष्णुस्मृतौ॥ मार्गशीर्षं पंचदश्यां
शुक्लमृगशिरोयुक्तायां चूर्णितलवणस्य सुवर्णनाभं प्रस्थमेकं चंद्रोदये ब्राह्मणाय प्रतिपादयेत्॥
अनेन कर्मणा रूपसौभाग्यवानभिजायते॥ पौषी चेत्पुष्ययुक्ता स्यात्तस्यां गौरसर्षपकल्केनाछादितशरी(
रो गव्यघृतपूर्णकुंभेनाभिषिक्तः सर्वौषधिभिः सर्वैर्गंधैः सर्ववीजैश्च स्नातं घृतं घृतेन च भगवंतं वा
सुदेवं स्नापयित्वा पुष्पगंधधूपदीपनैवेद्यादिभिश्चाभ्यर्च्य वैष्णवैः॥ शाकैर्वार्हस्पत्यैश्च मंत्रैर्यो

वकंकृत्वासुवर्णेनघृतेनब्राह्मणांस्वस्तिवाचयेद्वासोयुगंक--दद्यात्॥अनेनकर्मणायुष्मान्ति॥माघीम
घायुक्तायेस्यान्नस्यांतिलैःश्राद्धंकृत्वापूतोभवेत्॥भोजनार्थेश्राद्धेतिलान्दत्वासर्वजनप्रियोभवति॰
फाल्गुनीफल्गुनीभयुतायेनस्यांब्राह्मणायसुसंस्कृतंस्वास्तीर्णांशयनंनिवेद्यभार्यांमनोज्ञांभार्यांय
क्षतींद्रविणवतींप्राप्नोतिः॥नार्योपिभर्त्तारंरेवैत्रीचित्रायुतायेनस्यांचित्रवस्त्रप्रदानेनसौभाग्यमाप्नोति
वैशाखांविशाखायुक्तायांयोर्धमासांब्राह्मणान्सन्नकंक्षौद्रयुक्तैस्तिलैःसंतर्प्यधर्मराजानंप्रीणयि
त्वापापेभ्यःपूतोभवति॥ज्येष्ठींज्येष्ठायुतायेनस्यांछत्त्रोपानत्प्रदानेनगणाधिपत्यमाप्नोति॥आ
षाढ्यामाषाढायुक्तायामन्नपानदानेनदेवाक्षयमवाप्नोति॥श्रावणांश्रवणायुक्तायांजलधेनु
मथवासोयुगान्वितांदत्वास्वर्गलोकमवाप्नोति॥प्रोष्ठपद्यांनयुक्तायांगोदानेनसर्वपापविनिर्मु
क्तोभवति॥आश्वयुज्यामश्विनीगतेचंद्रमसिघृतपूर्णंभाजनंसुवर्णयुतंविप्रायदत्वादीप्ताग्नि

॥ दा·वि ॥
॥२५८॥

र्भवति॥ कार्त्तिकीचेत्कृत्तिकायुक्तातस्यांसितमु–क्षाणमन्यवर्णंवाशशांकोदयेसर्वसस्यरत्नगंधोपेतंद्वीपमध्ये
ब्राह्मणायदद्यात्॥ कांतारभयंनपश्यति॥ अथवारत्नानि·हेमाद्रौस्कांदे॥ दद्यादादित्यमादित्येसोमेसोमं
कुजंकुजे॥ एवंबुधादीन्संदेन्तुराहुकेतुशनैश्वरान्॥ एतेषांलक्षणानिप्राग्युक्तानि॥ मंत्राश्चग्रहदाने॥ यथा
शक्तिसुवर्णंदक्षिणा॥ ब्रह्मपुराणे॥ आदित्यवारेसुवर्णमयमादित्यंकृत्वारक्तवस्त्रयुग्मरागंचब्राह्मणायप्र
तिपादयेत्कपिलांवा॥ ससूर्यलोकेसर्वान्कामानवाप्नोतिनिष्कामोमोक्षं॥ सोमदिनेराजतंसोमंशंखंवा·मं
गलदिनेसौवर्णंमंगलंरक्तंधुरंधरंवा॥ बुधेसौवर्णंबुधंज्ञानशास्त्रयेदद्यात्॥ गुरुदिनेसौवर्णंबृहस्पतिं
पीतंवावस्त्रंदद्यात्॥ शुक्रदिनेराजतंशुक्रंश्वेतंहयंवानस्मीनयेद्दद्यात्॥ शनैश्चरेसौवर्णंशनैश्चरमिन्द्र
नीलयुतंकृष्णांगांवानस्मीनयेद्दद्यात्॥ तस्मिन्नेवदिने·अत्रराहुकेतवोपिसौवर्णाएवंविशेषदानेनस
र्वान्कामानवाप्नुयात्॥ विष्णुधर्मोत्तरे·॥ लवणाज्यगुडोपेतंनमपूपंसूर्यवासरे॥ सहिरण्यंनरोदत्वानरो

॥ राम ॥
॥२५८॥

गेरभिभूयते ॥ एवं विधं वैं तु दिने दत्वा सौभाग्यमाप्नुयात् ॥ काष्ठदानं भौमदिने शत्रुनाशमवाप्नुयात् ॥ बुधे क्री
डनकानां च दानं वालेषु शस्यते ॥ जीवाह्नि वस्त्रदानेन परां वृद्धिं समश्नुते ॥ सर्वं वरान्नमाप्नोति शुक्रे दत्वा रतिं
स्त्रियः ॥ अभ्यंगं सूर्यदिवसे दत्वा जीवितमाप्नुयात् ॥ अथ नक्षत्रदानानि । हेमाद्रौ भारते ॥ कृत्तिकासु महाभा
ग पायसेन ससर्पिषा ॥ संतर्प्य ब्राह्मणान्साधून्लोकानाप्नोत्यनुत्तमान् ॥ रोहिण्यां पांडवश्रेष्ठ माषैरन्नेन
सर्पिषा । ॥ पयोनुपानं दातव्यं आनृण्यार्थं द्विजातये ॥ दोग्ध्रीं सवत्सां तु नक्षत्रे सोमदैवते ॥ दत्वा दिव्य(
विमानस्थः स्वर्गमाप्नोत्यनुत्तमं ॥ सोमदैवतं मृगशीर्षं ॥ आर्द्रायां कृसरं दत्वा तिलमिश्रं समाहितः ॥ नर
स्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥ अपूपं पुनर्वसौ दत्वा घृतपूर्णं सुपाचितं ॥ यशस्वी रूपसंपन्नो बहु
न्ने जायते कुले ॥ पुष्ये तु कांचनं दत्वा कृतं वाकृतमेव च ॥ अनालोकेषु लोकेषु सोमवत्स विराजते कृत(
मलंकारादिरूप्यं ॥ अश्लेषासु तथा रूप्यं वृषभं वा प्रयच्छति ॥ स सर्वभयनिर्मुक्तः शास्त्रवानभिजायते ।

शास्त्रज्ञानवानित्यर्थः ॥ मघासु तिलपूर्णानि वर्द्धमानानि मानवः ॥ प्रदाय पशुमांश्चैव पुत्रवांश्च प्रजायते ॥
फाल्गुनीपूर्वसमये ब्राह्मणानामुपोषितः ॥ भक्ष्यान्फाणितसंयुक्तान्दत्वा सौभाग्यमृच्छति ॥ घृतक्षीरसमा
युक्तं विधिवत्षाष्टिकौदनं ॥ उत्तराविषये दत्वा स्वर्गलोके महीयते ॥ यद्यत्प्रदीयते दानमुत्तराविषये नरैः
सफलमनन्तं च भवतीह विनिर्णयः ॥ हस्ते हस्तिरथं दत्वा चतुर्युक्तमुपोषितः ॥ नरस्तरति उर्गाणि क्षु
रधारांश्च पर्वतान् ॥ चतुर्युक्तं हस्तिचतुष्टययुक्तमित्यर्थः ॥ चित्रायामृषभं दत्वा पुण्यांगांगांश्च भारतः
चरत्यप्सरसां लोके रमते नन्दने वने ॥ स्वातिष्वथ धनं दत्वा यदिष्टमनसात्मनः ॥ प्राप्नोति लोकान्स शुभा
निहवैव महद्यशः ॥ विशाखायामनड्वाहं धेनुं दत्वा च दुग्धदां ॥ सप्रासंगं च शकटं सधान्यं वस्त्रसंयुतं ॥
पासंगो युगकाष्ठं ॥ पितॄन्देवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते ॥ न स उर्गाण्यवाप्नोति स्वर्गलोकं च ग
च्छति ॥ अनुराधासु प्रावारं वस्त्रान्तरमुपोषितः ॥ दत्वा युगशतं चापि नरः स्वर्गे महीयते ॥ प्रावारः प्रा

वराववस्त्रं परिधानवस्त्रसहितं ॥ कालशाकं तु विप्रेभ्यो दत्वा मध्यं स मूलकं ॥ ज्येष्ठायां मृत्युतच्छाघगातिमि
ष्टां व गच्छति ॥ मूले मूलफलं दत्वा ब्राह्मणेभ्यः समाहितः ॥ स्वपितॄन्प्रीणायेद्देवं गतिमिष्टां च गच्छति ॥ अथपू
र्वास्वषाढासु दधिपात्राणि पूर्वोषितः ॥ कुलवृत्तोपसंपन्ने ब्राह्मणे वेदपारगे ॥ प्रदायजायते श्रेष्ठकुले बहु
पुरा कुले ॥ पुत्रपौत्रैः परिवृतः पशुमान्धनवांस्तथा ॥ ओदनं वससर्पिष्कं प्रभूतमधुफाणितं ॥ दत्वोत्त
रास्वषाढासु सर्वलोकानवाप्नुयात् ॥ फाणितं खंड विकारः ॥ दुग्धं त्वभिजिते योगे दत्वा मधुघृतैर्युतं ॥ धर्म
निष्ठा मनीषिभ्यः स्वर्गलोके महीयते ॥ उत्तराषाढनक्षत्र चतुर्थपादः ॥ श्रवणस्याद्यघटिका चतुष्टयम
भिजिद्योग इत्यर्थः ॥ श्रवणे कंवलं दत्वा वस्त्रांतरितमेव च ॥ श्वेतेन यानियानेन स्वर्गलोकेन संवृतः ॥ गो
युक्तं च धनिष्ठासु यानं दत्वा समाहितः ॥ वस्त्रमस्मिन्नवं दत्वा प्रेत्य राज्यं प्रपद्यते ॥ गंधं शतभिषायोगे द
त्वा सागरु चंदनं ॥ प्राप्नोत्यप्सरसां लोकं प्रेत्यगंधांश्च शाश्वतान् ॥ पूर्वभाद्रपदायोगे राजमाषान्प्रदायवै

॥ दा॰वि ॥
॥ २६० ॥

सर्वभक्ष्यफलोपेतः सर्वैप्सितसुखी भवेत् ॥ औरभ्रमुन्नतयोगे यस्तु मांसं प्रयच्छति ॥ पितॄन्प्रीणाति सकला
न्मेषस्यानंत्यमश्नुते ॥ उरभ्रो मेषः ॥ कांस्योपदोहनां धेनुं रौप्यवत्सां यः प्रयच्छति ॥ सप्रेत्य कामानाप्नोति रम्रुपनि
ष्यति ॥ रथमश्वसमायुक्तं दत्वा भिन्यां नरोत्तमः ॥ हंसाश्वरथसंपन्नो वर्चस्वाञ्जायते कुले ॥ भरणीषु धि
जातिभ्यस्तिलधेनुं प्रदापयेत् ॥ गाः प्रसूताश्च प्राप्नोति नरः प्रेत्य यशस्तथा ॥ विष्णुधर्मोत्तरे ॥ कृत्तिकासु
सुवर्णस्य दानं वृद्धफलं स्मृतं ॥ रक्तवस्त्रस्य रोहिण्यां सोमे घृतव्रणस्य च ॥ कृशरस्य तथार्द्रायामादित्येर
जनस्य तु ॥ घृतस्य तु यथा पुष्ये गंधानामथ सार्पभे ॥ तिलानां च तथा पैत्र्ये प्रियंगो भाग्यदैवते ॥ आर्यम्णे
चापूपानां सावित्रे पायसस्य तु ॥ चित्रायां चित्रवस्त्राणां सक्तूनां वायुदैवते ॥ ऐंद्राग्ने चैव लोकानां मै
त्रे माल्यफलस्य च ॥ छत्रस्य तु तथा शाक्रे मूलस्य तु फलस्य च ॥ हेमाश्वमथयुक्तस्य दानमाप्ये महाफलं
विश्वेश्वरेन्नयानस्य श्रवणे वसनस्य च ॥ धान्यस्य वासवे विप्रा वारुणे चौषधस्य च ॥ आजे पुराणवीजा

॥ राम ॥
॥ २६० ॥

नान्नदनं नरे ॥ गोरसानां तथा पौष्णे -- नानामथवाश्विने ॥ तिलानां च महादानं भरण्यां शुभफलं ॥ अ
थ योगदानानि ॥ विष्कंभे सर्वधान्यानां दानं सर्वाघनाशनं ॥ प्रीतौ तु धान्यपानानामायुष्मति घृतस्य च ॥ कुं
भस्य च सौभाग्ये पयवदानं च शोभने ॥ अतिगंडे च वस्त्राणां यायसस्य सुकर्मणि ॥ धृतौ रजतदानं चभ्ले
भूलादिदानकं ॥ गंडे मंडनदानं च वृद्धौ गोदानमिष्यते ॥ ध्रुवे च यवरत्नानां व्याघाते फाणितस्य च ॥ हर्ष
णे गंधदानं स्याद्वज्रे दध्यान्नमणीनपि ॥ सिद्धौ सिद्धार्थका देया व्यतीपाते तु कांचनं ॥ वरीयसि तिलान्दद्या
च्छस्त्राणि परिघे तथा ॥ जलकुंभाः शिवे देयाः सिद्धे सिद्धान्नमिष्यते ॥ साध्ये लंकरणं चैवं छत्रदानं शुभे शु
भं ॥ शुक्ले चोपानहोर्दानं शस्त्रं ब्रह्मणि सर्पिषः ॥ ऐंद्रे च दीपकान्दद्या वैधृतौ कनकं हितं ॥ दानान्येते तु योगे
षु यथोक्तानि द्विजोत्तमाः ॥ भक्तियुक्तो द्विजे दत्वा लोके वसति वज्रिणः ॥ ॥ अथ करणदानानि विष्णुध
र्मोत्तरे ॥ करणेषु तु वक्ष्यामि दानानि द्विजसत्तमाः ॥ ववे पायसदानं स्यात्सक्तुदानं च बालवे ॥ कौलवे गो

रसान्द्यान्तिलांस्तैनिलनामनि ॥ गणाभिधानेलवणांवणिजेदेयमंवरं ॥ विद्धोचषष्टिकान्नानिशकुनौस
र्पिरेवच ॥ मधुदानंचजुःपादेशस्तंनागेचवाससां ॥ दानंप्रियंग्वाःकिंस्तुघ्नेश्चेष्ठगुरुक्तंद्विजोत्तमाः ॥ अथसं
क्रांतिदानानिविस्थानिच ॥ मेषसंक्रमणेभानोर्मेषदानंमहाफलं ॥ वृषसंक्रमणेदानंगवांप्रोक्तंतथै
वच ॥ वस्त्रान्नपानदानानिमिथुनेविहितानितु ॥ घृतधेनुप्रदानंचकर्कटेयद्विशस्यते ॥ सशुवर्णंछ
त्रदानंसिंहेपिविहितंसदा ॥ कन्याप्रवेशेवस्त्राणांसुरभीणांतथैवच ॥ तुलाप्रवेशेधान्यानांवीजानांमेवचोत्त
मं ॥ कीटप्रवेशेवस्त्राणांवेश्मनांदानमेवच ॥ कीटाह्वश्चिकः ॥ धनुःप्रवेशेवस्त्राणांयानानांचमहाफलं ॥ म
षप्रवेशेदारुणांदानमग्नेस्तथैवच ॥ कुंभप्रवेशेदानंतुगवामंवुतृणस्यच ॥ मीनप्रवेशेयानानांमाल्या
नामपिचोत्तमं ॥ दानान्यथैतानिमयाद्विजेंद्राःप्रोक्तानिकालेतुनरःप्रदत्वा ॥ प्राप्नोतिकामान्मनसस्त्वभीष्टा
न्नस्मान्नुशंसंनिहिकालदानं ॥ स्कांदे ॥ धेनुंतिलमयींराजन्दद्याद्यश्चोत्तरायणे ॥ सर्वकामानवाप्नोतिविं

दत्तेपरमंसुखं ॥ विष्णुधर्मोत्तरे ॥ उत्तरेत्वयनेविप्रावस्त्रदानंमहत्फलं ॥ तिलपूर्णमनड्वाहंदत्वारोगैःप्रमु॰
च्यते ॥ अथमासदानानिविष्णुधर्मोत्तरे ॥ तिलप्रदानान्माघेतुयाम्यंलोकंनगच्छति ॥ प्रियंगुफाल्गुनेदत्वाप्रि
योभवतिभूतले ॥ चैत्रेचित्राणिवस्त्राणिदत्वासौभाग्यमश्नुते ॥ अपूपानांप्रदानेनवैशाखेस्वर्गमश्नुते ॥ छ
त्रदानात्तथाज्येष्ठेसर्वान्कामान्समश्नुते ॥ श्रावणेवस्त्रदानस्यकीर्तितंसुमहत्फलं ॥ प्रौष्ठपदेतथामासि
प्रदानात्फाणितस्यच ॥ आश्विनेघृतदानेनरूपवानभिजायते ॥ कार्तिकेदीपदानेनसर्वथोज्वलमाप्नुया
त् ॥ लवणंमार्गशीर्षेतुदत्वासौभाग्यमश्नुते ॥ पौषेकनकदानेनपरांतुष्टिंतथैवच ॥ पुष्पाणांचसितेप
क्षेदानंलक्ष्मीकरंस्मृतं ॥ फलानांचतथादानंकृष्णपक्षेमहाफलं ॥ वामनपुराणे ॥ माघेमासितिलाःप्र
शस्तास्तिलधेनुश्चदानव ॥ इध्मंधनादयश्चान्येमाधवप्रीणनायतु ॥ फाल्गुनेव्रीहयोगावोवस्त्रंकृष्णा॰
जिनान्वितं ॥ गोविंदप्रीणनार्थायदातव्यंपुरुषर्षभैः ॥ चैत्रेविचित्रवस्त्राणिशयनान्यासनानिच ॥

॥ ध.वि ॥
॥२६२॥

विस्नोःप्रीत्यर्थमेतानिदेयानिब्राह्मणेषु च ॥ गंधाश्चमाल्यानितथावेद्मार्थेसुरभीणि च ॥ देयानिद्विज
मुख्येभ्योमधुसूदनतुष्टये ॥ उदकुंभांश्चधेनुंचनालहंतंसचंदनं ॥ त्रिविक्रमस्यप्रीत्यर्थंदातव्यंसाधुभिः
सह ॥ उपानद्युगलंछत्रंनवरत्नमलकानिच ॥ आषाढेवामनप्रीत्यैदातव्यानिसुभक्तितः ॥ घृतंचक्षीर
कुंभांश्चघृतधेनुफलानिच ॥ श्रावणेश्रीधरप्रीत्यैदातव्यानिविपश्चिते ॥ मासेभाद्रपदेदद्यान्नायसंम
धुसर्पिषा ॥ हृषीकेशप्रीणनार्थंलवणंसगुडौदनं ॥ तिलास्तुरंगवृषभंदधिताम्रपयसादिकं ॥ प्रीत्यर्थं
पद्मनाभस्यदेयमाश्वयुजेनरैः ॥ रजतंकनकंदीपान्मणिमुक्ताफलादिकं ॥ दामोदरस्यप्रीत्यर्थंप्रदद्या
त्कार्त्तिकेनरः ॥ खरोष्ट्राश्वतरीनागान्सकटाक्षगजादिकं ॥ दातव्यंकेशवप्रीत्यैमासिमार्गशिरेनरैः ॥ प्रा
सादनगराद्दीनिगृहणावरणानिच ॥ नारायणस्यतुष्ट्यर्थंपौषेदेयानियत्नतः ॥ दासीदासमलंकार
मन्नंषड्रससंयुतं ॥ पुरुषोत्तमतुष्ट्यर्थंप्रदेयंसर्वकालिकं ॥ यद्यदिष्टतमंकिंचिद्यद्वाप्यस्तिशुभंगृ

॥ राम ॥
॥ २६२ ॥

हे ॥ तन्नच्छिद्देयं पीत्यर्थं देव देवस्य चक्रिणः ॥ देवीपुराणे ॥ मार्गे रसोत्तमं दद्यात् घृतं पौषे महाफलं ॥ रसो
त्तमं लवणं ॥ तिलान्माघे तु निश्चेष्टस्प्तधान्यानि फाल्गुने ॥ विचित्राणि च वस्त्राणि चैत्रे दद्याद्द्विजोत्तमे ॥ वैशा
खे द्विजगोधूमान्ज्येष्ठे तोयभृतं घटं ॥ आषाढे चंदनं देयं सकर्पूरं महाफलं ॥ नवनीतं नभोमासि छत्रं प्रोष्ठ
पदे मतं ॥ गुडशर्करवर्णाद्यान् लड्डुकानाश्विने तु ने ॥ दीपदानं महापुण्यं कार्तिके यः प्रयच्छति ॥ सर्वकामा
नवाप्नोति क्रमेणोदगुदाहृतं ॥ व्रतान्ते गां शुभां दद्यात्सवस्त्रां कांस्यदोहिनीं ॥ सप्तगां सत्वजं वत्सं दापयेद्वि
धिनामुना ॥ देवीं विरंचिनं सूर्यं विष्णुं वाथ यथाविधि ॥ स्वभावशुद्धो विधिवत्पूजयित्वा द्विजोत्तमं ॥ दान
व्यावीनरागेनु काम क्रोध विवर्जिते ॥ श्रयावके सदाचारे विनीते विनयान्विते ॥ तथा ॥ आषाढे तोयधेनुं
च घृतं भाद्रपदे तथा ॥ माघे तु तिलधेनुः स्याद्याद्दत्वा लभते हितं ॥ तथा ॥ धेनुं तिलमयीं माघे दद्याज्जाश्वी
तरायणे ॥ सर्वकामानवाप्नोति ज्येष्ठे तिलमयीं तथा ॥ पुष्ये घृतमयीं दद्यात्श्रेष्ठाहे विधिना तु ने ॥ आ(

दित्यपुराणे ॥ ज्येष्ठे मासि तिलान्दत्वा पौर्णमास्यां विशेषतः ॥ अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥ यमः
घृतमाश्वयुजे मासि नित्यं दद्याद्द्विजातये ॥ प्रीणयित्वाश्विनौ देवौ रूपभागभिजायते ॥ विष्णुः ॥ आश्वि(
नं सकलं मासं विप्रेभ्यः प्रत्यहं घृतं ॥ प्रदायाश्विनौ प्रीणयति रूपभाग्भवति ॥ तस्मिन्नेव मासि प्रत्यहं गोरसै
र्ब्राह्मणान्भोजयित्वा आरोग्यभाग्भवति ॥ भारते ॥ माघे मासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति ॥ सर्वसत्व
समाकीर्णं नरकं न स पश्यति ॥ अथ पुण्यदानानि विष्णुधर्मोत्तरे ॥ स्नानानुलेपनादीनां वसंते दानमिष्यते ॥
पानकानां तथा ग्रीष्मे छत्राणां नंदनं नरे ॥ देवीपुराणे ॥ यः पुनर्विधिनावत्स देवीमुद्दिश्य प्राहृषि ॥ विप्रे
षु विप्रकन्यासु तिलादीन्संप्रयच्छति ॥ तस्य सा तुष्यते देवी अचिरेणानुविद्यया ॥ विष्णुधर्मोत्तरे ॥ शरत्प(
न्नस्य धर्मज्ञ वस्त्राणामपि हेमते ॥ वह्निदानं नरः कृत्वा सूर्यस्योदयनं प्रति ॥ शिशिरे सततं वह्निं न पश्यि
त्वा न तथा तिलैः ॥ कुल्माषं सघृतं दत्वा यथाशक्त्या द्विजातिषु ॥ कात्यायनिर्दीप्तिप्राकाश्यं प्राप्नुनाशं च विंदति

सक्तुसिनायं तण्डुलं त्रपुसैर्वाह्रकान्वितं ॥ लवणाज्यगुडं दत्वा तथा हरितकान्वितं ॥ मध्याह्ने श्राद्धविस्नानः सम
नं द्विजपुंगवाः ॥ जलकुंभोपरिक्रान्तं ह्यक्षयं फलमश्नुते ॥ प्रमः ॥ शरारंभो च यित्वा तु स्वशक्त्या शिशिरे द्विजा
न् ॥ प्रदीप्ताग्निमवाप्नोति स्वर्गलोकं च गच्छति ॥ अथ संवत्सरदानानि· विष्णुधर्मोत्तरे ॥ संवत्सरे तु दातव्यां
नि लदानमहाफलं ॥ परिपूर्वेन तथा दानं यवानां द्विजसत्तम ॥ परिवत्सरमित्यर्थः ॥ इडापूर्वे च वत्सराणां धा
न्यानां चानुपूर्वके ॥ इत्पूर्वे रजतस्यापि दानं प्रोक्तं महाफलं ॥ प्रभवादिवत्सरपंचकस्यैकैकासंज्ञा· ॥ अथक
ल्पदानानि ॥ मदनरत्ने मात्स्ये ॥ कल्पानुकीर्त्तनं वक्ष्ये सर्वकामफलप्रदं ॥ यस्यानुकीर्त्तनादेव वेदपुण्येन
न युज्यते ॥ प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः ॥ वामदेवस्तृतीयस्तु ततो रथंतरोपरः ॥ रौरवः
पंचमः प्रोक्तः षष्ठः प्राण इति स्मृतः ॥ सप्तमोथ बृहत्कल्पः कंदर्पोष्टम उच्यते ॥ सद्योथ नवमः प्रोक्त ईशा
नो दशमः स्मृतः ॥ व्यान एकादशः प्रोक्तस्तथा सारस्वतः परः ॥ त्रयोदश उदानस्तु गारुडोथ चतुर्दशः ॥ कौ

॥ दा॰वि ॥
॥ २६४ ॥

मेः पंचदशः प्रोक्तः पौर्णमासी प्रजायते ॥ षोडशो नारसिंहस्तु समानस्तु तथा परः ॥ आग्नेयोष्टादशः प्रोक्तः
सोमकल्पस्तथापरः ॥ मानवोविंशतिन्नमस्तस्तुमानिन्निवापरः ॥ नत्पुरुषइत्यर्थः ॥ वैकुंठश्चापरोकल्पो
लक्ष्मीकल्पस्तथापरः ॥ चतुर्विंशत्तमः प्रोक्तः सावित्रीकल्पसंज्ञितः ॥ पंचविंशत्तमो घोरो वाराहस्तु ततोप
रः ॥ सप्तविंशोथ वैराजो गौरीकल्पस्तथापरः ॥ माहेश्वरस्ततः प्रोक्तस्त्रिपुरो यत्र घातितः ॥ पितृकल्पस्त
थांतेतुयाकुहुर्ब्रह्मणास्मृतः ॥ इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः ॥ आदावेव हि माहात्म्यं यस्मिन्म
स्य विधीयते ॥ तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥ यस्तु दशादिमान्कृत्वा हैमान्पर्वणि पर्वणि
ब्रह्मविष्णुपुरे कल्पं मुनिभिः पूज्यते दिवि ॥ सर्वपापक्षयकरं कल्पदानं यतो भवेत् ॥ मुनिरूपांस्ततः
कृत्वा दद्यात्कल्पान्विचक्षणः ॥ शोषितांशेषयायायदंडयज्ञोपवीतिने ॥ जटाकमंडलुध्वतेमुनिरू
पायतेनेनमस्तिसंपूज्यदद्यात् ॥ एवमन्याकारान् ॥ प्रतिग्रहीत्वरणादिदानां तरवत्तः ॥ अथयुगादि

॥ राम ॥
॥ २६४ ॥

दानं ॥ युगाद्य्यः संग्रहे ॥ वैशाखमासस्य तृतीयानवम्यो कार्तिकशुक्लपक्षे ॥ नभस्यमासस्य तमिस्रप
क्षे त्रयोदशी पंचदशी च माघे ॥ एताश्च तस्त्रस्तिथयो युगाद्याः दत्तं हुतं चाक्षयमेव विंद्यात् ॥ पंचदशी च माघे
इति पौर्णमास्यमावास्ययोरन्यतरत् ॥ अत्र दानं हेमाद्रौ भविष्योत्तरे ॥ वैशाखस्य तृतीयायां श्रीसमेतं जग
द्गुरुं ॥ नारायणं पूजयेथाः पुष्पगंधादिलेपनैः ॥ लक्ष्मीनारायणामित्यर्थः ॥ तस्याग्रतस्ततो धेनुर्देवर्णास्ता
ठकेन तु ॥ कार्या कुरुकुलश्रेष्ठ चतुर्भागेन वत्सकः ॥ अविचर्मीयरिस्थाप्य कल्पयित्वा विधानतः ॥ शास्त्रोक्त
क्रमयोगेन ब्राह्मणाय प्रदापयेत् ॥ श्रीधरः श्रीपतिः श्रीमान् श्रीशः संप्रियतामिति ॥ अनेन विधिना दत्
त्वा धेनुं विप्राय भारत ॥ गोसहस्राद्दशगुणं फलं प्राप्नोति न संशयः ॥ तथैव कार्तिके मासि नवम्यां न कृत्
गुरुः ॥ उमासहायं वरदं नीलकंठमथार्चयेत् ॥ उमामहेश्वर प्रीतिमामित्यर्थः ॥ धेनुं तिलमयीं दद्यात्सु या
स्त्रोक्तविधानतः ॥ अत्र मूर्तिर्नीलकंठः प्रीयतामिति कीर्तयेत् ॥ दत्त्वा चैवं विधानेन शिवलोकमवाप्नु

यात् ॥ त्रयोदशीं तमसेयाहृक्ष्मं नस्यां समर्चयेत् ॥ पितृभ्यो त्रप्रदानेन मधुनाव तथैव च ॥ भोजयेत्तांस्तण
न्मक्त्या वेदवेदांगपारगान् ॥ प्रत्यक्षां गो महाराजन रुक्मीं सुपयस्विनीं ॥ पितापितामहश्चैव तथैव प्रपिता
महः ॥ प्रीयन्तां गोप्रदानेन दीनं दत्वा विसर्जयेत् ॥ पुत्रान्पौत्रांश्च पौत्रांश्च धनं सुमहदीप्सितं ॥ इह प्राप्नोति पु
रुषः परत्र च शुभांगतिं ॥ पंचदश्यां च माघस्य पूजयित्वा पितामहं ॥ गायत्र्या सहितं देवं वेदवेदांगभूषितं
नवनीतमयीं धेनुं फलैर्नानाविधैर्युतां ॥ सहिरण्यां सवत्सां च ब्राह्मणाय निवेदयेत् ॥ कीर्त्तयेत्प्रीयताम
त्र पद्मयोनिः पितामहः ॥ यत्स्वर्गे यच्च पाताले यन्मर्त्ये किंचिदुर्लभं ॥ न देवा प्राप्य संदिग्धं पद्मयोनिप्रसाद
नः इति ॥ ॥ मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसाल
द्रुमः ॥ यं विष्णुस्मरणाग्रगो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि समस्तकालदपनोत्तम्यौनयेपद्धतिः
॥ ॥ समस्तकालदानेषु कृत्वा निर्णयमादरात् ॥ सर्वोपस्करदाने तु गागाभट्टो व्यदत्तथः ॥ ॥ अथर

त्नदानं ॥ जाबालिः ॥ रत्नानि यो द्विजे दद्याद्दृढमूल्यानि मानवः ॥ अलंकारनिमित्तं वा देवताभ्यो नियन्त्रतः ॥ सप
पत्वाय निर्मुक्तो भुक्तिमेव समश्नुते ॥ स्कांदे ॥ विद्रुमाणां प्रदानेन रुद्रलोकं व्रजेन्नरः ॥ सर्वपापविनिर्मुक्तो
दानेनानेन जायते ॥ लोकमाप्नोति दानेन नरो वज्रस्य वज्रिणः ॥ तथाश्वदन्ते गोमेदैर्भीदत्ते नंदनेवने ॥ सर्वेश्व
र्याः सनुष्यांनिवध्यरागस्य दानतः ॥ गारुत्मतैर्मरकतैर्नंनियनंजयनि श्रिया ॥ वैडूर्यैः सूर्यलोकं च यक्ष्मरोगे र
रोगनां ॥ प्रवालैरिंद्रनीलानां नीलानां भाजनं भवेत् ॥ सुवीर्यं खयदानेन शक्तिमुक्ताप्रदानतः ॥ भगंदर
गलगंडहरं रत्नदानं पितृकृतकर्मविपाकसारात्तु ज्ञेयं ॥ अथालंकारदानं ॥ ब्रह्मवैवर्ते ॥ द्विजानि भक्तु
यो दद्यादलंकारान्स्वशक्तितः ॥ सोलंकृतः स्वर्गलोके क्रीडत्यप्सरसां गणैः ॥ अलंकारप्रदानेन सुरूपः सु
भगो भवेत् ॥ तथालंकारदानेन दीर्घमायुश्च विंदति ॥ नराभरणदानेन तुष्टिं याति सदाशिवः ॥ योषिदाभ
रणोद्दत्तेशीयते हिमशैलजा ॥ विष्णुधर्मोत्तरे ॥ मूर्धाभरणदानेन व्रजेन्मूर्धाभिषक्तता ॥ कर्णाजैसैः सु

कीर्त्तिः स्याल्लक्ष्मी कांठेरकुंठिना॥ पाणिजैः पाणिजैत्रः स्यान्जघनै रजघनजः॥ जानुजैः स्यानुजो जैत्रं सर
णां वरणोद्भवैः॥ मूर्द्धाभरणं मुकुटादि॥ कर्णजं कुंडलादि॥ कांठं - वर्णमालादि॥ पाणिजं मुद्रिकादि॥
जघनभवं सुवर्णकटिसूत्रादि॥ जानुजं किंकिण्यादि॥ चरणोद्भवं नूपुरादि॥ मंत्राः पूर्वमुक्ताः॥ अथव
स्त्रदानं देवलः॥ ॥कांतिमुक्तः सुभगः श्रीमान्भवत्यंबरदानवान्॥ भविष्ये॥ मध्यमोत्तमवस्त्राणि यो द
द्याद्दहनानि च॥ स तेनैवानुसारेणाशु प्नोति विपुलं फलं॥ विष्णुधर्मे॥ नीलवस्त्रं तथा जीर्णं न देयं ब्रा
ह्मणायतु॥ देयं वरं चांगिरसं लोकं यानि ह्वहस्यतेः॥ दत्वा कार्पासकं वस्त्रं स्वर्गलोके महीयते॥ तत्रास
रोमतत्रापि फलं दशगुणं भ॥ यथाशक्त्या विधानेन अग्निष्टोमफलं भवेत्॥ रोगघ्नायज्ञोपवीतदानंपि
तत्कनकर्मविपाकसारे ज्ञेयं॥ अथ गंधादिदानं स्कांदे॥ मनरः - - - - हत्वं गंध - - हवाप्नुते॥ भो
गवान्जायते नित्यं शरीरं नास्य नश्यति॥ विष्णुधर्मे॥ सौभाग्यकारकं प्रोक्तं प्रदानं कुंकुमस्य तु॥ तथा

कर्पूरदानेन सर्वान्कामानवाप्नुयात् ॥ मृगदर्पयदानेन यशसाभिविजायते ॥ यक्षकर्दमदानेन साम्राज्यं रा
ज्यमश्नुते ॥ अथछत्रदानं मदनरत्ने ॥ कांचनानि च पुष्पाणि मणिमुक्तामयानि च ॥ तुलसीपत्रदानस्य क
लांनार्हंति षोडशीं ॥ अथधूपदानं ॥ हेमाद्रौ भारते ॥ धूपदः सुरभिर्निनित्यं धूपदः सुभगः सदा ॥ तस्मा द्देवा
य विशायदानव्यं तत्सुखार्थिभिः मंत्रा उक्ताः ॥ नंदिपुराणे ॥ धूपदः सुरभिर्निनित्यं धूपदः सुभगः सदा ॥ त
स्माद्देवाय विशायदानव्यं तत्सुखार्थिभिः ॥ ॥ अथदीपदानं संवर्ते ॥ देवागारे द्विजानां च दीपं दत्वा चतु
ष्पथे ॥ मेधावी ज्ञानसंपन्नश्चक्षुष्मान्जायते नरः ॥ गारुडे ॥ वर्षां तु दीपदानेन पितॄणामनृणी भवेत् ॥ प
क्षं द्वाभ्यां गते दृष्टुदीयमानां प्रपश्यति ॥ सनिर्जितमनमोघोरं ज्योतिषां लोकमाप्नुयात् ॥ भारते ॥ वर्षां तु
दीपदानेन शशिवच्छोभते नरः ॥ व्रतहेमाद्रौ विष्णुधर्मे ॥ मलावर्ज्जिः सदादेया भूमिपाल महाफला ॥ कृष्ण
पक्षे विशेषेण तत्रापि च विशेषतः ॥ अमावास्या विनिर्दिष्टा द्वादशी च महाफला ॥ आश्वयुज्यामतीतायां कृ

क्षपक्षस्य या भवेत् ॥ अमावास्या हि सा पुण्या द्वादशी च विशेषतः ॥ देवस्य दक्षिणे पार्श्वे देयानैलतुलान्नप·
पलाष्टकसुनां रजनवर्जिन न त्रयदापयेत् ॥ वाससा तु समभ्येर्णा सो पवासो जितेंद्रियः ॥ उत्तरे देवपार्श्वे(
तु देया घृततुलान्तप ॥ पलाष्टकसुनां पुरांपाभुल्कां वर्जिंच दापयेत् ॥ वाससा तु समभ्येर्णा सो पवासो जितें(
द्रियः ॥ मणवर्जितद्वयमिदं सकृत्कृत्वा महीपते ॥ स्वर्लोकं सुचिरं भुक्त्वा जायते भुतले यदा ॥ तदा भवति
लक्ष्मीवान् रूपसौभाग्यसंयुतः ॥ राष्ट्रे वा जायते तस्मिन्देशे वा नगरे तथा ॥ कुले वा राजशार्दूल तत्रस्था द्वी
पवत्प्रभो· ॥ एकामप्यथवा दद्याद्भीष्ठाम तयोर्द्वयोः ॥ मानुष्ये सर्वमाप्नोति यदुक्तं नेमयानघ ॥ सामान्य
स्यतु दीपस्य राजन् दानं महत्फलं ॥ किं पुनर्महतो यस्य फलस्यांतो न विद्यते ॥ किं पुनर्देवदेवस्य अनंत(
स्य महात्मनः ॥ गिरिशृंगेषु दानवं नदीनां पुलिनेषु च ॥ चतुष्पथेषु रथ्यासु ब्राह्मणानां च वेश्मसु· ॥ वृक्ष
मूलेषु गोष्ठेषु कांतारगहनेषु च ॥ दीपदानेन सर्वत्र महत्फलमुपाश्नुते ॥ इति दीपदानं ॥ अथान्नदानं·

मदनरत्ने ॥ अन्नदः प्राणदः प्राणदश्चापि सर्वदः ॥ तस्मादन्नप्रदानेन सर्वदानफलं लभेत् ॥ धर्मार्थका
ममोक्षाणां देहः परमसाधनं ॥ स्थितिस्तस्यान्नपानाभ्यामतस्तत्स्वर्गसाधनं ॥ अन्नं प्रजापतिः साक्षाद
न्नं विष्णुः शिवः स्वयं ॥ तस्मादन्नसमं दानं न भूतं न भविष्यति ॥ अत्रान्नशब्दो नामान्नपरः ॥ तस्य पृथग्ग्रह
णोक्तेः ॥ नापि पक्वमान्नपरः ॥ दधिपुक्तपक्वमाषमुद्गधान्यशाकाद्युपयोगात् ॥ किंतु ओदनमात्रपरः ॥ भि-
स्त्रीभक्तमंधोन्नमित्यमरात् ॥ विष्णुधर्मे ॥ नात्रपात्रपरीक्षा स्यान्न कालनियमस्तथा ॥ न च देशः परीक्ष्यो
ऽत्र देयमन्नं सदैव तु ॥ श्वभ्यश्च पतितेभ्यश्च अंत्यजेभ्यस्तथैव च ॥ कृमिकीटपतंगेभ्यो देयमन्नं सदैव तु ॥ ब्र
ह्मवैवर्ते ॥ तस्मादहरहर्देयमन्नमेव विचक्षणैः ॥ अपरीक्ष्यैव सर्वेभ्य इति स्वायंभुवशासनं ॥ चन्द्रिकायां
व्यासः ॥ ग्रासमप्येकमन्नस्य यो दद्याद् दिने दिने ॥ स्वर्गलोकमवाप्नोति नरकं च न गच्छति ॥ हेमाद्रौ व्यासः
ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ॥ इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ विष्णुधर्मे ॥ य

॥दा·वि॥
॥२६८॥

स्वान्नेनोदरस्थेन ब्राह्मणो म्रियते द्विज॥ तां तु योनिमवाप्नोति नात्र कार्या विचारणा॥ भक्ष्यदः स्वर्गलोकं
तु शक्रलोकं तु भोज्यदः॥ लेह्यदोप्सरसां लोकं वसूनामपि चोष्यदः॥ वारुणं लोकमाप्नोति तथा पानप्र
दो नरः॥ परमान्नप्रदानेन तृप्तिर्भवति शाश्वती॥ गुडप्रदस्तथारोग्यं सितादः काममीप्सितं॥ फाणित
स्य प्रदानेन तु परां तृप्तिमवाप्नुयात्॥ खंडप्रदश्च सौभाग्यं सर्वान्कामान्मधुप्रदः॥ घृतदो जीवितं दीर्घ
मारोग्यं तैलदस्तथा॥ भगवतीपुराणे॥ लवणं च घृतं तैलं गुडं हिंगु च मारिचं॥ कूष्मांडं जीरकं चैव
पत्रशाकं च शोभनं॥ व्यंजनानि च यानानि दत्वान्यं तं सुखी भवेत्॥ यमः॥ गोरसानां प्रदानेन तृप्तिमा
प्नोत्यनुत्तमां॥ ॥अथ श्राद्धभोजनं॥ ब्रह्मवैवर्ते॥ यस्य श्रन्नमुपाश्नाति ब्राह्मणानां घानं सदा॥ तुष्टेन
मनसा दत्तं न सतिर्यग्गतिर्भवेत्॥ ॥अथ सहस्रभोजनं॥ ब्रह्मवैवर्ते॥ भोजयित्वा दशशतं नरो
वेदविदां नृप॥ न्यायविद्धर्मविदुषां स्मृतिभाष्यविदां तथा॥ न याति नरकं घोरं संसारं न च सेवते।

॥राम॥
॥२६८॥

बौधायनः॥ अथातः सहस्रभोजनविधिं व्याख्यास्यामः॥ उदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे जन्मनक्षत्रे वा
दक्षिणायणे वा स्वगृहे वा मन्त्रभूतौ देशे शुचिर्युग्मान् विप्रान् क्षालितपाणिपादानासनं कृत्वा गंधाद्यैरलंकृ
त्य संकल्पसिद्धिरस्त्विति वाचयित्वा त्रिह्वतां चैनत्रीन् लक्षणान्नं पूज्याशिषो वाचयित्वा प्रदक्षिणां नमस्कारान्कृत्वा
सहस्रान्मानमीशं सहस्रभोजनेन संपूज्य देवयजनोल्लेखनप्रभृत्याग्निमुखान्कृत्वा एकस्मै स्वाहा॥ याम्यां स्वाहे
ति दद्यात् नु वाकान्का दश विप्राः श्राविता भवंति॥ पश्चिमानन्नेन परिविष्य पुण्याहं स्वस्ति ऋद्धिरिति वाच
यित्वा पक्वान्नं जुहोति॥ विष्णोर्नुकमिति पुरोनुवाक्यामनूच्य विष्णोः पृष्ठमसीति आज्यया जुहोति॥ आज्याहु
तीर्जुहोति केशवाय स्वाहेत्यादि द्वादशनामभिः स्विष्टकृत्प्रतिसिद्धमाधेनुवरप्रदानान्॥ यवोदनं वा विषे
ष्णोनिकुंडलयुग्मानि अंगुलीयकमुपानहौ छत्रं च दद्यात् अन्नशेषमाज्यशेषं यकशेषं जोया पत्नी अश्नीयात् नं
सर्वकल्मषैर्मुच्यपातकैर्मुच्यते॥ षष्ठिवर्षसहस्राणि ब्रह्मलोकमतीत्य विष्णुलोके महीयते॥ इत्याह भगवा

र्बौधायनः ॥ अथातः ॥ सहस्रभोजनं सुसंख्याख्यास्यामो विष्णवे अयने ऽयने जन्मर्क्षे ग्रहगृहीते व्याधिग्रस्ते पु
जंकामो ऽन्यकामो वा विप्राननुज्ञाप्य भीष्ममाग्रदं कृत्वा सहस्रं विप्रान् वेदपारगान् संभोज्य सहस्रसंख्यपरि
पूर्णे पुण्यर्क्षे द्वादशविप्रान् विमंत्र्य सनादिगंधपुष्पधूपदीपैरभ्यर्च्याथ देवयजनोल्लेखनाद्यप्रणीतान्तः
कृत्वाग्रेणाग्निं व्याहृतीभिर्विष्णुमावाह्य परिधानप्रभृत्याग्निमुखात्कृत्वा देवमर्चयत्यापो हि ष्ठा मयोभुव इ
तितिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पंचपावमानः सुवर्जन इत्येतेनानुवाकेन गंधपु
ष्पधूपदीपैरभ्यर्च्याथ पक्वान्नं जुहोति ॥ केशवाय स्वाहेति द्वादशनामभिः स्विष्टकृत्प्रभृतिसि— माधेनुव
रप्रदानादथ विप्रान् संभोज्य गुडपायसघृतमिश्रमथान्नस्य बलिं हरत्यमुष्मै स्वाहेति द्वादशनामभिरथ वि
प्रेभ्यो वस्त्रयुगानि कुंडलयुगान्यंगुलीयानि चोपानहौ छत्रं कमंडलुं च दत्त्वा शेषं ॥ जायापती अश्नीयातां स
र्वकामानाप्नोति महापातकैर्मुच्यते ॥ षष्टिवर्षसहस्राणि विष्णुलोके महीयत इति ह भगवान्बौधायनः

अत्रसहस्रसंख्यायाब्राह्मणगणत्वेनैकस्याभोजनेनसहस्रभोजनमितिकेचित्॥ भिन्नपदेपानसहस्रसंख्यायाब्रा
ह्मणविशिष्टभोजनेनत्वयामहत्यापिभोजनेसहस्रभोजनोपपत्तिरितियुक्तंप्रतीयते॥ अथायुतभोजनं॥ मदन
रत्नेब्राह्मे॥ ब्राह्मणानांसहस्राणिदशभोज्यनरर्षभ॥ नरोऽधर्मान्प्रमुच्येतपापेभ्यभिरतःसदा॥ अथलक्षभोजनं
क्षेमप्रकाशेभारते॥ ब्राह्मणानांसहस्राणिशतंभोज्यानिकौरव॥ नरकान्संप्रमुच्येतपापेस्वपिरतःसदा॥ देवलः
मिष्टमन्नंस्वयंभुक्त्वापश्चात्कुदद्यानंनघु॥ ब्राह्मणंभोजयेन्मूर्खोनरकंविरमावसेत्॥ स्कान्दे॥ एकंपाप्रुयतंभ
क्त्याभोजयित्वाप्रणम्यच॥ नानाविधैर्महाभक्षैर्विहायसिसमोदने॥ ग्रासमात्रानुयोभिक्षांयतिभ्यःसंप्रयच्छ
ति॥ विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयात्॥ अथापूपदानं॥ आथर्वणपरिशिष्टे॥ अथयःकामयेत
सर्वेषांनरणामुन्नमःस्यामितिसभास्करायापूपंदद्यात्तस्यकल्पोयवगोधूमानामन्यतमचूर्णेनमंडलाकृतिः
संस्कृत्यपात्रेकृत्वापिहितंसगुडाज्यसुवर्णाकलशंवोपरिनिधायार्चयेद्रक्तकुसुमैर्विवासहिंसहामानमि

॥दा·वि॥
॥२८०॥

नियःअल्पमृत्युश्च¯साध्यंनात्रयत्नविचारतः॥षष्ठान्नंसूर्यलोकंचप्राप्नुयात्परमंपदं॥भारते॥सक्तुप्रस्थंवि
जेदत्वाब्रलोकमवाप्नुयात्॥अथधान्यदानंविष्णुधर्मे॥धान्यानामुत्तमंदानंसंप्रोक्तंमुनिपुंगवाः॥धान्येभ्यो
ऽप्युत्तमंदानंरक्तशालेःप्रकीर्तितं॥षाष्टिकान्नप्रदानेनलोकंनैर्ऋतिकंलभेत्॥अन्येषांत्रिविधान्यानांदाना
त्स्वर्गमवाप्नुयात्॥कृष्णशालिंतथादत्वाअलकायांप्रमोदते॥रक्तशालिंनरोदत्वासूर्यलोकेमहीयते॥द
त्वाशालीन्सुगंधाद्यान्गंधर्वैःसहमोदते॥यवप्रदानेननरःशक्रलोकेमहीयते॥तथागोधूमदानेनवसू
नांलोकमाप्नुयात्॥प्रियोभवतिलोकस्यप्रियंगुयःप्रयच्छति॥ददातियस्तुश्यामाकांस्तस्यधीरांतिदेवताः
मुद्गदःशक्रलोकंतुयमलोकंतुमाषदः॥यथेष्टंलोकमाप्नोतितथाविधस्तिलप्रदः॥षाष्टिकान्नप्रदानेन(
लोकंनैर्ऋतिकंलभेत्॥सचीनवरणकंदत्वावारुणंलोकमाप्नुयात्॥वायव्यंचमसूराणिराजमाषाणि
धानदं॥सर्वेषांशूकधान्यानांप्रदानेनिरतोनरः॥स्वर्गलोकमवाप्नोतिनात्रकार्याविचारणा॥आग्नेये॥

॥राम॥
॥२८०॥

शाकं विभवतो दत्वा नराः स्वर्यांति धार्मिणः ॥ अथोदकदानं ॥ सलिलं यः प्रयच्छेत जीवानां प्राणधारणं ॥ शीत
लं ग्रीष्मकाले तु तस्य पुण्यफलं शृणु ॥ कपिलाकोटिदानस्य यत्पुण्यं हि विधीयते ॥ तत्पुण्यफलमाप्नोति पा
नीयं यः प्रयच्छति ॥ पानीयदानं परमं सर्वदानाधिकं स्मृतं ॥ तस्मात्पानीयमानीय देयं धर्मविदा सदा ॥
व्यासः ॥ दुर्लभं सलिलं दानं विशेषेण परं च वै ॥ पानीयस्यापि दानेन तृप्तिर्भवति शाश्वती ॥ भविष्ये ॥ पानीयं
प्राणिनां प्राणरक्षणं किन्न दीयते ॥ सर्वेषामेव दानानामेतद्देवाधिकं यतः ॥ पद्मपुराणे ॥ सुगंधाशीत
लाश्चापो रसैर्दिव्यैः समन्विताः ॥ यः प्रयच्छति विप्रेभ्यस्तस्य दानफलं शृणु ॥ विमानं सूर्यसंकाशं अप्सरोग
णासेवितं ॥ सोधिरुह्य दिवं याति वरुणस्य सलोकतां ॥ नंदिपुराणे ॥ योपि कश्चित्तृषार्ताय जलपानं प्रय
च्छति ॥ सनित्यतृप्तो वसति स्वर्गे युगशतं नरः ॥ हेमाद्रौ ॥ अथान्यमपि वक्ष्यामि जलदानविधिं परं ॥ वसं
तसमयं ज्ञात्वा गत्वा देवालयं परं ॥ यत्र स्थापयेच्छिवलिंगमार्षं वा देवपूजितं ॥ तस्य गर्भगृहं तस्योपघटं तोये

॥ दा·वि ॥
॥ २७१ ॥

नसंभ्रमं ॥ कर्पूरसुरभिगंधैश्च वासितं वस्त्रगालितं ॥ स्नवेन्नच दिवा रात्रौ न जलं लिंगमूर्द्धनि· ॥ एवं यः कारयेत्कुं
भं श्रद्धाभक्तिसमाधिनं ॥ शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः ॥ अनेन विधिना कृत्वा नरो मासचतुष्टयं·
ततः कर्कटके प्राप्ते शिवं पंचामृतेन तु ॥ संस्नाप्य पूजयेद्देवं नैवेद्यैश्च मनोरमैः ॥ प्रणिपत्य महेशानं मंत्रमेत
मुदीरयेत् ॥ ॐ नमः शंकरः शंभुर्भवो धाता शिवो हरः ॥ प्रीयतां मे महादेवो जलकुंभप्रदानतः ॥ ततआगम्य
स्वगृहं शैवान्विप्रांश्च भोजयेत् ॥ एवं यः कुरुते ग्रीष्मे जलदानक्रियां हरेः ॥ यावदिंद्रनि लिंगस्य यतिना॰
निनसंशयः ॥ सर्वसेव्यां करे लोकेन्नावत्कोटिं नरेश्वरः ॥ अथ प्रपादानं लैंगे ॥ ग्रामे वा नगरे वापि मार्गे
वातोपवर्जिते ॥ यः प्रपां कारयेद्रम्यां सपुण्यां गतिमाप्नुयात् ॥ विष्णुधर्मे ॥ प्रपां पथि शुभां कृत्वा नाकलोके
महीयते ॥ प्रपास्थानं शुभं कृत्वा सर्वपापैः प्रमुच्यते ॥ रज्जुं दत्वा प्रपास्थाने गोदो भवति मानवः ॥ वारिधा
नीं तथा दत्वा तदेव फलमाप्नुयात् ॥ कुंभप्रदानाद्भवति सदा पूर्णमनोरथः ॥ प्रपापालं तथा कृत्वा पुरुषं·

॥ राम ॥
॥ २७१ ॥

परिचारकं ॥ सर्वकामसमृद्धः सन्नयज्ञस्य फलंलभेत् ॥ शय्याश्च विविधाः कृत्वाशयायामासनानि च ॥ स्वर्गे
लोकमवाप्नोति मानुष्यस्थानमेव च ॥ कृत्वानि दानशारयां प्रपास्थानमनोहरं ॥ सुरम्यं लोकमाप्नोति वसनांना
त्र संशयः ॥ ॥ अथ मणिकदानं ॥ देवलः ॥ ग्रीष्मप्रवेशे मणिकं द्ददाति द्विजसत्तम ॥ योऽपृविनमाप्नोति सत्र
गगकृतंफलं ॥ विशेषं धर्ममीप्सता ॥ दानं नैनप्रकर्तव्यं मणिकस्य युधिष्ठिर ॥ वैशाखस्य तृतीयायां पौर्णमा
स्यां विशेषतः ॥ वसंते ग्रीष्मकाले च मणिकं च प्रदीयते ॥ चत्वारिंशद्घटैः श्रेष्ठं त्रिंशद्भिर्मध्यमं स्मृतं ॥ विंशमा
कन्यसं प्रोक्तमतो हीनं न कारयेत् ॥ जलपूर्णां नतः कुर्यात्स हिरण्यं स्वशक्तितः ॥ भुक्तचंदनदिग्धांगं पुष्प
दामोपशोभितं ॥ वासोभिः संपरिछाद्य सत्रभांडकृतोपरि ॥ न्यस्योपविन्यसेदेवं वरुणां हेमनिर्मितं ॥ सद
क्षिणां तु विप्राय दद्यात्संचिंत्य केशवं ॥ आपो नारा इति प्रोक्ता आदित्य वरुणोयमः ॥ मणिकं पृथिवी सर्वा
दातुः शांतिं प्रयछन्तु ॥ पूजामंत्रः ॥ ॐ आपः पवित्रं लोकानाम स्मुशेतेजनार्दन ॥ मणिकाम्भुप्रदानेन प्रीय

॥ दा॰वि ॥
॥२७२॥

तांजलशायिकः॥ दानमंत्रः॥ अनेनविधिनादत्वामणिकंद्विजपुंगवे॥ दानायत्फलमाप्नोतिश्रृणुष्वनरोत्त
म॥ वियोगोनैवनस्यासीत्पुत्रभ्रातृधनेषुच॥ गृहसंभारवैकल्यंनप्राप्नोतिनरःक्वचित्॥ यास्त्रीददातिम
णिकंनस्यशृणुफलंशृणु॥ अपुत्रालभतेपुत्रंदुर्भगासुभगाभवेत्॥ विधवासप्तजन्मानिनजायेतमणि
कप्रदा॥ गृहदानंफलंप्राप्यविष्णुलोकेमहीयते॥ अश्वयुज्यांनवम्यांचभुक्त्वायांभरतर्षभ॥ सरूत्पुष्पके
ष्विखेआखंडलपुरेवसेत्॥ इतिमणिदानं॥ अथवापीदानं॥ हेमाद्रौदेवीपुराणे॥ योवापीमग्निसाक्षेण
विधिवत्संनियादयेत्॥ कोटीषूदककुंभस्याश्वमेधानचाष्टया॥ चतुरश्वतुरंतातुतेनदत्तामहीभ
वेत्॥ अथकूपदानंतत्रैवस्कांदे॥ अवटंयोनरःकुर्याद्दयापूर्णंसुशोभनं॥ दद्याद्ब्राह्मणेभ्यस्तंपूजयि
त्वायथाविधि॥ त्रिभिःपताकाभिर्दलंकृतंदान्तुपितृन्स्ता ~ नेपश्चात्तंवदत्वानरोत्तमः॥ यान्याम्नरः?गी
तेनवरुणस्यसत्वोकतां॥ अथतांबूलदानं॥ मदनरत्ने॥ तांबूलमुज्वलंदद्याद्विप्रेभ्यःसमाहितः॥ द्वि

॥ दान ॥
॥२७२॥

वायकेशवायाथनागलोकेसपूज्यते ॥ स्कांदे ॥ तांबूलंब्राह्मणेन्द्राययोदत्वाग्रक्षुभक्षयेत् ॥ सुरूपोभग-
वान्दक्षोभवेज्जन्मनिजन्मनि ॥ पूगंब्रह्माहरिःपत्रंचूर्णंदेवोमहेश्वरः ॥ एतेषांसंप्रदानेनवर्द्धतेनाभयसंप-
दः ॥ तांबूलंश्रीकरंभद्रंब्रह्मविष्णुशिवात्मकं ॥ अस्यप्रदानाद्ब्रह्माद्याःप्रियंयच्छंतुपुष्कलं ॥ अथतांबूलोद्याप-
नं ॥ अगस्तिरुवाच ॥ तांबूलदानमाहात्म्यंकथस्वममप्रभो ॥ उद्यापनविधिंतस्यसर्वकामार्थसिद्धये ॥ स्कं-
दउवाच ॥ सर्वेषामेवदानानांतांबूलंचोत्तमंस्मृतं ॥ अन्नदोदीर्घमायुष्यंसोमनस्यंचपुष्यदः ॥ सौभाग्यंचंद-
नादिभ्योनैर्मल्यंचभविष्यति ॥ एतत्त्वंतुस्वयंब्रह्मन्तांबूलाद्धिभवेन्नरः ॥ क्षुत्पिपासाहरंस्वादुसगंधनिर्मलं
स्मृतं ॥ द्वात्रिंशत्पत्रकैर्युक्तंपुंगीफलसमन्वितं ॥ एलालवंगकर्पूरैर्युतंतांबूलमुच्यते ॥ यथालाभंभवे-
द्वापिदेयंद्विजवरायच ॥ द्विजाभावेपुरंध्रीभ्यस्तदभावेकुमारिका ॥ उद्यापनंचकर्त्तव्यंयथाविभवसा-
रतः ॥ शुद्धेहिमासेकर्त्तव्यंचाशक्तौवैवाहिकेतथा ॥ सप्तमंचत्रयोविप्रास्तत्पत्नीकांश्चपूजयेत् ॥ पूर्वेद्युरा

॥ दा·वि ॥ त्रैसेपूज्यलक्ष्मीनारायणावुभौ ॥ उमामहेश्वरौपूज्यौसतिब्रलणामेवच ॥ रतिंचमंचवासांवस्त्राद–पू
॥ २७३ ॥ जयेत्ततः ॥ अग्निंसिद्धिंवि–रजंलोकपांश्चपूजयेत् ॥ वर्तुलेष्टदलेकृत्वापूजयेत्स्थंडिलेशुभे ॥ स्वस्ति
केनसमायुक्तेनोरणाघेकुदीयकैः ॥ तांवूलोपस्कारास्तु–स्थापयाश्चानरदेशतः ॥ पर्णस्थापनपात्रंचचू
र्णपात्रंतथैवच ॥ स्वर्णारौप्यताम्रमयीलोहीवापूगभंजिका ॥ तेषांपूजांप्रकर्त्तव्यागंधपुष्पादिभिस्स
त्या ॥ पौरुषेणैवसूक्तेनपूजाहोमोप्रकल्पयेत् ॥ अन्येगुरग्निसंस्थाप्यहोमंकुर्याद्विधानतः ॥ सहस्रशी
र्षामंत्रेणप्रत्यृचंजुहुयाद्धृतं ॥ अष्टविंशतिरष्टौवाजुहुयात्त्वयथाविधिः ॥ पूर्णाहुतिंततःकुर्याद्ब्राह्म
णान्पूजयेत्ततः ॥ एवंकृतेविधानेतुव्रतंपूर्णंभवेदिह ॥ अथशय्यादानंमहाभारते ॥ शय्यामास्तरणो ॥ राम ॥
पेतांसुप्रछादनसंयुतां ॥ प्रदद्याप्रकृतिविप्रायभृगुनसापियम्फलम् ॥ सुरूपःसुभगःश्रीमान्स्त्रीसह ॥ २७३ ॥
स्त्राभिसंयुतः ॥ दशवर्षसहस्राणिस्वर्गलोकेमहीयते ॥ विधिर्भविविष्णोत्तरे ॥ शय्यादानंप्रवक्ष्यामितु

भ्यं यां डुकुलो घट् ॥ अनित्यं जीवितं यस्मात्पश्चात्कोन्यः प्रदास्यति ॥ तस्मात्स्वयं प्रदातव्या शय्या भोज्यजलादिकं
तस्मात्स्त्र्यां समासाद्य सारदारुमयीं दृढां ॥ दंतपत्रवितानां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलीप्रतिच्छन्नां शुभगं
डोपधानिकां ॥ प्रच्छादनपटीयुक्तां गंधधूपाधिवासितां ॥ तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं ॥ ऊर्ध्व
र्धकेघृतभृतं कलशं परिकल्पयेत् ॥ तांबूलकुंकुमक्षोदकर्पूरागरुचंदनं ॥ पार्श्वेषु स्थापयेद्भक्त्या सप्तधा
न्यानि चैव हि ॥ शयनस्थस्य भवति यच्चान्यदुपकारकं ॥ भृंगारकरकादर्शं पंचवर्णवितानकं ॥ शय्यामेवं
विधां कृत्वा ब्राह्मणाय प्रपादयेत् ॥ सपत्नीकाय संपूज्य विधाय विधिपूर्वकं ॥ मंत्रोवक्ष्यते ॥ दत्वैवं तस्य सफलं प्र
णिपत्य विसर्जयेत् ॥ स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा ॥ सुखं वसत्यसौ जंतुः शय्यादानप्रभावतः ॥ आभूत
संप्लवं यावत्तिष्ठत्यातंकवर्जितः ॥ मृतशय्याप्रदानमपि तच्चैव ॥ एकादशाहेपि तथा विधिरेष प्रकीर्तितः ॥ वि
शेषं चात्र राजेंद्र कथ्यमानं निशामय ॥ तेनोपभुक्तं यत्किंचित्पूर्वं तत्सगृहे स्थितं ॥ तज्ञात्वा तत्रं च तथा वस्त्रवा

हृनभोजनं॥यद्यदिष्टंचतस्यान्नंसर्वंयपरिकल्पयेत्॥तमेवपुरुषंहैमंतस्यांसंस्थापयेत्तदा॥पूजयि
त्वाथदानवाक्यमन्त्राभ्यांयथोदिता॥मृतशय्यायांविधेयःशुभे॥सूतकान्तेद्वितीयेह्निशय्यांदद्यात्सदक्षि
णां॥कांचनंपुरुषंतत्फलवस्त्रसमन्वितं॥संपूज्यद्विजदांपत्यंनानाभरणभूषितं॥उपवेश्यतुशय्या
यांमधुपर्कंततोददेत्॥रजतस्यतुपात्रेणदधिदुग्धसमन्वितं॥अस्थिललाटिकंगृह्यसूक्ष्मंकृत्वासपाय
सं॥भोजयेद्विजदांपत्यंविधिरेषसनातनः॥एकादशाहेत्वन्यदपिदानमुक्तंदेवजानीयेगारुडे॥यदानि
सर्ववस्तूनिवीरिष्टानित्र्ययोदश॥योददातिमृतस्येहजीवतोप्यात्महेतवे॥सुखीभूत्वामहामार्गेवैतनेयंस
गच्छति॥पदत्रक्षणंतत्रैव॥आसनोपानहौच्छत्रंमुद्रिकांचकमंडलुः॥भाजनंभोजनाधारोवस्त्राण्यष्ट
विधंपदं॥पदत्रानांगभूतमुक्तंतत्रैव॥भाजनासनदानेनमुद्रिकाभोजनेनच॥आज्ययज्ञोपवीतेनपदं
संपूर्णतांव्रजेत्॥तथा॥महिषीरथगोदानात्सुखीभवतिनिश्चितं॥चतुर्दशोपदानान्युक्तानितत्रैव.॥

अन्नंचैवोदकंचैवयानहोत्रकमंडलुः॥छत्रंवस्त्रंतथायष्टिंलोहदंडंतथाश्मं॥अग्नीष्टकांवदीयंचनिला
नांबूलमेवचं॥चंदनंउपदानंचोपदानानिचतुर्दशेति॥अथशय्यादानप्रयोगः॥देशकालौसंकीर्त्यम
मस्यरूपत्वसौभाग्यसहस्रीसंघसमाहृतनदशासहस्रावछिन्नस्वर्गलोकेमहितत्वकामःशय्यादानमहंक
रिष्यइतिसंकल्प॥पात्रंहृत्वासंपूज्योक्तोपस्करसहितायांशय्यायांलक्ष्मीनारायणप्रतिमांसंपूज्यशिरःप्र
देशेघृतपूर्णकुंभंपार्श्वतःसप्तधान्यानिनिधायपूर्वोक्तंफलमुद्दश्यइमांशय्यांसारदारुमयींतूलीकोत्तरच्छद
प्रछन्नांलक्ष्मीनारायणयुक्तांघृतकुंभयुक्तांसप्तधान्यान्वितांतांबूलकर्पूरकुंकुमागरुचंदनदीपिकोपा
नच्छत्रचामरासनभोजनभाजनयुक्तांशय्यांदानुमहमुत्सृजेइतिसंकल्प॥यस्मादशून्यंशयनंकेशव
स्यशिवस्यच॥शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनीतिमंत्रंपूर्वोक्तमंत्रदयान्यनवांपठेत्॥न
नोपथाशक्तिदक्षिणांदद्यात्॥प्रतिग्रहीतास्वस्तीत्युक्त्वादानस्तुतिंपठेत्॥ततसंकरेधृत्वाशय्यायामुप

वेशयेत् ॥ येन शय्याप्रदानेन तुष्येत प्रतिमापूजेति विशेषः ॥ इति शय्यादानप्रयोगो गागाभट्टकृतः ॥ अथायुधा
दिदानानि ॥ मनुः ॥ आयुधानां प्रदानेन नरः शर्म समवाप्नुयात् ॥ क्षेमप्रकाशे ॥ दत्वा निस्त्रिंशकान्तु खड्गान्
शत्रुभिर्नाभिभूयते ॥ विष्णुधर्मे ॥ दर्पणस्य प्रदानेन रूपवान्दर्पवान्भवेत् ॥ मार्कण्डेये ॥ दर्पणं यो नरो
दद्यान्निर्मलं वा द्विजातये ॥ स वंडलोकमासाद्य मोदते शरदां शतं ॥ भविष्ये ॥ तालवृंतं द्विजेभ्यस्तु यः प्र
यच्छति भक्तितः ॥ स दिव्यभोगसंयुक्तमरोगः सर्वदाश्नुते ॥ भारते ॥ यस्तु भक्त्या द्विजाग्र्येभ्यो दद्याच्चामरमु
ज्ज्वलं ॥ स प्रपन्नमवाप्नोति सकले वनिमंडले ॥ वायवीये ॥ चामरं चामरेशाय यः शिवाय निवेदयेत् ॥
स सर्वकामसंपूर्णः स्वर्गलोके तनले वसेत् ॥ मायूरं चामरं यो पि शिवाय विनिवेदयेत् ॥ विमानवरमा
रूढो वीज्यते प्सरसां गणैः ॥ प्रदद्याच्चामरं यस्तु श्रद्धया विष्णवे नरः ॥ परं पदमवाप्नोति यत्सुरैरपि दुर्लभं ॥
नोदणराणो ॥ यो गीतवाद्यं दद्यात्तु ब्राह्मणाय सुबुद्धिमान् ॥ स गंधर्वपुरं गच्छेद्वसेत्तत्र युगत्रयं ॥ देव

तापनने यस्तु ब्राह्मणानां गृहेपि वा ॥ गायन् गीतं सुमधुरं गंधर्वाणां पुरे वसेत् ॥ देवतायै द्विजाग्रे वा यो नि
त्यं नृत्यमाचरेत् ॥ विनोदयति तं स्वर्गे नित्यमप्सरसां गणः ॥ योगीनवाद्यनृत्यानि मूल्यं दत्वा तु कारयेत्
सशक्त भवने नित्यं घ्वावदाभूतसंप्लवं ॥ यो वा पितुः स्ववाद्येन विनोदयति देवतां ॥ सधौतकल्मषमलः
स्वर्गयाति न संशयः ॥ स्त्रीयैः परकृतैर्वापि यः स्तोत्रैः स्तौति देवतां ॥ न स पुण्यवतः पुण्यमगण्यं केन वर्ण्य
ते ॥ अथ छत्रोपानत्पादुकादानं ॥ तत्फलश्रुतिः ॥ असिपत्रवनं मार्गं क्षुरधारासमन्वितं ॥ तीक्ष्णातपं च तर
ति छत्रोपानत्प्रदो नरः ॥ भारते ॥ ब्राह्मणाय सुशीलाय यो दद्यात्काष्ठपादुके ॥ सवाहनेन दिव्येन दिवं ग(
च्छ)ति भोगवान् ॥ अत्रिः श्राद्धकाले च यो दद्याद्भोजनं च उपानहौ ॥ तस्यैव विपुलं पुण्यमश्वदानफलं लभे
त् ॥ अथाग्निष्टकादानं भविष्योत्तरे ॥ आदौ मार्गशिरे मासि शोभने दिवसे शुभां ॥ अग्निष्टिकां कारयित्वा
सुखासीनवतीं दत्वा ॥ ततः प्रज्वालयेदग्निं तूलावा हविभिः क्रमात् ॥ ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्या

त्वदक्षिणां ॥ अनेनविधिनाकृत्वाप्रग्रहंज्वालयेन्नरः ॥ षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ॥ अर्चि
तोनंतसंतुष्टोब्रह्मलोकेमहीयते ॥ इहलोकेधनीराजाचतुर्वेदोद्विजोभवेत् ॥ अपरिमितकालभोग्यब्र
ह्मलोकप्राप्तिसर्वार्थसंपन्नचतुर्वेदब्राह्मणत्वकामोहमिमंनंदिशिरखंज्ञातुद्वयंयावत्सर्वकालंवाय
थाशक्त्यंसर्वसत्वप्रजापतनार्थमिमामग्निष्टिकांविष्णुदैवतामहंज्वालयामीतिसंकल्पः ॥ कात्यायनः ॥ इंधना
निचयोदद्याद्विजेभ्यःशिशिरागमे ॥ नित्यंजयतिसंग्रामेश्रियायुक्तश्चदीप्यते ॥ अथाभ्यंगदानं ॥ तैलेनाभ्य
भ्यंगंधेनदत्वाभ्यंगंद्विजातये ॥ विरुक्षशुभवर्णौनस्नायकोसेनवारिणा ॥ प्राप्नोतिचंद्रसालोक्यंयाव
दाभूतसंप्लवं ॥ यस्तुयज्ञादितैलेनद्विजंवाकेशवंशिवं ॥ संस्नापयतिपुण्यात्माकिंनस्याद्बहुभिर्मखैः
शुभगंधेनतैलेनशाल्मलीगोघृतेनवा ॥ नितंतैलेनवालोकेगंधर्वाणांसमोदते ॥ अथयष्टिदानं ॥ ब्र
ह्मवैवर्ते ॥ येप्रयच्छंतियात्राभ्योदीनेभ्योपिदयालवः ॥ यष्टिदानंप्रकुर्वंतिनीरोगास्तेनसंशयः ॥ यष्टिं

ह्रस्वायपयोदद्यान्नुरूपस्कंदयान्वितः ॥ सदाश्रयोमवेन्नित्यं गतभीः स्वर्गमाप्नुयात् ॥ अथपद्मादिवयनं ॥ ब्र
ह्मचारियतिभ्यश्चवयनंयस्तुकारयेत् ॥ नखकर्मशिकुर्वाणश्चशुष्मान्जायतेनरः ॥ यस्तुसर्वजनार्थाय
केशश्मश्रुनखादिकीं ॥ क्रियासमुद्दिश्यप्रतितिनापिनायपयच्छति ॥ सवसेपाप्विनेलोकेवीतशोकः शमं
समाः ॥ अथतरुदानं ॥ आदित्यपुराणे ॥ पक्कान्ददानिकेदारान्सफलांश्चैवपादपान् ॥ षष्ठिकोटिसहस्रा
णिअर्बुदानांचवैत्रयं ॥ क्रीडतिनेभ्वेतपुरेवर्षाणांजु द्विजोत्तय ॥ विमुच्यते ॥ आम्रवृक्षप्रदानेनसर्वा(
न्कामानवाप्नुयात् ॥ वीजपूरकदानेनसौभाग्यंमहदाप्नुयात् ॥ चंपकोमल्लिकाजातीश्रेष्ठाःपुष्पकराम
ताः ॥ अन्येभ्योधिकमाप्नोतिदत्वैतान्फलमीप्सितं ॥ गुल्मप्रपप्रदंयस्तुलतांवासंप्रयच्छति ॥ विमानेनं द
नेसोथक्रीडनप्सरसांगणैः ॥ भारते ॥ सहकारद्रुमंदत्वाकिन्नरैःसहमोदते ॥ यानिदत्वाद्विजेजंवूमंचि
कायाःसतोकतां ॥ वारुणानालिकेरेणाखर्जूरेणावनंनंदंपूगीद्रुमप्रदानेनलोकंसारस्वतंव्रजेत् ॥ या

॥दा॰वि॥
॥२७८॥

निवंज्ञमसोलोकंदत्वायनसभूरुहं॥विंवाम्रदाननोयानिरुचिरंलोकमाभ्विनं॥कपित्थंदाडिमाम्रानक
दत्वामलकीनरुत्॥दत्वानक्षत्रलोकेषुसुखमश्नातिमानवः॥अन्येषामपिसर्वेषांसुमनःफलशाखिनां
प्रदानाद्देनरायांतिपरमैश्वर्यसंपदं॥अनेकवर्षावछिन्नश्चेनपराधिकरणाकीनवासकामइतिह्व
क्षसामान्येसंकल्पः॥नत्त्रवृक्षेनतन्फलोद्देश्यइति॥मंत्राः॥पित्तकृतकर्मविपाकेज्ञेयाः॥अथपाथेय
वारः॥गारुडे॥पांथंपरिश्रमेधर्मश्रयनासनभोजनैः॥सम्यक्पेनपयासेनभजनिष्कृतयाजिनं॥प्र
निश्रयंश्रुनिर्वानंभुविभूमिनलंभुभं॥आश्वनीनायसंपाद्यसघोरहतिपानकं॥वर्षासुमूलभवने
हेमंतेशिशिरेषुच॥ग्रीष्मेचशीतलतलेयांथंविश्रामयनार्तिभाक्॥दत्वावासोविवस्त्रायरोगिणोरुक्
प्रतिक्रियां॥तृषार्त्तायजलंदत्वानिष्कमन्नंबभुक्षिते॥पथिकाययथावित्तंसर्वंतरतिदुःकृतं॥अश्व
न्यमनुनाश्यापिशाकमूलफलैर्जलैः॥सत्कृत्सत्कृत्यवाचापिश्रेयसोभाजनंभवेत्॥तथाअभावेतत्॥

॥राम॥
॥२७७॥

अश्व- पत्रैर्धनफलानि च ॥ दत्त्वा --- ॥ विष्णुधर्मे ॥ उद्यानश्रांच वृक्षेणाश्रांनं संयोज्यमानवं ॥ संस्था(
प्य शुभदेशेतु क्षणाद्वहुफलं लभेत् ॥ नथाम्लेन च वाहमरभारं विवक्षणः ॥ अश्वमेधस्य यज्ञस्य फलं द
शगुणं लभेत् ॥ चौरेभ्यो रक्षणं कृत्वा शक्रलोके महीयते ॥ स्कांदे ॥ यस्तु मार्गपरिश्रांतं द्विजानीयायक
खिन्नेनाप्यजपेत्त्वाज्ञः स स्वर्गो याद्दहनेचिरं ॥ नंदिपुराणे ॥ पादाभ्यंगं तु यो दद्यात्तथा पथपरिखेदिने ॥ स
शुभाभरणैः पादैर्वंदिभिर्नित्यवंदितः ॥ भवेन्नृपो महाभागो मंडलेशानयोजने ॥ संवाद्याध्वपरिश्रांतं
पादाभ्यंगादिना नरः ॥ धर्मस्य परमारोति सर्वकामगुणोज्वले ॥ दत्त्वा वारि स संस्पर्शी पादाभ्यंगं द्विजान(
ये ॥ उच्छिष्टमार्जनाद्यापि गोदानफलमश्नुते भविष्ये ॥ ब्राह्मणास्य तु यो भक्त्या पादौ प्रक्षालयाक्रिनः ॥ स
नैयेभ्यं जयेत्तो स विष्णुलोके महीयते ॥ अथाभयदानं ॥ भूताभयप्रदानेन सर्वान्कामानवाप्नुयात् ॥ दी
र्घमायुश्च लभते स सदा स्तुखिनो भवेत् ॥ रामायणे ॥ ------- दीनं यावंतमपराधिनं ॥ न ह(

स्यात्कुरूणां धान्यं समानां धर्ममनुस्मरन्॥ ॥इति श्रीमन्नारायणभट्टसूरिसुतश्रीमद्रामकृष्णभट्टात्म
जदिनकरभट्टसूनुविश्वेश्वरापरनामकगागाभट्टविरचिते दानोद्योते सर्वोपस्करदानविधिः॥ ॥दाना
नि सर्वाण्यभिधाय तेषां प्रतिग्रहेभ्यः क्रमतोऽभिधास्ये॥ यथाधियाभाविनयाथषड्हानिः प्रतिग्रहे साधुज
नस्य नस्यात्॥ नत्वमेषीदानप्रकरणे॥ दुष्टप्रतिग्रहदुष्टो विप्रो भवति पातकी॥ नाभिभाषेन्नतो दृष्वात
न्मुखं नावलोकयेदित्यादिभविष्योत्तरोक्तेर्दुष्टप्रतिग्रहनिषेधः स्पष्टः॥ प्रतिग्रहस्य दुष्टत्वं चतुर्धा॥ पा
त्रकालदेशद्रव्यप्रतिग्राह्यदोषभेदात्॥ चाण्डालत्वयतित्वादयः पात्रदोषाः १ कुरुक्षेत्रत्वादयो देशदोषाः
२॥ ग्रहणत्वादयः कालदोषाः ३॥ उभयतोमुखीत्वमहिषीत्वादयो द्रव्यदोषाः ४॥ इति न त्वेवं न निषेधो
क्तरास्मृतौ॥ परमापद्गतेनापि अन्त्यजानि प्रतिग्रहः॥ न कार्यो ब्राह्मणेनेह आत्मनः श्रेयमिच्छता॥ प्र
तिग्रहश्चान्त्यजानां पतितं त्वं प्रजायमर्हति॥ अन्त्यजा नाह मनुः॥ रजकश्चर्मकश्चैव नटो बुरुड एव च

कैवर्त्तभेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥ चाण्डालानां ह्यासः ॥ ब्राह्मणं भुञ्जाति नश्चाण्डालो धर्मवर्जितः
कुमारीसंभवस्त्वेकः सगोत्रायां द्वितीयकः ॥ ब्राह्मण्यां भुञ्जाति नश्चाण्डालस्त्रिविधः स्मृतः ॥ तथा ॥ कुरु
क्षेत्रप्रतिग्राहीनमूल्यः पुरुषो भवेत् ॥ गायत्रीमनुजपेन सप्तलक्षं भवेच्छुचिः ॥ कालदेयदोषभिन्नोस
त्प्रतिग्रहनिषेधस्तत्रासत्प्रतिग्रहप्रायश्चित्तं कथ्यते न स्मृतः ॥ सर्वासत्प्रतिग्रहे प्रायश्चित्तं षट्त्रिंशन्मते
देव्या लक्षजपेनैव शुध्यन्ते ऽसत्प्रतिग्रहादिति ॥ यज्ञयाज्ञवल्क्यः ॥ गोष्ठे वसन्ब्रह्मचारी मासमेकं पयो
व्रतं ॥ सावित्रीजाप्यनिरतः शुध्यते ऽसत्प्रतिग्रहात् ॥ जपसंख्याः जपित्वा त्रीणि सावित्र्याः सहस्राणि
समाहित इति मनूक्ता ॥ न ह्विविप्रकारेण प्रतिग्रहस्यास्त्वं विषयं ॥ नेनयानिनादिभ्यो ऽपदेशका
तयोरपि ष्ट्रव्यप्रतिग्रहे षट्त्रिंशन्मतोक्तं दशप्राजापत्यरूपं ॥ यानि नादिभ्यो महिष्यादिप्रतिग्रहे याज्ञ
वल्क्योक्तमिति विज्ञानेश्वरः ॥ स्मृत्यर्थसारे ॥ सर्वेषामुक्तो दानदेशकालद्रव्येष्वप्यनुक्तेष्वपि द्वादश

॥ प्रा.वि ॥
॥२७९॥

निष्क्रमणाण्जप्रप्रतिग्रहे कार्यं ॥ एवं सर्वत्र द्रव्यानुसारात्प्रायश्चित्तं ह्यद्विह्यसौ कल्प्यो ॥ दानदेशकालद्र
व्येष्वन्यतरदोषेष्वेकैकगुणाहृद्धिः ॥ मणिवासोगवादीनामन्यतरप्रतिग्रहे गायत्र्यष्टसहस्रजपः ॥ भिक्षा
दिप्रतिग्रहेषु रापमंत्रोच्चारणं ॥ नत्वप्रतिग्रहस्यानिषिद्धत्वात्कथं तत्र प्रायश्चित्तविधिरिति वाच्यं ॥ प्र
तिग्रहे लब्धविप्राणां ब्राह्मंतेजः प्रहीयत इति अरुणास्मृत्याप्रायश्चित्ताम्नानेनत्वनन्तकथनात् ॥ प्रतिग्रहस्यसम
र्थोपि प्रसंगं तत्र वर्जयेदिति स्पष्टनिषेधसत्वाच्च ॥ प्रायश्चित्तं च प्रतिगृहीतं सर्वद्रव्यं त्यक्त्वैव कार्यं ॥ सति द्र
व्ये प्रायश्चित्ताधिकाराभावादिति स्मृत्यर्थसारादयः ॥ अरुणास्मृतौ तु षष्ठांशपादमात्रं परित्यागो वैक
ल्पिकावुक्तौ ॥ अरुणास्मृतौ प्रतिग्रहस्य षष्ठांशं वाणिज्यात्तृतीयकं ॥ कृषेर्विंशतिमं भागं यज्ञे नो नास्ति
पातकं ॥ प्रतिग्रहः कुत्सितानां त्रिभिः कृच्छ्रैर्विशुध्यति ॥ रथो वाजी च महिषी तिलधेनुर्गजो ३ जिनं ॥ सूप
मानाचसप्तभिर्घोरास सप्तप्रतिग्रहाः ॥ एतेषां प्रतिग्रहे आहिताग्नेः प्राजापत्येष्टिः ॥ स्मार्ताग्निमतश्च कृः॥

॥ राम ॥
॥२७९॥

अनर्घैः कृच्छ्रत्रयं ॥ गुडधेन्वादिधेनूनां प्रायश्चित्तं तथोच्यते ॥ प्रतिग्रहे चरेद्विप्रः प्राजापत्यमतन्द्रितः ॥ जये
द्वापौरुषं सूक्तमप्सु चैवाघमर्षणं ॥ अहोरात्रस्थितश्चैव मुच्यते तेन किल्बिषात् ॥ अयुतं जपसंख्या ॥ गृह
दानं मठदानं नास्ति दानं गृहात्परं ॥ येन दत्तेन दानेन सर्वं दत्तं भवेन्नृणां ॥ गृहोपस्करणं सर्वं गोमहिष्या
दिभूषणं ॥ कुट्टिनी पेषणी चुल्ली घुदकुंभस्तु मार्जनी ॥ शय्यासनं भाजनं छत्रं वितानं रथ्यागोहयं ॥ तत्र कृ
छ्रं चरेद्विप्रो मग्रासं नयनं तथा ॥ ब्राह्मणं वा भोजयेद्विप्रान्गायत्री लक्षमेव च ॥ प्रायश्चित्ते कृते विप्रो मुच्यते
तस्मात्प्रतिग्रहात् ॥ प्रायश्चित्तस्याकरणे तु वैवं म्रियते पुनः ॥ अश्वप्रतिग्रहं कृत्वा चरेच्चान्द्रायणत्रयं ॥ लक्षत्र
यं च गायत्र्या जपेद्विप्रान्समाहितः ॥ त्रिगुणां वा जपेद्दशतं विप्रांश्च भोजयेत् ॥ अश्वस्य विक्रयं कृत्वा से
न देवव्रतं चरेत् ॥ कपिलाविक्रयं कृत्वा चरेच्चान्द्रायणत्रयं ॥ गोशतं गोसहस्रं च क्रमाद्वै नरकीं तथा ॥
च नरस्तेषां वै गावश्च वर्जनीयाः प्रयत्नतः ॥ च नरकः ॥ उत्क्रान्ति कर्ण पापमोक्षधेनवः ॥ गृहीत्वा वै चैव नरपीं

लोहदंडं भयावहं ॥ प्राजापत्यत्रयं कुर्याद्भोजयेच्च शतं द्विजान् ॥ जयेच्छवामदेवं च शिवसंकल्पमेव च ॥ –
–रं वामदेवं च मृत्युंजनेनेन किल्विषात् ॥ यज्ञकर्मणि या धेनुर्दुग्धेन धेनुस्तथैव च ॥ मधुपर्के च या धेनुर्या धे–
नुः कर्मसिद्धये ॥ एतत्स्थानिग्रहे विप्रश्चायश्चित्तं न विद्यते ॥ पर्वतादद्याये प्रोक्तास्तथैव द्विमुखी च गौः ॥ एषां
प्रतिग्रहे विप्रः क्षपेन्मासचतुष्टयं ॥ प्राजापत्येन कृच्छ्रेण यद्वंशानुपरित्यजेत् ॥ जपेद्द्वादशलक्षं वा गायत्र्याः
स्नायभोजने ॥ दानेन मुच्यते पापाद्विप्राणां भोजनेन च ॥ दानभोजनेनेत्यर्थः ॥ गजप्रतिग्रहं कृत्वा द्विजश्चां–
द्रायणत्रयं ॥ महासानयनं वापि ब्रह्मकूर्चसमन्वितं ॥ रथप्रतिग्रहे लक्षं गायत्रीजपमाचरेत् ॥ अयुतं
वार्धगायत्र्याः संगमे स्नानमाचरेत् ॥ षष्ठांशं तु परित्यज्य ब्राह्मणान्भोजयेत्सुधीः ॥ प्रतिगृह्यान्नपाना–
नि प्रायश्चित्तं यथोदितं ॥ जपेन्निरंतरं देवीं वैष्णवं व्रतमाचरेत् ॥ अयुतादि जपसंख्या ॥ विद्यादानं गृही–
त्वापि यत्किंचिन्मुख्यकादिकं ॥ ब्राह्मणान्भोजयेत्कृत्वा कृच्छ्रमेकं समाचरेत् ॥ पृथिवीं प्रतिगृह्याथ सद्यो

लवनकाननां ॥ अपिधातुमयीं गृह्य तन्नं कृच्छ्रत्रयं तथा ॥ भूत्वा त्रिषवणस्नायी क्षेपेन्मासवत्सरं ॥ स्वं स्तु(
च्छ्रिमवाप्नोति द्विजायवांशामुन्मृजत् ॥ इदं च दक्षिणप्रतिग्रहे ॥ न जहेत प्रतिग्रहे तु न दोषः ॥ भूमिं यः प्रति(
गृह्णाति यस्तु भूमिं प्रयच्छति ॥ ताबुभौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ विमुक्तैः ॥ अथ षोडशमहादानेषु
न त्वेव ॥ तुलापुरुषभागं च गृहीत्वा वांइकं चरेत् ॥ हिरण्यगर्भे च तथा ब्रह्मांडे कल्पपादपे ॥ जले त्रिषवणा(
स्नायी चरेन्मासं पनहयं ॥ गोसहस्रप्रतिग्राही यश्च विप्रस्य कामतः ॥ गोमूत्रं यावकाहारो मासेनैकेन शुध्य
ति ॥ हिरण्यकामधेन्वादिदानग्रयणो दितं ॥ महाभूत -- नेष्वपापश्चित्तमथोच्यते ॥ गायत्र्या दशलक्षैश्च
प्राणायामसहस्रकैः ॥ नश्यंते पापसंघाश्च का कथा दुःप्रतिग्रहे ॥ पावमानं च सूक्तं वै सर्वपापनकनाशनं ॥
अत्रायमभिसंधिः ॥ आयुष्यमिति सूक्तेन मणिं कंठे प्रतिमुंच्येत्यादिसूत्रेषु विधानात् ॥ न च च फलापेक्षा(
याखिलानामपि विनियोगदर्शनात् ॥ तेषामपि प्रामाण्यावसायात् ॥ पावमानीजपस्याखिलेषु विधाना

न्त्रत्रफलापेक्षायां गोघ्नमातृपितृवधादिन्यादि मंत्रवर्णैर्ननजन्यानकनाशस्य फलत्वावसायात् ॥ न
नन्यायेषु पापवमानीजपस्य प्रायश्चित्तत्वं ॥ पापानुरोधेन वजपसंख्याकल्पनीयेति दिक् ॥ ॥ श्रीमद्दिन
करसूनोः कृतिरेषा दानगोवत्सम्यक् ॥ विश्वेश्वरस्य सुधियामनः कुरुतां प्रमोदालीम् ॥ ॥ इति श्रीम
त्सकलविद्याविशारदधौरेयमीमांसकवंशावतंसभट्टनारायणात्मजभट्टरामकृष्णसूनुभट्टदिनकरात्
नयगागाभट्टापरनामविश्वेश्वरसूरिनानादिनकरोद्योते सकलदुःखनिग्रहप्रायश्चित्तनिरूपणांश
मासंनम् ॥ ॥ शुभमस्तु ॥ ७ ॥ ग्रन्थसंख्या ६७५० शुभमस्तु शुभम्

